संस्कृतस्वाध्यायः

चतुर्थी दीक्षा - वाङ्मयावगाहनी

श्रीमद्भगवद्गीतासङ्ग्रहः

द्वितीयः भागः

(गीतायाः चतुर्थाध्यायात् एकादशाध्यायपर्यन्तात् भागात् चितानां श्लोकानामाधारेण संरचिता अध्ययनसामग्री)

योऽनूचानः स नो महान्।

राष्ट्रियसंस्कृतसंस्थानम्

राष्ट्रियसंस्कृतसंस्थानम्
मानितविश्वविद्यालयः
नवदेहली

संस्कृतस्वाध्यायः

चतुर्थी दीक्षा - वाङ्मयावगाहनी

श्रीमद्भगवद्गीतासंग्रहः

द्वितीयः भागः

(गीतायाः चतुर्थाध्यायात् एकादशाध्यायपर्यन्तात् भागात् चितानां श्लोकानामाधारेण संरचिता अध्ययनसामग्री)

Śrīmadbhagavadgītāsaṅgrahaḥ

Part - II

(Study material based on seleted shlokas from Chapter 4 to 11 of Gita)

राष्ट्रियसंस्कृतसंस्थानम्

मानितविश्वविद्यालयः

नवदेहली

प्रधानसम्पादकः
राधावल्लभत्रिपाठी, कुलपतिः, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली

अध्ययनसामग्रीलेखकः
आजादमिश्रः, प्राचार्यः, राष्ट्रियसंस्कृतसंस्थानम्, भोपालपरिसरः (म.प्र.)

सम्पादकः
वाई. एस. रमेशः, सहाचार्यः, राष्ट्रियसंस्कृतसंस्थानम्, जयपुरपरिसरः, जयपुरम्

सहसम्पादकौ
तङ्कल्लपल्लि महेन्द्रः, सहायकाचार्यः, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली
प्रफुल्लगडपालः, सहायकाचार्यः, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली

संयोजकः
कू. वेङ्कटेशमूर्तिः, सहायकाचार्यः, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली

निदेशकः, मुक्तस्वाध्यायपीठम्
रमाकान्तपाण्डेयः, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली

प्रथमसंस्करणम् - **2012**
प्रतयः - 1000
ISBN : 978-93-82091-64-6
मूल्यम् : 370/- रूप्यकाणि

प्रकाशकः
के.बी.सुब्बरायुडु
कुलसचिवः
राष्ट्रियसंस्कृतसंस्थानम्
मानितविश्वविद्यालयः
56-57, इन्स्टीट्यूशनल् एरिया,
जनकपुरी, नवदेहली - 1100 058
e-mail : rsks@nda.vsnl.net.in
website : www. sanskrit.nic.in

मुद्रकः
अमर प्रिंटिंग प्रेस
8/25, विजयनगरम्, दिल्ली - 110 009
दूरवाणी - 098716 99565, 8802451208

पुरोवाक्

राष्ट्रियसंस्कृतसंस्थानं संस्कृतभाषाया:, शास्त्राणां च प्रचार-प्रसारकार्ये निरतो विश्वविश्रुतो मानितविश्वविद्यालयो वर्तते। संस्कृतविद्यासम्बद्धानाम् उच्चस्तरीयग्रन्थानां प्रकाशनं संस्थानस्य बहुमुखकार्येषु अन्यतमम् अस्ति। एतेन सहैव संस्कृताध्ययनासक्तानां जनसामान्यानाम् इच्छां पूरयितुम् अपेक्षितायाः अध्ययनसामग्र्याः निर्माणं तत्प्रकाशनं च स्वीयं कर्तव्यं मनुते संस्थानम्। संस्कृतजिज्ञासुभि:, संस्कृतेतरक्षेत्रेषु विद्यालय-महाविद्यालयादिनियमितशिक्षणसंस्थासु संस्कृतम् अध्येतुमशक्तैः समाजस्य विभिन्नक्षेत्रेषु कार्यरतैः संस्कृतानुरागिभिर्वा संस्कृतस्य क्रमिकस्वाध्यायार्थं तादृशसामग्र्याः अपेक्षा क्रियमाणा आसीत्। जिज्ञासूनां तादृशीम् अपेक्षां पूरयितुमेव राष्ट्रियसंस्कृतसंस्थानेन पञ्चसोपानात्मिका भाषाशिक्षणयोजना परिकल्पिता। पञ्चस्तरीयसंस्कृतस्वाध्याय-योजनायामस्यां व्यवहारावतरणीति प्रथमा दीक्षा, व्यवहारावगाहनीति द्वितीया दीक्षा, वाङ्मयावतरणीति तृतीया दीक्षा, वाङ्मयावगाहनीति चतुर्थी दीक्षा, व्युत्पादिनीति पञ्चमी दीक्षा च भवेदिति निश्चित्य प्रथमदीक्षायां पञ्चपुस्तकयुक्तगुच्छ:, द्वितीयदीक्षायां पुस्तकत्रयगुच्छः च प्रकाशित:। तृतीयदीक्षायां संक्षेपरामायणम्, विदुरनीतिशतकम्, श्रीमद्भगवद्गीतासङ्ग्रहः (गीतायाः द्वादशाध्यायात् अष्टादशाध्यायं यावत् सङ्ग्रहः)- इति एतेषां ग्रन्थानां स्वाध्यायानुकूलशैल्या सामग्री प्रकाशिता।

सम्प्रति श्रीमद्भगवद्गीतासङ्ग्रहस्य अपरः भागः चतुर्थदीक्षास्तरे अध्येयग्रन्थत्वेन प्रस्तूयते। अस्मिन् भागे गीतायाः चतुर्थाध्यायात् एकादशाध्यायं यावत् विद्यमानविषयाः सङ्गृहीताः सन्ति। अध्येतृभिः इदमत्र अवश्यमवधेयं यत् प्रकृतग्रन्थे गीतायाः चतुर्थाध्यायात् एकादशाध्यायं यावत् सर्वे श्लोकाः न प्रस्तुताः। तेभ्यः अध्यायेभ्यः श्लोकानां चयनं कृत्वा भाषाकौशलवर्धनदृष्ट्या, विषयसम्बोधदृष्ट्या च अभ्यासान् संयोज्य एषा अध्ययनसामग्री सज्जीकृता। अत्रैवं शङ्का न कार्या यत् 'गीतायाः द्वादशाध्यायात् अष्टादशाध्यायपर्यन्तानां-

कतिपयश्लोकानां सङ्ग्रहात्मिका अध्ययनसामग्री तृतीयदीक्षायां निर्दिष्टा; ततः प्राक्तनाध्यायानां (4 तः 11 अध्यायपर्यन्तानां) श्लोकसङ्ग्रहात्मकः अयं भागः चतुर्थदीक्षायाम् इति क्रमव्यत्ययः कथम्' इति। यतो हि श्लोकानामाधारेण भाषाकौशलानां वर्धनाय रचितानाम् अभ्यासानां प्रस्तुतिशैलीम् अनुसृत्य 'सरलात् कठिनं प्रति' इति नीतिमाश्रित्य अस्माभिः क्रमनिश्चयः कृतः।

श्रीमद्भगवद्गीतासङ्ग्रहस्य पूर्वं प्रकाशित-तृतीयभागस्तु तृतीयदीक्षायां (वाङ्मयावतरण्याम्) अपेक्षितया सरलया रीत्या (पदच्छेदः, प्रश्नोत्तरमाध्यमेन आकाङ्क्षाविस्तरद्वारा अन्वयशिक्षणादिरीत्या वाङ्मयप्रवेशकौशलबोधिन्या शैल्या) रचितः इत्यतः तृतीयदीक्षास्तरीयग्रन्थत्वेन स भागः प्राकाश्यं नीतः।

श्रीमद्भगवद्गीतासङ्ग्रहस्य प्रकाश्यमाने अस्मिन् द्वितीयभागे अभ्यासेषु नावीन्यं प्रौढता च वर्तते। प्रश्नोत्तराभ्यासे क्वचित् क्वचित् श्लोकेषु साक्षादनुक्ताः, किन्तु तात्पर्येण प्रबोधिताः अंशाः प्रश्नस्य विषयीकृताः वर्तन्ते। व्याख्याने भावार्थप्रकाशने च संस्कृतस्य गौरवमयी प्रौढशैली वर्तते। अतः संस्कृतस्य ईषत् प्रौढग्रन्थानाम् अवगमनाय अध्येतुः मनोदशां सज्जीकृत्य कौशलं वर्धयितुं कल्पितायां चतुर्थदीक्षायां स्वाध्यायसामग्र्याः एषः भागः भवतु इति चिन्तितम्।

तृतीयभागः तृतीयदीक्षायां, द्वितीयभागः चतुर्थदीक्षायाम् इति यद्यपि क्रमव्यत्ययः इति भासते तथापि उभयोः भागयोः, भाषाशिक्षणदृष्ट्या गीतायाः पृथक् पृथक् अध्यायेभ्यः संगृहीतश्लोकाः विद्यन्ते इत्यतः अत्र ग्रन्थयोः आनुपूर्व्यक्रमव्यत्ययेऽपि भाषाशिक्षणे नास्ति क्लेश इति विद्वद्भिरभिप्रेतमासीत्।

अध्येतारः विद्वांसश्च एनं ग्रन्थम् अवलोक्य स्वीयम् अभिप्रायं/परामर्शं प्रेषयेयुः येन अस्माभिः ग्रन्थस्यास्य अग्रिमे संस्करणे तदनुसृत्य उचितं परिवर्तनं परिवर्धनं वा कर्तुं शक्येत।

आश्विनशुक्लचतुर्दशी
28.10.2012
नवदेहली

राधावल्लभत्रिपाठी
कुलपतिः

श्लोकानुक्रमणिका

सङ्केतसूची

वचनम्

एक. - एकवचनम्

द्वि. - द्विवचनम्

बहु. - बहुवचनम्

विभक्तिः

प्र. - प्रथमा

द्विती. - द्वितीया

तृ. - तृतीया

चतु. - चतुर्थी

पं. - पञ्चमी

षष्ठी - षष्ठी

सप्त. - सप्तमी

सम्बो.प्र. - सम्बोधनप्रथमा

पुरुषः

प्रपु. - प्रथमपुरुषः

मपु. - मध्यमपुरुषः

उपु. - उत्तमपुरुषः

लिङ्गम्

पु. - पुंलिङ्गः

स्त्री. - स्त्रीलिङ्गः

नपुं. - नपुंसकलिङ्गः

त्रि. - त्रिलिङ्गः

समासः

द्विती. तत्पु. - द्वितीयातत्पुरुषः

तृ. तत्पु. - तृतीयातत्पुरुषः

चतु. तत्पु. - चतुर्थीतत्पुरुषः

पं. तत्पु. - पञ्चमीतत्पुरुषः

षष्ठी तत्पु. - षष्ठीतत्पुरुषः

सप्त. तत्पु. - सप्तमीतत्पुरुषः

नञ् तत्पु. - नञ् तत्पुरुषः

अन्त्यवर्णनिर्देशः

अ. - अकारान्तः

द. - दकारान्तः

एवमेव अन्येषामपि अजन्तानां हलन्तानां च।

अन्यः सङ्केतः

सर्व. - सर्वनामशब्दः

वि. लि. - विधिलिङ्

क्रि. वि. - क्रियाविशेषणम्

वि. - विशेषणम्

समस्तम् - समस्तपदम्

आत्म. - आत्मनेपदी

परस्मै. - परस्मैपदी

उभय. - उभयपदी

श्रीमद्भगवद्गीतासङ्ग्रहः

द्वितीयः भागः

अथ चतुर्थोऽध्यायः

१. श्लोकः

श्रीभगवानुवाच–

बहूनि मे व्यतीतानि जन्मानि तव चार्जुन।
तान्यहं वेद सर्वाणि न त्वं वेत्थ परन्तप।। (भ. गी. ४.५)

लेखनाभ्यासः

(अ) श्लोकपदैः रिक्तस्थानानि पूरयतु–

बहूनि मे .... जन्मानि तव ....।

.... वेद .... न त्वं .... परन्तप।।

(आ) श्लोकपादैः रिक्तस्थानानि पूरयतु–

बहूनि मे व्यतीतानि ....।

.... न त्वं वेत्थ परन्तप।।

पदच्छेदः

बहूनि, मे, व्यतीतानि, जन्मानि, तव, च, अर्जुन।

तानि, अहम्, वेद, सर्वाणि, न, त्वम्, वेत्थ, परम्-तप।।

पदच्छेदाभ्यासः

अधः प्रदत्तानां पदानां पदच्छेदं करोतु–

(i) चार्जुन – .... (ii) तान्यहम् – ....

(iii) परन्तप – ....

पदपरिचयः

पदम्	विश्लेषणम्	पदम्	विश्लेषणम्
बहूनि	बहु–उका. नपुं. प्र. बहु. (वि.)	तानि	तद्–दका. नपुं. द्विती. बहु. (सर्व.)
मे	(मम) अस्मद्–दका. षष्ठी एक. (सर्व)	अहम्	अस्मद्–दका. प्र. एक. (सर्व.)
व्यतीतानि	अका. नपुं. प्र. बहु.	वेद	विद्+लट् उपु. एक. कर्तरि क्रिया
जन्मानि	जन्मन्–नका. नपुं. प्र. बहु. (विशे.)	सर्वाणि	सर्व–अका. नपुं. द्विती. बहु. (सर्व.)
तव	युष्मद्–दका. षष्ठी एक. (सर्व.)	न	अव्ययम्
च	अव्ययम्	त्वम्	युष्मद्–दका. त्रि. प्र. एक. (सर्व.)
अर्जुन	अका. पुं. सम्बो. प्र. एक.	वेत्थ	विद्+लट् मपु. एक. कर्तरि क्रिया
		परन्तप	अका. पुं. सम्बो. प्र. एक. समस्तं कृदन्तम्

वर्गीकरणाभ्यासः

निर्देशानुसारं श्लोकस्य पदानि लिखतु– [आवरणे प्रदत्तसंख्या निर्दिष्टप्रकारकपदानां संख्यां सूचयति]

यथा– प्रथमा–बहुवचनम् (३) इत्यनेन प्रथमाबहुवचनान्तानि त्रीणि पदानि लेखनीयानि
यथा– बहूनि, व्यतीतानि, जन्मानि

(i) प्रथमैकवचनान्तम् (२) ....

(ii) सम्बोधनान्तम् (२) ....

(iii) द्वितीयाबहुवचनान्तम् (२) ....

(iv) षष्ठ्यन्तम् (२) ....

(v) अव्ययम् (२) ....

(vi) क्रियापदम् (२) ....

(vii) सर्वनामपदम् (६) ....

(viii) उकारान्तम् (१) ....

(ix) नकारान्तम् (१) ....

(x) अकारान्तम् (४) ....

(xi) नपुंसकलिङ्गम् (५) ....

(xii) पुंलिङ्गम् (२) ....

आकाङ्क्षाविस्तरः

[आकाङ्क्षाणाम् उत्तरभूतानां पदानां विश्लेषणम् आवरणे प्रदत्तम्। तदाधारेण रिक्तस्थानानि पूरयतु।]

व्यतीतानि।

कानि व्यतीतानि? **जन्मानि** (नका. नपुं. प्र. बहु.)

कति जन्मानि व्यतीतानि? .... (उका. नपुं. प्र. बहु.)

कस्य बहूनि जन्मानि व्यतीतानि .... (अस्मद्-दका. षष्ठी एक. सर्व.)

पुनश्च कस्य बहूनि जन्मानि व्यतीतानि? .... (युष्मद्-दका.षष्ठी एक. सर्व.)

वेद।

कः वेद? .... (अस्मद्-दका. प्र. एक. सर्व.)

अहं किं वेद? .... (अका. नपुं. द्विती. बहु.)

अहं कानि सर्वाणि वेद? .... (तद्-दका. नपुं. द्विती. बहु. सर्व.)

न वेत्थ।

कश्च न वेत्थ? .... (युष्मद्-दका. त्रि. प्र. एक. सर्व.)

इह सम्बोधनपदे के? ....

अन्वयः

परन्तप! अर्जुन! तव मे च बहूनि जन्मानि व्यतीतानि। अहम् तानि सर्वाणि वेद, त्वम् न वेत्थ।

पदार्थः

पदम्	संस्कृतम्	हिन्दी
परन्तप!	शत्रुनाशन!	रिपुदलन!
अर्जुन!	हे पार्थ!	हे अर्जुन!
तव	तव (अर्जुनस्य)	तुम्हारे
मे	मम (भगवतः)	मेरे
च	तथा	और
बहूनि	अनेकानि	बहुत से
जन्मानि	लीलादेहग्रहणानि	जन्म
व्यतीतानि	सञ्जातानि	बीत गये हैं
अहम्	अहं (भगवान्)	मैं
तानि	तानि (जन्मानि)	उन
सर्वाणि	सम्पूर्णानि	सभी
वेद	जानामि	जानता हूँ।
त्वम्	त्वम् (युष्मत्पुरुषः)	तुम
न वेत्थ	न जानासि	नहीं जानते हो

भावार्थः

संस्कृतम् – अर्जुनः भगवन्तं श्रीकृष्णम् असर्वज्ञम् अनित्यं च मत्वा तं पृच्छति। तस्य शङ्कां श्रुत्वा भगवान् वासुदेवः स्वस्य ईश्वरत्वं सर्वजन्म च प्रकटयन् उक्तवान्–"हे अर्जुन! मम तव किं वा जीवमात्रस्य अनेकानि जन्मानि व्यपगतानि। प्राणी नवं नवं देहं धृत्वा पुनः पुनः जायते म्रियते च। जीवेन धृतं शरीरं पुनः पुनः उत्पद्यते ततः कालेन तद् नश्यति चेत्यर्थः। एवं जीवस्य वारं-वारं पुनर्जन्म भवति। किन्तु जीवः स्वपूर्वजन्मानि जन्मान्तरे कदापि न स्मरति, अतः हे परन्तप! त्वमपि स्वस्य सर्वाणि तानि पूर्वजन्मानि न स्मरसि। किन्तु अहं स्वस्य परस्य तव च तानि सर्वाणि पूर्वजन्मानि सम्यक् स्मरामि जानामि च, ईश्वरत्वात् सर्वज्ञत्वाच्च। त्वं तु अर्जुनवृक्षवत् आवृतज्ञानः तथा परं शत्रुं भिन्नं मत्वा हन्तुं प्रवृत्तोऽसि। अत एव त्वं जीवः।" अत एव भगवान् इह श्लोके द्वे सम्बोधनपदे प्रयुक्तवान्– अर्जुन! परन्तप! इति च। अनेन सम्बोधनद्वयेन अज्ञानस्य आवरणविक्षेपशक्तिद्वयं सूचितम्।

हिन्दी – अर्जुन भगवान् श्रीकृष्ण को अपने समान जीव समझकर उनकी उक्ति में शंका करता है कि सर्गादि में उत्पन्न विवस्वान् को आपने इस शरीर से योग की शिक्षा कैसे दी? तथा यदि दूसरे

शरीर से शिक्षा दी तो उस शरीरान्तर की स्मृति आपको कैसे है? जबकि मुझे पूर्वजन्म की स्मृति नहीं है। अर्जुन की इस शंका का समाधान करते हुए भगवान् ने कहा कि मैं ईश्वर और सर्वज्ञ हूँ। अत एव हे अर्जुन! मेरे तथा तुम्हारे अनेक बार जन्म हो चुके हैं। किन्तु हे परन्तप! उन सारे पूर्वजन्मों को तुम नहीं जानते हो, इसके विपरीत मैं अपने, तुम्हारे किं वा सभी जीवों के उन सभी पूर्वजन्मों को भली-भाँति जानता हूँ, क्योंकि मैं ईश्वर और सर्वज्ञ हूँ। तुम जीव और अल्पज्ञ हो, क्योंकि तुम्हारा ज्ञान अर्जुन वृक्ष के समान आवृत है, फलतः तुम शत्रु को भिन्न समझकर उन्हें मारने आये हो। इस श्लोक में अर्जुन! और परन्तप! इन दो सम्बोधन-पदों से भगवान् ने अज्ञान की 'आवरण' और 'विक्षेप' नामक दो शक्तियों को इंगित किया है, जिनसे अर्जुन प्रभावित है।

अवबोधाभ्यासः

प्रश्नानाम् उत्तराणि लिखतु–

(क) श्रीभगवान् कम् उवाच? ....

(ख) अर्जुनस्य शङ्कां लिखतु। ....

(ग) इह श्लोके कति सम्बोधनपदानि सन्ति? ....

....

(घ) सम्बोधनद्वयस्य अभिप्रायं वर्णयतु। ....

....

(ङ) जीवः स्वस्य सर्वाणि पूर्वजन्मानि कथं न जानाति? ....

....

(च) चतुर्थाध्यायस्य प्रारम्भे त्रिषु श्लोकेषु कर्मयोगस्य उपदिष्टां परम्परां लिखतु।

....

व्याकरणाभ्यासः

(अ) सन्धिः

चार्जुन – च + अर्जुन (सवर्णदीर्घसन्धिः)

तान्यहम् – तानि + अहम् (यण्सन्धिः)

अधः प्रदत्तपदानां सन्धिं कृत्वा सन्धेः नाम निर्दिशतु–

(i) च + अस्ति – ....

(ii) न + आयाति – ....

(iii) राम + अर्जुनौ – ....

(iv) कानि + आम्राणि – ....

(v) भानु + अस्तम् – ....

(vi) धातृ + इच्छा – ....

(vii) वि + अतीतानि – ....

(आ) समासः

परन्तप – परं तापयति [पर + तापि + खच् (अ)]
परम् + तप (उपपदसमासः)

अधः कृदन्तेन उपपदसमासनिष्पन्नं पदं लिखतु–

(i) मृत्युं जयति – ....

(ii) धनं जयति – ....

(iii) ललाटं तपति – ....

(इ) 'विद्-ज्ञाने' धातोः लटि क्रियापदेन वाक्यपूर्तिं करोतु–

यथा– हरिः मम गृहं **वेद**।

(१) तौ मम गृहं न ....।

(२) ताः अपि मम गृहं न ....।

(३) त्वं मम गृहं ....।

(४) युवां मे विद्यालयं ....।

(५) यूयं मे गृहमपि ....।

(६) अहं तव पितरं ....।

(७) आवां ते गृहं ....।

(८) वयं ते विद्यालयमपि ....।

(ई) क्रियाकारक-सम्बन्धः

व्यतीतानि	-	कर्तरि क्तान्तं क्रियाबोधकपदम्	वेद	-	कर्तरि क्रियापदम्
			अहम्	-	कर्तृपदम्
जन्मानि	-	कर्तृपदम्	तानि	-	कर्मपदम्
बहूनि	-	विशेषणम्	वेत्थ	-	मध्यमपुरुषस्य क्रियापदम्
तव, मे	-	सम्बन्धबोधकम्	त्वम्	-	कर्तृपदम्

(उ) पर्यायशब्दः

अर्जुनः - पार्थः (अ. पुं.), धनञ्जयः, कौन्तेयः

◆◆◆

२. श्लोकः

यदा यदा हि धर्मस्य ग्लानिर्भवति भारत।
अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम्।। (भ. गी. ४.७)

लेखनाभ्यासः

(अ) श्लोकपदैः रिक्तस्थानानि पूरयतु–

यदा .... हि .... ग्लानिः .... भारत।

.... तदात्मानं ....।।

(आ) श्लोकपादैः रिक्तस्थानं पूरयतु–

यदा यदा हि धर्मस्य ....।

.... तदात्मानं सृजाम्यहम्।।

पदच्छेदः

यदा, यदा, हि, धर्मस्य, ग्लानिः, भवति, भारत।

अभ्युत्थानम्, अधर्मस्य, तदा, आत्मानम्, सृजामि, अहम्।।

पदच्छेदाभ्यासः

अधः प्रदत्तपदानां पदच्छेदं करोतु–

(i) ग्लानिर्भवति .... (ii) अभ्युत्थानमधर्मस्य ....

(iii) तदात्मानम् .... (iv) सृजाम्यहम् ....

पदपरिचयः

पदम्	विश्लेषणम्	पदम्	विश्लेषणम्
यदा	अव्ययम् १	भारत	अका. पुं. सम्बो. प्र. एक.
यदा	अव्ययम् २	अभ्युत्थानम्	अका. नपुं. प्र. एक
हि	अव्ययम् ३	अधर्मस्य	अका. पुं. षष्ठी एक.

धर्मस्य	अका. पुं. षष्ठी एक.	तदा	अव्ययम् ४
ग्लानिः	इका. स्त्री. प्र. एक.	आत्मानम्	आत्मन्-नका. पुं. द्विती. एक.
भवति	भू+लट् प्रपु. एक. कर्तरि क्रिया	सृजामि	सृज्+लट् उपु. एक. कर्तरि क्रिया
		अहम्	अस्मद्-दका. त्रि. प्र. एक. (सर्व.)

वर्गीकरणाभ्यासः

निर्देशानुसारं श्लोकस्य पदानि लिखतु–

(i) प्रथमैकवचनान्तम् (३) ....

(ii) षष्ठ्यन्तम् (२) ....

(iii) अव्ययम् (४) ....

(iv) क्रियापदम् (२) ....

(v) सम्बोधनान्तम् (३) ....

(vi) सर्वनाम (१) ....

(vii) इकारान्तम् (१) ....

(viii) स्त्रीलिङ्गम् (३) ....

(ix) अकारान्तपुंलिङ्गम् (३) ....

(x) अकारान्तनपुंसकलिङ्गम् (१) ....

(xi) द्वितीयान्तम् (१) ....

(xii) नकारान्तम् (१) ....

आकाङ्क्षाविस्तरः

भवति।

किं भवति? .... (इका. स्त्री. प्र. एक.)

कस्य ग्लानिः भवति? .... (अका. पुं. षष्ठी एक. १)

धर्मस्य ग्लानिः कदा भवति? .... (अव्ययम् १-२)

अभ्युत्थानं कस्य भवति? .... (अका. पुं. षष्ठी एक. २)

अधर्मस्य अभ्युत्थानं भवति तदा किं भवति? .... (सृज्+लट् उपु.एक. क्रिया)

सृजामि।

तदा अहं कम् सृजामि? .... (नका. पुं. द्विती. एक.)

इह सम्बोधनपदं किम्? .... (अका. पुं. सम्बो. प्र. एक.)

अन्वयः

भारत! यदा-यदा धर्मस्य ग्लानिः, हि अधर्मस्य अभ्युत्थानं (च) भवति तदा अहम् आत्मानं सृजामि।

पदार्थः

पदम्	संस्कृतम्	हिन्दी
भारत!	भरतवंशोद्भव!	हे अर्जुन!
यदा-यदा	यस्मिन्-यस्मिन् काले	जब-जब
धर्मस्य	अभ्युदयनिःश्रेयससाधनस्य	धर्म की
ग्लानिः	ह्रासः	हानि
हि	तथा	और
अधर्मस्य	पापस्य (धर्मविरोधिनः दुःखसाधनस्य)	पाप की
अभ्युत्थानम्	आधिक्येन उद्भवः	वृद्धि
भवति	जायते	होती है
तदा	तस्मिन् काले	तब
अहम्	अहं (भगवान्)	मैं
आत्मानम्	स्वदेहम्	अवतार रूप
सृजामि	धारयामि	धारण करता हूँ।

भावार्थः

संस्कृतम्—भगवान् इह मर्त्यलोके कदा अवतरति इत्याकाङ्क्षायाम् उक्तम्—"भरतकुलोत्पन्न! जिज्ञासो! हे अर्जुन! यदा-यदा लोकाभ्युदयसाधनस्य धर्मस्य हानिः तथा उद्वेजकस्य दुःखसाधनस्य पापस्य

प्रकर्षः जायते, तदा-तदा अहं लोके स्वस्वरूपं प्रकटयामि।" धर्माधर्मयोः प्रकर्षापकर्षौ सः एव जानाति। अत एव इह अवतारस्य कोऽपि निश्चितः कालः नैव उक्तः। 'यदा-यदा' इति एकस्यैव पदस्य द्विर्वचनेन भगवतः पुनः पुनः अवतारः ध्वन्यते।

हिन्दी–इस धरा-धाम में अपना अवतार लेने का समय बताते हुए भगवान् ने कहा कि जब-जब धर्म की हानि और अधर्म की वृद्धि होती है, तब-तब मैं अपने रूप की सृष्टि करता हूँ, अर्थात् अवतार लेता हूँ। अवतार लेने का कोई युग, वर्ष, मास या समय निश्चित नहीं है। इसीलिए यहाँ 'जब-जब' कहा गया है। इसी प्रकार धर्माधर्म के ह्रास और प्रकर्ष का निर्णय भी भगवान् के ही अधीन है।

अवबोधाभ्यासः

प्रश्नानाम् उत्तराणि लिखतु–

(क) भगवान् कदा शरीरं गृह्णाति? ....

(ख) धर्मस्य हानौ सत्यां जनाः किं नाचरन्ति? ....

(ग) पापस्य वृद्धौ सत्यां सामान्याः जनाः किम् आचरन्ति?

....

(घ) कः सर्वज्ञः कश्च अल्पज्ञः? ....

अवधेयम्

(i) अस्माकं जीवानां कर्मवशात् जन्म भवति, किन्तु ईश्वरस्य जन्म स्वेच्छया भवति। अतः ईश्वरः अजन्मा कथ्यते।

(ii) जीवानां शरीरं मायया निर्मितम्, किन्तु ईश्वरस्य योगमायया। अत एव सः ईश्वरः इत्युच्यते।

(iii) जीवः गर्भदुःखम् अनुभूय जन्म गृह्णाति, किन्तु ईश्वरः तद् अननुभूय लीलाशरीरं प्रकटयति।

व्याकरणाभ्यासः

(अ) सन्धिः

ग्लानिर्भवति – ग्लानिः + भवति (विसर्गसन्धिः)

तदात्मानम् – तदा + आत्मानम् (दीर्घसन्धिः)

सृजाम्यहम् – सृजामि + अहम् (यण्सन्धिः)

अभ्युत्थानम् – अभि + उत्थानम् (यण्सन्धिः)

रेखाङ्कितेषु नामनिर्देशपुरस्सरं विसन्धिं करोतु–

(क) क्रीडाङ्गणे हरिर्हसति। – ....

(ख) दुर्बलेषु प्रभुर्भवति। – ....

(ग) मतिरस्य सुनिर्मला। – ....

(घ) बुद्धिर्यस्य बलं तस्य। – ....

(ङ) कदाऽऽगतः? – ....

(च) रामस्यानुजः पूर्वं जगाम। – ....

(छ) वस्त्रं धारयाम्यहम्। – ....

(ज) उपर्युक्तं स्मरतु। – ....

(झ) अभ्युक्तिः स्वीकार्या। – ....

(ञ) जनाः हरिं पर्युपासते। – ....

(आ) समासः

अधर्मस्य – न धर्मः = अधर्मः, तस्य – अधर्मस्य (नञ् तत्पुरुषसमासः)

अधः समस्तं पदं लिखतु–

(क) न ज्ञानम् ...., तस्य ....

(ख) न सुखम् ...., तस्य ....

(ग) न मूर्खः ...., तस्य ....

(घ) न अश्वः अनश्वः, तस्य अनश्वस्य

(ङ) न आम्रम् ...., तस्य ....

(इ) तद्धितप्रत्ययः

यद् + दा = **यदा** - (अव्ययम्) यस्मिन् काले इत्यर्थः।

किम् + दा = ...

तद् + दा = ...

सर्व + दा = ...

एक + दा = ...

अन्य + दा = ...

अवधेयम्

यदा - यदा (पुनः पुनः वीप्सायां च पदस्य द्विर्वचनं भवति)

ग्रामे - ग्रामे (प्रत्येकस्मिन् ग्रामे इत्यर्थः)

अधः पदस्य द्विर्वचनेन रिक्तं स्थानं पूरयतु–

यथा– उद्याने-उद्याने पुष्पाणि विकसन्ति।

(i) मालाकारः .... सिञ्चति। (पादपम्)

(ii) रामः .... अगच्छत्। (वनम्)

(iii) वायसः .... गतवान्। (लोकम्)

(iv) कृष्णः .... अवतरति। (तदा)

(v) फलानि .... सन्ति। (वृक्षे)

(ई) कृत्-प्रत्ययः

ग्लानिः - ग्लै + क्तिन् (ति) - भाववाचकं पदम्।

एवमेव अधः क्तिन्-प्रत्ययान्तं रूपं लिखतु–

(क) ग्लै + क्तिन् = ग्लानिः इति तु ग्लायति अनेन, अस्मिन् वा इत्यर्थे औणादिकः निः (४-५१)

(ख) हा + क्तिन् = ...

(ग) कृ + क्तिन् = ...

(घ) लू + क्तिन् = ...

(ङ) पू + क्तिन् = ...

(च) धू + क्तिन् = ...

(उ) क्रियाकारकसम्बन्धः

भवति	-	कर्तरि क्रिया	अधर्मस्य	-	अभ्युत्थानसम्बन्धी
ग्लानिः	-	कर्तृपदम्	सृजामि	-	कर्तरि क्रिया
अभ्युत्थानम्	-	कर्ता	अहम्	-	कर्ता
धर्मस्य	-	ग्लानिसम्बन्धी	आत्मानम्	-	कर्मपदम्

(ऊ) पर्यायशब्दः

अभ्युत्थानम् - उत्कर्षः, उन्नतिः (इका. स्त्री.), वृद्धिः (इका. स्त्री.)

ग्लानिः - क्षयः, ह्रासः, अवनतिः

◆◆◆

३. श्लोकः

परित्राणाय साधूनां विनाशाय च दुष्कृताम्।
धर्मसंस्थापनार्थाय सम्भवामि युगे युगे।। (भ. गी. ४.८)

लेखनाभ्यासः

(अ) श्लोकपदैः रिक्तं श्लोकं पूरयतु–

परि.............. साधूनां विनाशाय च ....।
धर्म..............र्थाय .... युगे युगे।।

(आ) श्लोकपादाभ्यां रिक्तं श्लोकं पूरयतु–

परित्राणाय साधूनां ....।
.... सम्भवामि युगे युगे।।

पदच्छेदः

परित्राणाय, साधूनाम्, विनाशाय, च, दुष्कृताम्।
धर्म-संस्थापन+अर्थाय, सम्भवामि, युगे-युगे।।

पदच्छेदाभ्यासः

अधः पदानां पदच्छेदं करोतु–

(i) धर्मसंस्थापन...... – ....
(ii) धर्मसंस्थापनार्थाय – ....
(iii) युगे युगे – ....

पदपरिचयः

पदम्	विश्लेषणम्	पदम्	विश्लेषणम्
परित्राणाय	अका. नपुं. चतु. एक.	दुष्कृताम्	दुष्कृत्-तका. पुं. षष्ठी बहु.
साधूनाम्	साधु-उका. पुं. षष्ठी बहु.	धर्मसंस्थापनार्थाय	अका. पुं. चतु. एक. (समस्तम्)
विनाशाय	अका. पुं. चतु. एक.	सम्भवामि	सम्+भू+लट् उपु. एक. (कर्तरि क्रिया)
च	अव्ययम्	युगे युगे	अका.नपुं. सप्त. एक. (वीप्सा-बोधकम्)

वर्गीकरणाभ्यासः

अधः प्रदत्तवर्गानुसारं श्लोकपदानि सङ्गृह्य लिखतु– [आवरणे प्रदत्तसंख्या सङ्ग्रहणीयपदानां संख्या निर्दिशति]

(i) चतुर्थ्येकवचनान्तम् (३) ....

(ii) षष्ठी–बहुवचनान्तम् (२) ....

(iii) सप्तम्येकवचनान्तम् (२) ....

(iv) क्रियापदम् (१) ....

(v) तकारान्तपुंलिङ्गम् (१) ....

(vi) उकारान्तपुंलिङ्गम् (१) ....

(vii) अव्ययम् (१) ....

(viii) पुंलिङ्गम् (४) ....

(ix) नपुंसकलिङ्गम् (३) ....

आकाङ्क्षाविस्तरः

सम्भवामि।

कः सम्भवति? **अहं सम्भवामि।**

कदा सम्भवामि? .... (अका. नपुं. सप्त. एक.)

किमर्थं युगे युगे सम्भवामि? .... (अका. नपुं. चतु. एक.)

केषां परित्राणाय युगे युगे सम्भवामि? .... (उका. पुं. षष्ठी बहु.)

पुनश्च किमर्थं युगे युगे सम्भवामि? .... अका. पुं. चतु. एक.)

केषां विनाशाय युगे युगे सम्भवामि? .... (तका. पुं. षष्ठी. बहु, समस्तम्)

अन्वयः

साधूनां परित्राणय दुष्कृतां विनाशाय धर्मसंस्थापनार्थाय च युगे–युगे सम्भवामि।

पदार्थः—

पदम्	संस्कृतम्	हिन्दी
साधूनाम्	सन्मार्गस्थानाम्	सज्जनों की
परित्राणाय	संरक्षणाय	रक्षा के लिए
दुष्कृताम्	पापिनाम्	पापियों के
विनाशाय	निग्रहाय	विनाश के लिए
धर्मसंस्थापनार्थाय	सन्मार्गस्थिरीकरणाय	धर्म की स्थापना के लिए
च	तथा च	और
युगे-युगे	प्रतियुगम्	प्रत्येक युग में
सम्भवामि	आविर्भवामि	अवतार लेता हूँ।

भावार्थः

संस्कृतम्—अस्मिन् श्लोके भगवान् श्रीकृष्णः इह लोके स्वस्य अवतरणस्य प्रयोजनम् अर्जुनाय वर्णयति— "हे अर्जुन! सन्मार्गगामिनां सज्जनानां भक्तानां सर्वतोभावेन सुरक्षायै, दुष्टानां पापकारिणां जनानां वधाय तथा च जगद्धारकस्य धर्मस्य सम्यक् स्थापनाय अहं प्रत्येकस्मिन् युगे अवतरामि।

हिन्दी—इस श्लोक में भगवान् श्रीकृष्ण ने अर्जुन को अपने अवतार का प्रयोजन बताया है कि हे अर्जुन! सन्मार्ग पर चलने वाले सज्जनों भक्तों की सब प्रकार से सुरक्षा करने के लिए, कुमार्गगामी दुष्टों का संहार करने के लिए तथा उपदेश आदि के द्वारा धर्म की विधिवत् स्थापना के लिए मैं प्रत्येक युग में अवतार लेता हूँ।

अवबोधाभ्यासः

अधः वाक्यं पठित्वा उत्तरतु

(i) इमं श्लोकं कः कस्मै श्रावयति? ....

(ii) अवतारस्य कति प्रयोजनानि निर्दिष्टानि? ....

(iii) तानि कानि प्रयोजनानि? ....

अवधेयम्

(i) भगवान् श्रीकृष्णः युधिष्ठिरादीनां परिपालनेन साधुपरित्राणम्, कंसादीनां मारणेन दुष्टवधं तथा गीतादीनाम् उपदेशेन धर्मस्य संस्थापनं च कृतवान्।

(ii) भक्तानां परिपालनेन अभक्तानां दुष्टानां दमनेन च भगवति पक्षपातः न शङ्कनीयः। तथापि कथम्? यथा माता दुष्टं पुत्रं ताडयति, पुनरपि पक्षपातिनी न भवति, तथैव भगवानपि।

व्याकरणाभ्यासः

(अ) सन्धिः

दुष्कृताम् – दुस् + कृताम् (षत्वसन्धिः)

संस्थापनार्थाय – संस्थापन + अर्थाय (दीर्घसन्धिः)

कोष्ठकस्थपदे सन्धिं कृत्वा तेन पदेन वाक्यं पूरयतु–

(i) आतपे धावनं ....। (दुस्+करम्)

(ii) जनानाम् उदरं ....। (दुस्+पूरम्)

(iii) अविनयस्य .... प्राप्स्यसि। (दुस्+फलम्)

(iv) .... निर्भयं विचरन्ति। (अभय+अरण्ये)

(v) तुन्दिलः नास्ति ....। (दीर्घ+अश्वः)

(vi) सूर्यः सम्प्रति ....। (उत्तर+अयणः)

(vii) मह्यं .... रोचते। (मिष्ट+अन्नम्)

(आ) समासः

अधः समस्तं पदं लिखतु–

यथा– धर्मस्य संस्थापनम् इति – **धर्मसंस्थापनम्** (षष्ठीतत्पुरुषसमासः)

(i) मन्दिरस्य स्थापना इति – ....

(ii) ज्ञानस्य प्रकाशः इति – ....

(iii) यज्ञस्य शाला इति – ....

(iv) पाकस्य आलयः इति – ....

(v) शिक्षकस्य पुस्तकम् इति – ....

अधः समस्तं पदं लिखतु–

यथा– धर्मसंस्थापनमेव अर्थः (प्रयोजनं) इति धर्मसंस्थापनार्थः तस्मै - धर्मसंस्थापनार्थाय (चतुर्थीतत्पुरुषसमासः)

(i) धान्येन अर्थः, तस्मै – ....

(ii) फलेन अर्थः, तस्मै – ....

(iii) अध्ययनेन अर्थः, तस्मै – ....

(iv) यज्ञेन अर्थः, तस्मात् – ....

(v) दर्शनेन अर्थः, तस्मिन् – ....

(vi) पुस्तकेन अर्थः, तस्य – ....

(इ) तद्धितः–

युगे युगे = प्रतियुगम् - व्याप्तेः इच्छा वीप्सा। प्रत्येकं युगं व्याप्तुम् इच्छया 'युगे' इति पदस्य द्वित्वं कृतम्।

अधः वीप्सायां पदस्य द्वित्वं कृत्वा वाक्यं पूरयतु–

(i) बालः ....जिघ्रति। (पुष्पम्)

(ii) ....देयं पूरयति। (भागेन)

(iii) ....मोदकं यच्छति। (छात्राय)

(iv) ....शिक्षकान् आमन्त्रयति। (विद्यापीठात्)

(v) मेलायाम्..............................जनाः आयान्ति। (प्रान्तस्य)

(vi) इष्टिकामार्गः ....निर्मितः। (ग्रामे)

(vii) ....अनध्यायः ....गृहं गच्छति। (यदा, तदा)

(ई) क्रियाकारकसम्बन्धः

सम्भवामि	- कर्तरि क्रियापदम्	धर्मसंस्थापनार्थाय	- तादर्थ्यबोधकं पदम्
अहम्	- इति कर्तृपदम् आक्षेपेण बोध्यम्	साधूनाम्	- सम्बन्धबोधकम्
परित्राणाय	- तादर्थ्यबोधकं पदम्	दुष्कृताम्	- सम्बन्धबोधकम्
विनाशाय	- तादर्थ्यबोधकं पदम्	युगे-युगे	- अधिकरणकारकम्

(उ) पर्यायशब्दः

(i) **साधुः** - १. सभ्यः, २. सज्जनः, ३. आर्यः,

(ii) **दुष्कृत्** - १. दुर्जनः, २. खलः, ३. पापः,

◆◆◆

४. श्लोकः

जन्म कर्म च मे दिव्यमेवं यो वेत्ति तत्त्वतः।
त्यक्त्वा देहं पुनर्जन्म नैति मामेति सोऽर्जुन!।। (भ. गी. ४.९)

लेखनाभ्यासः

(अ) श्लोकपदैः श्लोकं पूरयतु–

जन्म .... च मे ....मेवं यो .... तत्त्वतः।

.... देहं ....जन्म नैति .... सो.......... ।।

(आ) श्लोकपादाभ्यां श्लोकं पूरयतु–

जन्म कर्म च मे दिव्यम् .... ।

.... नैति मामेति सोऽर्जुन!।।

पदच्छेदः

जन्म, कर्म, च, मे, दिव्यम्, एवम्, यः, वेत्ति, तत्त्वतः।

त्यक्त्वा, देहम्, पुनर्-जन्म, न, एति, माम्, एति, सः, अर्जुन!।।

पदच्छेदाभ्यासः

अधः प्रदत्तपदानां पदच्छेदं करोतु–

(i) दिव्यमेवम् – ....

(ii) यो वेत्ति – ....

(iii) पुनर्जन्म – ....

(iv) नैति – ....

(v) मामेति – ....

(vi) सोऽर्जुन – ....

पदपरिचयः

पदम्	विश्लेषणम्	पदम्	विश्लेषणम्
जन्म	जन्मन्-नका. नपुं. प्र. एक. (१)	त्यक्त्वा	त्यज्+क्त्वा अव्ययम् (क्त्वान्तम्)
कर्म	कर्मन्-नका. नपुं. प्र. एक. (२)	देहम्	अका. पुं. द्विती. एक.
च	अव्ययम्	पुनर्जन्म	पुनर्जन्मन् नका. नपुं. द्विती. एक.
मे	अस्मद्-द.त्रि.षष्ठी एक.(मम)(सर्व.)	न	अव्ययम्
दिव्यम्	अका. नपुं. प्र. एक. (वि.)	एति	इ+लट्-प्रपु. एक. (कर्तरि क्रिया)
एवम्	अव्ययम्	माम्	अस्मद्-दका. द्विती. एक. (सर्व.)
यः	यद्-दका. पुं प्र. एक. (सर्व.)	एति	इ+लट्-प्रपु. एक. (कर्तरि क्रिया)
वेत्ति	विद्+लट् प्रपु. एक.(कर्तरि क्रिया)	सः	तद्-दका. पु. प्र. एक. (सर्व.)
		अर्जुन	अका. पुं. सम्बो. प्र. एक.

वर्गीकरणाभ्यासः

अधः निर्दिष्टवर्गेषु श्लोकपदानि लिखतु–

(i) प्रथमान्तम् (५) ....

(ii) द्वितीयान्तम् (३) ....

(iii) सम्बोधनान्तम्(१) ....

(iv) अव्ययम् (५) ....

(v) क्रियापदम् (३) ....

(vi) सर्वनापदम् (४) ....

(vii) नकारान्तम् (३) ....

(viii) नपुंसकलिङ्गम् (४) ....

(ix) पुंलिङ्गम् (६) ....

आकाङ्क्षाविस्तरः

दिव्यम् (अस्ति)।

किं दिव्यमस्ति? .... (न. नपुं. प्र. एक. १)

पुनश्च किं दिव्यमस्ति? .... (न. नपुं. प्र. एक.२)

कस्य जन्म कर्म च दिव्यम् अस्ति? .... (षष्ठी. एक. सर्व.)

जन्म कर्म च मे दिव्यम् एवं वेत्ति।

कः एवं वेत्ति?....................(सर्व. पुं. प्र. एक. १)

यः कथम् एवं वेत्ति?....................(तसिप्रत्ययान्तम्)

यः एवं तत्त्वतः वेत्ति, सः किं भवति?

सः नैति (न प्राप्नोति)

सः किं नैति?....................(न. नपुं. द्विती. एक.)

सः किं कृत्वा पुनर्जन्म नैति?....................(क्त्वान्तम्)

सः किं त्यक्त्वा पुनर्जन्म नैति?....................(अ. पुं. द्विती. एक.)

सः देहं त्यक्त्वा पुनर्जन्म नैति तर्हि कुत्र एति?....................(सर्व. द्विती. एक.)

अन्वयः

अर्जुन! मे जन्म कर्म च द्विव्यम्। एवं यः तत्त्वतः वेत्ति सः देहं त्यक्त्वा पुनर्जन्म न एति, (अपि तु) माम् एति।

पदार्थः

पदम्	संस्कृतम्	हिन्दी
अर्जुन!	हे पार्थ!	हे अर्जुन!
मे	मम	मेरा
जन्म	देहग्रहणम्	उत्पत्ति (जन्म)
कर्म	कृत्यम्	कार्य
च	तथा च	और

दिव्यम्	अप्राकृतम्	असाधारण
एवम्	एवं प्रकारेण	इस प्रकार
यः	यः कश्चित् जनः	जो
तत्त्वतः	तत्त्वेन यथावत्	वस्तुतः
वेत्ति	जानाति	जानता है
सः	सः जनः	वह
देहम्	शरीरम्	देह को
त्यक्त्वा	परित्यज्य	छोड़ने पर
पुनर्जन्म	पुनरुत्पत्तिम्	पुनर्जन्म को
न एति	न प्राप्नोति	प्राप्त नहीं होता है
माम्	मम लोकम्	(मेरे धाम) मुझे
एति	गच्छति	प्राप्त हो जाता है।

भावार्थः

संस्कृतम्– भगवान् श्रीकृष्णः ईश्वरस्य जन्मकर्मणोः ज्ञाने फलम् आह-- ईश्वरस्य मम जन्म स्वेच्छा- कृतम्, न कर्मभिः आरब्धम् एकञ्च कर्म धर्मपालनरूपं साधुपरित्राणादि, न तु बन्धनाय फलदानसमर्थम्। एवञ्च मम एतदुभयं दिव्यम् अलौकिकम् इत्येवं रूपेण यः जनः तत्त्वतः निर्भ्रान्तं परानुग्रहार्थमेव जानाति, सः पार्थिवशरीरस्य त्यागात् परं पुनः मर्त्यलोके जन्म न गृह्णाति, अपितु मम लोकं गच्छति, मुक्तः भवति इति भावः।

हिन्दी– भगवान् श्रीकृष्ण अर्जुन को अपने जन्म और कर्म के ज्ञान का फल बता रहे हैं– हे अर्जुन! अन्य जीवों की भाँति मेरा शरीर किसी पूर्वजन्म के कर्म से निर्मित नहीं है, अपितु यह स्वेच्छा से योगमाया से रचित है। इसी प्रकार मेरे कर्म से भोग प्रदान करने वाला बन्धनकारी फल उत्पन्न नहीं होता, अपितु वह धर्मस्थापन एवं साधु-परित्राणादि हेतु केवल मेरी लीला है। अर्थात् मेरे जन्म एवं कर्म अलौकिक, अप्राकृत व लोककल्याणकारी हैं, इस तथ्य को जो व्यक्ति निर्भ्रान्तरूप से जानता है वह इस शरीर को छोड़ने के बाद पुनर्जन्म को धारण नहीं करता, वह मुक्त हो जाता है, मुझे प्राप्त कर लेता है।

अवबोधाभ्यासः

अधः वाक्यानि उत्तरयतु–

(i) जीवेश्वरयोः जन्मकर्मणोः भेदं लिखतु। ....

(ii) ईश्वरस्य जन्म कर्म च किमर्थम्? ....

(iii) ईश्वरस्य जन्मकर्मणां ज्ञाने किं फलम्? ....

(iv) पुनर्जन्म कदा भवति? ....

(v) के पुनर्जन्मनि विवदन्ते? ....

अवधेयम्

कस्यचिदपि तत्त्वतः ज्ञाने तस्मिन् विषये भ्रमो निवर्तते। तदेव तस्य वास्तविकं ज्ञानम्। तत्र असम्भावना विपरीतभावना वा कदापि न उदेति।

व्याकरणाभ्यासः

(अ) सन्धिः

यो वेत्ति – यः+वेत्ति – (विसर्गसन्धिः)।

नैति – न+एति (वृद्धिसन्धिः)।

सोऽर्जुन – सः अर्जुन – विसर्ग+पूर्वरूपसन्धिः

अधः विसन्धिपदानि ससन्धीनि करोतु–

(i) कः + जानाति – ....

(ii) गजः + गच्छति – ....

(iii) बालः + धावति – ....

(iv) कः + अवदत् – ....

(v) वृक्षः + अस्ति – ....

(vi) यः + अभ्यर्थी – ....

(vii) न + एधते – ....

(viii) लोक + एषणा – ....

(ix) भोग + ऐश्वर्यम् – ....

(x) पाठ + औचित्यम् – ....

(xi) वन + ओषधिः – ....

(xii) रमा + एति – ....

(xiii) लता + औषधम् – ....

(आ) कृत्-प्रत्ययः–

त्यक्त्वा - त्यज्+त्वा (क्त्वा) (त्यागं कृत्वा इत्यर्थः)

निर्दिष्ट-प्रत्यययोगेन निष्पन्नं पदं लिखतु–

(i) मुच् + क्त्वा – ....

(ii) दा + क्त्वा – ....

(iii) स्था + क्त्वा – ....

(iv) पा + क्त्वा – ....

(v) पठ् + क्त्वा – ....

(vi) हस् + क्त्वा – ....

(vii) गम् + क्त्वा – ....

(viii) नम् + क्त्वा – ....

(इ) तद्धितप्रत्ययः

तत्त्वतः - तत्त्वेन इति - तत्त्व + तस् (तसि/तसिल् प्रत्ययः)

अधः तसिप्रत्ययान्तेन पदेन वाक्यं पूरयतु–

उदा. (i) मन्त्रः हीनः **मन्त्रतः हीनः** । (मन्त्र+तसिः)

(ii) सः ....कथाम् अकथयत्। (आदि+तसिः)

(iii) त्वं ....धनी असि। (शब्द+तसिः)

(iv) सः ....सुन्दरः अस्ति। (रूप+तसिः)

(v) मम..........आरोहति। (पृष्ठ+तसिः)

(ई) क्रियाकारकसम्बन्धः

अस्ति	-	आक्षेपगम्या क्रिया.	न एति	-	क्रिया अव्ययम्
जन्म	-	कर्तृपदम्	सः	-	कर्ता
कर्म	-	कर्तृपदम्	त्यक्त्वा	-	गौणक्रिया
दिव्यम्	-	कर्तृविशेषणम्	देहम्	-	गौणक्रियायाः कर्म
वेत्ति	-	कर्तरि क्रिया.	पुनर्जन्म	-	मुख्यक्रियायाः कर्म
यः	-	कर्ता	एति	-	कर्तरि क्रिया.
तत्त्वतः	-	क्रियाविशेषणम्	माम्	-	कर्मपदम्

(उ) पर्यायशब्दः—

(i) **जन्म** - १. जनुः (सका. नपुं.), २. जननम् (अका. नपुं.) ३. जनिः (इका. स्त्री.), ४. उत्पत्तिः (इका. स्त्री.) ५. उद्भवः (अका. पुं.)

(ii) **कर्म** - १. क्रिया (आका. स्त्री), २. कार्यम् (अका. नपुं.), ३. लीला (आका. स्त्री.)

(iii) **दिव्यम्** - १. अलौकिकम् (अका. वि.), २. अप्राकृतम् (अका. वि.), ३. असाधारणम् (अका. वि.), ४. असामान्यम् (अका. वि.), ५. ईश्वरीयम् (अका. वि.)

◆◆◆

५. श्लोकः

ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम्।
मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ! सर्वशः।। (भ. गी. ४.११)

लेखनाभ्यासः–

(अ) श्लोकपदैः श्लोकं पूरयतु–

ये .... मां ....तथैव .... ।
मम ....नुवर्तन्ते .... पार्थ! .... ।।

(आ) श्लोकपादाभ्यां श्लोकं पूरयतु–

ये यथा मां प्रपद्यन्ते .... ।
....मनुष्याः पार्थ! सर्वशः।।

पदच्छेदः–

ये, यथा, माम्, प्रपद्यन्ते, तान्, तथा+एव, भजामि, अहम्।
मम, वर्त्म, अनुवर्तन्ते, मनुष्याः, पार्थ!, सर्वशः।।

पदच्छेदाभ्यासः–

अधः प्रदत्तपदानि विच्छिनत्तु–

(i) तांस्तथैव – ....
(ii) तथेव – ....
(iii) भजाम्यहम् – ....
(iv) वर्त्मानुवर्तन्ते – ....

पदपरिचयः

पदम्	विश्लेषणम्	पदम्	विश्लेषणम्
ये	यद्– दका. पुं. प्र. बहु. सर्व.	अहम्	अस्मद्– दका. प्र. एक. सर्व.
यथा	अव्ययम्	मम	अस्मद्– षष्ठी एक. सर्व.
माम्	अस्मद्– दका. द्विती. एक. सर्व.	वर्त्म	वर्त्मन्– नका. नपुं. द्विती. एक.
प्रपद्यन्ते	प्र+पद्+लट् प्रपु.बहु. आत्मने.	अनुवर्तन्ते	अनु+वृत्+लट् प्रपु. बहु. आत्मने.

	कर्तरि क्रिया		कर्तरि क्रियापदम्
तान्	तद्- दका. पुं. द्विती. बहु. सर्व.	मनुष्याः	अका. पुं. प्र. बहु.
तथैव	(तथा+एव) अव्ययसमुच्चयः	पार्थ	अका. पुं. सम्बो. प्र. एक.
भजामि	भज्+लट् उपु. एक. कर्तरि क्रियापदम्	सर्वशः	अव्ययम् (शस्प्रत्ययान्तम्)

वर्गीकरणाभ्यासः

अधः निर्दिष्टवर्गेषु श्लोकपदानि विभजतु–

प्रथमान्तम् (३) ....

द्वितीयान्तम् (३) ....

क्रियापदम् (३) ....

अव्ययम् (३) ....

सर्वनाम् (५) ....

नकारान्तम् (१) ....

पुंलिङ्गम् (४) ....

नपुंसकलिङ्गम् (१) ....

सम्बोधनम् (१) ....

आकाङ्क्षाविस्तरः

प्रपद्यन्ते - (प्राप्नुवन्ति, भजन्ति)

के प्रपद्यन्ते? .... (पुं. प्र. बहु. सर्व.)

ये कं प्रपद्यन्ते? .... (द्विती. एक. सर्व.)

ये केन प्रकारेण मां प्रपद्यन्ते? .... (अव्ययम्)

ये मां यथा प्रपद्यन्ते तथैव किं भवति?

कः तथैव भजति? .... (भज्+लट्) (प्र. एक. सर्व.)

अहं कान् तथैव भजामि? .... (द्विती. बहु. सर्व.)

अनुवर्तन्ते (अनुसरन्ति)

के अनुवर्तन्ते? .... (अका. पुं. प्र. बहु.)

मनुष्या: किम् अनुवर्तन्ते? .... (नका. नपुं. द्विती. एक.)

मनुष्या: कस्य वर्त्म अनुवर्तन्ते? .... (षष्ठी एक. सर्व.)

मनुष्या: मम वर्त्म केन रूपेण अनुवर्तन्ते? .... (शसन्तम् अव्ययम्)

अन्वय:

पार्थ! ये मां यथा प्रपद्यन्ते अहं तान् तथैव भजामि। मनुष्या: मम वर्त्म सर्वश: अनुवर्तन्ते।

पदार्थ:

पदम्	संस्कृतम्	हिन्दी
पार्थ!	हे अर्जुन!	हे अर्जुन
ये	ये (मनुष्या:)	जो (लोग)
माम्	भगवन्तम् (श्रीकृष्णं)	मुझे
यथा	येन प्रकारेण	जिस रूप से
प्रपद्यन्ते	भजन्ति	भजते हैं
अहम्	भगवान् (श्रीकृष्ण:)	मैं
तान्	(तान्) मनुष्यान्	उन्हें
तथैव	तेनैव प्रकारेण	उसी रूप में
भजामि	अनुगृह्णामि	अनुग्रह करता हूँ
मनुष्या:	कर्मरता: जना:	कर्मशील मनुष्य
मम	भगवत: (श्रीकृष्णस्य)	मेरे
वर्त्म	भजनमार्गम्	मार्ग का
सर्वश:	सर्वतो भावेन	सब प्रकार से
अनुवर्तन्ते	अनुसरन्ति	अनुगमन करते हैं।

भावार्थः

संस्कृतम्– भगवति वैषम्यं नास्ति। ये खलु निष्कामभावेन भगवन्तम् उपासते ते मुक्तिं लभन्ते, ये तु सकामाः, तेषां कामनापूर्तिः एव फलम्, न मोक्षप्राप्तिः, इत्यभिप्रायं भगवान् श्रीकृष्णः अर्जुनाय उक्तवान्– हे पृथापुत्र! कर्मणि प्रवृत्ताः ये जनाः माम् ईश्वरं येन प्रकारेण येन प्रयोजनेन यत्फलाशया भजन्ते, अहम् ईश्वरः तान् सकामनिष्कामान् जनान् तदपेक्षितफलदानेनैव अनुगृह्णामि। यतोहि जनाः सर्वैः उपासनाप्रकारैः मम (भगवतः श्रीकृष्णस्यैव) रूपं सेवन्ते। सर्वप्रकारेण ते ईश्वरस्य मार्गम् अनुसरन्ति।

हिन्दी– भगवान् श्रीकृष्ण अर्जुन को कह रहे हैं कि हे पृथापुत्र! जो लोग जिस रूप से जिस प्रयोजन से मेरी उपासना करते हैं, मैं उन्हें उसी रूप से उसी प्रयोजन से अनुगृहीत करता हूँ। सब के सब उपासक सब प्रकार से मेरे मार्ग का अनुगमन करते हैं, सब रूपों में मेरा ही दर्शन करते हैं। इस प्रकार भगवान् में भेद-दृष्टि अथवा पक्षपात का भाव नहीं होता है। सकाम उपासक भिन्न-भिन्न विधियों से इन्द्रादि अनेक देवों की आराधना करके अपनी कामना पूर्ण करते हैं तथा निष्काम उपासक आत्मज्ञान के द्वारा मोक्ष प्राप्त करते हैं। इस प्रकार उपासकों के काम में भेद है, भगवान् तो एक ही है। वह उपासकों की भावना के अनुसार अपने को नाना रूपों और नाना-फलों में प्रकट करता है।

अवबोधाभ्यासः

अधः प्रदत्तप्रश्नानाम् उत्तराणि लिखतु–

(i) भगवति पक्षपातः कथम् अवभासते? ....

(ii) भगवतः पक्षपातावभासस्य किं समाधानम्? ....

(iii) अन्यदेवोपासकाः कथं भगवतः मार्गम् अनुसरन्ति? ....

(iv) भगवान् भक्तान् केन रूपेण प्राप्नोति? ....

(v) उपासनायाः मुख्यौ कौ प्रकारौ स्तः? ....

(vi) मोक्षः कस्याः उपासनायाः फलम्? ....

व्याकरणाभ्यासः

(अ) सन्धिः

तांस्तथैव – तान्+तथैव (हल्-सन्धिः)

तथैव – तथा+एव (वृद्धिसन्धिः)

भजाम्यहम् – भजामि+अहम् (यण्-सन्धिः)

वर्त्मानुवर्तन्ते – वर्त्म+अनुवर्तन्ते (दीर्घसन्धिः)

अधः ससन्धि-पदानि लिखतु–

(i) जनान् + तवास्ति – ....

(ii) हे राजन् + तवास्ति – ....

(iii) कपीन् + तदा दृष्टवान् – ....

(iv) गुरून् + त्वं सेवस्व – ....

(v) यथा + एव – ....

(vi) यदा + एषणा – ....

(vii) गच्छति + अधुना – ....

(viii) गुरु + अनुज्ञा – ....

(ix) कर्म + अनुसरन्ति – ....

(x) धर्म + अरण्यम् – ....

(xi) तव + आगमनम् – ....

(xii) साधु + उपासनम् – ....

(आ) तद्धितप्रत्ययः

सर्वशः – **सर्व + शस् (सर्वैः प्रकारैः इत्यर्थः)**

अधः शस्-प्रत्ययान्तेन अव्ययपदेन वाक्यं पूरयतु–

(i) शासनं..........पुस्तकानि प्रयच्छति। (बहु + शस्)

(ii) प्रतिभागिषु..........रजतं वितरति। (माष + शस्)

(iii) श्रोतृषु..........बोद्धारः भवन्ति। (अल्प + शस्)

(iv) अधिकारी ....निरीक्षणं करोति। (विद्यालय + शस्)

(v) साक्षात्कारे...आकारयति। (एकैक + शस्)

(vi) ....जनाः गच्छन्ति। (पञ्चन् + शस्)

(इ) क्रियाकारकसम्बन्धः

प्रपद्यन्ते (शरणागताः भवन्ति)	-	कर्तरि क्रिया.
ये	-	कर्तृपदम्
माम्	-	कर्मपदम्
भजामि (अनुग्रहं करोमि)	-	कर्तरि क्रिया.
अहम्	-	कर्तृपदम्
तान्	-	कर्म
अनुवर्तन्ते (अनुगच्छन्ति)	-	कर्तरि क्रिया.
मनुष्याः	-	कर्तरि
वर्त्म	-	कर्मपदम्
मम	-	सम्बन्धबोधकम्
सर्वशः	-	करणकारकम्

(ई) पर्यायशब्दः

(i) वर्त्म - १. पन्थाः (पथिन् न. पुं.), २. मार्गः, ३. सरणिः, ४. पद्धतिः, ५. सृतिः

(ii) मनुष्यः - १. मनुजः, २. नरः, ३. मानवः, ४. लोकः, ५. जनः

◆◆◆

६. श्लोकः

चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः।
तस्य कर्तारमपि मां विद्ध्यकर्तारमव्ययम्।। (भ. गी. ४.१३)

पदच्छेदः

चातुर्वर्ण्यम्, मया, सृष्टम्, गुण-कर्म-विभागशः।

तस्य, कर्तारम्, अपि, माम्, विद्धि, अकर्तारम्, अव्ययम्।।

पदच्छेदाभ्यासः

अधः पदानि छिनत्तु–

(i) गुणकर्मविभागशः = ...

(ii) कर्तारमपि = ...

(iii) विद्ध्यकर्तारम् = ...

(iv) अकर्तारमव्ययम् = ...

पदपरिचयः

पदम्	विश्लेषणम्	पदम्	विश्लेषणम्
चातुर्वर्ण्यम्	अका. नपुं. प्र. एक.	अपि	अव्ययम्
मया	अस्मद्-दका. तृ. एक. सर्व.	माम्	अस्मद्- दका. द्विती. एक. सर्व.
सृष्टम्	अका. नपुं. प्र. एक. कर्मणि क्तान्तं वि.	विद्धि	विद्+लोट् मपु. एक. कर्तरि क्रिया.
गुणकर्मविभागशः	शस्- प्रत्ययान्त-अव्ययम्. समस्तम्	अकर्तारम्	अकर्तृ- ऋका. पुं. द्विती. एक. वि.
तस्य	तद्- दका. नपुं. षष्ठी. एक. सर्व.	अव्ययम्	अका. पुं. द्विती. एक. वि.
कर्तारम्	कर्तृ.- ऋका. पुं. द्विती. एक. वि.		

वर्गीकरणाभ्यासः

यथानिर्देशं श्लोकपदानि अधः लिखतु–

(i) प्रथमान्तम् (२) ....

(ii) द्वितीयान्तम् (४) ....

(iii) तृतीयान्तम् (१) ....

(iv) सर्वनाम (३) ....

(v) क्रियापदम् (१) ....

(vi) विशेषणम् (४) ....

(vii) अव्ययम् (२) ....

(viii) नपुंसकलिङ्गम् (३) ....

(ix) पुंलिङ्गम् (३) ....

(x) समस्तम् (५) ....

(xi) अव्ययम् (३) ....

आकाङ्क्षाविस्तरः

सृष्टम् (अस्ति) (निर्मितम् अस्ति)।

किं सृष्टम्? .... (अका. नपुं. प्र. एक.)

चातुर्वर्ण्यं केन सृष्टम्? .... (अस्मद्–दका. तृ. एक. सर्व.)

मया चातुर्वर्ण्यं केन प्रकारेण सृष्टम्? .... (शसन्तम् अव्ययं समस्तम्)

विद्धि - (जानीहि)

कं विद्धि? .... (द्विती. एक. सर्व.)

मां कम् विद्धि? .... (ऋका. द्विती. एक. १)

पुनश्च मां कम् विद्धि? .... (ऋका. द्विती. एक. २)

कस्य कर्तारम् अकर्तारमपि मां विद्धि? .... (तद्–दका. षष्ठी एक. सर्व.)

पुनश्च कीदृशं मां तस्य कर्तारम् .... (अका. पुं. द्विती. एक.)
अकर्तारमपि विद्धि?

अन्वयः

मया गुणकर्मविभागशः चातुर्वर्ण्यं सृष्टम् तस्य कर्तारम् अपि माम् अव्ययम् अकर्तारं विद्धि।

पदार्थः

पदम्	संस्कृतम्	हिन्दी
मया	भगवता कृष्णेन	मैंने
गुणकर्म-	सत्त्वादि-गुणानां शमादि-	गुणों एवं कर्मों का
विभागशः	कर्मणां च विभागेन	विभाग होने से
चातुर्वर्ण्यम्	ब्राह्मणादयः चत्वारो वर्णाः	ब्राह्मणादि चारों वर्णों की
सृष्टम्	उत्पादितम्	सृष्टि की
तस्य	चातुर्वर्ण्यस्य	उसका
कर्तारम्	निर्मातारम्	कर्ता होने पर
अपि	समुच्चये	भी
माम्	भगवन्तं श्रीकृष्णम्	मुझ
अव्ययम्	श्रमनाशादिरहितम्	अविनाशी को
अकर्तारम्	अनिर्मातारम्	अकर्ता
विद्धि	जानीहि	समझो

भावार्थः

संस्कृतम्–लोके सकामनिष्कामतया कर्मवैचित्र्यं दृश्यते। तादृशविभिन्नकर्मकर्तृणामपि उत्तममध्यमादिभेदः श्रूयते। एवञ्च कर्मवैचित्र्यस्य कर्तृवैचित्र्यस्य च रचयितरि भगवति अपि दृष्टिवैचित्र्यम् अवश्यं स्याद् इत्याशङ्कायां भगवान् अर्जुनमुवाच–सत्त्वादिगुणेषु शमदमशौर्यादि-कर्मसु च परस्परं भेदः अस्ति। तादृशैः भेदमूलकैः विभागैः एव अहं चतुरः वर्णान् सृष्टवान्। एवञ्च विषमस्वभावस्य तस्य चातुर्वर्ण्यस्य व्यवहारदृष्ट्या कर्तारमपि मां भगवन्तं परमार्थदृष्ट्या फलश्रमनाशादिरहितम् असंसारिणम्

अकर्तारं जानीहि। मायाकार्यस्य ईश्वरे आरोपात् ईश्वरः कर्तेव भासते, वस्तुतस्तु सः अकर्ता अभोक्ता अविनाशी चेति भावः।

हिन्दी–जब भगवान् में भेद दृष्टि नहीं है तब सकाम-निष्काम आदि कर्म में भेद तथा उत्तम-मध्यम आदि कर्ता में भेद नहीं होना चाहिए, इस शंका का समाधान करते हुए भगवान् ने कहा–सत्त्वादि गुणों में भेद है, शम-दम आदि कर्मों में परस्पर भेद है, इन भेदमूलक विभागों से मैंने चारों वर्णों की सृष्टि की है। व्यावहारिक दृष्टि से विषम स्वभाव वाले उन चारों वर्णों का कर्ता होने पर भी मैं पारमार्थिक रूप से अविनाशी, अभोक्ता और अकर्ता हूँ। वस्तुतः विषमता माया के कारण है तथा सृष्टि मायाकृत है। ईश्वर तो अविनाशी, अकर्ता और अभोक्ता है। इस प्रकार भगवान् में विषमता अथवा भेद दृष्टि नहीं होती है।

अवबोधाभ्यासः

अधः प्रदत्तानि वाक्यानि उत्तरयतु–

(i) यदि भगवति भेददृष्टिः नास्ति तर्हि उपासकेषु उत्तममध्यमादिभेदः कथम्?

....

(ii) सत्त्वादिगुणाः के सन्ति? ....

(iii) कर्मविभागस्य कः अभिप्रायः? ....

(iv) चत्वारः वर्णाः के सन्ति? ....

(v) चतुर्णां वर्णानां कर्ता कः? ....

(vi) ईश्वरः कर्ता सन् अकर्ता कथं भवति? ....

(vii) कर्तुः ईश्वरस्य इह कति विशेषणानि? ....

अवधेयम्

आसक्तिसत्त्वे कर्तृत्वभावः उदेति, नान्यथा।

व्याकरणाभ्यासः

(अ) सन्धिः

अधः प्रदत्तसन्धि-पदानि विसन्धीनि करोतु–

यथा– विद्ध्यकर्तारम् - विद्धि + अकर्तारम् (यण्-सन्धिः)

(i) देह्यमृतं वचः। ....

(ii) कर्माण्यारभते जनः। ....

(iii) मध्वानयतु। ....

(iv) पृथुकं गुर्वाहारम्। ....

(v) सन्त्यत्र सुहृदः नराः। ....

(vi) विगलत्यायुः शनैः शनैः। ....

(आ) समासः तद्धितप्रत्ययः च

(i) चातुर्वर्ण्यम् - चत्वारः वर्णाः एव चतुर्वर्ण + ष्यञ् (य) = चातुर्वर्ण्यम्। स्वार्थे ष्यञ् प्रत्ययः।

(ii) चातुराश्रम्यम् - चत्वारः आश्रमाः एव; चतुराश्रम + ष्यञ्।

(iii) चातुर्धाम्यम् - चत्वारि धामानि एव; चतुर्धामन् + ष्यञ्।

(iv) माङ्गल्यम् - मङ्गल + ष्यञ्; भावेऽर्थे ष्यञ्।

(v) औदार्यम् - उदार + ष्यञ्; भावेऽर्थे ष्यञ्।

(vi) औचित्यम् - उचित + ष्यञ्; भावेऽर्थे ष्यञ्।

गुणकर्मविभागशः - गुणाश्च कर्माणि च इति गुणकर्म (द्वन्द्वे एकवद्भावः), गुणकर्मणः विभागः इति गुणकर्मविभागः (षष्ठी तत्पु.), गुणकर्मविभागैः इति गुणकर्मविभागशः (तृतीयान्तात् करणकारकात् शस् प्रत्ययः) गुणकर्मविभाग + शस् (अव्ययम्)।

खण्डशः - खण्ड + शस्, (अव्ययम्)

प्रस्थशः - प्रस्थ + शस्, (अव्ययम्)

शतशः - शत + शस्, (अव्ययम्)

सहस्रशः - सहस्र + शस्, (अव्ययम्)

कोटिशः - कोटि + शस्, (अव्ययम्)

(इ) क्रियाकारकसम्बन्धः

सृष्टम् - कर्मणि क्तान्तं क्रिया.

मया - कर्ता

चातुर्वर्ण्यम् - कर्म

गुणकर्मविभागशः - करणकारणबोधकम्

विद्धि (अवगच्छ) - कर्तरि क्रिया. मपु. एक.

माम् - कर्म

कर्तारम् - कर्मविशेषणम्

अकर्तारम् - कर्मविशेषणम्

अव्ययम् - कर्मविशेषणम्

तस्य - सम्बन्धबोधकम्

(ई) पर्यायशब्दः

(i) **अव्ययम्** - १. अविनाशी (अविनाशिन्- नका. वि.), २. नाशरहितम् (अका. वि.), ३. नित्यः (अका. वि.), ४. अक्षीणः (अका. वि.)

◆◆◆

७. श्लोकः

न मां कर्माणि लिम्पन्ति न मे कर्मफले स्पृहा।
इति मां योऽभिजानाति कर्मभिर्न स बध्यते।। (भ. गी. ४.१४)

पदच्छेदः

न, माम्, कर्माणि, लिम्पन्ति, न, मे, कर्म-फले, स्पृहा।
इति, माम्, यः, अभिजानाति, कर्मभिः, न, सः, बध्यते।।

पदच्छेदाभ्यासः

अधः प्रदत्तपदानां पदच्छेदं करोतु–

(i) कर्मफले – ....

(ii) योऽभिजानाति – ....

(iii) कर्मभिर्न – ....

(iv) स बध्यते – ....

पदपरिचयः

पदम्	विश्लेषणम्	पदम्	विश्लेषणम्
न	अव्ययम्	इति	अव्ययम् ३
माम्	अस्मद्- दका. द्विती. एक. सर्व. १	माम्	अस्मद्-दका.द्विती.एक.सर्व. २
कर्माणि	कर्मन्- नका. नपुं. प्र. बहु.	यः	यद्-दका. पुं. प्र. एक. सर्व. १
लिम्पन्ति	लिप्+लट् प्रपु. बहु. कर्तरि क्रिया.	अभिजानाति	अभि+ज्ञा+लट् प्रपु. एक. कर्तरि क्रिया.
न	अव्ययम्	कर्मभिः	कर्मन्-नका. नपुं. तृ. बहु.
मे	अस्मद्-दका. षष्ठी एक. सर्व.	न	अव्ययम् ४
कर्मफले	अका. नपुं. सप्त. एक.	सः	तद्-दका. पुं. प्र. एक. सर्व. २
स्पृहा	आका. स्त्री. प्र. एक.	बध्यते	बन्ध्+लट् प्रपु. एक. कर्मणि क्रिया.

वर्गीकरणाभ्यासः

अधः श्लोकस्थानि पदानि वर्गशः संयोजयतु–

(i) प्रथमान्तम् (४) ....

(ii) द्वितीयान्तम् (२) ....

(iii) तृतीयान्तम् (१) ....

(iv) षष्ठ्यन्तम् (१) ....

(v) सप्तम्यन्तम् (१) ....

(vi) अव्ययम् (४) ....

(vii) सर्वनाम (५) ....

(viii) नपुंसकलिङ्गम् (३) ....

आकाङ्क्षाविस्तरः

लिम्पन्ति (आसजन्ति, बध्नन्ति)

न लिम्पन्ति।

कानि न लिम्पन्ति? .... (नका. नपुं. प्र. बहु.)

कर्माणि कं न लिम्पन्ति? .... (दका. द्विती.एक. सर्व. १)

न (नास्ति)

किं नास्ति? .... (आका. स्त्री. प्र. एक.)

कस्य स्पृहा नास्ति? .... (दका. षष्ठी एक. सर्व.)

कुत्र मे स्पृहा नास्ति? .... (अका. नपुं. सप्त. एक.)

अभिजानाति (अनुव्यवस्यति, निश्चिनोति)

कः अभिजानाति? .... (पुं. प्र. एक. सर्व. १)

यः कम् अभिजानाति? .... (दका. द्विती.एक. सर्व. २)

यः केन रूपेण माम् अभिजानाति? .... (अव्ययम् ३)

इति यः माम् अभिजानाति सः किं भवति?........................ (अव्ययम् ४+कर्मणि क्रिया.)

सः कैः न बध्यते? .... (नका. नपुं. तृ. बहु.)

अन्वयः

कर्माणि मां न लिम्पन्ति, कर्मफले मे स्पृहा न इति यः माम् अभिजानाति सः कर्मभिः न बध्यते।

पदार्थः

पदम्	संस्कृतम्	हिन्दी
कर्माणि	विश्वसर्गादीनि	जगत् की सृष्टि आदि कर्म
माम्	ईश्वरम्	मुझ ईश्वर को
न	न हि (देहारम्भकत्वेन)	नहीं
लिम्पन्ति	बध्नन्ति	बाँधते हैं
कर्मफले	कर्मणां फले	कर्मों के फल की
मे	(आप्तकामस्य) मम	मुझे
स्पृहा	तृष्णा	चाह, इच्छा
न	नास्ति	नहीं है
इति	एवं प्रकारेण	इस प्रकार से
यः	यः अन्यः साधकः	जो साधक
माम्	ईश्वरम्	मुझ ईश्वर को
अभिजानाति	(आत्मत्वेन) निश्चिनोति	पहचान लेता है
सः	तादृशः साधकः	वह
कर्मभिः	देहारम्भकैः कर्मफलैः	कर्मों से
न बध्यते	न आसज्यते	नहीं बँधता है।

भावार्थः

संस्कृतम्– हे अर्जुन! येषां जगद्रचनादीनां कर्मणां कर्तारं त्वं मां मन्यसे, परमार्थतः तेषाम् अकर्ता एव अहम्। यतोहि तानि सृष्ट्यादीनि कर्माणि मां भगवन्तं निरहङ्कारत्वेन न आसज्जन्ति। यथा जीवानां कर्माणि तेषां नवदेहम् आरभन्ते तथा मम कर्माणि देहारम्भकाणि न भवन्ति इति भावः। अनेन कथनेन ईश्वरस्य कर्तृत्वं निरस्तम्। तस्य भोक्तृत्वमपि नास्ति। तदुक्तम्– कर्मणां फले मम भगवतः तृष्णा अपि नास्ति, नित्यतृप्तत्वात्। ईश्वरः हि सदा आप्तकामः। एवञ्च कर्तृत्वाभिमानेन फललिप्सया च कर्माणि जीवं बध्नन्ति, तदभावात् तानि ईश्वरं न लिम्पन्ति इत्येवं रूपेण यः अन्यः साधकः मां निश्चिनोति, सोऽपि शनैः शनैः अभिमानतृष्णाभ्यां रहितः सन् कर्मबन्धनात् मुक्तः स्यात् इत्यर्थः।

हिन्दी–कर्तापन का अहंकार न होने से संसार की सृष्टि, पालन आदि कर्म मुझ ईश्वर के बन्धन का कारण नहीं बनते। जीव में कर्तृत्वाभिमान रहता है अतः उसके द्वारा क्रियमाण शुभाशुभ कर्म पुनर्जन्म में कारणभूत होते हैं, किन्तु ईश्वर में कर्तृत्वाभिमान नहीं होता है। ईश्वर में फल-भोग की लिप्सा भी नहीं होती, क्योंकि वह सदा आप्तकाम नित्य तृप्त है। इस प्रकार ईश्वर न कर्ता है और न भोक्ता है, जो साधक इस रूप में मेरी पहचान कर लेता है, वह भी धीरे-धीरे कर्ता और भोक्तापन के अभिमान से दूर होता जाता है और ऐसा होने पर वह भी कर्म-बन्धन से मुक्त हो जाता है।

अवबोधाभ्यासः

अधः प्रदत्तानां प्रश्नानाम् उत्तराणि लिखतु–

(i) कर्माणि ईश्वरं कथं न लिम्पन्ति? ....

(ii) जीवं कर्माणि कथं बध्नन्ति? ....

(iii) कर्मबन्धनात् किं जायते? ....

(iv) फले स्पृहा कथं भवति? ....

(v) ईश्वरे भोक्तृत्वं कथं न सिद्ध्यति? ....

(vi) साधकः ईश्वरस्य अभिज्ञानं केन रूपेण कुर्यात्?

....

(vii) जीवः कर्मभिः कथं न बध्येत। ....

(viii) वस्तुतः येषां कर्मसु फलेषु च ममता, कामना आसक्तिः चास्ति, ते भगवतः दिव्यं कर्म न जानन्ति। स्पष्टं करोतु? ....

....

व्याकरणाभ्यासः

(अ) सन्धिः

यथोचितं सन्धिं विसन्धिं वा कृत्वा सन्धेर्नाम लिखतु–

यथा– योऽभिजानाति – यः + अभिजानाति (विसर्ग-सन्धिः) (पूर्वरूपम्)

कर्मभिर्न – कर्मभिः + न (विसर्ग-सन्धिः) (रेफः)

स बध्यते – सः + बध्यते (विसर्ग-सन्धिः) (लोपः)

(i) कोऽदात् – ....

(ii) सोऽब्रवीत् – ....

(iii) हंसोऽवदत् – ....

(iv) रामः + अपठत् – ....

(v) कः + अस्ति – ....

(vi) सः + अहसत् – ....

(vii) हरिर्हसति – ....

(viii) वायुर्वाति – ....

(ix) उच्चैर्गच्छन्ति – ....

(x) मुनिरुवाच – ....

(xi) ऋषिः + उग्रधन्वा – ....

(xii) नीचैः + दशा – ....

(xiii) गुरुः + उपदिशति – ....

(xiv) भानुः + भाति – ....

(xv) एषः गच्छामि – ....

(xvi) रामः आयाति – ....

(xvii) एषः + अस्मि – ....

(आ) समासः

कर्मफले - कर्मणां फलम् इति कर्मफलम्, (षष्ठी. तत्पु.) तस्मिन्

प्रदत्तविग्रहानुसारं अधः समस्तं पदं समासनाम च लिखतु–

यथा–	(i)	**दानफले**	दानस्य फलम् इति	–	**दानफलम् (षष्ठी. तत्पु.)**	**तस्मिन्**
	(ii)	....	आम्रस्य फलम् इति	–	....	....
	(iii)	....	घटस्य जलम् इति	–	....	....
	(iv)	....	विद्यालयस्य छात्रः इति	–	....	....
	(v)	....	हिमस्य नदः इति	–	....	....
	(vi)	....	नृणां पतिः इति	–	....	....

(इ) क्रियाकारक-सम्बन्धः

लिम्पन्ति	–	परस्मै. कर्तरि क्रिया.	अभिजानाति	–	परस्मै. कर्तरि क्रिया.
कर्माणि	–	कर्ता	यः	–	कर्ता
माम्	–	कर्म	माम्	–	कर्म
न	–	क्रियाविशेषणम्	इति	–	क्रियाविशेषणम्, अव्ययम्
अस्ति	–	आक्षेपगम्या क्रिया	बध्यते	–	आत्मने. कर्मणि क्रिया.
स्पृहा	–	कर्ता (कर्तृपदम्)	सः	–	कर्मपदम्
मे	–	सम्बन्धबोधकम्	कर्मभिः	–	कर्ता
न	–	(क्रियाविशेषणम्) निषेधार्थकम् अव्ययम्	न	–	क्रियाविशेषणम्

(ई) वाच्यप्रयोगः

(प)	कर्मभिः सः न बध्यते	–	कर्मवाच्यम्
	कर्माणि तं न बध्नन्ति	–	कर्तृवाच्यम्
(ii)	रामेण पशुः बध्यते	–	कर्मवाच्यम्
	रामः पशुं बध्नाति	–	कर्तृवाच्यम्

(iii) हरिणा दानवाः हताः - कर्मवाच्यम्

हरिः दानवान् हतवान् - कर्तृवाच्यम्

(iv) भानुना आकाशः दीपितः - कर्मवाच्यम्

भानुः आकाशं दीपितवान् - कर्तृवाच्यम्

(उ) पर्यायशब्दः

स्पृहा - १. तृष्णा, २. कामना, ३. लालसा, ४. लिप्सा, ५. आशा, ६. इच्छा

◆◆◆

८. श्लोकः

एवं ज्ञात्वा कृतं कर्म पूर्वैरपि मुमुक्षुभिः।
कुरु कर्मैव तस्मात्त्वं पूर्वैः पूर्वतरं कृतम्।। (भ. गी.४.१५)

पदच्छेदः

एवम्, ज्ञात्वा, कृतम्, कर्म, पूर्वैः, अपि, मुमुक्षुभिः।
कुरु, कर्म, एव, तस्मात्, त्वम्, पूर्वैः, पूर्वतरम्, कृतम्।।

पदच्छेदाभ्यासः

श्लोकस्थानि पदानि छिनत्तु–

(i) पूर्वैरपि – ....

(ii) कर्मैव – ....

(iii) तस्मात्त्वम् – ....

पदपरिचयः

पदम्	विश्लेषणम्	पदम्	विश्लेषणम्
एवम्	अव्ययम्	कुरु	कृ+लोट् मपु. एक. कर्तरि क्रिया.
ज्ञात्वा	क्त्वान्तम् अव्ययम्	कर्म	कर्मन् – नका. नपुं. द्विती. एक.
कृतम्	अका. नपुं. प्र. एक. कर्मणि क्तान्तं वि.	एव	अव्ययम् ३
कर्म	कर्मन् – नका. नपुं. प्र. एक.	तस्मात्	तद् – नपुं. पं. एक. सर्व.
पूर्वैः	अका. पुं. तृ. बहु. वि. सर्व. १	त्वम्	युष्मद् – दका. त्रि. प्र. एक. सर्व.
अपि	अव्ययम् २	पूर्वैः	अका. पुं. तृ. बहु. सर्व. २
मुमुक्षुभिः	मुमुक्षु – उका. पुं. तृ. बहु. विशे.	पूर्वतरम्	अका. नपुं. प्र. एक.
		कृतम्	अका. नपुं. प्र. एक. कर्मणि क्तान्तं वि.

वर्गीकरणाभ्यासः

अधः पदानि वर्गशः लिखतु–

(i) प्रथमान्तम् (५) ....

(ii) द्वितीयान्तम् (१) ....

(iii) तृतीयान्तम् (३) ....

(iv) पञ्चम्यन्तम् (१) ....

(v) सर्वनाम (४) ....

(vi) अव्ययम् (४) ....

(vii) नपुंसकलिङ्गम् (६) ....

(viii) नकारान्तम् (२) ....

(ix) विशेषणम् (३) ....

आकाङ्क्षाविस्तरः

कृतम् (आचरितम्)

किं कृतम्? .... (नका. नपुं. प्र. एक.)

कैः कर्म कृतम्? .... (अका. पुं. तृ. बहु. १)

कीदृशैः पूर्वैरपि कर्म कृतम्? .... (उका. पुं. तृ. बहु.)

किं कृत्वा मुमुक्षुभिः पूर्वैरपि कर्म कृतम्? .... (अव्ययम् १ + क्त्वान्तम् अव्ययम्)

(तस्मात् त्वं) **कुरु**

त्वं किं कुरु? .... (नका. नपुं. द्विती. एक.)

तस्मात् त्वं कीदृशं कर्मैव कुरु? .... (अका. नपुं. प्र. एक.)

पूर्वतरं कर्म कैरपि कृतम्? .... (अका. पुं. तृ. बहु.)

अन्वयः

एवं ज्ञात्वा पूर्वैः मुमुक्षुभिः अपि कर्म कृतं तस्मात् त्वं पूर्वैः कृतं पूर्वतरं कर्म एव कुरु।

पदार्थः

पदम्	संस्कृतम्	हिन्दी
एवम्	उक्तरूपेण	ऐसा
ज्ञात्वा	विज्ञाय	समझकर
पूर्वैः	पूर्ववर्तिभिः	पहले के साधकों ने
मुमुक्षुभिः	मोक्षार्थिभिः	मोक्ष के इच्छुक
अपि	समुच्चये	भी (अपना)
कर्म	कर्तव्यतम्	कर्तव्य
कृतम्	अनुष्ठितम्	किया था
तस्मात्	तेन हेतुना	इसलिए
त्वम्	त्वम् (अर्जुनः)	तुम
पूर्वैः	अतीतकालिकैः	प्राचीन पुरुषों के द्वारा
कृतम्	विहितम्	किया गया
पूर्वतरम्	प्राचीनतमम्	लोक संग्राहक प्राचीन
कर्म	कर्तव्यम्	कर्म
एव	अवश्यम्	ही
कुरु	विधेहि	करो।

भावार्थः

संस्कृतम्—अहङ्कारादिराहित्येन कृतं कर्म बन्धकं न भवति इत्येवं ज्ञात्वा मोक्षार्थिभिः पूर्वपुरुषैः जनकादिभिरपि सांसारिकं सत्कर्म अनुष्ठितम्। तस्मात् त्वमपि कर्मैव कुरु, न तूष्णीम् आसनं नापि संन्यसनम्। कर्मणैव आत्मशुद्धिः, ततः लोकोपकारः, ततश्च मोक्ष-प्राप्तिः भवति। अत एव पूर्वैः

जनकादिभिः ज्ञानिभिः चित्तशुद्ध्यर्थं लोकसंग्रहार्थं च पूर्वतरं वेदोक्तं कर्म कृतम्। एवञ्च अभिमानतृष्णाभ्यां रहितः सन् पूर्वतः निर्णीतं स्वकर्तव्यम् अवश्यं कुर्यात्। तेनैव शान्तिं मुक्तिं च लभते नरः।

हिन्दी–अहंकार और फलेच्छा के बिना किये गये कर्म से बन्धन नहीं होता यह समझकर ही मोक्ष की कामना से जनकादि पूर्व ज्ञानियों ने भी कर्म किया था। इसलिए हे अर्जुन! तुम भी कर्म ही करो। तटस्थ होकर चुपचाप बैठ जाना अथवा कर्म से संन्यास लेना (कर्म का त्याग) उचित नहीं है। सत्यनिष्ठा के साथ कर्तव्य पालन से आत्म शुद्धि, लोकोपकार और अन्त में मोक्ष की प्राप्ति होती है। इसीलिए पूर्व युग के ज्ञानी जनक आदि राजाओं ने वेद विहित अनादि सिद्ध कर्म का पालन किया, जिससे चित्तशुद्धि और लोकसंग्रह करने से विदेह कहलाये और अन्त में मोक्ष को प्राप्त किया। अतः अभिमान और तृष्णा से शून्य होकर अपने-अपने कर्तव्य का पालन करना चाहिए, उसी से शान्ति और मुक्ति प्राप्त होती है।

अवबोधाभ्यासः

अधः प्रदत्तान् प्रश्नान् उत्तरतु–

(i) कीदृशं कर्म बन्धकं भवति? ....

(ii) पूर्वे मुमुक्षवः के आसन्? ....

(iii) पूर्वे मुमुक्षवः किं ज्ञात्वा कर्म कृतवन्तः? ....

(iv) पूर्वतरस्य कर्मणः त्रीणि प्रयोजनानि कानि सन्ति? ....

(v) श्लोके त्वं-पदेन कस्य बोधः? ....

अवधेयम्, कर्तव्यानां विहित-कर्मणां त्यागमात्रेण संसारबन्धनाद् मुक्तिः न भवति, प्रत्युत निष्कामेन अनुष्ठानेन; कर्तव्यकर्मणः स्वधर्मरूपत्वात्।

व्याकरणाभ्यासः

(अ) सन्धिः

पूर्वैरपि - पूर्वैः + अपि (विसर्गसन्धिः)

कर्मैव - कर्म + एव (वृद्धिसन्धिः)

अधः प्रदत्त-ससन्धिपदानि विच्छिनत्तु विसन्धिपदानि च संयुनक्तु–

(i) जनैरेभिः कृतम् ....

(ii) हरिर्हरति पापानि ....

(iii) प्रभुर्बुभूषुः भुवनत्रयस्य ....

(iv) गुरुभिरनुज्ञातः ....

(v) नौः+नावि बद्धा ....

(vi) ऋषेः+आज्ञया हताः ....

(vii) श्रीः+विष्णुं प्रति ....

(viii) वधूः+धत्ते पदं नवम् ....

(ix) जन्मैव कर्मजन्यम् ....

(x) ममैव दुष्कृतम् किञ्चित् ....

(xi) दुष्ट+औद्धत्यं विनिश्चित्य ....

(xii) राष्ट्र+एकत्वं समेधताम् ....

(आ) कृत्प्रत्ययः

यथा– ज्ञात्वा - ज्ञा+त्वा (क्त्वा) अव्ययम्

क्त्वान्तेन पदेन वाक्यानि पूरयतु–

(i) आपणात् शाकं......................आयातु। (क्री+क्त्वा)

(ii) मध्येमार्गं मित्रं......................पृच्छतु। (दृश्+क्त्वा)

(iii) सः ....च गच्छेत्। (भुज्+क्त्वा, पा + क्त्वा)

(iv) कर्णौ...................... शृणोति। (दा+क्त्वा)

(v) आसने......................सूर्यं नमेत्। (स्था+क्त्वा)

(vi) नववस्त्राणि......................पितरौ प्रणमति। (धृ+क्त्वा)

यथा– कृतम् - कृ+क्त (त) भूते कर्मणि

क्तान्तेन पदेन वाक्यानि पूरयतु–

(i) पूर्वैः पूर्वतरं कर्म ....कृतम् ....। (कृ+क्त)

(ii) अधुनातनं कर्म ....। (मिश्र+क्त)

(iii) पुस्तकं मया ....। (पठ्+क्त)

(iv) तद् गुरुणा .... । (दा+क्त)

(v) अद्यैव तत् .... । (परा+वृत्+क्त)

(vi) मधुरः रसः .... । (पा+क्त)

(vii) अन्ते च शय्या .... । (लभ्+क्त)

(इ) क्रियाकारकसम्बन्धः

कृतम्	-	कर्मणि क्तान्ता क्रिया	कुरु	-	कर्तरि क्रिया
कर्म	-	कर्मपदम्	कर्म	-	कर्मपदम्
ज्ञात्वा	-	क्त्वान्ता गौणक्रिया	त्वम्	-	कर्ता
पूर्वैः	-	कर्ता	तस्मात्	-	हेतुबोधकम्
मुमुक्षुभिः	-	कर्तृविशेषणम्	पूर्वतरम्	-	कर्मविशेषणम्

(ई) पर्यायशब्दः

(i) **पूर्वः** - १. अतिक्रान्तः (अका. वि.), २. अतीतः (अका. वि.), ३. प्राचीनः (अका. वि.)

(ii) **मुमुक्षुः** - १. मोक्षेच्छुकः (अका. वि.), २. मोक्षार्थी (नका. वि.), ३. मोक्षसाधकः (अका. वि.)

◆◆◆

९. श्लोकः

किं कर्म किमकर्मेति कवयोऽप्यत्र मोहिताः।
तत्ते कर्म प्रवक्ष्यामि यज्ज्ञात्वा मोक्ष्यसेऽशुभात्।। (भ. गी.४.१६)

पदच्छेदः

किम्, कर्म, किम्, अकर्म, इति, कवयः, अपि, अत्र, मोहिताः।
तत्, ते, कर्म, प्रवक्ष्यामि, यद्, ज्ञात्वा, मोक्ष्यसे, अशुभात्।।

पदच्छेदाभ्यासः

अधः प्रदत्तपदानां पदच्छेदं करोतु–

(i) किमकर्मेति – ....

(ii) अकर्मेति – ....

(iii) कवयोऽप्यत्र – ....

(iv) तत्ते – ....

(v) यज्ज्ञात्वा – ....

(vi) मोक्ष्यसेऽशुभात् – ....

(vii) अप्यत्र – ....

पदपरिचयः

पदम्	विश्लेषणम्	पदम्	विश्लेषणम्
किम्	नपुं. प्र. एक. सर्व.१	तत्	तद् – दका. नपुं. द्विती. एक. सर्व. १
कर्म	कर्मन्–नका. नपुं. प्र. एक.१	ते	युष्मद् – दका. पुं. चतु. एक. सर्व.
किम्	नपुं. प्र. एक. सर्व. २	कर्म	कर्मन् – नका. नपुं. द्विती. एक.
अकर्म	अकर्मन् – नका. नपुं. प्र. एक. २	प्रवक्ष्यामि	प्र+वच्+लृट् उपु. एक. कर्तरि क्रिया
इति	अव्ययम् १	यद्	यद् – दका. नपुं. द्विती. एक. सर्व. २
कवयः	कवि – इका. पुं. प्र. बहु.	ज्ञात्वा	क्त्वान्तम् अव्ययम् ४
अपि	अव्ययम् २	मोक्ष्यसे	मुच् + लृट् मपु. एक. कर्तरि क्रिया
अत्र	अव्ययम् ३ (त्रलन्तम्)	अशुभात्	अका. नपुं. पं. एक. वि.
मोहिताः	अका. पुं. प्र. बहु. कर्तरि क्तान्तं वि.		

वर्गीकरणाभ्यासः

अधः श्लोकस्थपदानि वर्गशः लिखतु–

(i) प्रथमान्तम् (६) ....

(ii) द्वितीयान्तम् (३) ....

(iii) चतुर्थ्यन्तम् (१) ....

(iv) पञ्चम्यन्तम् (१) ....

(v) लृडन्तक्रियापदम् (२) ....

(vi) अव्ययम् (४) ....

(vii) क्त्वान्तम् (१) ....

(viii) क्तान्तम् (१) ....

(ix) सर्वनाम (५) ....

(x) नपुंसकलिङ्गम् (७) ....

(xi) पुंलिङ्गम् (३) ....

(xii) इकारान्तम् (१) ....

आकाङ्क्षाविस्तरः

मोहिताः (अनिर्णयं प्राप्ताः)

के मोहिताः? .... (इका. पुं. प्र. बहु.)

कवयोऽपि कुत्र मोहिताः? .... (त्रलन्तम्)

कवयोऽपि अत्र कस्मिन् विषये मोहिताः? .... (इत्यन्तं सर्व.)

मोक्ष्यसे (मुक्तो भविष्यसि)

कः मोक्ष्यते? .... त्वम् (इति आक्षेपगम्यम्)

त्वं कुतः मोक्ष्यसे? .... (अका. पुं. पं. एक.)

अशुभात् किं कृत्वा मोक्ष्यसे? .... (क्त्वान्तम्)

किं ज्ञात्वा अशुभात् मोक्ष्यसे? .... (सर्व. २)

यद् ज्ञात्वा अशुभात् मोक्ष्यसे, ... (लृट् उपु. एक. क्रिया.)
तत् त्वं कथं ज्ञास्यसि?

तत् कस्मै प्रवक्ष्यामि? .... (सर्व. चतु. एक.)

तत् किं ते प्रवक्ष्यामि? .... (नका. नपुं. द्विती. एक.)

अन्वयः

किं कर्म किम् अकर्म इति अत्र कवयः अपि मोहिताः। (अतः) यद् ज्ञात्वा अशुभात् मोक्ष्यसे, ते तत् कर्म प्रवक्ष्यामि।

पदार्थः

पदम्	संस्कृतम्	हिन्दी
किम्	किमिति प्रश्ने	क्या
कर्म	करणीयं कार्यम्	कर्म (करने योग्य है)
किम्	किमिति प्रश्ने	क्या
अकर्म	अकरणीयं कार्यम्	करने योग्य नहीं है
इति अत्र	इत्यस्मिन् विषये	इस विषय में
कवयः	मेधाविनः	विवेकी पुरुष
अपि	च (मन्दबुद्ध्यः मेधाविनः च)	भी
मोहिताः	मोहं गताः	भ्रम में पड़ जाते हैं
(अतः)	(अतः)	(इसलिए)
यद् (यत्)	यादृशं (कर्म)	जिसे
ज्ञात्वा	अनुष्ठाय	करके
अशुभात्	अशुभसंसारात्	भव-बन्धन से
मोक्ष्यसे	मुक्तिं प्राप्स्यसि	मुक्त हो जाओगे
ते	तुभ्यम्	तुझे
तत्	तादृशम्	वह
कर्म	करणीयं कर्तव्यम्	करने योग्य कर्म
प्रवक्ष्यामि	सन्देहोच्छेदेन उपदेक्ष्यामि	भली-भाँति बताऊँगा।

भावार्थः

संस्कृतम्–तत्त्ववेत्तृभिः ज्ञानिपुरुषैः सह सुविचार्य सत्कर्म कर्तव्यम्, न लोकपरम्परामात्रेण। अत एव पूर्वस्मिन् श्लोके 'पूर्वैः पूर्वतरं कृतम्' इति कर्मविशेषणम् उक्तम्, तदेव स्पष्टं कृतवान् भगवान्–कीदृशं कर्म करणीयं कीदृशं च न करणीयम् इति सत्कर्म-अकर्मविषययोः बुद्धिमन्तः जनाः अपि सन्देहं प्राप्नुवन्ति। यथा-याने स्थितस्य जनस्य 'निष्क्रियाः तटस्थाः च वृक्षाः चलन्ति' इति भ्रमः भवति तथा 'चक्षुःसन्निकृष्टः गच्छन् अपि पुरुषः न गच्छति' इति सन्देहः जायते। एवमेव कर्मणः स्वरूपम् अत्यन्तं दुर्निरूपम् अस्ति। अतः हे अर्जुन! अहं तुभ्यम् तत् कर्माकर्म च प्रकर्षेण असन्दिग्धं निरूपयिष्यामि, यद् अनुष्ठाय त्वम् अशुभात् जन्म-मरणचक्रात् मुक्तो भविष्यसि।

हिन्दी–तत्त्ववेत्ता ज्ञानी जनों के साथ सुविचार करके कर्म करना चाहिए, केवल लोक-परम्परा को प्रमाण मानकर कर्म करना उचित नहीं है। इसीलिए पूर्व श्लोक में भगवान् ने अनादिसिद्ध कर्म का उल्लेख किया है। इसका स्वरूप दुर्बोध है, इसीलिए विद्वान् भी सन्देह में पड़ जाते हैं कि कौन-सा कर्म करना चाहिए और कौन-सा कर्म नहीं करना चाहिए। व्यवहार में जैसे जल-थल भ्रम हो जाता है वैसे ही कर्म के स्वरूप में भी भ्रम हो जाना सम्भव है। अतः हे अर्जुन! मैं तुम्हें वह कर्म भली-भाँति समझाता हूँ, जिसे जानकर तुम भव-बन्धन से, पुनर्जन्म के चक्र से सदा के लिए छूट जाओगे।

अवबोधाभ्यासः

अधः प्रदत्तप्रश्नान् उत्तरतु–

(i) कीदृशं कर्म करणीयम्? ....

(ii) लोकपरम्परया कर्मस्वरूपनिर्धारणे कथं दोषाः सम्भवन्ति? ....

....

(iii) व्यवहारे सम्भावितस्य भ्रमस्य उदाहरणं लिखतु? ....

....

(iv) भ्रमज्ञानं कदा अपसरति? ....

(v) वस्तुनः परमार्थरूपम् अपरमार्थरूपं च भवतः इति भ्रमः कथं सिद्ध्यति? ....

....

(vi) अर्जुनस्य कर्ममोहं सुविचार्य लिखतु। ....

व्याकरणाभ्यासः

(अ) सन्धिः

अकर्मेति	–	अकर्म+इति	(गुणसन्धिः)
कवयोऽपि	–	कवयः+अपि	(विसर्गपूर्वरूपसन्धिः)
अप्यत्र	–	अपि+अत्र	(यणसन्धिः)
यज्ज्ञात्वा	–	यत्+ज्ञात्वा	(जश्त्वं श्चुत्वं च)
मोक्ष्यसेऽशुभात्	–	मोक्ष्यसे+अशुभात्	(विसर्गपूर्वरूपसन्धिः)

अधः सन्धिं कृत्वा सन्धिनाम च निर्दिशतु–

(i) मोक्ष्यसे + अधुना – ....

(ii) ग्रामे + अस्ति – ....

(iii) उपवने + अटन्ति – ....

(iv) तत्त्ववित् + जायते – ....

(v) तत् + जन्म – ....

(vi) एतत् + ज्ञात्वा – ....

(vii) इति + अत्र – ....

(viii) सन्ति + एकस्मिन् – ....

(ix) लिखतु + अक्षराणि – ....

(x) ऋषयः + अगच्छन् – ....

(xi) बालः + अपि – ....

(xii) गुरवः + अर्चनीयाः – ....

(xiii) राम + इति – ....

(ivx) तीर्थ + उदकम् – ....

(vx) महा + ऋषिः – ....

(आ) समासः

अकर्म - **न कर्म इति** - (नञ् तत्पु.)

अशुभात् - **न शुभम् इति अशुभम्, तस्मात्** (नञ् तत्पु.)

अधः विग्रहं पठित्वा समस्तं रूपं लिखतु–

(i) न पटुः इति - ....

(ii) न वनम् इति - ....

(iii) न सरोजम् इति - ....

(iv) न अग्निः इति - ....

(v) न मृतम् इति - ....

(vi) न पुण्यम् इति - ....

(इ) एकशेषः प्रश्लेषश्च

ते कर्म - कर्म च कर्म च इति एकशेषेण 'कर्म' इत्येकमेव पदं प्रयुज्यते, किन्तु **बोधः** कर्मद्वयस्य भविष्यति। तत्र एकस्मिन् कर्मपदे अकारप्रश्लेषेण '(तेऽकर्म) ते **अकर्म**' इति पदच्छेदः। तथा चात्र कर्मपदेन कर्म अकर्म इत्युभयार्थः प्रतीयते। अतः ते कर्म अकर्म च प्रवक्ष्यामि इति अर्थं विद्वांसः वर्णयन्ति।

अधः प्रदत्तानि एकशेषसमासस्य उदाहरणानि पठन्तु–

(i) माता च पिता च इति = पितरौ

(ii) हंसी च हंसः च इति = हंसौ

(iii) रामश्च रामश्च रामश्चेति = रामाः

(iv) आगतः आगते इति = आगताः

(ई) क्रियाकारकसम्बन्धः

अस्ति	-	इति आक्षेपगम्या क्रिया	तत्	-	कर्मविशेषणम्
कर्म	-	कर्ता	ते	-	तादर्थ्यम्
अकर्म	-	कर्ता	मोक्ष्यसे	-	कर्तरि क्रिया

मोहिताः	–	क्रियाबोधकं क्तान्तं पदम्	अशुभात्	–	अपादानम्
कवयः	–	कर्तृपदम्	ज्ञात्वा	–	गौणक्रिया
प्रवक्ष्यामि	–	कर्तरि क्रिया	यत्	–	गौणक्रियायाः कर्म
कर्म	–	कर्मकारकम्			

(उ) पर्यायशब्दः

कविः – १. मनीषी – (मनीषिन्–नका. पुं.), २. विद्वान् (विद्वस् – सका. पुं.), ३. क्रान्तदर्शी (क्रान्तदर्शिन् – नका. पुं.)

शुभम् – १. मङ्गलम् (अका. वि.), २. पुण्यम् (अका. वि.),

◆◆◆

१०. श्लोकः

ब्रह्मार्पणं ब्रह्म हविर्ब्रह्माग्नौ ब्रह्मणा हुतम्।
ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्मसमाधिना।। (भ. गी.४.२४)

पदच्छेदः

ब्रह्म, अर्पणम्, ब्रह्म, हविः, ब्रह्म+अग्नौ, ब्रह्मणा, हुतम्।

ब्रह्म, एव, तेन, गन्तव्यम्, ब्रह्म-कर्म-समाधिना।।

पदच्छेदाभ्यासः

अधः पदानि छिनत्तु–

(i) ब्रह्मार्पणम् – ....

(ii) हविर्ब्रह्म – ....

(iii) ब्रह्माग्नौ – ....

(iv) ब्रह्मैव – ....

(v) ब्रह्मकर्मसमाधिना – ....

पदपरिचयः

पदम्	विश्लेषणम्	पदम्	विश्लेषणम्
ब्रह्म	ब्रह्मन्- नका. नपुं. प्र. एक. १	ब्रह्म	ब्रह्मन्- नका. नपुं. प्र. एक. ३
अपर्णम्	अका. नपुं. प्र. एक.	एव	अव्ययम्
ब्रह्म	ब्रह्मन्- नका. नपुं. प्र. एक. २	तेन	तद्- दका. पुं. तृ. एक. सर्व.
हविः	हविष्- षका. नपुं. प्र. एक.	गन्तव्यम्	अका. नपुं. प्र. एक. (तव्यान्तं वि.)
ब्रह्माग्नौ	ब्रह्माग्नि- इका. पुं. सप्त. एक. (समस्तम्)	ब्रह्म-	बह्मन्- नका. नपुं. प्र. एक. ४
ब्रह्मणा	ब्रह्मन्- नका. नपुं. तृ. एक.	कर्म-	कर्मन्- नका. नपुं. प्र. एक.
हुतम्	अका. नपुं. प्र. एक. (क्तान्तं वि.)	समाधिना	समाधि- इका. पुं. तृ. एक. (समस्तम्)

वर्गीकरणाभ्यासः

श्लोकपदानि अधः वर्गशः विभजतु–

(i) प्रथमान्तम् (८) ....

(ii) तृतीयान्तम् (३) ....

(iii) सप्तम्यन्तम् (१) ....

(iv) नकारान्तम् (१) ....

(v) षकारान्तम् (१) ....

(vi) नपुंसकलिङ्गम् (१) ....

(vii) पुंलिङ्गम् (३) ....

(viii) अव्ययम् (१) ....

(ix) विशेषणम् (२) ....

आकाङ्क्षाविस्तरः

अस्ति (आक्षेपगम्या क्रिया।)

किमस्ति? .... (नका. नपुं. प्र. एक. १)

ब्रह्म किम् अस्ति? .... (अका. नपुं. प्र. एक.)

पुनश्च ब्रह्म किम् अस्ति? .... (षका. नपुं. प्र. एक.)

हुतम् (हवनं कृतम्)

केन हुतम्? .... (नका. नपुं. तृ. एक.)

ब्रह्मणा कुत्र हुतम्? .... (इका. पुं. सप्त. एक.)

गन्तव्यम्।

किं गन्तव्यम्? .... (नका. नपुं. प्र. एक. ३)

केन ब्रह्म गन्तव्यम् .... (इका. पुं. तृ एक.)

अन्वयः

ब्रह्म अर्पणं, ब्रह्म हविः, ब्रह्मणा ब्रह्माग्नौ हुतं, तेन ब्रह्मकर्मसमाधिना ब्रह्म एव गन्तव्यम्।

पदार्थः

पदम्	संस्कृतम्	हिन्दी
ब्रह्म	परमेश्वरः	परमात्मा
अर्पणम्	हवनसाधनं मन्त्रादि स्रुवादि च	स्रुवादि साधन है
ब्रह्म	परमेश्वरः	परमात्मा
हविः	घृतादि-हवनसामग्रीः	घी आदि हवन सामग्री है
ब्रह्मणा	परमेश्वरेण	परमात्मा के द्वारा
ब्रह्माग्नौ	ब्रह्मरूपवह्नौ	ब्रह्मरूपी आग में
हुतम्	हवनं कृतम्	हवन किया जाता है
तेन	तस्माद्हेतोः	इसलिये
ब्रह्मकर्मसमाधिना	ब्रह्मात्मके कर्मणि स्थितेन जनेन	ब्रह्मरूपी कर्म में स्थित रहने वाला
ब्रह्म एव	परमेश्वरः एव (भवति)	ब्रह्म को ही प्राप्त करता है

भावार्थः

संस्कृतम्–'अवश्यमेव भोक्तव्यं कृतं कर्म शुभाशुभम्' इत्यादिवचनेन, क्रियमाणं कर्म पुनर्जन्मबन्धनं करोत्येव इति अवगम्यते। किन्तु चित्तशुद्धये लोकोपकाराय च कृतं पूर्वतरं कर्म ज्ञानहेतुत्वेन बन्धकं न भवति, अपितु तत् परमेश्वरे परब्रह्मणि विलीयते, ब्रह्मरूपं सम्पद्यते, अयमेव अभिप्रायः अस्मिन् श्लोके यज्ञरूपकेण प्रदर्शितः। तथाहि– यज्ञो नाम क्रियाकारकसमूहः। यथा– यज्ञे होमक्रिया, घृतादिद्रव्यकर्म, हवनकर्त्ता अध्वर्युः, स्रुवादिकरणम्, अग्निः अधिकरणम्, देवतारूपं सम्प्रदानम् च भवति। एवमेव कर्मणि अपि काचित् क्रिया कर्मकर्तृकरणादीनि कारणानि च भवन्ति। अत एव उभयोः रूपकालङ्कारेण इह वर्णनम्। तत्र निष्कामभावेन आत्मशोधनार्थं लोकसङ्ग्रहार्थं च क्रियमाणे कर्मणि यावान् क्रियाकारकसमूहः तत्सर्वं ब्रह्मैव। अत एव तत् कर्म ब्रह्मणि विलीयते, तस्य बन्धनं न भवतीति भावः। तद्यथा– स्रुवादिकरणरूपम् अर्पणं ब्रह्मरूपम्, घृतादिकं हविर्द्रव्यं ब्रह्मरूपम्, अधिकरणम् अग्निः ब्रह्म, हवनकर्ता ब्रह्म, हुतं होमक्रिया ब्रह्मरूपा, तेन हवनेन गन्तव्यं ब्रह्मैव। एवञ्च

एतादृशं कर्म ब्रह्मैव, तस्मिन् ब्रह्मकर्मणि समाधिमान् ब्रह्मीभूतः साधकः, तेन प्राप्तव्यं ब्रह्मैव स्यात्। अतः सः कर्मयोगी अवश्यं संसारात् मुच्यते। तस्य कर्म बन्धकं न भवतीत्यर्थः।

हिन्दी–कर्म से भोग होता है मुक्ति नहीं, किन्तु आत्मशोधन एवं लोकोपकार के लिए किया जाने वाला निष्काम कर्म ज्ञान का हेतु होने से वह परमात्मरूप हो जाता है, उसका फल ब्रह्म में ही विलीन हो जाता है, इसी बात को यहाँ यज्ञ का रूपक देते हुए समझाया गया है। वस्तुतः क्रिया-कारक समूह को ही यज्ञ कहते हैं। उसमें होम क्रिया, पुरोहित कर्ता, हवन द्रव्य कर्म, स्रुवा आदि करण, अग्नि अधिकरण एवं देवता सम्प्रदान होते हैं। इसी प्रकार सभी कर्म में कोई न कोई क्रिया होती है और उसके कर्ता, कर्म, करण आदि कारक होते हैं, इसीलिये इस श्लोक में यज्ञ और कर्म को रूपक के रूप में प्रदर्शित किया गया है–

जुहू आदि अर्पण करण ब्रह्मरूप है, घृतादि हविष् ब्रह्म है, अधिकरण अग्नि ब्रह्म है, ब्रह्म ही यजमान कर्ता है, वही होम क्रिया और उससे गन्तव्य है। इसीलिये कर्म को ब्रह्म समझ कर उसमें समाधि लगाने वाले कर्मयोगी साधक का गन्तव्य अवश्य ब्रह्म ही है।

अवबोधाभ्यासः

अधः प्रदत्तान् प्रश्नान् उत्तरतु–

(i) कीदृशं कर्म बन्धनं भवति? ....

(ii) कर्मयज्ञयोः कीदृशं सादृश्यम्? ....

(iii) कर्मणः ब्रह्मरूपवर्णनेन किं फलम्? ....

(iv) अस्मिन् श्लोके 'अस्ति' क्रियायाः आक्षेपः कुत्र-कुत्र भवति? ....

....

(v) केन कर्मणा स्वर्गादिफलानि लभन्ते? ....

(vi) 'ब्रह्मकर्मणि स्थितिः' इति कथनस्य किं तात्पर्यम्? ....

....

व्याकरणाभ्यासः

(अ) सन्धिः

ब्रह्मार्पणम् – ब्रह्म+अर्पणम् (दीर्घसन्धिः)

ब्रह्माग्नौ – ब्रह्म+अग्नौ (दीर्घसन्धिः)

ब्रह्मैव - ब्रह्म+एव (वृद्धिसन्धिः)

हविर्ब्रह्म - हविः+ब्रह्म (विसर्गरेफसन्धिः)

अधः विसन्धिपदानि ससन्धीनि कृत्वा वाक्यं पूरयतु–

(i) .... इव पन्नगीं जानीहि। (पञ्च + आस्याम्)

(ii) क्षेत्रे कृषकः .... तपति। (पञ्च + अग्नीन्)

(iii) त्वं .... पाठय। (हरि + ईशम्)

(iv) जलात् .... भवति। (विद्युत् + उत्पत्तिः)

(v) दुग्धं .... महत्। (गीता + अमृतम्)

(vi) सर्वम् .... करोति। (ईश्वर + अर्पणम्)

(vii) कुरु .... तस्मात् त्वम्। (कर्म + एव)

(viii) .... केशाः कृष्णाः सन्ति। (कृष्ण + एडकायाः)

(ix) बालकाय .... रोचते। (मिष्ट + अन्नं)

(x) .... इव सृजति। (कविः + ब्रह्मा)

(xi) तस्य .... रोगात्। (तनुः + दुर्बला)

(xii) .... मुखं पश्यति। (हरेः मुग्धं)

(आ) समासः

ब्रह्माग्नौ - ब्रह्म एव अग्निः इति ब्रह्माग्निः, तस्मिन् (सप्त. तत्पु.)

समस्तं पदं विलिसमासनाम निदर्शितु–

(i) मानः एव धनम् इति - ....

(ii) विद्या एव धनम् इति - ....

(iii) कर्म एव पूजा इति - ....

(iv) शास्त्रम् एव नेत्रम् इति - ....

(v) अध्ययनम् एव व्यवसनम् - ....

(vi) ब्रह्म एव कर्म इति - ....

ब्रह्मकर्मसमाधिना - ब्रह्म एव कर्म इति ब्रह्मकर्म, ब्रह्मकर्मणि समाधिः यस्य सः ब्रह्मकर्मसमाधिः, तेन ब्रह्मकर्मसमाधिना। (तत्पु. + बहुव्रीहिः)

अधः समस्तपदानां विग्रहः कार्यः–

(i) व्याकरणशास्त्रप्रियः – ....

(ii) अश्वारोहणव्यसनः – ....

(iii) मुक्ताकाशवासः – ....

(iv) विद्याधनप्रधानः – ....

(v) दुष्टदलनस्वभावः – ....

(vi) भक्तिरसरञ्जनः – ....

(इ) कृत्प्रत्ययः

अर्पणम् - अर्प्यतेऽनेन इति, अर्पि+ल्युट् (अन)

अधः ल्युडन्तं पदं लिखतु–

(i) कृष् + ल्युट् – ....

(ii) वृष् + ल्युट् – ....

(iii) कृ + ल्युट् – ....

(iv) मृ + ल्युट् – ....

(v) हृ + ल्युट् – ....

(vi) पा + ल्युट् – ....

(vii) दा + ल्युट् – ....

गन्तव्यम् - (गन्तुं योग्यम्) गम् + तव्य

अधः तव्यान्तेन पदेन वाक्यं पूरयतु–

(i) प्रमादः न .... (कृ + तव्य)

(ii) विद्यालयः समयेन .... (गम् + तव्य)

(iii) सूर्योदयात् पूर्वम् .... (उद् + स्था + तव्य)

(iv) प्रतिदिनं पितरौ .... (प्र + नम् + तव्य)

(v) स्नात्वा .... (मुञ् + तव्य)

(ई) क्रियाकारकसम्बन्धः

अस्ति	-	आक्षेपगम्या क्रिया	ब्रह्मणा	-	कर्ता
ब्रह्म	-	कर्ता	हुतम्	-	क्रियाबोधकं क्तान्तम्
अर्पणम्	-	कर्तृविशेषणम्	तेन	-	विशेषणम्
ब्रह्म	-	कर्ता	गन्तव्यम्	-	क्रियाबोधकं तव्यान्तं विशेषणम्
हविः	-	कर्तृविशेषणम्	ब्रह्म	-	कर्म
ब्रह्माग्नौ	-	अधिकरणम्	ब्रह्मकर्मसमाधिना	-	कर्ता

(उ) पर्यायशब्दः

हविः - १. हविष्यम् (अका. नपुं.), २. हवनद्रव्यम् (अका. नपुं.), ३. होमसामग्रीः (ईका. स्त्री.)

अग्निः - १. अनलः (अका. पुं.), २. वह्निः (इका. पुं.), ३. पावकः (अका. पुं.), ४. कृशानुः (उका. पुं.)

समाधिः - १. चित्तैकाग्र्यम् (अका. नपुं.), २. प्रणिधानम् (अका. नपुं.), ३. ध्यानम् (अका. नपुं.)

◆◆◆

११. श्लोकः

श्रेयान्द्रव्यमयाद्यज्ञाज्ज्ञानयज्ञः परन्तप।
सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते।। (भ. गी.४.३३)

पदच्छेदः

श्रेयान्, द्रव्यमयात्, यज्ञात्, ज्ञान-यज्ञः, परन्तप।
सर्वम्, कर्म, अखिलम्, पार्थ, ज्ञाने, परिसमाप्यते।।

पदच्छेदाभ्यासः

अधः प्रदत्तानि पदानि पृथक् करोतु–

(i) द्रव्यमयाद्यज्ञात् – ....

(ii) यज्ञाज्ज्ञानयज्ञः – ....

(iii) कर्माखिलम् – ....

पदपरिचयः

पदम्	विश्लेषणम्	पदम्	विश्लेषणम्
श्रेयान्	श्रेयस्- सका. पुं. प्र. एक. वि.	कर्म	कर्मन्- नका. नपुं. प्र. एक. विशे.
द्रव्यमयात्	अका. पुं. पं. एक. वि.	अखिलम्	अका. नपुं. प्र. एक. वि.
यज्ञात्	अका. पुं. पं. एक. विशे.	पार्थ	अका. पुं. सम्बो. एक २
ज्ञानयज्ञः	अका. पुं. प्र. एक. विशे.	ज्ञाने	अका. नपुं. सप्त. एक.
परतनप	अका. पुं. सम्बो. एक. १	परिसमाप्यते	परि+सम्+आप+लट् प्रपु. एक. कर्मणि
सर्वम्	अका. नपुं. प्र. एक. सर्व.		

वर्गीकरणाभ्यासः

श्लोकपदानि अधः वर्गशः विभजतु–

(i) प्रथमान्तम् (५) ....

(ii) पञ्चम्यन्तम् (२) ....

(iii) सप्तम्यन्तम् (१) ....

(iv) सम्बोधनान्तम् (२) ....

(v) नपुंसकलिङ्गम् (४) ....

(vi) पुंलिङ्गम् (६) ....

(vii) विशेषणम् (३) ....

(viii) विशेष्यम् (३) ....

(ix) क्रियापदम् (१) ....

आकाङ्क्षाविस्तरः

श्रेयान् (प्रशस्यतरः अस्ति)

कः श्रेयान् अस्ति? .... (अका. पुं. प्र. एक. विशे.)

ज्ञानयज्ञः कस्मात् श्रेयान्? .... (अका. पुं. पं. एक. विशे.)

ज्ञानयज्ञः कीदृशात् यज्ञात् श्रेयान्? .... (अका. पुं. पं. एक. विशे.)

परिसमाप्यते (पर्यवस्थाप्यते)।

किं परिसमाप्यते? .... (नका. नपुं. प्र. एक. विशे.)

कीदृशं कर्म परिसमाप्यते? .... (अका. नपुं. प्र. एक. सर्व.)

पुनश्च कीदृशं कर्म परिसमाप्यते? .... (अका. नपुं. प्र. एक. वि.)

सर्वम् अखिलं कर्म कुत्र परिसमाप्यते? .... (अका. नपुं. सप्त. एक.)

अन्वयः–परन्तप, ज्ञानयज्ञः द्रव्यमयात् यज्ञात् श्रेयान् (अस्ति)। पार्थ, ज्ञाने सर्वम् अखिलं मर्म परिसमाप्यते।

पदार्थः

पदम्	संस्कृतम्	हिन्दी
परन्तप!	द्विषन्तप!	हे शत्रुसूदन!
द्रव्यमयात्	वस्तुप्रधानात्	द्रव्यों से सम्पादित होने वाले
यज्ञात्	यागात्	यज्ञ की अपेक्षा
ज्ञानयज्ञः	ज्ञानरूपः यागः	ज्ञानयज्ञ
श्रेयान्	प्रशस्यतरः	श्रेष्ठ है।
पार्थ!	हे अर्जुन!	हे अर्जुन!
सर्वम्	अग्निहोत्रादिकं सर्वविधम्	सभी प्रकार का

अखिलम्	सम्पूर्णम्	सारा
कर्म	अनुष्ठानम्	कर्म
ज्ञाने	अध्यात्म ज्ञाने	अध्यात्म ज्ञान में
परिसमाप्यते	पर्यवस्यति	परिणत हो जाता है।

भावार्थः

संस्कृतम्–पूर्वेषु श्लोकेषु यज्ञानाम् अनेके प्रकाराः निर्दिष्टाः सन्ति। ते सर्वे यज्ञाः कर्मजन्याः भवन्ति। तेषु मुख्यो द्विधा विभागः – द्रव्ययज्ञः ज्ञानयज्ञश्च। तत्र द्रव्ययज्ञः फलस्य उत्पादकः किन्तु ज्ञानयज्ञः फलं नोत्पादयति। कर्मफलेन बन्धनं भवति इत्यवधेयम्। अतः भगवान् श्रीकृष्णः अर्जुनं सम्बोधयति– हे शत्रुसूदन! अनेकैः द्रव्यैः सम्पाद्यमानात् द्रव्ययज्ञात् ज्ञानयज्ञः प्रशस्यतरः उत्तमः च भवति। यतोहि द्रव्ययज्ञः अनात्मव्यापारजन्यः, अतः फलोत्पादकश्च। यद्यपि ज्ञानयज्ञोऽपि मनोव्यापाराधीनः तथापि ज्ञानं मनोजन्यं नास्ति, किन्तु मनसः व्यापारेण तद् अनुभूयते। अतः हे पार्थ! योगिनां सर्वविधं सम्पूर्णं कर्म ज्ञानस्वरूपे पर्यवस्यति। ततः एव मोक्ष इति भावः।

हिन्दी–पूर्व श्लोकों में अनेक प्रकार के यज्ञों का उल्लेख हुआ है। वे सारे के सारे यज्ञ कर्म से ही सम्पादित किये जाते हैं। उन यज्ञों को मुख्य रूप से द्रव्ययज्ञ और ज्ञानयज्ञ नाम से दो भागों में विभक्त किया जा सकता है। उनमें द्रव्ययज्ञ फल का उत्पादक किन्तु ज्ञानयज्ञ से कोई फल उत्पन्न नहीं होता है। कर्म से उत्पन्न फल ही बन्धन का कारण है। अतः भगवान् श्रीकृष्ण समझा रहे हैं कि हे वैरिमर्दन! अनेक द्रव्यों से सम्पादित होने वाले द्रव्ययज्ञ की अपेक्षा ज्ञान-यज्ञ श्रेष्ठ है। इसलिए हे पार्थ! कर्मयोगी सब प्रकार के सम्पूर्ण कर्म को ज्ञान में स्थापित करते हैं। अध्यात्म ज्ञान में कर्म का अन्तर्भाव होने से ज्ञान की प्रधानता रहती है और वह कर्म निष्काम हो जाता है।

अवबोधाभ्यासः

अधः प्रदत्तानां प्रश्नानाम् उत्तरं लिखतु–

(i) यज्ञेषु मुख्यः विभागः कतिविधः? ....

(ii) कः यज्ञः फलम् उत्पादयति? ....

(iii) कः यज्ञः श्रेयान् भवति? ....

(iv) ज्ञाने कस्य अन्तर्भावः? ....

(v) अन्तर्भावः इति कथनस्य किं तात्पर्यम्? ....

(vi) ज्ञानं मनोजन्यमस्ति न वा? ....

(vii) श्लोके 'अस्ति' क्रियायाः कुत्रान्वयः? ....

व्याकरणाभ्यासः

(अ) सन्धिः

द्रव्यमयाद्यज्ञात् － द्रव्यमयात्+यज्ञात् (जश्त्वसन्धिः)

यज्ञाज्ज्ञानयज्ञः － यज्ञात्+ज्ञानयज्ञः (जश्त्वसन्धिः श्चुत्वसन्धिश्च)

कर्माखिलम् － कर्म+अखिलम् (दीर्घसन्धिः)

सन्धिं कृत्वा वाक्यं पूरयतु–

(i) .... गच्छति। (गृहात्+उद्यानं)

(ii) .... उत्पतन्ति। (वृक्षात्+विहगाः)

(iii) .... विहगानाम्। (एतत्+गृहं)

(iv) .... फलम्। (श्रमात्+जायते)

(v) .... वाञ्छितं सुखम्। (एतत्+जन्यं)

(vi) .... अवाप्यते। (पुस्तकात्+ज्ञानम्)

(vii) .... मध्ये स्थितः। (तस्य+आलयस्य)

(viii) .... वित्तं सः नरः कुलीनः। (यस्य+अस्ति)

(ix) .... न भवति शान्तिः। (भय+आतुराणाम्)

(आ) समासः

ज्ञानयज्ञः - ज्ञानम् एव यज्ञः इति (तत्पु.)

अधः यथाविग्रहं समस्तं पदं लिखतु–

(i) स्वाध्यायः एव यज्ञः － ....

(ii) अभेददर्शनम् एव यज्ञः － ....

(iii) पशवः एव धनम् － ....

(iv) जनता एव जनार्दनः － ....

(इ) तद्धितप्रत्ययः

श्रेयान् - प्रशस्य + इयसुन् (श्र + इयस्) अयम् अनयोः अतिशयेन प्रशस्यः।

आम्रमयः - प्रचुरम् आम्रम् अस्मिन् इति (आम्र+मयट्)

गोमयम् - गोः विकारः इति (गो+मयट्)

अधः लिखितानि उदाहरणानि स्मरणीयानि–

(i) **लघीयान्** - अयम् अनयोः अतिशयेन लघुतरः इति (लघु+इयसुन्)

(ii) **पटीयसी** - इयम् अनयोः अतिशयेन पटुतरा इति (पटु+इयसुन्+ङीप्)

(iii) **प्रथीयः** - इदम् अनयोः अतिशयेन पृथुतरम् इति (पृथु+इयसुन्)

(iv) **गरीयान्** - अयम् अनयोः अतिशयेन गुरुतरः इति (गुरु+इयसुन्)

(v) **द्रव्यमयात्** - प्रचुरं द्रव्यम् अस्मिन् इति [द्रव्य+मयट् (मय)] द्रव्यमयः, तस्मात्

(vi) **ज्ञानमयम्** - प्रचुरं ज्ञानम् अस्मिन् इति (ज्ञान+मयट्)

(vii) **मोदकमयः** - प्रचुरं मोदकम् अस्मिन् इति (मोदक+मयट्)

(viii) **वाङ्मयम्** - वाचः विकारः इति (वाच्+मयट्)

(ई) क्रियाकारकसम्बन्धः

अस्ति	-	आक्षेपगम्या क्रिया	परिसमाप्यते	-	कर्मणि क्रिया
ज्ञानयज्ञः	-	कर्ता	कर्म	-	कर्मकारकम्
श्रेयान्	-	कर्तृविशेषणम्	सर्वम्	-	कर्मविशेषणम्
यज्ञात्	-	विभागार्थ - पञ्चमी	अखिलम्	-	कर्मविशेषणम्
द्रव्यमयात्	-	विशेषणम्	ज्ञाने	-	अधिकरणम्

(उ) वाच्यप्रयोगः

१. **कर्मणि** - योगिभिः ज्ञाने कर्म परिसमाप्यते।

कर्तरि - योगिनः ज्ञाने कर्म परिसमापयन्ति।

२.	**कर्मणि** –	योगिभिः ईश्वरे बुद्धिः धार्यते।
	कर्तरि –	योगिनः ईश्वरे बुद्धिं धारयन्ति।
३.	**कर्मणि** –	योगिभिः जीवने कर्मयोगः उपास्यते।
	कर्तरि –	योगिनः जीवने कर्मयोगम् उपासते।

(उ) पर्यायशब्दः

द्रव्यम् – १. वित्तम् (अका. नपुं.), २. धनम् (अका. नपुं.), ३. वसु (उका. नपुं.)

यज्ञः – १. यागः (अका. पुं), २. मखः (अका. पुं), ३. क्रतुः (उका. पुं.)

◆◆◆

१२. श्लोकः

तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया।
उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः।। (भ. गी.४.३४)

पदच्छेदः

तद्, विद्धि, प्रणिपातेन, परिप्रश्नेन, सेवया।

उपदेक्ष्यन्ति, ते, ज्ञानम्, ज्ञानिनः, तत्त्व-दर्शिनः।।

पदच्छेदाभ्यासः

अधः प्रदत्तानि पदानि छिनत्तु–

(i) तद्विद्धि – ....

(ii) ज्ञानिनस्तत्त्वदर्शिनः – ....

(iii) तत्त्वदर्शिनः – ....

पदपरिचयः

पदम्	विश्लेषणम्	पदम्	विश्लेषणम्
तद्	तद् - दका. नपुं. द्विती. एक. सर्व.	उपदेक्ष्यन्ति	उप+दिश्+लृट् प्रपु. बहु. कर्तरि क्रिया
विद्धि	विद्+लोट् मपु. एक. कर्तरि क्रिया	ते	युष्मद्- दका. चतु. एक. सर्व.
प्रणिपातेन	अका. पुं. तृ. एक. १	ज्ञानम्	अका. नपुं. द्विती. एक.
परिप्रश्नेन	अका. पुं. तृ. एक. २	ज्ञानिनः	ज्ञानिन्- नका. पुं. प्र. बहु.
सेवया	आका. स्त्री. तृ. एक.	तत्त्वदर्शिनः	तत्त्वदर्शिन्- नका. पुं. प्र. बहु. वि. समस्तम्

वर्गीकरणाभ्यासः

अधः श्लोकपदानि वर्गशः लिखतु–

(i) प्रथमान्तम् (२) ....

(ii) द्वितीयान्तम् (२) ....

(iii) तृतीयान्तम् (३) ....

(iv) चतुर्थ्यन्तम् (१) ....

(v) विशेषणम् (१) ....

(vi) नपुंसकलिङ्गम् (२) ....

(vii) पुंलिङ्गम् (४) ....

(viii) स्त्रीलिङ्गम् (१) ....

(ix) क्रियापदम् (२) ....

(x) समस्तम् (१) ....

(xi) सर्वनाम (२) ....

आकाङ्क्षाविस्तरः

विद्धि (जानीहि)

किं विद्धि? .... (दका. नपुं. द्विती. एक. सर्व.)

तत् कथं विद्धि? .... (अका. पुं. तृ. एक. १)

पुनश्च तत् कथं विद्धि? .... (अका. पुं. तृ. एक. २)

पुनश्च तत् कथं विद्धि? .... (आका. स्त्री. तृ. एक.)

उपदेक्ष्यन्ति (उपदेशं करिष्यन्ति)

के उपदेक्ष्यन्ति? .... (नका. पुं. प्र. बहु.)

कथम्भूताः ज्ञानिनः उपदेक्ष्यन्ति? .... (नका. पुं. तृ. एक. वि.)

तत्त्वदर्शिनः ज्ञानिनः किम् उपदेक्ष्यन्ति? .... (अका. नपुं. द्विती. एक.)

तत्त्वदर्शिनः ज्ञानिनः ज्ञानं कस्मै उपदेक्ष्यन्ति? .... (दका. चतु. एक. सर्व.)

अन्वयः

प्रणिपातेन परिप्रश्नेन सेवया तद् विद्धि। तत्त्वदर्शिनः ज्ञानिनः ते ज्ञानम् उपदेक्ष्यन्ति।

पदार्थः

पदम्	संस्कृतम्	हिन्दी
प्रणिपातेन	दण्डवन्नमस्कारेण	दण्डवत् प्रणाम से
परिप्रश्नेन	बहुविषयकप्रश्नेन	ऊहापोह के प्रश्न से
सेवया	शुश्रूषया	सेवा से
तद् (तत्)	तादृशम् (अध्यात्मज्ञानम्)	उस अध्यात्म ज्ञान को
विद्धि	प्राप्नुहि	पाओगे
तत्त्वदर्शिनः	स्वरूपानुभविनः	स्वरूप का साक्षात्कार किये हुए
ज्ञानिनः	शास्त्रज्ञाः	शास्त्रज्ञानी जन
ते	तुभ्यम्	तुम्हें
ज्ञानम्	अध्यात्मज्ञानम्	अध्यात्म ज्ञान का
उपदेक्ष्यन्ति	कथयिष्यन्ति	उपदेश करेंगे

भावार्थः

संस्कृतम्–सर्वविधः द्रव्ययज्ञः कर्मफलं च यस्मिन् ज्ञाने अन्तर्भवतः, तस्य विशिष्टज्ञानस्य प्राप्ति-साधनम् उपदिशन् भगवान् श्रीकृष्णः अर्जुनम् आह– हे अर्जुन! गुरूणां पुरतः प्रथमं श्रद्धया प्रकर्षेण नीचैः पतनम्, ततः ऊहापोह-तर्कवितर्कादिभिः बहुविधः प्रश्नः, गुरुशुश्रूषा चेति त्रिभिः उपायैः तद्विशिष्टं ज्ञानं प्राप्तुम् अर्हसि। एभिः उपायैः प्रसन्नाः शास्त्रवेत्तारः प्रत्यक्षानुभवसम्पन्नाः ज्ञानिनः तुभ्यं तद्विशिष्टम् अध्यात्मज्ञानम् उपदेशेन सम्पादयिष्यन्ति।

हिन्दी–पूर्व श्लोक में उस ज्ञान की चर्चा हुई है जिसमें द्रव्ययज्ञ एवं समस्त कर्मफल का अन्तर्भाव होने पर ही भव-बन्धन से मुक्ति सम्भव है। यहाँ उस विशिष्ट ज्ञान की प्राप्ति का उपाय बतलाते हुए भगवान् ने कहा– हे अर्जुन! इन तीन उपायों से उस ज्ञान को तुम प्राप्त करो (१) गुरु के सामने श्रद्धाभाव से दण्डवत् प्रणाम करना चाहिए, (२) उसके समक्ष अपनी जिज्ञासा एवं अनेक प्रकार से प्रश्न रखना चाहिए और (३) अपेक्षानुसार गुरु की सेवा करनी चाहिए। इन तीनों साधनों से प्रसन्न होने पर ही परमार्थ तत्त्व का साक्षात्कार किये हुए शास्त्रों के ज्ञानी गुरु तुम्हें उस अध्यात्म ज्ञान का अनुभव करायेंगे।

अवबोधाभ्यासः

अधः प्रदत्तान् प्रश्नान् उत्तरतु–

(i) कर्मयोगिनां कर्मफलं क्व अन्तर्भवति? ....

(ii) विशिष्टज्ञानस्य कानि प्राप्तिसाधनानि? ....

....

(iii) 'विद्धि' क्रियायाः कः कर्ता? ....

(iv) विशिष्टज्ञानस्य उपदेशे कथम्भूताः ज्ञानिनः समर्थाः सन्ति? ....

(v) 'ज्ञानिनः' इत्यत्र बहुवचनप्रयोगस्य किं प्रयोजनम्? ....

अवधेयम्

अभिमानेन वितण्डावादेन कपटभावेन वा परीक्षाबुद्ध्या पृष्टो गुरुः उपदेष्टुं न प्रवर्तते।

व्याकरणाभ्यासः

(अ) सन्धिः

तद्विद्धि – तत् + विद्धि (जश्त्वसन्धिः)

ज्ञानिनस्तत्त्वदर्शिनः – ज्ञानिनः + तत्त्वदर्शिनः (विसर्गसत्वम्)

अधः सन्धिच्छेदं कृत्वा सन्धिनाम निर्दिशतु–

(i) तद्विजानीहि ....

(ii) सः तस्मात् पादपात् धीमान् ....

(iii) पुष्पाद्गन्धः प्रसरति ....

(iv) रामादन्यः नास्ति सहायः ....

(v) छात्रास्ततः आगताः ....

(vi) बालाश्चिन्वन्ति पुष्पाणि ....

(vii) ततष्टीका वितन्यते ....

(viii) मूढास्तत्त्वं न जानन्ति ....

(आ) कृत्प्रत्ययः समासश्च

तत्त्वदर्शिनः – तत्त्वं दर्शयन्ति इति – तत्त्व + दृश् + णिच् + णिनि (तत्त्व + दृश् + इ + इ) तत्त्वदर्शिन् (उपपदसमासः) तस्य भावः तत्त्वम्, तत्त्वं पश्यन्ति तच्छीलाः, तत्त्वदर्शिनः

अधः रेखाङ्कितानां पदानां विग्रहं प्रत्ययं समासं च लिखतु–

(i) ब्रह्मवादिनः धर्मं वदन्ति। ....

(ii) साधुकारी कस्यापि अहितं न करोति। ....

(iii) पयोव्रती न दधि अत्ति। ....

(iv) न वञ्चनीयाः प्रभवः अनुजीविभिः। ....

(v) दीर्घसूत्री विनश्यति। ....

(vi) काकराविणः ततः निःसारय। ....

(इ) तद्धितप्रत्ययः

ज्ञानिनः – ज्ञानम् अस्य अस्ति इति, ज्ञान + इनि (इन्) ज्ञानी. ते ज्ञानिनः

अधः इनि-प्रत्ययान्तं रूपं लिखतु–

(i) विवेकः अस्य अस्ति इति – ....

(ii) अर्थः अस्य अस्तीति – ....

(iii) धनम् अस्य अस्तीति – ....

(iv) बलम् अस्य अस्तीति – ....

(v) रोगः अस्य अस्तीति – ....

(vi) कपटः अस्य अस्तीति – ....

(ई) क्रियाकारकसम्बन्धः

विद्धि	–	कर्तरि क्रिया	उपदेक्ष्यन्ति	–	कर्तरि क्रिया
त्वम्	–	कर्ता आक्षेपगम्यः	ज्ञानिनः	–	कर्ता
तद्	–	कर्म	तत्त्वदर्शिनः	–	कर्तृविशेषणम्

प्रंणिपातेन	–	करणम्	ज्ञानम्	–	कर्म
परिप्रश्नेन	–	करणम्	ते	–	तादर्थ्य–सम्प्रदानम्
सेवया	–	करणम्			

(उ) पर्यायशब्दः

प्रणिपातः – १. प्रणामः, २. वन्दनम्, ३. नमस्कारः

परिप्रश्नः – १. प्रश्नः, २. अनुयोगः, ३. पृच्छा

सेवा – १. शुश्रूषा, २. परिचर्या, ३. शुश्रूषणम्, ४. अनुवृत्तिः

ज्ञानम् – १. बोधः, २. प्रत्ययः, ३. प्रमा, ४. अवगमः

◆◆◆

१३. श्लोकः

यथैधांसि समिद्धोऽग्निर्भस्मसात्कुरुतेऽर्जुन।
ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा।। (भ. गी.४.३७)

पदच्छेदः

यथा, एधांसि, समिद्धः, अग्निः, भस्मसात्-कुरुते, अर्जुन।
ज्ञान+अग्निः, सर्व-कर्माणि, भस्मसात्-कुरुते, तथा।।

पदच्छेदाभ्यासः

अधः प्रदत्तानि पदानि छिनत्तु–

(i) यथैधांसि – ....

(ii) समिद्धोऽग्निः – ....

(iii) अग्निर्भस्मसात् – ....

(iv) भस्मसात्कुरुते – ....

(v) कुरुतेऽर्जुन! – ....

(vi) ज्ञानाग्निः – ....

(vii) सर्वकर्माणि – ....

पदपरिचयः

पदम्	विश्लेषणम्
यथा	अव्ययम् १
एधांसि	एधस् - सका. नपुं. द्विती. बहु.
समिद्धः	अका. पुं. प्र. एक. क्तान्तं वि.
अग्निः	इका. पुं. प्र. एक. विशे.
भस्मसात्	सात्यन्तम् अव्ययम् २
कुरुते	कृ+लट् प्रपु. एक. कर्तरि आत्मने. क्रिया.

पदम्	विश्लेषणम्
अर्जुन	अका. पुं. सम्बो. एक.
ज्ञानाग्निः	इका. पुं. प्र. एक. समस्तम्
भस्मसात्	सात्यन्तम् अव्ययम् ३
कुरुते	कृ+लट् प्रपु. एक. कर्तरि आत्मने. क्रिया.
तथा	अव्ययम् ४

वर्गीकरणाभ्यासः

अधः प्रदत्तानि पदानि वर्गशः लेखनीयानि–

(i) प्रथमान्तम् (३) ....
(ii) द्वितीयान्तम् (२) ....
(iii) अव्ययम् (४) ....
(iv) क्रियापदम् (२) ....
(v) विशेषणम् (१) ....
(vi) समस्तम् (२) ....
(vii) सकारान्तम् (१) ....
(viii) नकारान्तम् (१) ....
(ix) इकारान्तम् (२) ....
(x) पुंलिङ्गम् (४) ....
(xi) नपुंसकलिङ्गम् (२) ....

आकाङ्क्षाविस्तरः

कुरुते (करोति)।

किं कुरुते? .... (अव्ययम् २)

कः भस्मसात् कुरुते? .... (इका. पुं. प्र. एक.)

कीदृशः अग्निः भस्मसात् कुरुते? .... (अका. पुं. प्र. एक. वि.)

समिद्धः अग्निः कानि भस्मसात् कुरुते? .... (सका. नपुं. द्विती. बहु.)

अर्जुन! समिद्धः अग्निः यथा एधांसि भस्मसात् कुरुते

तथा कः भस्मसात् कुरुते? .... (इका. पुं. प्र. एक. समस्तम्)

ज्ञानाग्निः तथा कानि भस्मसात् कुरुते? .... (नका. नपुं. द्विती. बहु. समस्तम्)

अन्वयः

अर्जुन! समिद्धः अग्नि यथा एधांसि भस्मसात् कुरुते तथा ज्ञानग्निः सर्वकर्माणि भस्मसात् कुरुते।

पदार्थः

पदम्	संस्कृतम्	हिन्दी
अर्जुन!	हे अर्जुन!	हे अर्जुन!
समिद्धः	सुदीप्तः	जलती हुई
अग्निः	पावकः	आग
यथा	येन प्रकारेण	जैसे
एधांसि	इन्धनानि	इन्धन को
भस्मसात्	भस्मीभावं	पूरी तरह राख
कुरुते	विधत्ते	कर देती है
तथा	तेन प्रकारेण	उसी तरह
ज्ञानाग्निः	आत्मज्ञानरूपः अग्निः	ज्ञान रूपी आग
सर्वकर्माणि	सम्पूर्णकर्मफलानि	सारे पुण्य एवं पाप को
भस्मसात्	भस्मीभावं	जलाकर राख
कुरुते	करोति	कर देती है।

भावार्थः

संस्कृतम्–ज्ञानस्य महत्त्वम् अग्निदृष्टान्तेन प्रकटयन् भगवान् आह– हे अर्जुन! आवृत्तज्ञान! प्रज्वलितः कृशानुः यथा काष्ठानि सम्पूर्णतया दग्ध्वा तानि भस्मीकरोति, एवम् आत्मज्ञानरूपः अनलः सर्वाणि कर्माणि शुभाशुभानि कर्मफलानि प्रारब्धातिरिक्तानि सर्वांशेन नाशयति। प्रारब्ध कर्मणां फलभोगे जायमानेऽपि तेन अन्तःकरणे हर्षशोकादयः विकाराः न प्रादुर्भवन्ति, शरीरेन्द्रियेभ्यः आत्मनः असङ्गज्ञानात्। क्रियमाणेष्वपि कर्मसु कर्तृत्वाभिमानराहित्यात् न ततः फलोत्पत्तिः जायते इति भावः।

हिन्दी–भगवान् श्रीकृष्ण ने अर्जुन को अग्नि के दृष्टान्त से ज्ञान का महत्त्व समझाया है कि वृक्ष के समान आवृत्तज्ञान हे अर्जुन! जलती हुई आग जैसे सारी लकड़ी को जलाकर उसे बिल्कुल राख कर देती है, उसी प्रकार अध्यात्म ज्ञानरूपी आग सभी कर्मों व शुभाशुभ कर्मफलों का सर्वथा नाश कर देती है। कर्म तीन प्रकार के होते हैं– संचित, प्रारब्ध और क्रियमाण। इनमें संचित कर्म का नाश हो जाने पर भी जिसका भोग चल रहा है, उस प्रारब्ध का भोग होने पर भी उसमें आसक्ति न होने से उससे हर्ष-शोक आदि नहीं होते तथा क्रियमाण कर्म में कर्तृत्व का अभिमान न रहने से उससे फल उत्पन्न नहीं होते हैं।

अवबोधाभ्यासः

अधः प्रदत्तान् प्रश्नान् उत्तरतु–

(i) अर्जुन! इति सम्बोधनेन किं सङ्केतितम्? ....

(ii) अनलः कानि भस्मसात् कुरुते? ....

(iii) ज्ञानं सम्यग्दर्शनं कानि नाशयति? ....

(iv) कर्मफलं कतिविधम्? ....

(v) प्रारब्धकर्मफलस्य नाशः भवति न वा? ....

(vi) अनेन श्लोकेन कस्य महत्त्वं प्रकटितम्? ....

....

व्याकरणाभ्यासः

(अ) सन्धिः

यथैधांसि – यथा+एधांसि (वृद्धिसन्धिः)

समिद्धोऽग्नि – समिद्धः+अग्नि (विसर्गपूर्वरूपसन्धिः)

अग्निर्भस्मसात् – अग्निः+भस्मसात् (विसर्गोफसन्धिः)

कुरुतेऽर्जुन – कुरुते+अर्जन (पूर्वरूपसन्धिः)

ज्ञानाग्निः – ज्ञान+अग्निः (दीर्घसन्धिः)

अधः नामनिर्देशपूर्वकं ससन्धिपदानि विसन्धीनि विसन्धिपदानि च ससन्धीनि करोतु–

(i) श्वेतैडकाः क्षेत्रे चरन्ति। ....

(ii) नवौर्णकम् आसामेवास्ति। ....

(iii) वनौकसां सरलः स्वभावः। ....

(iv) प्रबुद्धोऽपि न भाषते। ....

(v) कुतः+अस्माकं गुरवः ....

(vi) रामः+अस्मि सर्वं सहे। ....

(vii) हरिर्हरति पापानि। ....

(viii) स्वाभावैः+जयन्ति लोकम्। ....

(ix) शुभैः+ललितकुण्डलैः। ....

(x) हरतेऽघं सत्कर्म। ....

(xi) कुरुते+अनवद्यं कार्यम्। ....

(xii) हरे+अधुना दयस्व माम्। ....

(xiii) यस्यास्ति चित्तं सरलम्। ....

(xiv) पुण्य+आत्मा सुप्रसीदति। ....

(xv) राज+आज्ञा गरीयसी। ....

(आ) समासः

ज्ञानाग्निः - ज्ञानम् एव अग्निः इति (तत्पु.)

अधः समस्तं रूपं लिखतु–

(i) ज्ञानम् एव प्लवः इति - ....

(ii) हिंसा एव पिशाची इति - ....

(iii) शास्त्रम् एव ज्योतिः इति - ....

(iv) कपटम् एव मित्रम् इति - ....

अधः निर्दिष्टस्थानेषु समस्तं रूपं लिखतु–

सर्वकर्माणि - सर्वाणि च तानि कर्माणि इति (कर्मधारयः)

(i) नीलं च तद् आकाशम् इति - ....

(ii) सर्वे च ते धर्माः इति - ....

(iii) सर्वाणि च तानि पुस्तकानि इति - ....

(iv) सुन्दरी च सा वाटिका च इति - ....

(v) पटुः च असौ बालः च इति - ....

(इ) तद्धितप्रत्ययः

अधः सात्यन्तम् अव्ययपदं लिखतु–

भस्मसात् कुरुते - कृत्स्नं कर्म भस्म सम्पद्यते, तत् कुरुते इति (भस्मन् + साति) सात्

(i) कृत्स्नं लवणं जलं सम्पद्यते, तत् कुरुते इति, जल + साति - ....

(ii) कृत्स्नं शस्त्रम् अग्निः सम्पद्यते इति, अग्नि + साति - ....

(iii) कृत्स्नं भवनं भूमिः सम्पद्यते इति, भूमि + साति - ....

(iv) कृत्स्नं सरोवरं क्षेत्रं सम्पद्यते इति, क्षेत्र + साति - ....

(ई) कृत्प्रत्ययः

समिद्धः - सम् + इन्ध् + क्त (कर्तरि क्तः)

अधः क्तान्तेन वाक्यं पूरयतु–

(i) ....वृषभः नर्दति। (बन्ध् + क्त)

(ii) ....जनेन मिलति। (स्निह् + क्त)

(iii) ....बालकाय मोदकं देहि। (क्रुध् + क्त)

(iv) ....शिक्षकात् अधीते। (प्रबुध् + क्त)

(v) कर्मणि..............................मम कुत्र कालः। (नह् + क्त)

(vi) ....कार्ये समं फलम्। (सिध् + क्त)

(vii) ....जलम् आनेयम्। (शुध् + क्त)

(viii) कक्षायाः ....गृहमायास्यति। (मुञ्च् + क्त)

क्रियाकारकसम्बन्धः

कुरुते	-	कर्तरि क्रिया.	भस्मसात्	-	क्रियाविशेषणम्
भस्मसात्	-	क्रियाविशेषणम्	ज्ञानाग्निः	-	कर्ता

अग्निः	-	कर्ता	सर्वकर्माणि	-	कर्म
समिद्धः	-	कर्तृविशेषणम्	यथा-तथा	-	दृष्टान्त-दार्ष्टान्तिकार्थे
एधांसि	-	कर्म	अर्जुन	-	सम्बोधनम्
कुरुते	-	कर्तरि क्रिया			

पर्यायशब्दः

एधः - १. एधः (सका. पुं.), २. इन्धनम्, ३. इध्मम् (अका. नपुं.), ४. समित् (धका. स्त्री.)

भस्म - १. भूतिः (इका. स्त्री.), २. भासितम्, ३. क्षारः (अका. पुं.)

◆◆◆

१४. श्लोकः

न हि ज्ञानेन सदृशं पवित्रमिह विद्यते।
तत्स्वयं योगसंसिद्धः कालेनात्मनि विन्दति।। (भ. गी.४.३८)

पदच्छेदः

न, हि, ज्ञानेन, सदृशम्, पवित्रम्, इह, विद्यते।

तत्, स्वयम्, योग-संसिद्धः, कालेन, आत्मनि, विन्दति।।

पदच्छेदाभ्यासः

अधः प्रदत्तानां पदानां छेदनं करोतु–

(i) पवित्रमिह – ....

(ii) तत्स्वयम् – ....

(iii) योगसंसिद्धः – ....

(iv) कालेनात्मनि – ....

पदपरिचयः

पदम्	विश्लेषणम्
न	अव्ययम् १
हि	अव्ययम् २
ज्ञानेन	अका. नपुं. तृ. एक.
सदृशम्	अका. नपुं. प्र. एक. (वि. १)
पवित्रम्	अका. नपुं. प्र. एक. (वि. २)
इह	अव्ययम् ३
विद्यते	विद्+लट् प्रपु. एक. आत्मने. कर्तरि क्रिया
तत्	तद्- दका. नपुं. द्विती. एक. सर्व.
स्वयम्	अव्ययम् ४
योगसंसिद्धः	अका. पुं. प्र. एक. समस्तं वि.
कालेन	अका. पुं. तृ. एक.
आत्मनि	आत्मन्- नका. पुं. सप्त. एक.
विन्दति	विद्+ लट् प्रपु. एक. कर्तरि क्रिया

वर्गीकरणाभ्यासः

अधः श्लोकस्थपदानि वर्गशः लिखतु–

(i) प्रथमान्तम् (३) ....

(ii) द्वितीयान्तम् (१) ....

(iii) तृतीयान्तम् (२) ....

(iv) सप्तम्यन्तम् (१) ....

(v) विशेषणम् (३) ....

(vi) क्रियापदम् (२) ....

(vii) अव्ययम् (४) ....

(viii) पुंलिङ्गम् (३) ....

(ix) नपुंसकम् (४) ....

(x) नकारान्तम् (१) ....

(xi) अकारान्तम् (५) ....

आकाङ्क्षाविस्तर :

न विद्यते (न अस्ति)।

किं न विद्यते? .... (अका. नपुं. प्र. एक. वि. २)

कीदृशं पवित्रं न विद्यते? .... (अका. नपुं. तृ. एक.+अका. नपुं. प्र. एक वि. १)

ज्ञानेन सदृशं पवित्रं कुत्र न विद्यते? .... (अव्ययम् ३)

विन्दति (लभते)।

कः विन्दति? .... (अका. पुं. प्र. एक. समस्तं वि.)

कथं योगसंसिद्धः? .... (अका. पुं. तृ. एक.)

कालेन योगसंसिद्धः किं विन्दति? .... (दका. नपुं. द्विती. एक. सर्व.)

कालेन योगसंसिद्धः कथं तत् विन्दति? .... (अव्ययम् ४)

कालेन योगसंसिद्धः कुत्र तत् स्वयं विन्दति? .... (नका. पुं. सप्त एक.)

अन्वयः–इह हि ज्ञानेन सदृशं पवित्रं न विद्यते। योगसंसिद्धः तत् कालेन आत्मनि स्वयं विन्दति।

पदार्थः

पदम्	संस्कृतम्	हिन्दी
हि	यस्माद् हेतोः	चूँकि
इह	तपो योगादिषु	तपस्या योग आदि मार्गों में
ज्ञानेन	अध्यात्मज्ञानेन	आत्म ज्ञान के
सदृशम्	तुल्यम्	समान अन्य कोई
पवित्रम्	शुद्धिकरम्	शोधक
न	न	नहीं
विद्यते	वर्तते	है
कालेन	चिरप्रयत्नेन	बहुत समय के प्रयास से
योगसंसिद्धः	कर्मयोगेन योग्यतां प्राप्तः	कर्मयोग के द्वारा योग्यता को प्राप्त करके
तत्	अध्यात्मज्ञानम्	उस आत्म ज्ञान को
आत्मनि	चित्ते	आत्मा में
स्वयम्	अनायासेन	अपने-आप
विन्दति	प्राप्नोति	प्राप्त कर लेता है।

भावार्थः

संस्कृतम्–ज्ञानाग्निः सम्पूर्णं कर्मबन्धनं भस्मीकरोति। तत्र कारणं यत् तपोयोगादिषु उपायेषु ज्ञानेन तुल्यम् अन्यत् किमपि शुद्धिकरं साधनं नास्ति। ज्ञानं हि भव-बन्धनच्छेदे सर्वोत्तमं साधनम् अस्ति। तर्हि सर्वेऽपि आत्मज्ञानम् एव किं न अभ्यसन्ति? कथं भगवान् श्रीकृष्णः अर्जुनाय कर्मावलम्बम् उपदिशति? यतोहि कर्मयोगं विना तद् विशिष्टम् आत्मज्ञानं प्राप्तुं न शक्यते। कर्ममार्गेणैव शनैः शनैः अभ्यासद्वारा तद् ज्ञानं स्वतः लभ्यते। तदाह भगवान्–कालेन चिरकालप्रयत्नेन कर्मयोगेन स्वकर्तव्यपालनेन च योग्यतां प्राप्तस्सन् परिशुद्धे अन्तःकरणे साधकः स्वतः एव तद् अध्यात्मज्ञानं प्राप्नोति।

हिन्दी–पूर्व श्लोक में कहा गया है कि ज्ञानाग्नि सभी कर्मों को जलाकर राख कर देती है, क्योंकि तपस्या, समाधि आदि भव-बन्धन से छूटने के जितने भी उपाय हैं ; उनमें ज्ञान से बढ़कर मुक्तिकारक दूसरा कोई उपाय नहीं है। ज्ञान ही सर्वोत्तम पवित्र साधन है। तब फिर प्रश्न उठता है कि भगवान् ने अर्जुन को कर्म करने का उपदेश क्यों दिया? फिर क्यों नहीं सब लोग ज्ञान-मार्ग में ही प्रवृत्त होते हैं? इसका समाधान करते हुए भगवान् ने कहा– चिरकाल तक कर्मयोग का निरन्तर अभ्यास करते रहने से साधक को ऐसी योग्यता प्राप्त हो जाती है कि उसके निर्मल अन्तःकरण में वह विशिष्ट अध्यात्म ज्ञान अपने-आप स्फुरित हो जाता है। इस प्रकार कर्म-मार्ग से ही वह ज्ञान प्राप्त होता है, जो परम पुरुषार्थ का साधक है। इसलिए सबको सत्यनिष्ठा से अपने-अपने कर्तव्य का ही पालन करना चाहिए।

अवबोधाभ्यासः

अधः प्रदत्तान् प्रश्नान् उत्तरतु–

(i) कृत्स्नं कर्मबन्धनं कः भस्मीकरोति? ....

(ii) परमपुरुषार्थं प्राप्तुं सर्वोत्तमं साधनं किमस्ति? ....

(iii) श्रीकृष्णः अर्जुनं कर्ममार्गे कथं प्रेरितवान्? ....

(iv) 'योगसंसिद्धः' इति पदस्य कोऽभिप्रायः? ....

(v) सकामनिष्कामकर्मयोगयोः कतरः श्रेयान्? ....

(vi) अस्य श्लोकस्य तात्पर्यं संक्षेपेण लिखतु। ....

....

....

व्याकरणाभ्यासः

(अ) सन्धिः

कालेनात्मनि - कालेन + आत्मनि (दीर्घसन्धिः)

यथोचितं सन्धिं विसन्धिं वा करोतु–

(i) तस्य <u>सत्य+अभिसन्धस्य</u> – ....

(ii) <u>दैवायत्तं</u> कुले जन्म – ....

(iii) भाग्याधीनमतः परम् – ....

(iv) कपि+ईशं भजे – ....

(v) भानु+उदयं कामये – ....

(आ) समासः

योगसंसिद्धः – योगेन संसिद्धः इति (तृ. तत्पु.)

अधः प्रदत्तविग्रहवाक्यानां समस्तं रूपं लिखतु–

(i) मधुना सिक्तम् इति – ....

(ii) दण्डेन ताडितः इति – ....

(iii) छलेन जितः इति – ....

(iv) गोलिकाभिः आहतः इति – ....

(v) संस्कृतेन व्यवहारः इति – ....

(इ) क्रियाकारकसम्बन्धः

विद्यते	आत्मने कर्तरि क्रिया	योगसंसिद्धः	कर्ता
पवित्रम्	कर्ता	कालेन	करणम्
सदृशम्	कर्तृविशेषणम्	तत्	कर्म
न	क्रियाविशेषणम्	आत्मनि	अधिकरणम्
ज्ञानेन	तुल्यार्थे तृतीया	स्वयम्	क्रियाविशेषणम्
विन्दति	परस्मै. कर्तरि क्रिया		

(ई) पर्यायशब्दः

(i) **सदृशम्** – १. समम् (अका. वि.), २. तुल्यम् (अका. वि.), ३. समानम् (अका. वि.)

(ii) **पवित्रम्** - १. प्रयतम् (अका. वि.), २. पूतम् (अका. त्रि.), ३. शुद्धम् (अका. वि.)

(iii) **योगः** - १. ध्यानम् (अका. नपुं.), २. सङ्गतिः (इका. स्त्री.), ३. कौशलम (अका. नपुं.)

(iv) **कालः** - १. दिष्टः (अका. पुं.), २. अनेहा (अनेहस् - सका. पुं.), ३ समयः (अका. पुं.)

◆◆◆

१५. श्लोकः

श्रद्धावाँल्लभते ज्ञानं तत्परः संयतेन्द्रियः।
ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति।। (भ. गी.४.३९)

पदच्छेदः

श्रद्धावान्, लभते, ज्ञानम्, तत्-परः, संयत-इन्द्रियः।
ज्ञानम्, लब्ध्वा, पराम्, शान्तिम्, अचिरेण, अधिगच्छति।।

पदच्छेदाभ्यासः

अधः प्रदत्तपदानां पदच्छेदः विधेयः–

(i) श्रद्धावाँल्लभते – ....

(ii) संयतेन्द्रियः – ....

(iii) शान्तिमचिरेण – ....

(iv) अचिरेणाधिगच्छति – ....

पदपरिचयः

पदम्	विश्लेषणम्	पदम्	विश्लेषणम्
श्रद्धावान्	श्रद्धावत् – तका. पुं. प्र. एक. मतुबन्तं .वि.	लब्ध्वा	क्त्वान्तम् अव्ययम्
लभते	लभ्+लट् प्रपु. एक. आत्मने. कर्तरि क्रिया.	पराम्	परा–आका. स्त्री. द्विती. एक. वि.
ज्ञानम्	अका. नपुं. द्विती. एक. १	शान्तिम्	इका. स्त्री. द्विती. एक.
तत्परः	अका. पुं. प्र. एक. वि. समस्तम् १	अचिरेण	अव्ययम्
संयतेन्द्रियः	अका. पुं. प्र. एक. वि. समस्तं २	अधिगच्छति	अधि+गम्+लट् प्रपु. एक. कर्तरि क्रिया
ज्ञानम्	अका. नपुं. द्विती. एक. २		

वर्गीकरणाभ्यासः

श्लोकस्थपदानि यथानिर्देशं वर्गशः विभजतु–

(i) प्रथमान्तम् (३) ....

(ii) द्वितीयान्तम् (४) ....

(iii) पुंलिङ्गम् (३) ....

(iv) स्त्रीलिङ्गम् (२) ....

(v) नपुंसकलिङ्गम् (२) ....

(vi) आकारान्तम् (१) ....

(vii) अकारान्तम् (४) ....

(viii) इकारान्तम् (१) ....

(ix) तकारान्तम् (१) ....

(x) विशेषणम् (४) ....

(xi) क्रियापदम् (२) ....

(xii) गौणक्रिया (१) ....

आकाङ्क्षाविस्तरः

लभते (प्राप्नोति)।

कः लभते? .... (मतुबन्तं वि.)

कीदृशः श्रद्धावान् लभते? .... (समस्तं वि.)

पुनश्च कीदृशः श्रद्धावान् लभते? .... (समस्तं वि.)

श्रद्धावान् तत्परः संयतेन्द्रियः किं लभते? .... (अका. नपुं. द्विती. एक. १)

अधिगच्छति (प्राप्नोति)।

कः अधिगच्छति? 'साधकः जनः' इति आक्षेपलभ्यः कर्ता।

काम् अधिगच्छति? .... (इका. स्त्री. द्विती. एक.)

कीदृशीं शान्तिम् अधिगच्छति? .... (आका. स्त्री. द्विती. एक.)

किं कृत्वा परां शान्तिम् अधिगच्छति? .... (क्त्वान्तम् अव्ययम्)

किं लब्ध्वा परां शान्तिम् अधिगच्छति? .... (अका. नपुं. द्विती. एक. २)

अन्वयः–तत्परः संयतेन्द्रियः श्रद्धावान् ज्ञानं लभते। ज्ञानं लब्ध्वा अचिरेण परां शान्तिम् अधिगच्छति।

पदार्थः

पदम्	संस्कृतम्	हिन्दी
श्रद्धावान्	श्रद्धालुः	श्रद्धा रखने वाला
तत्परः	तदेकनिष्ठः	गुरुभक्त
संयतेन्द्रियः	जितेन्द्रियः	जितेन्द्रिय
(साधकः)	(साधकः)	(साधक)
ज्ञानम्	आत्मज्ञानम्	अध्यात्म-ज्ञान को
लभते	प्राप्नोति	प्राप्त करता है।
ज्ञानम्	आत्मज्ञानम्	अध्यात्म-ज्ञान को
लब्ध्वा	प्राप्य	पाकर
अचिरेण	शीघ्रम्	शीघ्र ही
पराम्	सर्वोत्कृष्टाम्	परमार्थ
शान्तिम्	मोक्षम्	मुक्ति को
अधिगच्छति	लभते	पा लेता है।

भावार्थः

संस्कृतम्–पूर्वं ज्ञानप्राप्तेः बाह्यम् उपायत्रयं प्रणिपात-परिप्रश्न-सेवारूपम् उक्तम्। इदानीं साधकनिष्ठम् आन्तरोपायं वर्णयति–श्रद्धावान् इत्यादिना। गुरुवेदान्तवाक्येषु आस्तिक्यबुद्धिः श्रद्धा, तत्र दृढः विश्वासः तत्परता, अन्तःकरणादीनां सर्वेषाम् इन्द्रियाणां जयः चेति त्रयः आन्तरिका उपायाः। एभिः उपायैः युक्तः साधकः जनः श्रद्धावान्, तत्परः, संयतेन्द्रियः च भवति। तादृशः साधक एव विशिष्टम् आत्मज्ञानं प्राप्नोति। अतः ज्ञानलाभात् प्राक् एभिः उपायैः चित्तशुद्धये कर्मयोगः एव अनुष्ठेयः। यतोहि ज्ञानलाभात् परं तस्य साधकस्य किञ्चित् कृत्यं नास्ति। ज्ञानं लब्ध्वा तु सः शीघ्रं परमां शान्तिं (मोक्षं) प्राप्नोति।

हिन्दी–पहले ज्ञान प्राप्ति के तीन साधन प्रणिपात-परिप्रश्न और सेवा बताये गये हैं। ये तीनों ही बाह्य-साधन कहलाते हैं, क्योंकि ये साधक के बहिरिन्द्रिय व्यापार से सम्पादित होते हैं। इस श्लोक में तीन आन्तरिक उपायों का वर्णन हुआ है। ये आन्तरिक उपाय हैं– श्रद्धा, विश्वास एवं इन्द्रिय-जय। ये तीनों ही साधक के अन्तरिन्द्रिय से सम्पाद्य हैं, अतः इन्हें ज्ञान-प्राप्ति के अन्तःसाधन कहा गया है। गुरु एवं वेदान्तादि वाक्यों में आस्तिक्यभाव को श्रद्धा, उनमें अटल विश्वास को तत्परता और अन्तःकरण के साथ सभी इन्द्रियों का जय, इन गुणों से सम्पन्न साधक उस विशिष्ट अध्यात्म ज्ञान को अवश्य प्राप्त करता है। उस ज्ञान की प्राप्ति से पहले तक अन्तःकरण की शुद्धि के लिए इन उपायों से कर्मयोग का अनुष्ठान नितान्त अपेक्षित है। ज्ञान-प्राप्ति के बाद तो उसका कोई कृत्य शेष बचता नहीं है। उस ज्ञान को पाकर वह तत्काल परम शान्ति, परम पुरुषार्थ मोक्ष को प्राप्त कर लेता है।

अवबोधाभ्यासः

अधः प्रदत्तान् प्रश्नान् उत्तरतु–

(i) ज्ञानप्राप्तेः कति के च बाह्याः उपायाः? ....

(ii) श्रद्धापदस्य कः भावार्थः? ....

(iii) तत्परताशब्देन अत्र किं गृह्यते? ....

(iv) ज्ञानप्राप्तेः आन्तरोपायान् लिखतु। ....

(v) कः साधकः ज्ञानं लभते? ....

(vi) कर्मयोगानुष्ठानस्य किं प्रयोजनम्? ....

(vii) ज्ञानलाभात् परं कर्मयोगः अनुष्ठेयो न वा? ....

(viii) आत्मज्ञानस्य प्रयोजनं लिखतु। ....

....

....

व्याकरणाभ्यासः

(अ) सन्धिः

श्रद्धावाँल्लभते – श्रद्धावान्+लभते (परसवर्णसधिः)

संयतेन्द्रियः – संयत+इन्द्रियः (गुणसन्धिः)

अचिरेणाधिगच्छति - अचिरेण+अधिगच्छति (दीर्घसन्धिः)

अधः रेखाङ्कितपदानां सन्धिच्छेदः कार्यः–

(i) ज्ञानवाँल्लभते मोक्षम्। ....

(ii) तल्लाभो लाभ एव सः। ....

(iii) तस्मिँल्लब्धपत्रः याति। ....

(iv) भगवल्लीला गरीयसी। ....

(v) जितेन्द्रियः वशी कुर्यात्। ....

(vi) महोग्रहनुनासश्च। ....

(vii) विभीषणोक्तं वचनं सुपूज्यम्। ....

(viii) राक्षसेन्द्रनिवेशनम्। ....

(xi) वराभरणभूषिताः। ....

(x) विरूपाक्षस्य भवनम्। ....

(xi) भास्वरेणाभिसंवृतम्। ....

(आ) समासः

तत्परः - तेषु परः इति (सप्त. तत्पु.), तदेव परं यस्य सः (बहुव्रीहिः)

अधो रेखाङ्कितेषु पदेषु विग्रह-समासौ कार्यौ–

(i) कर्मकुशलाः स्वल्पाः लोके। ....

(ii) मातृस्निग्धः सुखी सदा। ....

(iii) वानरोत्तमः उपासर्पत्। ....

(iv) भूमिशय्या विवर्णाङ्गी। ....

(v) प्रातः स्वाध्यायरताः बालाः। ....

संयतेन्द्रियः - संयतानि इन्द्रियाणि यस्य सः (बहुव्रीहिः)

विग्रहानुसारं समस्तं रूपम् अधः लिखतु-

(i) कृतः व्रणः यस्मिन् सः - ....

(ii) पीनौ अंसौ यस्य सः - ....

(iii) विशाले अक्षिणी यस्य सः - ....

(iv) पञ्च शीर्षाणि यस्य सः - ....

(v) विवर्णानि अङ्गानि यस्याः सा - ....

(vi) तनुः मध्यमः यासां ताः - ....

(इ) तद्धितप्रत्ययः

प्रदत्तविग्रहानुहानसारं अधः मतुबन्तं पदं लिखतु।

श्रद्धावान् - श्रद्धा अस्य अस्ति इति (श्रद्धा + मतुप्) - श्रद्धावत्

श्रद्धावती - श्रद्धा अस्याः अस्ति इति

(i) गुणः अस्य अस्ति इति - ....

(ii) रसः अस्य अस्तीति - ....

(iii) मतिः अस्याः अस्तीति - ....

(iv) वपुः अस्याः अस्तीति - ....

(v) श्रीः अस्य अस्तीति - ....

(vi) धीः अस्याः अस्तीति - ....

(ई) कृत्प्रत्ययः

लब्ध्वा - लभ् + क्त्वा (त्वा) क्त्वान्तम् अव्ययम्

अधः क्त्वान्तेन पदेन वाक्यं पूरयतु-

(i) धनं.................................पलायितः। (नी + क्त्वा)

(ii) व्ययं.................................प्रमुदितः। (कृ + क्त्वा)

(iii) जलं...सुप्तः। (पा + क्त्वा)

(iv) वस्त्राणि...नयति। (क्षाल् + इ + क्त्वा)

(v) शिरस्त्राणं...गच्छति। (धारि + क्त्वा)

(उ) क्रियाकारकसम्बन्धः

लभते	–	आत्मने. कर्तरि क्रिया.	शान्तिम्	–	कर्म
श्रद्धावान्	–	कर्तृविशेषणम्	पराम्	–	कर्मविशेषणम्
तत्परः	–	कर्तृविशेषणम्	अचिरेण	–	क्रियाविशेषणम्
संयतेन्द्रियः	–	कर्तृविशेषणम्	लब्ध्वा	–	पूर्ववर्तिनी गौणक्रिया
जनः	–	कर्ता (आक्षेपगम्यः)	ज्ञानम्	–	गौणक्रियायाः कर्म
ज्ञानम्	–	कर्म	जनः	–	कर्ता (आक्षेपगम्यः)
अधिगच्छति	–	कर्तरि क्रिया			

(ऊ) पर्यायशब्दः

श्रद्धा – १. आदरः, २. निष्ठा

इन्द्रियम् – १. हृषीकम्, २. विषयी (विषयिन् – नका. नपुं.)

शान्तिः – १. शमथः, २. शमः

◆◆◆

१६. श्लोकः

तस्मादज्ञानसम्भूतं हृत्स्थं ज्ञानासिनात्मनः।
छित्त्वैनं संशयं योगमातिष्ठोत्तिष्ठ भारत!।। (भ. गी.४.४२)

पदच्छेदः

तस्मात्, अज्ञान-सम्भूतम्, हृत्स्थम्, ज्ञान+असिना-आत्मनः।
छित्त्वा, एनम्, संशयम्, योगम्, आतिष्ठ, उत्तिष्ठ, भारत!।।

पदच्छेदाभ्यासः

अधः प्रदत्तानि पदानि छिनत्तु–

(i) तस्मादज्ञान... – ....

(ii) ज्ञानासिना – ....

(iii) असिनात्मनः – ....

(iv) छित्त्वैनम् – ....

(v) योगमातिष्ठ – ....

(vi) आतिष्ठोत्तिष्ठ – ....

पदपरिचयः

तस्मात्	–	तद्-दका. नपुं. पं. एक. सर्व.
अज्ञानसम्भूतम्	–	अका. पुं. द्विती. एक. वि. समस्तम् १
हृत्स्थम्	–	अका. पुं. द्विती. एक. समस्तं विशेषणम् २
ज्ञानासिना	–	ज्ञानासि-इका. पुं. तृ. एक. समस्तम्
आत्मनः	–	आत्मन्-नका. पुं. षष्ठी एक.
छित्वा	–	क्त्वान्तम् अव्ययम्
एनम्	–	एतद्-दका. पुं. द्विती. एक. सर्व.
संशयम्	–	अका. पुं. द्विती. एक.

योगम् - अका. पुं. द्विती. एक.

आतिष्ठ - आ+स्था + लोट् मपु. एक. कर्तरि क्रिया.

उत्तिष्ठ - उद्+स्था+लोट् मपु. एक. कर्तरि क्रिया.

भारत - अका. पुं. सम्बो. प्र. एक.

वर्गीकरणाभ्यासः

यथानिर्देशं श्लोकपदानि निर्दिष्टवर्गे लिखतु–

(i) द्वितीयान्तम् (५) ....

(ii) तृतीयान्तम् (१) ....

(iii) पञ्चम्यन्तम् (१) ....

(iv) षष्ठ्यन्तम् (१) ....

(v) सम्बोधनान्तम् (१) ....

(vi) अव्ययम् (१) ....

(vii) क्रियापदम् (२) ....

(viii) सर्वनाम (२) ....

(ix) विशेषणम् (२) ....

(x) पुंलिङ्गम् (८) ....

(xi) नपुंसकलिङ्गम् (१) ....

आकाङ्क्षाविस्तरः

आतिष्ठ (अनुष्ठानं कुरु)।

कः आतिष्ठतु? ‘हे भारत! त्वम् आतिष्ठ’ (इति कर्ता आक्षेपगम्यः।)

कम् आतिष्ठ .... (अका. पुं. द्विती. एक.)

किं कृत्वा योगम् आतिष्ठ? .... (अव्ययम्)

कं छित्वा योगम् आतिष्ठ? .... (अका. पुं. द्विती. एक. विशे.)

कीदृशम् संशयं छित्वा योगम् आतिष्ठ?	....	(समस्त विशे.)
पुनश्च कीदृशं संशयं छित्वा योगम् आतिष्ठ?	....	(अका. पुं. विशे. २)
पुनश्च कीदृशं संशयं छित्वा योगम् आतिष्ठ?	....	(अका. पुं. द्विती. एक.)
अज्ञानसम्भूतं हृत्स्थं कस्य एनं संशयं छित्वा योगम् आतिष्ठ?	....	(नका. पुं. षष्ठी एक.)
अज्ञानसम्भूतं हृत्स्थम् आत्मनः एनं संशयं केन छित्वा योगम् आतिष्ठ?	....	(इका. पुं. तृ. एक.)
कस्य ज्ञानासिना अज्ञानसम्भूतं हृत्स्थम् एनं संशयं छित्वा योगम् आतिष्ठ?	....	(नका. पुं. षष्ठी एक.)

अन्वयः

भारत! (त्वम्) उत्तिष्ठ। तस्मात् आत्मनः अज्ञानसम्भूतं हृत्थम् एनं संशयम् आत्मनः ज्ञानासिना छित्वा योगम् आतिष्ठ।

पदार्थः

पदम्	संस्कृतम्	हिन्दी
भारत!	हे अर्जुन! (त्वम्)	हे अर्जुन! (तुम)
तस्मात्	तस्मात् कारणात्	इसलिए
आत्मनः	स्वस्य	अपने
अज्ञानसम्भूतम्	अविवेकात् जातम्	अविवेक से उत्पन्न
हृत्स्थम्	बुद्धिस्थितम्	बुद्धि में स्थित
एनम्	पूर्वनिर्दिष्टम् एनम्	इस
संशयम्	अनिश्चयम्	सन्देह को
ज्ञानासिना	ज्ञानकुठारेण	ज्ञानरूपी तलवार से
छित्वा	कर्तयित्वा	काटकर

योगम्	कर्ममार्गम्	निष्काम कर्म का
आतिष्ठ	आश्रय	आश्रय लो
तस्मात्	अतः	इसलिए
भारत!	भरतवंशोत्पन्न!	हे भरतवंशी
उत्तिष्ठ	(युद्धाय) प्रवर्तस्व	(युद्ध) करो।

भावार्थः

संस्कृतम्– यस्मात् लोकसंग्रहार्थानि स्वाभाविकानि वा कर्माणि जीवं न निबध्नन्ति, अनिष्टम् इष्टं मिश्रं वा शरीरं नारभन्ते, तस्मात्, हे भारत! स्वस्य अज्ञानात् समुत्पन्नं हृदि स्थितं शोकादिनिमित्तम् एनं सन्देहं देहात्मविवेकज्ञानरूपेण खड्गेन छित्वा परमात्मनः ज्ञानोपायभूतं कर्मयोगम् आश्रय। तत्र च प्रथमं प्रस्तुताय युद्धाय उत्तिष्ठ, लोकसंग्रहार्थं निष्कामकर्मरूपेण युद्धं कुरु इत्यर्थः। अत्र 'भारत' इति सम्बोधनपदेन अर्जुनस्य भरतकुलोत्पत्तिः स्मारिता, तेन च युद्धस्य स्वधर्मत्वं दर्शितम् इति भावः।

हिन्दी–पूर्व श्लोकों में भगवान् ने युक्ति के साथ यह बात बतलाई है कि लोकोपकार के लिए किये गये कर्म अथवा स्वाभाविक कर्म से बन्धन अर्थात् पुनर्जन्म नहीं होता है तथा सन्देह से महती हानि होती है। यह सन्देह जीव के अपने अज्ञान से उत्पन्न होता है और बुद्धि में स्थित होकर उसे अनिश्चय में किंकर्तव्यविमूढ बना देता है। शोक, मोह, भय आदि सारे अनर्थों का कारण यह सन्देह ही है। अतः हे भारत! आत्मज्ञानरूपी तलवार से इस संशयरूपी शत्रु को काट डालो और आत्मज्ञान की प्राप्ति में सहायक निष्काम कर्मयोग का आचरण करो। इसलिए हे भारत! तुम उठो और युद्ध करो, क्योंकि तत्काल उपस्थित यह युद्ध करना तुम्हारा परम धर्म है। तुम भारत हो, भरत कुलोत्पन्न परम वीर हो, लोकोपकारी युद्ध तुम्हारा निष्काम कर्म है।

अवबोधाभ्यासः

अधः प्रदत्तान् प्रश्नान् उत्तरतु–

(i) संशयः कस्मात् कारणात् उत्पद्यते? ....

(ii) संशयः कुत्र तिष्ठति? ....

(iii) संशयः कस्य कारणम्? ....

(iv) संशयस्य नाशः केन हेतुना भवति? ....

(v) 'योगमातिष्ठ' इत्यस्य कः भावार्थः? ....

....

(vi) 'भारत'सम्बोधनस्य किं तात्पर्यम्? ....

(vii) 'तस्मात्'पदेन कस्य कारणस्य बोधः भवति? ....

व्याकरणाभ्यासः

(अ) सन्धिः

तस्मादज्ञानम् – तस्मात् + अज्ञानम् (जश्त्वसन्धिः)

ज्ञानासिना – ज्ञान + असिना (दीर्घसन्धिः)

असिनात्मनः – असिना + आत्मनः (दीर्घसन्धिः)

छित्त्वैनम् – छित्त्वा + एनम् (वृद्धिसन्धिः)

आतिष्ठोत्तिष्ठ – आतिष्ठ + उत्तिष्ठ (गुणसन्धिः)

अधः रेखाङ्कितपदानां सन्धिच्छेदं कृत्वा सन्धिनाम निर्दिशतु–

(i) न ते चिरादागमनं प्रियस्य। ....

(ii) तदिदं लोकविद्विष्टम्। ....

(iii) रामाद्विशिष्टः कोऽन्योऽस्ति। ....

(iv) भगवद्वचनामृतम्। ....

(v) घनराजीव गर्जन्ती। ....

(vi) पातालाम्बरसन्निभम्। ....

(vii) नात्र संशयः। ....

(viii) पन्नगाशनवत् कपिः। ....

(ix) मम दृष्ट्वैव रूपं ते। ....

(x) शीतेनैजते बालः। ....

(xi) दिव्यौषधं समादाय। ....

(xii) नैनमुदैक्षत। ....

(xiii) उत्तिष्ठोत्तिष्ठ कस्मात्त्वम्। ....

(xiv) बलेन विक्रम्य महोर्मिमालिनम्। ....

(xv) निपत्य तीरे च महोदधेस्तदा। ....

(xvi) देवसङ्घाः महर्षिभिः। ....

(xvii) वानरेन्द्रः प्रतापवान्। ....

(आ) समासः

अज्ञानसम्भूतम् - अज्ञानात् सम्भूतम् इति (पं. तत्पु.)

अधः यथाविग्रहं समस्तं पदं लिखतु–

(i) कुलात् उत्पन्नम् इति - ....

(ii) भारतात् आगतः इति - ....

(iii) दुःखात् मुक्तः इति - ....

(iv) आकाशात् पतितः इति - ....

(v) उपाध्यायात् अधीतम् इति - ....

अधः यथोचितं विग्रहवाक्यं समासनाम च लिखतु।

ज्ञानासिना - ज्ञानम् एव असिः तेन (तत्पु.)

(i) विद्याधनं सर्वधनप्रधानम्। ....

(ii) इदं गोधनं कृषकाणाम्। ....

(iii) ज्ञानप्लवेन दुःखसागरं तरति। ....

(iv) शरीरसदने आत्मा निवसति। ....

(v) शिक्षकाः छात्रबलेन शोभन्ते। ....

अधः यथाविग्रहं समस्तं पदं लिखतु–

हृत्स्थः - हृदि तिष्ठति इति (हृद् + स्था + क) (उपपदसमास):

(i) नगरे तिष्ठति इति (नगर + स्था + क) - ....

(ii) धनं ददाति इति (धन + दा + क) - ....

(iii) कच्छे पिबतीति (कच्छ + पा + क) - ....

(iv) हस्तिनं पातीति (हस्तिन् + पा + क) - ....

(v) शोकम् अपनुदति इति (शोक + अप + नुद् + क) - ....

(इ) कृत्प्रत्ययः

यथानिर्देशं कृदन्तेन पदेन वाक्यं पूरयतु–

सम्भूतम् - (सम् + भू + क्त)

छित्वा - (छिद् + क्त्वा)

(i) मम मनसि निश्चयः ....। (जन् + क्त)

(ii) तव गृहे अतिथयः ....। (सम् + आ + गम् + क्त)

(iii) मया अद्यैव पुस्तकानि ....। (क्री + क्त)

(iv) त्वया कुतः तानि........................। (आ + नी + क्त)

(v) तानि अत्रैव ....। (मुद्र + क्त)

(vi) जालात् ....मूषकः पलायितः। (मुच् + क्त्वा)

(vii) बिले ....मित्रम् उक्तवान्। (विश् + क्त्वा)

(viii) सर्वान् ....निर्णीतवान्। (मन्त्र + क्त्वा)

(ix) सर्वे ....जालम् अपहृतवन्तः। (मिल् + क्त्वा)

(उ) क्रियाकारकसम्बन्धः

आतिष्ठ	-	कर्तरि क्रिया	एनम्	-	कर्मविशेषणम्
त्वम्	-	कर्ता (आक्षेपगम्यः)	ज्ञानासिना	-	करणम्
योगम्	-	कर्म	तस्मात्	-	हेत्वर्थे पञ्चमी
छित्वा	-	गौणक्रिया (पूर्ववर्तिनी)	आत्मनः	-	सम्बन्धे षष्ठी
संशयम्	-	गौणक्रिया कर्म	भारत	-	सम्बोधनम्

अज्ञानसम्भूतम्	-	कर्मविशेषणम्	उत्तिष्ठ	- कर्तरि क्रिया
हृत्स्थम्	-	कर्मविशेषणम्		

(ऊ) पर्यायशब्दः

(i) **हृत्** - १. स्वान्तम्, २. मानसम्, ३. मनः (सका. नपुं.)

(ii) **असिः** - १. खड्गः, २.निस्त्रिंशः, ३. चन्द्रहासः

(iii) **संशयः** - १. सन्देहः, २. विचिकित्सा, ३. द्वापरः

◆◆◆

अथ पञ्चमोऽध्यायः

१७. श्लोकः

योगयुक्तो विशुद्धात्मा विजितात्मा जितेन्द्रियः।
सर्वभूतात्मभूतात्मा कुर्वन्नपि न लिप्यते।। (भ. गी. ५.७)

पदच्छेदः

योग-युक्तः, विशुद्ध-आत्मा, विजित-आत्मा, जित-इन्द्रियः।
सर्व-भूत - आत्म-भूत-आत्मा, कुर्वन्, अपि, न, लिप्यते।।

पदच्छेदाभ्यासः

अधः प्रदत्तानि पदानि छिनत्तु-

(i) योगयुक्तो - ....

(ii) विशुद्धात्मा - ....

(iii) विजितात्मा - ....

(iv) जितेन्द्रियः - ....

(v) सर्वभूतात्मभूतात्मा - ....

(vi) कुर्वन्नपि - ....

पदपरिचयः

पदम्	विश्लेषणम्	पदम्	विश्लेषणम्
योगयुक्तः	अका. पुं. प्र. एक. क्तान्तं वि. समस्तम् १	कुर्वन्	कुर्वत्-तका. पुं प्र. एक. शत्रन्तं वि. ६
विशुद्धात्मा	विशुद्धात्मन्-नका. पुं. प्र. एक. वि. समस्तम् २	अपि	अव्ययम् १
विजितात्मा	नका. पुं. प्र. एक. वि. समस्तम् ३	न	अव्ययम् २
जितेन्द्रियः	अका. पुं. प्र. एक. वि. समस्तम् ४	लिप्यते	लिप्+लट् प्रपु. एक. कर्मणि आत्मने. क्रिया.
सर्वभूतात्म-भूतात्मा	नका. पुं. प्र. एक. वि. समस्तम् ५		

वर्गीकरणाभ्यासः

यथानिर्देशं श्लोकपदानि वर्गशः लेखनीयानि–

(i) प्रथमान्तम् (६) ....

(ii) समस्तम् (५) ....

(iii) विशेषणम् (६) ....

(iv) नकारान्तम् (३) ....

(v) अकारान्तम् (२) ....

(vi) तकारान्तम् (१) ....

(vii) अव्ययम् (२) ....

(viii) कर्मणि क्रिया (१) ....

आकाङ्क्षाविस्तरः

न लिप्यते (न बध्यते)।

कः न लिप्यते? .... (शत्रन्तं वि. अव्ययम् १ च)

कः कुर्वन्नपि न लिप्यते? .... (क्तान्तं वि.)

कीदृशः योगमुक्तः कुर्वन्नपि न लिप्यते? .... (समस्तं वि. २)

पुनश्च कीदृशः योगयुक्तः विशुद्धात्मा कुर्वन्नपि न लिप्यते? .... (समस्तं वि. ३)

पुनश्च कीदृशः योगयुक्तः विशुद्धात्मा विजितात्मा कुर्वन्नपि न लिप्यते? .... (समस्तं वि. ४)

पुनश्च कीदृशः योगयुक्तः विशुद्धात्मा विजितात्मा जितेन्द्रियः कुर्वन्नपि न लिप्यते? .... (समस्तं वि. ५)

योगयुक्तः विशुद्धात्मा विजितात्मा जितेन्द्रियः सर्वभूतात्मभूतात्मा कुर्वन्नपि कैः न लिप्यते? कर्मभिः (इति कर्ताक्षेपगम्यः)

अन्वयः

योगयुक्तः विशुद्धात्मा विजितात्मा जितेन्द्रियः सर्वभूतात्मभूतात्मा कुर्वन् अपि न लिप्यते।

पदार्थः

पदम्	संस्कृतम्	हिन्दी
योगयुक्तः	कर्मयोगेन सहितः	कर्मयोग से युक्त
विशुद्धात्मा	निर्मलान्तःकरणः	अन्तःकरण से निर्मल
विजितात्मा	वशीकृतदेहः	शरीर वश में किया हुआ
जितेन्द्रियः	वशीकृतबाह्येन्द्रियः	बाह्येन्द्रियों का विजयी
सर्वभूत-आत्मभूतात्मा	सर्वेषां ब्रह्मादिस्तम्ब-पर्यन्तां भूतानाम् आत्मरूपात्मा	सभी चराचर भूतों की आत्मा को अपनी आत्मा समझने वाला
कुर्वन्	कर्म विदधत्	कर्म करता हुआ
अपि	अपि	भी
न	नहि	नहीं
लिप्यते	स्पृश्यते	बँधता है।

भावार्थः

संस्कृतम्—कर्मयोगी पुरुषः कर्म कुर्वन् अपि तस्मिन् कर्मणि लिप्तः न भवति, यतोहि कर्मयोगेन युक्तस्य पुरुषस्य अन्तःकरणं निर्मलं भवति, तेन तस्य शरीरं तदधीनं भवति, बाह्येन्द्रियेषु अपि सः जयं प्राप्नोति, तेन सर्वप्राणिनाम् आत्मभूतं परमात्मानं स्वात्मानं मनुते। एवञ्च एतादृशः सम्यक् दर्शी कर्मयोगी कर्म कुर्वन्नपि तस्मिन् कर्तृत्वाभिमानस्य आसक्तेश्च अभावात् तेन कर्मणा कर्मफलेन वा बद्धो न भवतीति भावः।

हिन्दी—कर्मयोगी कर्म करता हुआ भी उसमें लिप्त नहीं होता है, क्योंकि निष्काम कर्म से युक्त होने पर उसका चित्त रजसादि गुणों से रहित होकर निर्मल हो जाता है, उससे अन्तरिन्द्रिय और बाह्येन्द्रियाँ उसके वश में हो जाती हैं और सभी प्राणियों के आत्मभूत परमात्मा को वह अपना आत्मा मानने लगता है। इस प्रकार सम्यक् दर्शी उस कर्मयोगी में कर्तृत्वाभिमान और आसक्ति न होने से वह कर्म करता हुआ भी उस कर्म से अथवा कर्म के फल से बँधता नहीं है।

अवबोधाभ्यासः

अधः प्रदत्तप्रश्नान् उत्तरतु–

(i) कर्माणि कं न लिम्पन्ति? ....

(ii) मलिनम् अन्तःकरणं कीदृशं भवति? ....

(iii) 'विजितात्मा जितेन्द्रियः' इत्यनयोः पदार्थयोः कः भेदः?

....

(iv) श्लोके प्रयुक्तानां विशेषणानां विशेष्यं किमस्ति? ....

(v) कर्मयोगिनः लक्षणं लिखतु।

....

(vi) कर्मयोगी ज्ञानं प्राप्नोति न वा? ....

व्याकरणाभ्यासः

(अ) सन्धिः

योगयुक्तो विशुद्धात्मा – योगयुक्तः + विशुद्धात्मा (विसर्गसन्धिः)

कुर्वन्नपि – कुर्वन् + अपि

जितेन्द्रियः – जित + इन्द्रियः (गुणसन्धिः)

विशुद्धात्मा – विशुद्ध + आत्मा (दीर्घसन्धिः)

विजितात्मा – विजित + आत्मा (दीर्घसन्धिः)

सर्वभूतात्मभूत – सर्वभूत + आत्मभूत (दीर्घसन्धिः)

आत्मभूतात्मा – आत्मभूत + आत्मा (दीर्घसन्धिः)

रेखाङ्कितेषु पदेषु सन्धिः विधेयः–

(i) रामः राजमणिः – ....

(ii) बालः मात्रा सह – ....

(iii) कृष्णः बलेन सह – ....

(iv) पटः दग्धः – ....

(v) गच्छन् अस्ति – ....

(vi) तस्मिन् उदारे – ....

(vii) कस्मिन् ऐश्वर्यम् – ....

(viii) अकुर्वन् अपि – ....

(ix) रहिता इव – ....

(x) राक्षस+ईश्वरपालिताम् – ....

(xi) पावक+उद्दीप्ताः – ....

(xii) स+ऋषिगणाः – ....

(xiii) विस्मय+आविष्टहृदयः – ....

(xiv) प्राकारेण अभिसंवृताम् – ....

(xv) सागर+अनिलसेविताम् – ....

(आ) समासः

योगयुक्तः – योगेन युक्तः इति (तृ. तत्पु.)

रेखाङ्कितानां यथोचितं विग्रहवाक्यं समासनाम च लिखतु–

(i) पयोभिश्रितम् ओदनं भुङ्क्ते। ....

(ii) वस्त्रवेष्टितं पुस्तकं नयति। ....

(iii) जलस्नातं तं बालं आनय। ....

(iv) हस्तताडितं मृदङ्गं नदति। ....

यथा– **विशुद्धात्मा** – विशुद्धः आत्मा यस्य सः इति (बहुव्रीहिः)

विजितात्मा – विजितः आत्मा यस्य सः इति (बहुव्रीहिः)

जितेन्द्रियः – जितानि इन्द्रियाणि येन सः इति (बहुव्रीहिः)

अधः रेखाङ्कितानां पदानां वाक्यानि लिखतु–

(i) रुचिरप्रभां जानकीं दृष्टवान्। – ....

(ii) कनकपट्टाभं शुभं वसनम्। – ....

(iii) असितेक्षणा तम् अर्हति। – ....

(iv) नष्टशोभा सा सम्प्रति संवृत्ता। – ....

(v) हतपापः सुखमश्नुते। – ....

अधः समास विग्रहवाक्यानि सावधानं पठतु।

यथा– सर्वभूतात्मभूतात्मा – १. सर्वाणि भूतानि इति सर्वभूतानि (कर्मधारयः)

२. आत्मानं भूतः इति आत्मभूतः (द्विती. तत्पु.) चैतन्यं प्राप्तः इत्यर्थः

३. सर्वभूतानाम् आत्मभूतः इति सर्वभूतात्मभूतः (षष्ठी तत्पु.)

४. सर्वभूतात्मभूतः आत्मा – अन्तःकरणं यस्य सः इति (बहुव्रीहिः)

अधोरेखाङ्कितपदानां विग्रहवाक्यानि लिखतु–

(i) सर्वजनाज्ञागतप्राणः महाबाहुः। ....

....

(ii) अखिलपुस्तकविषयधृतकण्ठः छात्रः। ....

....

(iii) सुपक्ष्मताम्रायतशुक्ललोचनाम् ताम् अपश्यत्। ....

....

(iv) कनकविमलहारभूषिताङ्गी सरस्वती। ....

....

(v) रत्नौघसङ्कुला लङ्का शोभते। ....

....

(इ) कृत्प्रत्ययः

कुर्वन् – कृ + शतृ – कुर्वत्

शत्रन्तेन पदेन वाक्यं पूरयतु–

(i)	राजमार्गे..........................पथिकं पश्य।	(गम् + शतृ)
(ii)	तेन..........................एका वृद्धा गच्छति।	(सम् + लप् + शतृ)
(iii)	वृद्धायाः अधरोष्ठौ..........................स्तः।	(स्फुर् + शतृ)
(iv)	पिपासया जलस्थानं..........................गच्छतः।	(दृश् + शतृ)
(v)	तौ जलं..........................जनान् पश्यतः।	(पा + शतृ)
(vi)	तत्र छायायां..........................जनसमूहः दृष्टः।	(वि + श्रम् + शतृ)

(ई) क्रियाकारकसम्बन्धः

न लिप्यते – आत्मने. कर्मणि क्रिया

कर्मभिः इति कर्ता आक्षेपगम्यः।

कर्मयोगी इति कर्म आक्षेपगम्यः।

योगयुक्तः	–	कर्मवि.	जितेन्द्रियः	–	कर्मवि.
विशुद्धात्मा	–	कर्मवि.	सर्वभूतात्मभूतात्मा	–	कर्मवि.
विजितात्मा	–	कर्मवि.	कुर्वन्	–	कर्मवि.

(उ) वाच्यप्रयोगः

(i) कर्मभिः योगयुक्तः न लिप्यते। (कर्मणि)

कर्माणि योगयुक्तं न लिम्पन्ति। (कर्तरि)

(ii) तेन हट्टे आम्ररसः पीयते। (कर्मणि)

सः हट्टे आम्ररसं पिबति। (कर्तरि)

(iii) पिपासुना मार्गे जलं पीयते। (कर्मणि)

पिपासुः मार्गे जलं पिबति। (कर्तरि)

(iv) छात्रेण शिक्षकात् ग्रन्थः अधीयते। (कर्मणि)

छात्रः शिक्षकात् ग्रन्थम् अधीते। (कर्तरि)

◆◆◆

१८-१९. श्लोकः

नैव किञ्चित्करोमीति युक्तो मन्येत तत्त्ववित्।
पश्यञ्छृण्वन् स्पृशञ्जिघ्रन्नश्नन्गच्छन् स्वपञ्छ्वसन्।।

प्रलपन्विसृजन् गृह्णन्नुन्मिषन्निमिषन्नपि।
इन्द्रियाणीन्द्रियार्थेषु वर्तन्त इति धारयन्।। (भ. गी. ५.८-९)

पदच्छेदः

न, एव, किञ्चित्, करोमि, इति, युक्तः, मन्येत, तत्त्व-वित्।

पश्यन्, शृण्वन्, स्पृशन्, जिघ्रन्, अश्नन्, गच्छन्, स्वपन्, श्वसन्।।

प्रलपन्, विसृजन्, गृह्णन्, उन्मिषन्, निमिषन्, अपि।

इन्द्रियाणि, इन्द्रिय-अर्थेषु, वर्तन्ते, इति धारयन्।।

पदच्छेदाभ्यासः

अधः प्रदत्तानि पदानि छिनत्तु–

(i) नैव – ....

(ii) करोमीति – ....

(iii) पश्यञ्छृण्वन् – ....

(iv) जिघ्रन्नश्नन् – ....

(v) श्वपञ्छ्वसन् – ....

(vi) गृह्णन्नुन्मिषन् – ....

(vii) निमिषन्नपि – ....

(viii) इन्द्रियार्थेषु – ....

(ix) वर्तन्त इति – ....

(x) युक्तो मन्येत – ....

पदपरिचयः

पदम्	विश्लेषणम्	पदम्	विश्लेषणम्
न	अव्ययम् १	स्वपन्	स्वपत्-तका.पुं.प्र.एक.शत्रन्तम् ७(स्वप्+शतृ)
एव	अव्ययम् २	श्वसन्	श्वसत्-तका.पुं.प्र.एक.शत्रन्तम् ८(श्वस्+शतृ)
किञ्चित्	अव्ययम् ३	प्रलपन्	प्रलपत्-तका.पुं.प्र.एक.शत्रन्तम् ९(प्र+लप्+शतृ)
करोमि	कृ+लट् उपु.एक.कर्तरि क्रिया.	विसृजन्	विसृजत्-तका.पुं.प्र.एक.शत्रन्तम् १०(वि+सृज+शतृ)
इति	अव्ययम् ४	गृह्णन्	गृह्णत्-तका.पुं.प्र.एक.शत्रन्तम् ११(ग्रह्+शतृ)
युक्तः	अका. पुं.प्र.एक. क्तान्तपदम्	उन्मिषन्	उन्मिषत्-तका.पुं.प्र.एक.शत्रन्तम् १२ (उत्+मिष्+शतृ)
मन्येत	मन्+विधिलिङ् प्रपु.एक.कर्तरि क्रिया	निमिषन्	निमिषत्-तका.पुं.प्र.एक.शत्रन्तम् १३ (नि+मिष्+शतृ)
तत्त्ववित्	तत्त्वविद्-दका.पुं.प्र.एक.समस्तम्	अपि	अव्ययम् ५
पश्यन्	पश्यत्-तका.पुं.प्र.एक.शत्रन्तम् १(दृश्+शतृ)	इन्द्रियाणि	अका. नपुं. प्र. बहु.
शृण्वन्	शृण्वत्-तका.पुं.प्र.एक.शत्रन्तम् २(श्रु+शतृ)	इन्द्रियार्थेषु	अका. पुं. सप्त. बहु., समस्तम्
स्पृशन्	स्पृशत्-तका.पुं.प्र.एक.शत्रन्तम् ३(स्पृश्+शतृ)	वर्तन्ते	वृत्+लट् प्रपु. बहु. आत्मने. कर्तरि क्रिया.
जिघ्रन्	जिघ्रत्-तका.पुं.प्र.एक.शत्रन्तम् ४(घ्रा+शतृ)	इति	अव्ययम् ६
अश्नन्	अश्नत्-तका.पुं.प्र.एक.शत्रन्तम् ५(अश्+शतृ)	धारयन्	धारयत् - तका. पुं. प्र. एक. शत्रन्तम् १४ (धारि+शतृ)
गच्छन्	गच्छत्-तका.पुं.प्र.एक.शत्रन्तम् ६(गम्+शतृ)		

वर्गीकरणाभ्यासः

श्लोकपदानि वर्गशः लिखतु–

(i) प्रथमान्तम् (१७) ....

....

....

(ii) शत्रन्तम् (१४) ....

....

....

(iii) अव्ययम् (६) ....

(iv) सप्तम्यन्तम् (१) ....

(v) अकारान्तम् (३) ....

(vi) दकारान्तम् (१) ....

(vii) क्रियापदम् (३) ....

(viii) समस्तम् (१) ....

आकाङ्क्षाविस्तरः

मन्येत (मानयेत् मन्यते इति वार्थः)

कः मन्येत? .... (क्तान्तम्)

कथम्भूतः युक्तः मन्येत? .... (दका. समस्तम्)

तत्त्ववित् युक्तः कदा मन्येत? .... (शत्रन्तम् १)

युक्तः तत्त्ववित् पुनश्च कदा-कदा मन्येत? ....

....

.... (शत्रन्तम् २-१३)

युक्तः तत्त्ववित् पश्यन् शृण्वन् स्पृशन् जिघ्रन् अश्नन् गच्छन् स्वपन् श्वसन् प्रलपन् विसृजन् गृह्णन् उन्मिषन् निमिषन् अपि कथं मन्येत? .... (शत्रन्तम् १४)

युक्तः तत्त्ववित् किं धारयन् मन्येत? .... (वृत्+लट् अव्यय ६)

युक्तः तत्त्ववित् कानि वर्तन्ते इति धारयन् मन्येत? .... (अका. नपुं.)

युक्तः तत्त्ववित् इन्द्रियाणि कुत्र वर्तन्ते इति धारयन् मन्येत? .... (सप्त. बहु.)

युक्तः तत्त्ववित् पश्यन् शृण्वन् .... निमिषन् अपि इन्द्रियाणि इन्द्रियार्थेषु वर्तन्ते इति धारयन् किं मन्येत .... (अव्ययम् १-३, कृ + लट्, अव्ययम् ४)

युक्तः तत्त्ववित् पश्यन् शृण्वन् .... निमिषन् अपि इन्द्रियाणि इन्द्रियार्थेषु वर्तन्ते इति धारयन् नैव किञ्चित् करोमि इति मन्येत।

तत्र युक्तः योगी पुरुषः केन युक्तः? कर्मयोगेन सांख्ययोगेन वा युक्तः इति आक्षेपलभ्यः अर्थः।

अन्वयः

युक्तः तत्त्ववित् पश्यन् शृण्वन् स्पृशन् जिघ्रन् अश्नन् गच्छन् स्वपन् प्रलपन् विसृजन् गृह्णन् उन्मिषन् निमिषन् अपि इन्द्रियाणि इन्द्रियार्थेषु वर्तन्ते इति धारयन् न किञ्चित् एव करोमि इति मन्येत।

पदार्थः

पदम्	संस्कृतम्	हिन्दी
युक्तः	कर्मयोगेन समाहितः	कर्मयोगी
तत्त्ववित्	परमार्थदर्शी	तत्त्ववेत्ता
पश्यन्	अवलोकयन्	देखता हुआ
शृण्वन्	आकर्णयन्	सुनता हुआ
स्पृशन्	छुपन्	छूता हुआ
जिघ्रन्	शिङ्घन्	सूँघता हुआ
अश्नन्	खादन्	खाता हुआ
गच्छन्	व्रजन्	जाता हुआ
स्वपन्	शयानः	सोता हुआ
श्वसन्	प्राणन्	साँस लेता हुआ
प्रलपन्	वदन्	बोलता हुआ
विसृजन्	त्यजन्	त्यागता हुआ
गृह्णन्	आददानः	लेता हुआ
उन्मिषन्	उन्मीलयन्	खोलता हुआ
निमिषन्	निमीलयन्	मूँदता हुआ
अपि	शेषसर्वक्रियाणां समुच्चये	भी
इन्द्रियाणि	चक्षुरादिकरणानि	सभी इन्द्रियाँ
इन्द्रियार्थेषु	इन्द्रियाणां रूपादिविषयेषु	अपने विषयों में
वर्तन्ते	व्यवहरन्ति	बरत रही हैं

इति	एवम्	ऐसा
धारयन्	निश्चिन्वन्	समझने के कारण
किञ्चित्	किमपि	कुछ भी
न	नहि	नहीं
एव	अवश्यम्	ही
करोमि	वर्ते	करता हूँ
इति	एवम्	ऐसा
मन्येत	मानयेत्	मानता है।

भावार्थः

संस्कृतम्–पूर्वश्लोके कर्म कुर्वन् अपि न लिप्यते इति एतद् विरुद्धम् इत्याशङ्क्य कर्तृत्वाभिमानशून्यत्वात् तत्र विरुद्धमिति समाधत्ते आभ्यां श्लोकाभ्याम्– निष्कामकर्मणि सततं प्रवृत्तः पुरुषः क्रमेण परमार्थस्वरूपं तत्त्वं जानाति। ततः सः दर्शनं श्रवणं स्पर्शं घ्राणम् अशनं गमनं स्वापं श्वासं संलापं विसर्गं ग्रहणम् उन्मेषं निमेषम् इत्यादीनि कर्माणि कुर्वन् अपि एतानि कर्माणि अहं न करोमि, प्रत्युत इन्द्रियाणि एव स्व-स्वविषयेषु रूपादिषु व्यवहरन्ति इति मनसि धृत्वा निश्चयेन अहं किञ्चित् नैव करोमि इत्येवम् आत्मानं कर्तृत्वाभिमानशून्यं मनुते। तत्र दर्शनं श्रवणं स्पर्शनम् अवघ्राणः अशनं चेति चक्षुरादीनां पञ्चज्ञानेन्द्रियाणां व्यापाराः सन्ति। गमनं पादयोः, स्वापः बुद्धेः, श्वासः प्राणस्य, प्रलपनं वागिन्द्रियस्य, विसर्गः पायूपस्थयोः, ग्रहणं हस्तयोः, उन्मेषणनिमेषणे कूर्माख्यप्राणस्य च कार्याणि भवन्ति। एतानि कर्माणि कुर्वन् अपि तेषु अनहङ्कारात् तत्त्ववित् न लिप्यते।

हिन्दी–कर्मयोगी कर्म करता भी है और उससे बँधता भी नहीं इस उक्ति में जो विरोध भासित हो रहा है उसका समाधान इस श्लोक में दिया गया है कि कर्तापन का अभिमान न होने से बन्धन नहीं होता है। जिसका चित्त निष्काम कर्म में समाहित है वह युक्त योगी क्रमशः तत्त्व के वास्तविक स्वरूप को पहचान लेता है। फिर वह पाँचों ज्ञानेन्द्रियों से दर्शन, श्रवण, स्पर्श, अवघ्राण एवं स्वाद का ज्ञान करता रहता है। इसी प्रकार वह पैरों से गति, अन्तकरण से नींद, प्राणों से श्वास, वाणी से बोलना, गुदा एवं जननेन्द्रिय से मल-त्याग, हाथों से आदान तथा कूर्म नामक प्राणों से संकोच-विकास आदि क्रियाओं को करता हुआ भी 'यह इन्द्रियों का अपने-अपने अर्थों में व्यवहार है' ऐसी धारणा स्थिर कर लेता है। फलस्वरूप 'मैं' कुछ भी नहीं करता हूँ' इस प्रकार वह अपने को अभिमान शून्य मानने लगता है और कर्म में अभिमान न होने से वह कर्म-बन्धन से मुक्त रहता है।

अवबोधाभ्यासः

अधः प्रदत्तान् प्रश्नान् समादधातु–

(i) कर्म कुर्वन् तत्त्ववित् कथं कर्म-बन्धनात् मुक्तः भवति? ....

....

(ii) कानि ज्ञानेन्द्रियाणि तेषां कर्माणि च कानि? ....

....

(iii) कर्मेन्द्रियाणां व्यापारान् लिखतु? ....

....

(iv) निद्रा कस्य कर्म? ....

(v) श्वासः कस्य व्यापारः? ....

(vi) सङ्कोचविकासौ केषां कार्ये स्तः? ....

(vii) इन्द्रियाणाम् अर्थान् लिखतु। ....

(viii) धारणा केन इन्द्रियेण क्रियते? ....

(ix) इन्द्रियाणाम् अर्थेषु व्यवहारः कीदृशः? ....

(x) श्लोकस्य केन वाक्यांशेन 'कर्तृत्वाभिमानशून्यता' अर्थः निःसरति?

....

(xi) 'पश्यन्' इत्यादिषु चतुर्दशसु पदेषु कः प्रत्ययः, किं लिङ्गम्, का च विभक्तिः?

....

व्याकरणाभ्यासः

(अ) सन्धिः

नैव - न + एव (वृद्धिसन्धिः)

करोमीति - करोमि + इति (दीर्घसन्धिः)

युक्तो मन्येत - युक्तः + मन्येत (ओभावः सः, उकारः + गुणश्च)

पश्यञ्छृण्वन् - पश्यन् + शृण्वन् (श्चुत्वछत्वसन्धी)

स्पृशञ्जिघ्रन् - स्पृशन् + जिघ्रन् (श्चुत्वम्)

जिघ्रन्नश्नन् - जिघ्रन् + अश्नन् (ङमुडागमः)

स्वपञ्छ्वसन् - स्वपन् + श्वसन् (श्चुत्वछत्वसन्धी)

गृह्णन्नुन्मिषन् - गृह्णन् + उन्मिषन् (ङमुडागमः)

निमिषन्नपि - निमिषन् + अपि (ङमुडागमः)

इन्द्रियाणीन्द्रियार्थेषु - इन्द्रियाणि + इन्द्रियार्थेषु (दीर्घसन्धिः)

इन्द्रियार्थेषु - इन्द्रिय + अर्थेषु (दीर्घसन्धिः)

वर्तन्त इति - वर्तन्ते + इति (यलोपसन्धिः)

अधः प्रदत्ताः प्रश्नाः उत्तरणीयाः–

(i) अनयोः श्लोकयोः कति सन्धयः प्रयुक्ताः, के च ते?

....

(ii) श्लोकाभ्यां दीर्घसन्धेः सर्वाणि उदाहरणानि लेख्यानि।

....

(iii) पद्ययोः ङमुडागमस्य कानि उदाहरणानि?

....

(iv) श्चुत्वसन्धेः छत्वसन्धेः च सर्वाणि उदाहरणानि पद्याभ्यां लिखतु।

....

अधः उदाहरणेषु सन्धिः विधेयः नाम च लेखनीयम्–

(i) रामः नाम - ....

(ii) सुग्रीवः वानराधिपः - ....

(iii) सर्वतः गृहमुख्यानि - ....

(iv) सर्वदा एव - ....

(v) न एनम् - ....

(vi) जघान एनाम् - ....

(vii) दुष्कुले उत्पन्नाम् – ....

(viii) त्वयि गते आगतः – ....

(ix) सूर्ये उदिते – ....

(x) तत् चिन्त्यम् – ....

(xi) तस्मात् जातम् – ....

(xii) विद्यार्थिन् शेषे – ....

(xiii) श्रीमन् आयाहि – ....

(xiv) अस्मिन् उपवने – ....

(xv) एतत् श्रमणगृहम् – ....

(आ) समासः

इन्द्रियार्थेषु – इन्द्रियाणाम् अर्थाः इति इन्द्रियार्थाः, तेषु (षष्ठी तत्पु.)

अधः प्रदत्तरेखाङ्कितपदानां समासो विधेयः–

(i) कृषकग्रामात् अन्नम् आयाति। – ....

(ii) आभीरपल्लीषु ते निवसन्ति। – ....

(iii) कर्णविवरे न पतन्ति। – ....

(iv) स्मृतिपथम् आरूढः। – ....

(v) उपवनशोभां पश्यन्ति। – ....

(vi) मूर्ध्नि पदन्यासम् अकरोत्। – ....

अधः यथाविग्रहं समस्तं रूपं लेखनीयम्–

यथा– तत्त्वं वेत्ति इति (तत्त्व + विद् + क्विप्) कृत्प्रत्ययः उपपदसमासश्च।

(i) ज्ञानं वेत्ति इति – ....

(ii) भुवं भुनक्ति इति – ....

(iii) पयः मुञ्चति इति – ....

(iv) मधूनि लेढि इति – ....

(इ) कृत्प्रत्ययः

यथोचितं मेलयतु–

'क' भागः	'ख' भागः	उचितं मेलनम्
१. बुद्धिः	(क) शृण्वती	....
२. श्रुतिभ्याम्	(ख) स्पृशन्ती	....
३. करेण	(ग) स्वपन्ती	....
४. नासिकाया	(घ) अश्नन्ती	....
५. मोदकम्	(ङ) जिघ्रन्ती	....
६. विद्यापीठम्	(च) गृह्णन्ती	....
७. पुस्तकम्	(छ) गच्छन्ती	....

(ई) क्रियाकारकसम्बन्धः

पदम्	विश्लेषणम्	पदम्	विश्लेषणम्
मन्येत	कर्तरि मुख्यक्रिया	इन्द्रियार्थेषु	अधिकरणम्
युक्तः	कर्ता	इति	वाक्यान्तरेण संबध्नाति।
तत्त्ववित्	कर्तृविशेषणम्	करोमि	कर्तरि गौणक्रिया
पश्यन्...धारयन्	कर्तृविशेषणानि	किञ्चित्	कर्म
वर्तन्ते	कर्तरि गौणक्रिया	अहम्	आक्षेपलभ्यः कर्ता
इन्द्रियाणि	कर्ता		

(उ) पर्यायशब्दः

युक्तः - १. औपयिकः (अका. त्रि.), २. सहितः (अका. त्रि.), ३. भजमानः

तत्त्वम् - १. यथार्थस्वरूपम् (अका. नपुं.), २. परमार्थः (अका. पुं.), ३. सारः

◆◆◆

२०. श्लोकः

ब्रह्मण्याधाय कर्माणि सङ्गं त्यक्त्वा करोति यः।
लिप्यते न स पापेन पद्मपत्रमिवाम्भसा।। (भ. गी. ५.१०)

पदच्छेदः

ब्रह्मणि, आधाय, कर्माणि, सङ्गम्, त्यक्त्वा, करोति, यः।
लिप्यते, न, सः, पापेन, पद्म-पत्रम्+इव, अम्भसा।।

पदपरिचयः

पदम्	विश्लेषणम्	पदम्	विश्लेषणम्
ब्रह्मणि	ब्रह्मन्-नका. नपुं. सप्त. एक.	लिप्यते	लिप्+लट् प्रपु. एक. कर्मणि क्रिया
आधाय	ल्यबन्तम् अव्ययम्	न	अव्ययम्
कर्माणि	कर्मन्-नका. नपुं. द्विती. बहु.	सः	तद्-दका. पुं. प्र. एक. सर्व. २
सङ्गम्	अका. पुं. द्विती. एक.	पापेन	अका. नपुं. तृ. एक.
त्यक्त्वा	क्त्वान्तम् अव्ययम्	पद्मपत्रम्	अका. नपुं. प्र. एक. समस्तम्
करोति	कृ+लट् प्रपु. एक. कर्तरि क्रिया	इव	अव्ययम् २
यः	यद्-पुं. प्र. एक. सर्व. १	अम्भसा	अम्भस्-सका. नपुं. तृ. एक.

पदच्छेदाभ्यासः

अधः प्रदत्तपदानां विच्छेदं करोतु–

(i) ब्रह्मण्याधाय – ....

(ii) स पापेन – ....

(iii) पद्मपत्रमिव – ....

(iv) ब्रह्मैव – ....

(v) इवाम्भसा – ....

वर्गीकरणाभ्यासः

अधः यथानिर्देशं श्लोकपदानि वर्गशः लिखतु–

(i) प्रथमान्तम् (३) ....

(ii) द्वितीयान्तम् (२) ....

(iii) तृतीयान्तम् (२) ....

(iv) सप्तम्यन्तम् (१) ....

(v) नपुंसकलिङ्गम्(५) ....

(vi) पुंलिङ्गम् (३) ....

(vii) अव्ययम् (४) ....

(viii) क्रियापदम् (२) ....

(ix) सर्वनाम (२) ....

आकाङ्क्षाविस्तरः

करोति (कर्तरि क्रिया (मुख्या)।

कः करोति? .... (यद्–दका. पुं. प्र. एक. सर्व. १)

यः किं करोति? .... (नका. नपुं. द्विती. बहु.)

यः कर्माणि किं कृत्वा करोति? .... (ल्यबन्तम् अव्ययम्)

यः कर्माणि कुत्र आधाय (स्थापयित्वा) करोति?.................... (नका. नपुं. सप्त. एक.)

पुनश्च किं कृत्वा करोति? .... (क्त्वान्तम् अव्ययम्)

किं त्यक्त्वा करोति? .... (अका. पुं. द्विती. एक.)

यः कर्माणि ब्रह्मणि आधाय सङ्गं त्यक्त्वा करोति, तेन किं भवति? न लिप्यते (न बध्यते)।

कः न लिप्यते? .... (तद् – दका. पुं. प्र. एक. सर्व. २)

सः केन हेतुना न लिप्यते? .... (अका. नपुं. तृ. एक.)

सः पापेन न लिप्यते किम् इव? .... (अका. नपुं. प्र. एक.)

पद्मपत्रं केन न लिप्यते? .... (सका. नपुं. तृ. एक.)

अन्वयः

यः कर्माणि ब्रह्मणि आधाय सङ्गं त्यक्त्वा करोति सः अम्भसा पद्मपत्रम् इव पापेन न लिप्यते।

पदार्थः

पदम्	संस्कृतम्	हिन्दी
यः	यः पुरुषः	जो व्यक्ति
कर्माणि	कर्तव्यानि	अपने कर्तव्य को
ब्रह्मणि	परमेश्वरे	परमात्मा में
आधाय	समर्प्य	समर्पित करके
सङ्गम्	आसक्तिम्	आसक्ति को
त्यक्त्वा	परित्यज्य	त्यागकर
करोति	विधत्ते	करता है
सः	सः पुरुषः	वह व्यक्ति
अम्भसा	जलेन	पानी से
पद्मपत्रम्	कमलम्	कमल की
इव	यथा	भाँति
पापेन	बन्धनकारणेन	बन्धन मूलक फल से
न	नहि	नहीं
लिप्यते	लिप्तः भवति	लिप्त होता है।

भावार्थः

संस्कृतम्–पूर्वस्मिन् श्लोके 'नैव किञ्चित् करोमि' इत्युक्त्वा कर्तुः अभिमानराहित्यं दर्शितम्। किन्तु यस्य जनस्य 'करोमि' इत्यभिमानः अस्ति तस्य कर्मलेपः अवश्यम्भावी, अविशुद्धचित्तत्वात् संन्यासः अपि नास्ति, इति तस्य महत्सङ्कटम् आगतम् इत्याशङ्कायां भगवान् समाधत्ते यः जनः सर्वमपि स्वस्य विहितं कर्तव्यजातं परमात्मनि निक्षिप्य तस्य फले ममतां विहाय कर्माणि अनुतिष्ठति, यथा–राजसेवकः कश्चित् कर्तव्यजातं राजनि समर्प्य फलाशां विना स्वकर्माणि करोति। सः जनः, यथा वारिणा सरोजं

लिप्तं न भवति तथैव भव-बन्धनकारणेन पापेन पापिष्ठेन कर्मफलेन बद्धः न भवति। इह 'पाप'पदेन कर्मफलं कथितम्, यतोहि शुभमपि तत्फलं भवबन्धनाय भवति, किं पुनः अशुभम्?

हिन्दी–पूर्व श्लोक में सांख्य योगी की चर्चा हुई है, जिसमें 'नैव किञ्चित्करोमि' की भावना रहती है, किन्तु जिसमें 'करोमि' का अभिमान रहता है, उसे तो कर्म-बन्धन अवश्य होगा, इस शंका का समाधान करते हुए भगवान् ने कहा है–

जो व्यक्ति परमात्मा में समर्पण-भाव से अपना सम्पूर्ण कर्तव्य करता है और उसके फल में आसक्ति नहीं रखता है, [जैसे–राजसेवक राज्य के लिए पूरी निष्ठा से अपना काम करता है और उसमें उसकी कोई आसक्ति नहीं होती है।] वह व्यक्ति बन्धनमूलक उस कर्म से उसी प्रकार लिप्त नहीं होता, जैसे जल से कमल लिप्त नहीं होता है। कमल के पत्ते पर पानी की बूँद पड़ते ही वह पत्ते से नीचे सरक जाती है, पत्ते पर नहीं टिकती। यहाँ कर्म के फल को 'पाप' शब्द से व्यक्त किया गया है, क्योंकि वह शुभ होने पर भी भव-बन्धन का कारण है।

अवबोधाभ्यासः

अधः प्रदत्ताः प्रश्नाः समाधेयाः–

(i) नैव किञ्चित् करोमि इत्यनेन कर्तरि किं दर्शितम्? ....

(ii) सङ्गं कुत्र न कुर्यात्? ....

(iii) कर्तृत्वाभिमानं सत्त्वे कथं न लिप्यते? ....

(iv) पापेन इति पदेन कस्य निर्देशः कृतः? ....

(v) पद्मपत्रेण सह कस्य किं सादृश्यम् अस्ति? ....

(vi) इह 'लिप्यते' क्रियायाः कर्म किमस्ति? ....

(vii) सेवकः कस्मिन् आधाय कर्माणि करोति? ....

व्याकरणाभ्यासः

(अ) सन्धिः

ब्रह्मण्याधाय – ब्रह्मणि+आधाय (यण्सन्धिः)

स पापेन – सः+पापेन (सुलोपसन्धिः)

इवाम्भसा – इव+अम्भसा (दीर्घसन्धिः)

अधः लिखितानि पदानि विसन्धीनि करोतु–

(i) कर्माण्याचरति। ....

(ii) स्वामिन्यघं तत्। ....

(iii) आश्वासयाम्यहम्। ....

(iv) विरौत्यूर्ध्वबाहुः। ....

(v) स महामेघसङ्काशः। ....

(vi) सैष दाशरथी रामः। ....

(vii) एष वृक्षः निम्बस्य। ....

(viii) स राजा सत्यवाक्। ....

(ix) एष मे जीवितस्यान्तः। ....

(x) पुरादृष्टं वनम्। ....

(xi) तस्याग्रतः तूर्णं प्रस्थितः। ....

(आ) समासः

पद्मपत्रम् – पद्मस्य पत्रम् इति (षष्ठी. तत्पु.)

अधः रेखाङ्कितेषु समासः विधेयः–

(i) त्वं <u>राममहिषी</u> ध्रुवम्। – ....

(ii) <u>द्रुमचीरैः</u> अलङ्कृतः। – ....

(iii) <u>रामकीर्तन</u>हर्षिता। – ....

(iv) इमां वा <u>जनकात्मजाम्</u>। – ....

(v) <u>प्राणत्याग</u>श्च वैदेह्याः। – ....

(इ) कृत्प्रत्ययः–

आधाय – आ + धा + ल्यप् (य)

त्यक्त्वा – त्यज् + क्त्वा (त्वा)

अधः क्त्वान्तानि ल्यबन्तानि च पदानि यथोदाहरणं परिवर्तनीयानि–

(i) विशित्वा – ....

(ii) हसित्वा – ....

(iii) गत्वा – ....

(iv) नत्वा – ....

(v) धृत्वा – ....

(vi) भुक्त्वा – ....

(vii) पूजयित्वा – ....

(viii) व्रजित्वा – ....

(ix) वदित्वा – ....

(x) स्पृष्ट्वा – ....

(ई) वाच्यप्रयोगः

यः कर्माणि करोति – कर्तरि

येन कर्माणि क्रियन्ते – कर्मणि

१. सः न लिप्यते – कर्तरि

तं न लिम्पन्ति – कर्तरि

२. स्त्रियः मेलां गच्छन्ति – कर्मणि

स्त्रीभिः मेला गम्यते – कर्मणि

३. मेलायां कृषकाः पशून् क्रीणन्ति – कर्तरि

मेलायां कृषकैः पशवः क्रीयन्ते – कर्मणि

४. ते ततः पशून् गृहं नयन्ति – कर्तरि

तैः ततः पशवः गृहं नीयन्ते – कर्मणि

५. स्त्रियः गृहद्वारि तान् पूजयन्ति – कर्तरि

स्त्रीभिः गृहद्वारि ते पूज्यन्ते – कर्मणि

(उ) क्रियाकारकसम्बन्धः

करोति	–	कर्तरि क्रिया (मुख्या)	लिप्यते	–	कर्मणि क्रिया
यः	–	कर्ता	न	–	क्रियाविशेषणम्
कर्मणि	–	कर्म	सः	–	कर्म
आधाय	–	गौणक्रिया	पापेन	–	हेतु तृतीया
ब्रह्मणि	–	अधिकरणम्	पद्मपत्रम्	–	कर्मणः उपमानम्
त्यक्त्वा	–	गौणक्रिया	अम्भसा	–	हेतोः उपमानम्
सङ्गम्	–	गौणक्रियायाः कर्म	इव	–	उपमा वाचकशब्दः

(उ) पर्यायशब्दः

सङ्गः – १. सङ्गमः, २. मेलकः, ३. आसक्तिः

पापम् – १. किल्बिषम्, २. कलुषम्, ३. अघम्, ४. एनः

पद्मम् – १. नलिनम्, २. अरविन्दम्, ३. सरोजम्, ४. कुशेशयम्

अम्भः – १. पयः (सका. नपुं.), २. कीलालम्, ३. जलम्

◆◆◆

२१. श्लोकः

कायेन मनसा बुद्ध्या केवलैरिन्द्रियैरपि।
योगिनः कर्म कुर्वन्ति सङ्गं त्यक्त्वात्मशुद्धये।। (भ. गी. ५.११)

पदच्छेदः

कायेन, मनसा, बुद्ध्या, केवलैः, इन्द्रियैः, अपि।
योगिनः, कर्म, कुर्वन्ति, सङ्गम्, त्यक्त्वा, आत्म-शुद्धये।।

पदच्छेदाभ्यासः

अधः प्रदत्तानि पदानि छिनत्तु–

(i) केवलैरिन्द्रयैः – ....

(ii) इन्द्रियैरपि – ....

(iii) त्यक्त्वात्मशुद्धये – ....

(iv) आत्मशुद्धये – ....

पदपरिचयः

पदम्	विश्लेषणम्	पदम्	विश्लेषणम्
कायेन	काय-अका. पुं. तृ. एक.	योगिनः	योगिन्-नका पुं. प्र. बहु.
मनसा	मनस्-सका. नपुं. तृ. एक.	कर्म	कर्मन्-नका. नपुं. द्विती. एक.
बुद्ध्या	बुद्धि-इका. स्त्री. तृ. एक.	कुर्वन्ति	कृ+लट् प्रपु. बहु. कर्तरि क्रिया
केवलैः	अका. नपुं. तृ. बहु. वि.	सङ्गम्	अका. पुं. द्विती. एक.
इन्द्रियैः	अका. नपुं. तृ. बहु.	त्यक्त्वा	क्त्वान्तम् अव्ययम्
अपि	अव्ययम्	आत्मशुद्धये	आत्मशुद्धि-इका.स्त्री.चतु.एक.समस्तम्

वर्गीकरणाभ्यासः

अधः श्लोकपदानि वर्गशः विभजतु–

(i) प्रथमान्तम् (१) ....

(ii) द्वितीयान्तम् (२) ....

(iii) तृतीयान्तम् (५) ....

(iv) चतुर्थ्यन्तम् (१) ....

(v) नकारान्तम् (२) ....

(vi) अकारान्तम् (४) ....

(vii) इकारान्तम् (२) ....

(viii) सकारान्तम् (१) ....

(ix) पुंलिङ्गम् (३) ....

(x) स्त्रीलिङ्गम् (२) ....

(xi) नपुंसकम् (४) ....

(xii) अव्ययम् (२) ....

(xiii) क्रियापदम् (१) ....

(xiv) विशेषणेन सह विशेष्यं लिखतु। ....

आकाङ्क्षाविस्तरः

कुर्वन्ति (विदधति)

के कुर्वन्ति? .... (नका. पुं. प्र. बहु.)

योगिनः किं कुर्वन्ति? .... (नका. नपुं. द्विती. एक.)

योगिनः केन कर्म कुर्वन्ति? .... (अका. पुं. तृ. एक.)

पुनश्च केन कर्म कुर्वन्ति? .... (सका. नपुं. तृ. एक.)

पुनश्च कया कर्म कुर्वन्ति? .... (इका. स्त्री. तृ. एक.)

पुनश्च कैः कर्म कुर्वन्ति? .... (अका. नपुं. तृ. बहु.)

योगिनः कीदृशैः इन्द्रियैः कर्म कुर्वन्ति? .... (अका. नपुं. तृ. बहु. वि.)

योगिनः कायेन मनसा बुद्ध्या केवलैः

इन्द्रियैः अपि किं कृत्वा कर्म कुर्वन्ति? .... (क्त्वान्तम् अव्ययम्)

कं त्यक्त्वा कर्म कुर्वन्ति? .... (अका. पुं. द्विती. एक.)

योगिनः कायेन मनसा बुद्ध्या केवलैः इन्द्रियैः

अपि सङ्गं त्यक्त्वा कस्मै प्रयोजनाय .... (इका॰ स्त्री. चतु. एक. समस्तम्)
कर्म कुर्वन्ति?

अन्वयः

योगिनः कायेन मनसा बुद्ध्या केवलैः इन्द्रियैः अपि सङ्गं त्यक्त्वा आत्म शुद्धये कर्म कुर्वन्ति।

पदार्थः

पदम्	संस्कृतम्	हिन्दी
योगिनः	कर्मिणः	कर्मयोगी पुरुष
कायेन	देहेन	शरीर से
मनसा	मन-इन्द्रियेण	मन से
बुद्ध्या	मत्या	बुद्धि से
केवलैः	अभिनिवेशरहितैः	आग्रह रहित
इन्द्रियैः	करणैः	इन्द्रियों से
अपि	तथा	और
सङ्गम्	फलाशाम्	फल की कामना
त्यक्त्वा	विहाय	छोड़कर
आत्मशुद्धये	चित्तशुद्धये	अन्तःकरण की शुद्धि के लिए
कर्म	विहितं कर्म	कर्तव्य
कुर्वन्ति	अनुतिष्ठन्ति	करते हैं।

भावार्थः

संस्कृतम्—पूर्वस्मिन् श्लोके निष्कामकर्मणा बन्धनाभावम् उक्त्वा इदानीं सदाचारस्य मोक्षहेतुत्वं दर्शयति—

निष्कामकर्मयोगिनः पुरुषाः शरीरेण स्नानादिकम्, मनसा तत्त्वचिन्तनादिकम्, बुद्ध्या स्वरूपनिर्णयम् तथा कर्मभिः आग्रहरहितैः चक्षुरादिभिः सर्वैः इन्द्रियैः तत्तद्दर्शनादीनि सत्कर्माणि आचरन्ति। किन्तु तेषां तेषु सर्वेषु आचरितेषु कर्मसु फलाप्ति-कामना न भवति। अर्थात् ते योगिनः मनोरथं विहाय कर्म कुर्वन्ति। अतः तेन तेषां चित्तशुद्धिः जायते। एवञ्च सदाचारेण अन्तःकरणशोधनात् परं ज्ञानोदयः भवति येन मोक्षः भवति। तस्मात् हे अर्जुन! त्वमपि कर्मैव कुरु इति भावः।

हिन्दी—पूर्व श्लोक में भगवान् ने बताया कि कर्मयोगी को कर्म के फल का बन्धन नहीं होता है। अब बता रहे हैं कि वह सत्कर्म सदाचार मोक्ष का कारण भी है—

कर्मयोगी जन आग्रह एवं ममता से रहित होकर शरीर से स्नानादि, मन से स्वरूप-चिन्तन, बुद्धि से तत्त्व-निर्णय चक्षुरादि सभी इन्द्रियों से दर्शनादि तत्तत् कर्म करते हैं। इस प्रकार निरपेक्ष

इन्द्रियों से कर्तव्य का पालन करते समय उनमें किसी प्रकार की फलाशा नहीं रहती है। फलस्वरूप उनके सदाचार से उनका अन्तःकरण पवित्र हो जाता है और उसमें ज्ञान का प्रकाश हो जाने से उन्हें मोक्ष मिल जाता है। अतः हे अर्जुन! तुम कर्म के अधिकारी हो और कर्म ही करो।

अवबोधाभ्यासः

अधः प्रदत्तान् प्रश्नान् समादधातु–

(i) पूर्वश्लोके भगवता केन शब्देन बन्धनाभावः उक्तः?

....

(ii) कायेन मनसा बुद्ध्या किं किं कर्म क्रियते? ....

(iii) दर्शनादीनि कर्माणि कैः करणैः विधीयन्ते? ....

(iv) इन्द्रियं साग्रहं कदा भवति? ....

(v) किं त्यक्त्वा कर्म करणीयम्? ....

(vi) सदाचारेण किं पवित्रं भवति? ....

(vii) ज्ञानज्योतिः कस्मिन् अन्तःकरणे उदेति? ....

व्याकरणाभ्यासः

(अ) सन्धिः

केवलैरिन्द्रियैः – केवलैः+इन्द्रियैः (रुत्वम्)

इन्द्रियैरपि – इन्द्रियैः+अपि (रुत्वम्)

त्यक्त्वात्मशुद्धये – त्यक्त्वा+आत्मशुद्धये (दीर्घसन्धिः)

अधः प्रदत्तानि पदानि ससन्धीनि विसन्धीनि तथा च विसन्धीनि ससन्धीनि करोतु–

(i) हरिरवदत्। ....

(ii) भानुः उदेति। ....

(iii) स्वभावसिद्धैर्विमलैः। ....

(iv) कामरूपिभिराविष्टम्। ....

(v) गन्धर्वैः देवकल्पैः। ....

(vi) प्रभुः बुभूषुः भुवनत्रयस्य। ....

(vii) चारणाचरिते पथि। ....

(viii) गवां पतिः इव आबभौ। ....

(ix) सितासितैः। ....

(x) भूतेभ्यश्च अञ्जलिं कृत्वा। ....

(आ) समासः

आत्मशुद्धये – आत्मनः शुद्धये इति (षष्ठी तत्पु.)

अधः रेखाङ्कितेषु पदेषु समासः कार्यः–

(i) पवनाय आत्मयोनये। ....।

(ii) पुष्पौघेण सुगन्धिना। ....।

(iii) धूमराजिरिवानलः। ....।

(iv) स महान् सत्त्वसन्नाहः। ....।

(v) यानि औषधजालानि। ....।

(इ) तद्धितप्रत्ययः

योगिनः – योगः एषाम् अस्ति इति (योग + इनि = योगिन्)

अधः यथाविग्रहं तद्धितान्तं पदं लिखतु–

(i) विद्यार्थः एषाम् अस्ति – ....

(ii) विवेकः अस्य अस्ति – ....

(iii) घटौ अनयोः स्तः – ....

(iv) मृदङ्गम् अस्य अस्ति – ....

(v) पटहाः एषां सन्ति – ....

(ई) क्रियाकारकसम्बन्धः

कुर्वन्ति	–	कर्तरि मुख्यक्रिया	मनसा	–	करणम्
योगिनः	–	कर्ता	बुद्ध्या	–	करणम्
कर्म	–	कर्मकारकम्	इन्द्रियैः	–	करणम्

त्यक्त्वा	–	क्त्वान्ता पूर्वकालिकी गौणक्रिया	केवलैः	–	करणविशेषणम्
सङ्गम्	–	गौणक्रियायाः कर्म	अपि	–	समुच्चये
कायेन	–	करणम्	आत्मशुद्धये	–	तादर्थ्यसम्प्रदानम्

(उ) पर्यायशब्दः

कायः – १. गात्रम्, २. वपुः (वपुस्-सका. नपुं.), ३. वर्ष्म (वर्ष्मन्-नका. नपुं.), ४. कलेवरम्

मनः – १. मानसम्, २. चेतः (चेतस्- सका. नपुं.), ३. चित्तम्,

◆◆◆

२२. श्लोकः

युक्तः कर्मफलं त्यक्त्वा शान्तिमाप्नोति नैष्ठिकीम्।
अयुक्तः कामकारेण फले सक्तो निबध्यते।। (भ. गी. ५.१२)

पदच्छेदः

युक्तः, कर्म-फलम्, त्यक्त्वा, शान्तिम्, आप्नोति, नैष्ठिकीम्।

अयुक्तः, कामकारेण, फले, सक्तः, निबध्यते।।

पदच्छेदाभ्यासः

अधः प्रदत्तपदानां पदच्छेदः कार्यः–

(i) कर्मफलं त्यक्त्वा – ....

(ii) शान्तिमाप्नोति – ....

(iii) सक्तो निबध्यते – ....

पदपरिचयः

पदम्	विश्लेषणम्
युक्तः	अका. पुं. प्र. एक. क्तान्तम्
कर्मफलम्	अका. नपुं. द्विती. एक. समस्तम्
त्यक्त्वा	क्त्वान्तम् अव्ययम्
शान्तिम्	इका. स्त्री. द्विती. एक. विशे.
आप्नोति	आप् + लट् प्रपु. एक. कर्तरि क्रिया
नैष्ठिकीम्	ईका. स्त्री. द्विती. एक. वि॰
अयुक्तः	अका. पुं. प्र. एक. क्तान्तं समस्तं विशे. २
कामकारेण	अका. पुं. तृ. एक. समस्तम्
फले	अका. नपुं. सप्त. एक.
सक्तः	अका. पुं. प्र. एक. क्तान्तं वि॰
निबध्यते	नि + बन्ध् + लट् प्रपु. एक. कर्मणि क्रिया

वर्गीकरणाभ्यासः

अधः श्लोकपदानि वर्गशः स्थापनीयानि–

(i) प्रथमान्तम् (३) ....

(ii) द्वितीयान्तम् (३) ....

(iii) तृतीयान्तम् (१) ....

(iv) सप्तम्यन्तम् (१) ....

(v) अकारान्तम् (६) ....

(vi) इकारान्तम् (१) ....

(vii) ईकारान्तम् (१) ....

(viii) पुंलिङ्गम् (४) ....

(ix) स्त्रीलिङ्गम् (२) ....

(x) नपुंसकलिङ्गम् (२) ....

(xi) क्तान्तम् (३) ....

(xii) क्त्वान्तम् (१) ....

(xiii) क्रियापदम् (२) ....

(xiv) विशेषणेन सह विशेष्यं योजयतु।

आकाङ्क्षाविस्तरः

आप्नोति (प्राप्नोति)।

कः आप्नोति? .... (अका. क्तान्तम्)

युक्तः काम् आप्नोति? .... (इका. विशे.)

युक्तः कीदृशीं शान्तिम् आप्नोति .... (ईका. वि.)

युक्तः किं कृत्वा नैष्ठिकीं शान्तिम् आप्नोति? .... (क्त्वान्तम्)

युक्तः किं त्यक्त्वा नैष्ठिकीं शान्तिम् आप्नोति? .... (द्विती. समस्तम्)

निबध्यते (बन्धनं प्राप्नोति)।

कः निबध्यते? .... (प्र. क्तान्तं विशेष्यम्)

कीदृशः अयुक्तः निबध्यते? .... (क्तान्तं विशेषणम्)

कस्मिन् सक्तः अयुक्तः निबध्यते? .... (अका. नपुं. स एक.)

केन हेतुना फले सक्तः अयुक्तः निबध्यते? .... (अका. तृ.)

अन्वयः

युक्तः कर्मफलं त्यक्त्वा नैष्ठिकीं शान्तिम् आप्नोति। कामकारेण फले सक्तः अयुक्तः निबध्यते।

पदार्थः

पदम्	संस्कृतम्	हिन्दी
युक्तः	कर्मणि सावधानः	कर्म में प्रवृत्त व्यक्ति
कर्मफलम्	कर्मणः फलम्	कर्म के फल को
त्यक्त्वा	हित्वा	छोड़कर
नैष्ठिकीम्	आत्यन्तिकीम्	परम
शान्तिम्	मुक्तिम्	शान्ति को
आप्नोति	लभते	प्राप्त करता है।
कामकारेण	फलमूलकप्रवृत्त्या	फल की आशा से प्रवृत्ति करने के कारण
फले	कर्मणः फले	कर्मफल में
सक्तः	आसक्तः	आसक्त हुआ
अयुक्तः	असमाहितः	असावधान
निबध्यते	भव-बद्धः भवति	संसार-बन्धन को पाता है।

भावार्थः

संस्कृतम्—ननु तेनैव कर्मणा कश्चिद् जनः आत्मशुद्धिद्वारा मुच्यते कश्चित् च बध्यते इति भेदव्यवस्था कथमिति आकाङ्क्षायां श्रीभगवान् आह—

यः जनः युक्तः 'ईश्वराय कर्माणि करोमि न मम फलाय' इत्येवं समाहितः सन् कर्मफलस्य आशां परित्यज्य विहितं स्वकर्तव्यं सम्यक् पालयति सः परमेश्वरैकनिष्ठः आत्मशुद्धिद्वारा क्रमेण परमां ब्रह्मनिष्ठां मोक्षाख्यां शान्तिं लभते। यस्तु अयुक्तः बहिर्मुखः, सः 'मम फलाय इदं करोमि' इत्येवं कामतः प्रवृत्त्या कर्मफले आसक्तः सन् नितरां संसारबन्धं प्राप्नोति। अतः हे अर्जुन! त्वं युक्तः भव।

हिन्दी—पूर्व श्लोक में कहा गया है कि सदाचार से आत्मशुद्धि के द्वारा क्रमशः मुक्ति मिलती है। किन्तु देखा जाता है कि कर्म से कुछ लोग मुक्त होते हैं और कुछ बन्धन में ही फँसे रहते हैं। यह भेद-व्यवस्था कैसे है, इसे श्रीभगवान् बता रहे हैं–

'ईश्वर के लिए कर्म करता हूँ, अपने लाभ के लिए नहीं' इस भावना से समाहित होकर जो व्यक्ति कर्म में प्रवृत्त हैं उन्हें युक्त अथवा ईश्वर-निष्ठ कहते हैं। कर्मफल की आशा छोड़ देने के कारण उन्हें आत्मशुद्धि के द्वारा क्रमशः ब्रह्मनिष्ठा शान्ति अर्थात् मुक्ति मिलती है।

'मैं अमुक लाभ पाने के लिए अमुक काम करता हूँ' इस प्रकार कामना से प्रवृत्ति होने पर व्यक्ति कर्म-फल में अत्यन्त आसक्त रहता है, अतः उसे अयुक्त अथवा बहिर्मुख कहते हैं, उसे परम शान्ति नहीं मिलती, प्रत्युत वह संसार के बन्धन में फँसा रहता है। अतः हे अर्जुन! तुम युक्त बनो।

अवबोधाभ्यासः

अधः प्रदत्तप्रश्नान् उत्तरतु–

(i) आत्मशुद्धिः कथं जायते? ....

(ii) कर्मिणां कौ द्वौ भेदौ स्तः? ....

(iii) युक्तस्य किं स्वरूपम्? ....

(iv) कः अयुक्तः? ....

(v) भवबन्धं कः प्राप्नोति? ....

(vi) कश्च मुक्तिं लभते? ....

(vii) अर्जुनः ज्ञानकर्मणोः कस्याधिकारी? ....

व्याकरणाभ्यासः

(अ) सन्धिः

सक्तो निबध्यते - सक्तः+निबध्यते (ओभावसन्धिः)

अवधेयम् विसर्गात् पूर्वं ह्रस्वः अकारः परं च वर्गाणां तृतीयचतुर्थपञ्चमाः यशश्च स्युः तदा ओभावः उकारः, गुणश्च भवति। यथा–

(i) ततो रावणनीतायाः सीतायाः।

(ii) समुदग्रशिरोग्रीवो गवां पतिः।

(iii) ततो हि ववृधे गन्तुम्।

(iv) दक्षिणो दक्षिणां दिशम्।

(v) सर्वतः संवृतः शैलो बभौ।

अधः प्रदत्त रेखाङ्कितपदानि ससन्धीनि करोतु–

(i) बभौ पुष्पमयः यथा। ....

(ii) शैलः विशालाः शिलाः मुमोच। ....

(iii) एष पर्वतसंकाशः हनुमान्। ....

(iv) हनुमान् पर्वताकारः बभूव। ....

(v) सारवन्तः ये वृक्षाः सन्ति। ....

(आ) समासः

कर्मफलम् – कर्मणः फलम् इति (षष्ठी तत्पु.)

अयुक्तः – न युक्तः इति (नञ् तत्पु.)

अधः रेखाङ्कितेषु पदेषु समासः कार्यः–

(i) ग्रीष्मे आम्रफलम् आनयति। ....

(ii) वर्षर्तौ बदरीफलानि भवन्ति। ....

(iii) सीताफलं शैत्ये पक्वं भवति। ....

(iv) दशग्रीवपराभवं कामयमानम्। ....

(v) यमुनाजलम् असितं भवति। ....

(vi) अज्ञानं महद् दुःखम्। ....

(vii) रुदतीम् अनिन्दिताम्। ....

(viii) अमूर्खः शोभते बालः। ....

(इ) कृत्प्रत्ययः समासश्च

कामकारेण – करणं कारः (कृ + घञ्)

कामस्य कारः इति (उपपद तत्पु.)

कामकारः = स्वैरवृत्तिः, स्वच्छन्दता।

(ई) तद्धितप्रत्ययः

नैष्ठिकीम् – निष्ठायां भवा इति (निष्ठा + ठक् + ङीप्) नैष्ठिकी, ताम् द्व्यजन्तात् भवार्थे ठक् (इक) आदिवृद्धिः ङीप् च।

अधः ठक्प्रत्यययोगेन रूपं लिखतु–

(i) इष्टे भवः – ....

(ii) शेषे भवः – ....

(iii) कर्मणि भवां – ....

(iv) गृहे भवा – ....

(v) यज्ञे भवा – ....

(vi) निशायां भवः – ....

(vii) शालायां भवा – ....

(viii) क्षेत्रे भवः – ....

(ix) ग्रन्थे भवः – ....

(उ) वाच्यप्रयोगः

(i) युक्तः नैष्ठिकीं शान्तिम् आप्नोति – कर्तरि
युक्तेन नैष्ठिकी शान्तिः आप्यते – कर्मणि

(ii) कर्मभिः अयुक्तः निबध्यते – कर्मणि
कर्माणि अयुक्तं निबध्नन्ति – कर्तरि

(iii) बालः आपणे मधुरं रसं पिबति – कर्तरि
बालेन आपणे मधुरः रसः पीयते – कर्मणि

(iv) रहीमः उद्याने बालमित्रम् अपश्यत् – कर्तरि
रहीमेण उद्याने बालमित्रम् अदृश्यत – कर्मणि

(ऊ) क्रियाकारकसम्बन्धः

आप्नोति – कर्तरि मुख्यक्रिया

युक्तः – कर्ता

कर्मफलम् – गौणक्रियायाः कर्म

निबध्यते – कर्मणि मुख्यक्रिया

शान्तिम् - कर्म

नैष्ठिकीम् - कर्मविशेषणम्

त्यक्त्वा - पूर्वकालिकी क्त्वान्ता गौणक्रिया

कामकारेण - क्तान्तक्रियायां हेतुः

अयुक्तः - कर्मकारकम्

सक्तः - कर्मविशेषणं क्तान्तं क्रियाबोधकम्

फले - क्तान्तक्रियायाः अधिकरणम्

(ए) पर्यायशब्दः

फलम् - १. लाभः (अका. पुं.), २. निष्कर्षः (अका. पुं.), ३. प्राप्तिः (इका. स्त्री.),

शान्तिः - १. शमः (अका. पुं.), २. शमथः (अका. पुं.), ३. तूष्णिता (आ. स्त्री.), ४. मौनम् (अका. नपुं.)

◆◆◆

२३. श्लोकः

नादत्ते कस्यचित्पापं न चैव सुकृतं विभुः।
अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः।। (भ. गी. ५.१५)

पदच्छेदः

न, आदत्ते, कस्य-चित्, पापम्, न, च, एव, सुकृतम्, विभुः।
अज्ञानेन, आवृतम्, ज्ञानम्, तेन, मुह्यन्ति, जन्तवः।।

पदच्छेदाभ्यासः

अधः प्रदत्तानि पदानि विभजतु–

(i) नादत्ते – ....

(ii) कस्यचित् – ....

(iii) चैव – ....

(iv) अज्ञानेनावृतम् – ....

पदपरिचयः

पदम्	विश्लेषणम्	पदम्	विश्लेषणम्
आदत्ते	आ+दा+लट् प्रपु.एक.आत्मने.कर्तरि क्रिया	विभुः	उका. पुं. प्र. एक.
कस्य	किम्–मका. पुं. षष्ठी एक. सर्व.	अज्ञानेन	अका. नपुं. तृ. एक.
चित्	अव्ययम् २ पदान्तस्थम्	आवृतम्	अका.नपुं.प्र.एक.कर्मणि क्तान्तं वि.
पापम्	अका. नपुं. द्विती. एक.	ज्ञानम्	अका. नपुं. प्र. एक. विशे.
न	अव्ययम् ३	तेन	तद्–द नपुं. तृ. एक. सर्व.
च	अव्ययम् ४	मुह्यन्ति	मुह्+लट् प्रपु.बहु.कर्तरि क्रिया परस्मै.
एव	अव्ययम् ५	जन्तवः	उका. पुं. प्र. बहु.
सुकृतम्	अका.नपुं.द्विती.एक.भावे क्तान्तम्		

वर्गीकरणाभ्यासः

अधः श्लोकपदानि यथानिर्देशं वर्गशः विभजतु–

(i) प्रथमान्तम् (४) ....

(ii) द्वितीयान्तम् (२) ....

(iii) तृतीयान्तम् (२) ....

(iv) षष्ठ्यन्तम् (१) ....

(v) पुंलिङ्गम् (३) ....

(vi) नपुंसकलिङ्गम् (६) ....

(vii) अव्ययम् (५) ....

(viii) सर्वनाम (२) ....

(ix) क्रियापदम् (२) ....

(x) विशेष्यविशेषणे सहैव लेखनीये।

आकाङ्क्षाविस्तरः

न आदत्ते (न गृह्णाति)।

कः नादत्ते? .... (उका. प्र.)

विभुः किं नादत्ते? .... (नपुं. द्विती.)

विभुः कस्य पापं नादत्ते? .... (किम् षष्ठी+अव्ययम् २)

विभुः पुनश्च किं नादत्ते? .... (नपुं. द्विती. क्तान्तम्)

आवृतम् (आच्छन्नम् अस्ति)।

किम् आवृतम्? .... (नपुं. प्र.)

ज्ञानं केन आवृतम्? .... (नपुं. तृ.)

ज्ञानम् अज्ञानेन आवृतम्, तेन किम्? .... (सर्व. तृ.+क्रिया परस्मै.)

तेन के मुह्यन्ति? .... (उका. प्र. बहु.)

अन्वयः

विभुः कस्यचित् पापं न आदत्ते, सुकृतं च न (आदत्ते) एव। ज्ञानम् अज्ञानेन आवृतम् तेन जन्तवः मुह्यन्ति।

पदार्थः

पदम्	संस्कृतम्	हिन्दी
विभुः	व्यापकः परमेश्वरः	सर्वव्यापी परमात्मा
कस्यचित्	कस्यापि (भक्तस्य अभक्तस्य वा)	(भक्त अथवा द्रोही) किसी का भी
पापम्	अपुण्यम्	अशुभ कर्म
न	न हि	नहीं
आदत्ते	गृह्णाति	लेता है
सुकृतम्	शुभकर्म पुण्यम्	शुभकर्म
च	तथा	और
न (आदत्ते)	न (गृह्णाति)	नहीं (लेता है)
एव	हि	निश्चय ही
ज्ञानम्	विवेकज्ञानम्	परमार्थ ज्ञान
अज्ञानेन	अनृतेन	अज्ञान से
आवृतम्	आच्छन्नम्	ढका हुआ है
तेन	तेन कारणेन	उससे
जन्तवः	अज्ञाः प्राणिनः	अज्ञानी प्राणी
मुह्यन्ति	मोहं गच्छन्ति	मोहित होते हैं।

भावार्थः

संस्कृतम्—यः साधकः सर्वाणि कर्माणि कर्मफलानि च भगवते अर्पयित्वा तेभ्यः फलेभ्यः स्वसंबन्धं विच्छिनत्ति, तस्य तानि कर्माणि फलानि च भगवन्तं प्राप्नोति इति तं बध्नन्ति न वा इति जिज्ञासायां भगवान् आह—

प्रयोजकः कारयिता वा सन् अपि प्रभुः कस्यचित् अभक्तस्य अनाचारादि अशुभकर्म पापं न स्वीकरोति तथा कस्यचित् भक्तस्य यागदानहोमादिकं सुकृतं शुभं कर्मापि न गृह्णाति एव। यतोहि सः विभुः परिपूर्णः आप्तकामः अस्ति। आप्तकामस्यैव तस्य अचिन्त्यनिजमायया तत्तत्पूर्वकर्मानुसारेण प्रवर्तकत्वम्।

ननु भक्तान् अनुकम्पयतः अभक्तान् च दण्डयतः तस्य वैषम्योपलम्भात् कथम् आप्तत्वम् इति चेत्

उच्यते–'निग्रहः अपि दण्डरूपः अनुग्रहः एव' इति। अज्ञानेन 'सर्वत्र समः परमेश्वरः' इत्येवंभूतं ज्ञानं पिहितमस्ति। तेन हेतुना जीवाः मुह्यन्ति। भगवति वैषम्यं मन्यन्ते इति भावः।

शङ्करानुयायिनाम् उत्तरार्धस्य अर्थः किञ्चिद् भिन्नः, यथा–अज्ञानेन अनादिसिद्धमायया परमार्थज्ञानम् आच्छन्नम्, तेन जीवाः मुह्यन्ति अहं करोमि ईश्वरः कारयति इत्येवम् अध्यासरूपं मोहं गच्छन्ति संसारिणः जीवाः शास्त्राणि च। अत एव श्रुत्यादिषु उक्तम्–'एष उ ह्येव साधु कर्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीषते' इत्यादि।

हिन्दी–जो साधक सम्पूर्ण कर्मों को और कर्मफलों को भगवान् के अर्पण करके कर्मफल से अपना सम्बन्ध-विच्छेद कर लेते हैं, उनके शुभाशुभ कर्मों के फल के भागी क्या भगवान् होते हैं? इस जिज्ञासा पर कहते हैं–

सबका प्रेरक अथवा कारयिता होकर भी परमात्मा किसी अभक्त के अनाचारादि पाप का भागी नहीं होता और किसी भक्त के शुभ कर्म याग, दान, होमादि को ग्रहण भी नहीं करता है। उसे संज्ञान में रखता है, किन्तु उससे सम्बन्ध नहीं रखता है। क्योंकि वह विभु है, पूर्णकाम है। वह अपनी अचिन्त्य माया के द्वारा पूर्वकर्मानुसार जीवों का प्रेरक अथवा कारयिता है।

यहाँ पुनः शंका होती है कि वह परमात्मा भक्तों पर अनुग्रह करता है और दुष्टों का निग्रह करता है, इस प्रकार उसमें विषमता है। इसका निराकरण करते हैं–'निग्रह भी दण्डरूप अनुग्रह है'। इस अज्ञान से 'परमेश्वर सर्वत्र सम है' यह ज्ञान ढका हुआ है। इससे जीव मोह में पड़कर परमेश्वर में विषमता देखने लगता है।

श्रीशंकर मत से उत्तरार्ध का अर्थ छोड़ा भिन्न है–तदनुसार 'अज्ञान' अनादि सिद्ध माया को कहते हैं। उस माया से विवेकज्ञान ढक जाता है। फलस्वरूप अविवेकी संसारी को 'मैं' करता हूँ, कराता हूँ, ईश्वर प्रेरक है इत्यादि मोह हो जाता है।

अवबोधाभ्यासः

अधः प्रदत्ताः प्रश्नाः समाधेयाः–

(i) कां जिज्ञासां समाधातुम् अयं श्लोकः? ....

(ii) ईश्वरः सुकृतं दुष्कृतं वा कथं न भजते? ....

(iii) ज्ञानं केन अज्ञानेन आच्छादितम्? ....

(iv) जीवानां कीदृशः मोहः? ....

(v) श्रीशंकरमतेन उत्तरार्धस्य अर्थं लिखतु? ....

(vi) व्यावहारिकदृष्ट्या जीवानां प्रवर्त्तकः ईश्वरः कर्म वा?

....

(vii) श्लोके 'अस्ति' क्रियायाः आक्षेपः कुत्र? ....

व्याकरणाभ्यासः

(अ) सन्धिः

नादत्ते - न+आदत्ते (दीर्घसन्धिः)

अज्ञानेनावृतम् - अज्ञानेन+आवृतम् (दीर्घसन्धिः)

चैव - च+एव (वृद्धिसन्धिः)

अधः रेखाङ्कितेषु सन्धिछेदं सन्धिं वा करोतु–

(i) रम्यकाननतोयाढ्याम् - ....

(ii) शारदाम्बुधरप्रख्यैः - ....

(iii) सागर + अनिलसेविताम् - ....

(iv) भुजग + आचरिताम् - ....

(v) वायुना + एजन्ते - ....

(vi) महा + औषधम् - ....

(vii) नैव दंशात् - ....

(आ) समासः

यथा– अज्ञानेन - न ज्ञानेन इति (नञ् तत्पु.)

अधः समस्तं रूपं लिखतु–

(i) न विनयेन इति - ....

(ii) न आदिः इति - ....

(iii) न अग्निः इति - ....

(iv) न प्रभा इति - ....

(इ) कृत्प्रत्ययः

सुकृतम् - सु + कृ + क्त

आवृतम् - आ + वृ + क्त

अधः वाक्ये प्रयुक्तेषु क्तान्तेषु प्रकृति-प्रत्यय-विभागः दर्शनीयः–

(i) तद् भाण्डं चुल्लिकायाम् आधृतम्। ....

(ii) तस्मिन् भाण्डे तण्डुलाः प्रक्षिप्ताः। ....

(iii) मात्रा ततः दर्वी अपि परिचालिता। ....

(iv) इदानीं द्विदलं सम्यक् विक्लिन्नम्। ....

(v) तच्च घृतेन सुवासितम्। ....

(ई) क्रियाकारकसम्बन्धः

आदत्ते	–	कर्तरि क्रिया	अस्ति	–	क्रियायाः आक्षेपः
न	–	क्रियाविशेषणम्	ज्ञानम्	–	आक्षिप्तक्रियायाः कर्ता
विभुः	–	कर्ता	आवृतम्	–	कर्तृविशेषणम्
पापम्	–	कर्म	अज्ञानेन	–	करणम्
कस्यचित्	–	कर्म सम्बन्धी	मुह्यन्ति	–	कर्तरि क्रिया परस्मै.
न चैव	–	पुनः आक्षिप्तायाः 'आदत्ते' क्रियायाः विशेषणम्	जन्तवः	–	कर्ता
सुकृतम्	–	आक्षिप्तक्रियायाः कर्म	तेन	–	हेतु तृतीया

(उ) पर्यायशब्दः

जन्तुः – १. प्राणी (प्राणिन्–नका. पुं.), २.चेतनः (अका. पुं.), ३. जन्युः (उका. पुं.), ४. जीवः (अका॰ पुं॰), ५. सत्त्वः (अका॰ पुं॰)

सुकृतम् – १. पुण्यम् (अका. नपुं), २. श्रेयः (श्रेयस्–सका. नपुं), ३. धर्मः (अका. पुं./ नपुं), ४. वृषः (अका. पुं.)

◆◆◆

२४. श्लोकः

विद्याविनयसम्पन्ने ब्राह्मणे गवि हस्तिनि।
शुनि चैव श्वपाके च पण्डिताः समदर्शिनः।। (भ. गी. ५.१८)

पदच्छेदः

विद्या-विनय-सम्पन्ने, ब्राह्मणे, गवि, हस्तिनि।
शुनि, च, एव, श्वपाके, च, पण्डिताः, सम-दर्शिनः।।

पदच्छेदाभ्यासः

उपरि पदच्छेदप्रकरणे प्रदर्शितरीत्या अधः प्रदत्तपदानि विशिलष्य लिखतु–

(i) विद्याविनयसम्पन्ने – ....

(ii) चैव – ....

(iii) समदर्शिनः – ....

पदपरिचयः

पदम्	विश्लेषणम्	पदम्	विश्लेषणम्
विद्या-विनयसम्पन्ने	अका.पुं.सप्त.एक.समस्तम् विशेषणम्	एव	अव्ययम् २
ब्राह्मणे	अका. पुं. सप्त. एक. विशे.	श्वपाके	श्वपाक-अका. पुं. सप्त. एक.
गवि	गो-ओका. पुं./स्त्री. सप्त एक.	च	अव्ययम् ३
हस्तिनि	हस्तिन्-नका. पुं. सप्त. एक.	पण्डिताः	अका. पुं. प्र. बहु. विशे.
शुनि	श्वन्-नका. पुं. सप्त. एक.	समदर्शिनः	समदर्शिन्-नका. पुं. प्र. बहु. विशे.
च	अव्ययम् १		

वर्गीकरणाभ्यासः

अधः श्लोकपदानि वर्गशः विभजतु–

(i) प्रथमान्तम् (२) ....

(ii) सप्तम्यन्तम् (६) ....

(iii) अव्ययम् (३) ....

(iv) पुंलिङ्गम् (८) ....

(v) नकारान्तम् (३) ....

(vi) अकारान्तम् (४) ....

(vii) ओकारान्तम् (१) ....

(viii) विशेष्यम् (२) ....

(ix) विशेष्ययोः विशेषणे लिखतु।

आकाङ्क्षाविस्तरः

भवन्ति - इति क्रिया आक्षेपगम्या

के भवन्ति? .... (अका. प्र. बहु.)

पण्डिताः कीदृशाः भवन्ति? .... (नका. प्र. बहु.)

पण्डिताः कुत्र समदर्शिनः भवन्ति? .... (अका. सप्त. विशे.)

पण्डिताः कीदृशे ब्राह्मणे समदर्शिनः भवन्ति? .... (अका. सप्त. वि.)

पण्डिताः पुनश्च कुत्र समदर्शिनः भवन्ति? .... (ओका. सप्त.)

पुनश्च कुत्र समदर्शिनः? .... (नका. सप्त.)

पुनश्च कुत्र समदर्शिनः? .... (नका. सप्त.)

पुनश्च कुत्र समदर्शिनः? .... (अका. सप्त.)

अन्वयः

पण्डिता विद्याविनयसम्पन्ने ब्राह्मणे, गवि, हस्तिनि, शुनि च श्वपाके च समदर्शिनः एव (भवन्ति)।

पदार्थः

पदम्	संस्कृतम्	हिन्दी
पण्डिताः	ज्ञानिनः	ज्ञानी जन
विद्याविनयसम्पन्ने	विद्यया नम्रतया च युक्ते	विद्या और विनय से युक्त
ब्राह्मणे	विप्रे	ब्राह्मण में

गवि	गोपशौ	गाय में
हस्तिनि	गजे	हाथी में
शुनि	कुक्कुरे	कुत्ते में
च	तथा	और
श्वपाके	चाण्डाले	चाण्डाल में
च	तथा	और
समदर्शिनः	समानदृष्टयः	समदर्शी
एव (भवन्ति)	एव (भवन्ति)	ही (होते हैं)

भावार्थः

संस्कृतम्–परमात्मनः प्राप्ति-साधनम् उक्तम्। तैः साधनैः परमेश्वरस्य अनुभवं कृतानां सिद्धानां ज्ञानिपुरुषाणां जगति व्यवहारं दर्शयति–

ते पण्डिताः सिद्धज्ञानिनः विद्यया निरहंकारभावेन च युक्ते विदुषि विनम्रे च ब्राह्मणे, पशुषु पवित्रायां गवि, गजे, कुक्कुरे च चाण्डाले च समानं द्रष्टुं शीलवन्तः भवन्ति। ते पण्डिताः, पशुषु सात्त्विकीं गाम्, राजसं हस्तिनं तामसं श्वानं च, तथा मनुष्येषु तामसं चाण्डालं च समानभावेन पश्यन्ति। एतेषु विषमेषु अपि ब्राह्मणादिषु समानं परमात्मनं बुद्ध्वा तेषु विषमभावं न कुर्वन्ति। एवञ्च समदर्शित्वात् एव ते पण्डिताः सन्ति। तथा च ज्ञानिनः जगद्व्यवहारे सर्वत्र समानं प्रेमभावं प्रकटयन्तः समदर्शिनः भवन्ति इति भावः।

हिन्दी–पहले के श्लोकों में परमात्मा की प्राप्ति का साधन बताया गया है। उन साधनों से परमेश्वर का अनुभव किये हुए सिद्ध ज्ञानी पुरुषों का संसार में कैसा व्यवहार होता है, उसे इस श्लोक में बता रहे हैं–

परमात्म-तत्त्व के अनुभवी सिद्ध ज्ञानी पण्डित विद्या और विनय से युक्त ब्राह्मण और चाण्डाल में तथा गाय, हाथी और कुत्ते में भी समान दृष्टि रखने वाले समदर्शी होते हैं। यहाँ विद्या और विनय से युक्त विद्वान् एवं निरभिमानी ब्राह्मण सत्त्वगुणी है तो मनुष्यों में चाण्डाल तमोगुण का प्रतीक है। पशुओं में गाय सात्त्विक है, हाथी राजस है एवं कुत्ता तामस है। इन सबमें समान परमात्मा का दर्शन करने के कारण पण्डित ज्ञानी इनमें विषम भाव नहीं रखता है। संसार में गाय, हाथी एवं कुत्ता आदि व्यवहार करता हुआ भी ज्ञानी पुरुष सबको समान प्रेमभाव से देखता है। समदर्शी होने से ही वह सिद्ध ज्ञानी पण्डित कहलाता है।

अवबोधाभ्यासः

अधः प्रदत्तप्रश्नान् समादधातु–

(i) अस्मिन् श्लोके किं दर्शितम्? ....

(ii) श्लोके सत्त्वादिगुणानां कानि प्रतीकानि गृहीतानि? ....

(iii) के पण्डिताः सन्ति? ....

(iv) अत्र समानदर्शनस्य किं तात्पर्यम्? ....

(v) अस्मिन् श्लोके कस्याः क्रियायाः आक्षेपः भवति? ....

(vi) पण्डिताः कुत्र समदर्शिनः भवन्ति? ....

(vii) श्लोकस्य तात्पर्यं स्वीयवाक्यैः लिखतु। ....

व्याकरणाभ्यासः

(अ) सन्धिः

यथा– **चैव** – च+एव (वृद्धिसन्धिः)

अधः रेखाङ्कितेषु पदेषु सन्धिविच्छेदं करोतु–

(i) जगति ई<u>श्वरस्यौपम्यं</u> नास्ति। ....

(ii) <u>तस्यैश्वर्यं</u> गिरिनदीकाननादयः सन्ति। ....

(iii) सर्व<u>त्रैव</u> तस्य कृपा दृष्टिः विराजते। ....

(iv) सर्वं चराचरम् ईश्वरे<u>णौतप्रोतम्</u>। ....

(आ) समासः

विद्याविनयसम्पन्ने - विद्या च विनयः च इति विद्याविनयौ (द्वन्द्वः)।

विद्याविनयाभ्यां सम्पन्नः इति विद्याविनयसम्पन्नः (तृ. तत्पु.) तस्मिन्

अधः प्रदत्तेषु पदेषु समासविग्रहौ कार्यौ–

(i) ज्ञानविज्ञानपूर्णाय – ....

(ii) मानापमानशून्येन – ....

(iii) चम्पाकेतकीसंकुला – ....

(iv) अश्ववडवासहिताः – ....

(v) वातातपपीडितः – ....

(इ) कृत्प्रत्ययः

समदर्शिनः – समं द्रष्टुं शीलम् एषाम् इति

(सम + दृश् + णिनि) (णिनि – इन्) – समदर्शिन् + जस् (अस्)

अधः यथाविग्रहं णिनिप्रत्ययान्तं रूपं लिखतु–

(i) गृहं गन्तुं शीलम् अस्य (गृह + गम् + णिनि) – ....

(ii) धनं हर्तुं शीलम् अस्य – ....

(iii) देवं द्रष्टुं शीलम् अनयोः – ....

(iv) रोगं कर्तुं शीलम् अनयोः – ....

(v) दुग्धं पातुं शीलम् एषाम् – ....

(vi) पक्षे पतितुं शीलम् अस्य – ....

(vii) न्यायं वदितुं शीलम् अनयोः – ....

(viii) कार्यं कर्तुं शीलम् एषाम् – ....

(ix) अधः शयितुं शीलम् अस्य – ....

(ई) तद्धितप्रत्ययः

पण्डिताः – पण्डा सञ्जाता अस्य (पण्डा + इतच्)

(इतच् – इत) – पण्डित + जस्

अधः रेखाङ्कितेषु विग्रहः प्रत्ययश्च प्रदर्शनीयौ–

(i) वृक्षः अयं फलितः। – ....।

(ii) पुष्पितं पादपं पश्यतु। – ....।

(iii) सूत्रितां मालाम् आनयतु। – ....।

(iv) बुभुक्षितं न प्रतिभाति किञ्चित् – ....।

(v) महिषेण कल्लोलितं सरः। – ....।

(ई) क्रियाकारकसम्बन्धः

भवन्ति	-	आक्षेपगम्या क्रिया	गवि	-	अधिकरणम्
पण्डिताः	-	कर्ता	हस्तिनि	-	अधिकरणम्
समदर्शिनः	-	कर्तृविशेषणम्	शुनि	-	अधिकरणम्
ब्राह्मणे	-	अधिकरणम्	श्वपाके	-	अधिकरणम्
विद्याविनयसम्पन्ने	-	अधिकरणम् विशेषणम्			

(उ) पर्यायशब्दः

ब्राह्मणः - १. विप्रः (अका. पुं.), २. अग्रजन्मा (अग्रजन्मन्-नका. पुं.), ३. वाडवः ४. भूदेवः

गौः - १. धेनुः (उका. स्त्री.), २. सौरभेयी (ईका. स्त्री.), ३. उक्षा (उक्षन्-नका. पुं.), ४. वृषभः, ५. बलीवर्दः, ६. वृषः

हस्ती - १. गजः, २. द्विरदः, ३. द्विपः, ४. दन्ती (दन्तिन्-नका. पुं.), ५. नागः, ६. कुञ्जरः, ७. करी (करिन्-नका. पुं.)

श्वा - १. कौलेयकः, २. सारमेयः, ३. कुक्कुरः, ४. शुनकः, ५. भषकः, ६. मृगदंशकः

श्वपाकः - १. चण्डालः, २. चाण्डालः, ३. श्वपचः, ४. पुक्कसः

पण्डितः - १. विद्वान् (विद्वस्- सका. पुं.), २. विपश्चित् (तका. पुं.), ३. दोषज्ञः, ४. सुधीः (ईका. पुं.), ५. प्राज्ञः, ६. संख्यावान् (संख्यावत्-तका. पुं.)

विनयः - १. नम्रता (अका. स्त्री.), २. उपशमः, ३. अनौद्धत्यम्

◆◆◆

२५. श्लोकः

भोक्तारं यज्ञतपसां सर्वलोकमहेश्वरम्।
सुहृदं सर्वभूतानां ज्ञात्वा मां शान्तिमृच्छति।। (भ. गी. ५.२९)

पदच्छेदः

भोक्तारम्, यज्ञ-तपसाम्, सर्व-लोक-महा+ईश्वरम्।
सुहृदम्, सर्व-भूतानाम्, ज्ञात्वा, माम्, शान्तिम्, ऋच्छति।।

पदच्छेदाभ्यासः

अधः प्रदत्तानि पदानि विभजनीयानि–

(i) यज्ञतपसाम् – ....

(ii) सर्वलोकमहेश्वरम् – ....

(iii) शान्तिमृच्छति – ....

(iv) त्यक्त्वात्मशुद्धये – ....

(v) सर्वभूतानाम् – ....

(v) महेश्वरम् – ....

पदपरिचयः

पदम्	विश्लेषणम्	पदम्	विश्लेषणम्
भोक्तारम्	भोक्तृ-ऋका. पुं. द्विती. एक. तृजन्तम्	ज्ञात्वा	क्त्वान्तम् अव्ययम्
यज्ञतपसाम्	यज्ञतपस्-सका. नपुं. षष्ठी बहु. समस्तम्	माम्	अस्मद्-दका.त्रि.द्विती.एक.सर्व.
सर्वलोकमहेश्वरम्	अका. पुं. द्विती. एक. समस्तम्	शान्तिम्	इका. स्त्री. द्विती. एक.
सुहृदम्	सुहृद्-दका. पुं. द्विती. एक.	ऋच्छति	ऋच्छ्+लट् प्रपु. एक. कर्तरि क्रिया परस्मै.
सर्वभूतानाम्	अका. नपुं. षष्ठी. बहु. समस्तम्		

वर्गीकरणाभ्यासः

अधः श्लोकपदानि यथावर्गं लेखनीयानि–

(i) द्वितीयान्तम् (५) ....

(ii) षष्ठ्यन्तम् (२) ....

(iii) पुंलिङ्गम् (३) अस्मद् (माम्) कृष्णम् अथवा परमात्मानम्, तर्हि नपुंसकम्

(iv) स्त्रीलिङ्गम् (१) ....

(v) नपुंसकलिङ्गम् (२) ....

(vi) ऋकारान्तम् (१) ....

(vii) दकारान्तम् (२) ....

(viii) सकारान्तम् (१) ....

(ix) अकारान्तम् (२) ....

(x) क्त्वान्तम् (१) ....

(xi) क्रियापदम् (१) ....

आकाङ्क्षाविस्तरः

ऋच्छति (गच्छति - लभते)।

कः ऋच्छति? 'ज्ञानी पण्डितः'। इति कर्ता आक्षेपगम्यः।

काम् ऋच्छति .... (इका. द्विती.)

किं कृत्वा शान्तिम् ऋच्छति? .... (क्त्वान्तम्)

कं ज्ञात्वा शान्तिम् ऋच्छति? .... (सर्व.)

कीदृशं मां ज्ञात्वा शान्तिम् ऋच्छति? .... (तृजन्तम्)

केषां भोक्तारं मां ज्ञात्वा शान्तिम् ऋच्छति? .... (सका. षष्ठी)

यज्ञतपसां भोक्तारं पुनश्च कीदृशं मां ज्ञात्वा शान्तिम् ऋच्छति? .... (दका. पुं.)

यज्ञतपसां भोक्तारं केषां सुहृदं मां ज्ञात्वा शान्तिम् ऋच्छति? .... (अका. षष्ठी)

यज्ञतपसां भोक्तारं सर्वभूतानां सुहृदं पुनश्च कीदृशं मां ज्ञात्वा शान्तिम् ऋच्छति? .... (अका. द्विती.)

अन्वयः

यज्ञतपसां भोक्तारं सर्वभूतानां सुहृदं सर्वलोकमहेश्वरं मां ज्ञात्वा शान्तिम् ऋच्छति।।

पदार्थः

पदम्	संस्कृतम्	हिन्दी
यज्ञतपसाम्	क्रतूनां तपस्यानां च	यज्ञ और तप के
भोक्तारम्	स्वीकर्तारम्	भोक्ता
सर्वभूतानाम्	सर्वप्राणिनाम्	सभी प्राणियों के
सुहृदम्	मित्रम्	मित्र
सर्वलोकमहेश्वरम्	सकलभुवनाधिपतिम्	सभी लोकों के एकमात्र स्वामी
माम्	माम् (परमात्मानम्)	मुझ परमेश्वर को
ज्ञात्वा	विज्ञाय	जान लेने पर
शान्तिम्	मोक्षम्	परम शान्ति मोक्ष को
ऋच्छति	प्राप्नोति	प्राप्त कर लेता है।

भावार्थः

संस्कृतम्–निष्कामकर्मणा विशुद्धान्तःकरणे किं विज्ञेयम् इति अनेन श्लोकेन प्रतिपाद्यते, यतोहि केवलेन इन्द्रियादिसंयमेन अन्तःकरणशुद्ध्या वा परमपुरुषार्थः नैव प्राप्तुं शक्यते। अत आह–

यज्ञानां तपसां च भक्तैः समर्पितानां यदृच्छया अहमेव भोगकर्ता पालकः, सम्पूर्णजीवानाम् अहमेव प्रत्युपकारनिरपेक्षः हृदयेन दयालुः सुहृत् तथा अहमेव सर्वेषां लोकानां महान् ईश्वरः हिरण्यगर्भादीनामपि नियन्ता अस्मि। एतादृशं मां भगवन्तं ज्ञानेन तत्त्वतः अनुभूय मत्प्रसादेन भक्तः पण्डितः सर्वसंसारोपरतिं परमपुरुषार्थरूपां मोक्षाख्यां शान्तिं लभते। एवञ्च कर्मज्ञानद्वारेण भक्तियोगेन परमपुरुषार्थलाभः इति भावः।

हिन्दी–इन्द्रियों को वश में करके निष्काम कर्म के द्वारा अन्तःकरण की शुद्धि हो जाने मात्र से भगवान् का दर्शन नहीं हो जाता, अपितु निर्मल मन में ज्ञान का प्रकाश करके उसे भगवान् में समर्पित करने पर परमशान्ति मिलती है, इसी अभिप्राय को यहाँ भगवान् ने प्रकट किया है–

हे अर्जुन! सम्पूर्ण यज्ञों और तपस्याओं का स्वीकर्ता, भोक्ता अथवा पालक मैं ही हूँ। मैं प्राणिमात्र का सुहृत् अर्थात् प्रत्युपकार की भावना से रहित होकर हृदय से उपकार करने वाला हूँ तथा अखिल ब्रह्माण्ड का नियन्ता राजाधिराज भी हूँ। जो भक्त विशुद्ध चित्त में ज्ञान के द्वारा मेरे इस रूप का तात्त्विक अनुभव कर लेता है वह भक्त पण्डित सारे जगत्प्रपंच से मुक्ति दिलाने वाली परम शान्ति को प्राप्त कर लेता है। इस प्रकार कर्म और ज्ञान के रास्ते पर चलता हुआ पण्डित भक्तियोग से भगवान् को पा जाता है।

अवबोधाभ्यासः

अधः प्रदत्तानां प्रश्नानाम् उत्तराणि लेख्यानि–

(i) अनेन श्लोकेन किं प्रतिपाद्यते? ....

(ii) क्रतूनां तपसां च भोक्ता कः? ....

(iii) 'सुहृदम्' पदस्य कः सूक्ष्मः अर्थः? ....

(iv) शान्तिशब्दः इह कस्यार्थस्य वाचकः? ....

(v) ऋच्छति क्रियायाः कः कर्ता? ....

(vi) शुद्धान्तःकरणे किं विज्ञेयम्? ....

(vii) केन मार्गेण ईश्वरानुभवः भवितुम् अर्हति? ....

व्याकरणाभ्यासः

(अ) सन्धिः

महेश्वरम् - महा+ईश्वरम् (गुणसन्धिः)

अधः रेखाङ्कितेषु सन्धिच्छेदः विधेयः–

(i) तस्य तं <u>नरेन्द्रस्य</u> सेवकः। - ....

(ii) रम्याणि <u>पर्वतोपवनानि</u>। - ....

(iii) <u>येनेदं</u> प्राप्यते घोरं मया दुःखम्। - ....

(iv) उन्<u>मत्तेव</u> <u>प्रमत्तेव</u> भ्रान्<u>तचित्तेव</u> शोचति। - ....

(आ) समासः

यज्ञतपसाम् - यज्ञाश्च तपांसि च इति यज्ञतपांसि, तेषाम् (द्वन्द्वः)

सर्वलोकमहेश्वरम् - सर्वे च ते लोकाः इति सर्वलोकाः (कर्मधारयः)

महान् चासौ ईश्वरः इति महेश्वरः (कर्मधारयः)

सर्वलोकानां महेश्वरः इति सर्वलोकमहेश्वरः, तम् (षष्ठी तत्पु.)

सर्वभूतानाम् - सर्वाणि च तानि भूतानि इति सर्वभूतानि, तेषाम् (कर्मधारयः)

अधः समस्तं रूपं लिखतु–

(i) यमाः च नियमाश्च – ....

(ii) धर्मश्च अर्थश्च – ....

(iii) ज्ञानं च वैराग्यं च – ....

(iv) सर्वेषु च तेषु ग्रामेषु इति – ....

(v) क्रूराश्च ते पुरुषाश्च इति – ....

(vi) रम्याणि च तानि काननानि इति – ....

(vii) सम्पूर्णस्य राष्ट्रस्य नायकम् इति – ....

(viii) सर्वेषु भूतेषु मनोहरः – ....

(ix) मनोहरायाः वेलायाः उपान्तम् इति – ....

(x) सुभाषितस्य वाक्यस्य संग्रहः इति – ....

(इ) कृत्प्रत्ययः

यथा– **भोक्तारम्** – भुज् + तृच् (तृ) – भोक्तृ–द्विती. एक.

अधः तृजन्तेन पदेन वाक्यं पूरयतु–

(i) जनस्य.......................। (गुप् + तृच्)

(ii) लोकस्य.......................नाधिगच्छति। (त्रै + तृच्)

(iii) ग्रन्थस्य.......................छात्रान् आकारय। (अधि + इ + तृच्)

(iv) पीडाया.......................। (हृ + तृच्)

(v) न्यायस्य.......................विरलाः। (कृ + तृच्)

यथा– **ज्ञात्वा** – (ज्ञा + क्त्वा)

अधः क्त्वान्तेन पदेन वाक्यं पूरयतु–

(i) नद्यां.......................उपनतः। (स्ना + त्वा)

(ii) पत्रं.......................पत्रपेटिकायां पातितम्। (लिख् + क्त्वा)

(iii) हस्ते.......................बालिनः सुतम्। (ग्रह् + क्त्वा)

(iv) क्षेत्रे बीजं .... आगतः। (वप् + क्त्वा)

(v) सः .... गतवान्। (पठ् + त्वा)

(vi) सः .... सुप्तवान्। (खाद् + त्वा)

(ई) क्रियाकारकसम्बन्धः

ऋच्छति	-	कर्तरि मुख्यक्रिया	भोक्तारम्	-	कर्मविशेषणम्
पण्डितः	-	इति कर्ता आक्षेपगम्यः	यज्ञतपसाम्	-	भुजिक्रियायाः कर्म
शान्तिम्	-	कर्म	सर्वलोकमहेश्वरम्	-	कर्मविशेषणम्
ज्ञात्वा	-	क्त्वान्ता गौणक्रिया	सुहृदम्	-	कर्मविशेषणम्
माम्	-	गौणक्रियायाः कर्म	सर्वभूतानाम्	-	कर्मसम्बन्धी

(उ) पर्यायशब्दः

लोकः - १. जगती (ईका. स्त्री.), २. विष्टपम् (अका. नपुं.), ३. भुवनम् (अका. नपुं.), ४. जगत् (तका. नपुं.)

सुहृत् - १. मित्रम् (अका. नपुं.), २. सखि (इका. पुं.), ३. वयस्यः (अका. पुं.)

◆◆◆

अथ षष्ठोऽध्यायः

प्रसङ्गः

सांख्ययोगः कर्मयोगश्चोभौ कल्याणप्रदौ परं सांख्ययोगापेक्षया कर्मयोगः श्रेष्ठः। तस्मिन्नेव क्रमे परमात्मप्राप्त्यै अत्यन्तोपयोगी ध्यानयोगः संक्षेपेण प्रतिपादितो भगवता। तदधुना षष्ठाध्यायारम्भे साङ्गं ध्यानयोगं सविस्तरं प्रतिपादयितुं तथा भक्तियुक्ते कर्मयोगे अर्जुनं जिज्ञासुं प्रवर्तयितुं सर्वादौ कर्मयोगं प्रशंसन् प्रकरणमारभते श्रीभगवान्—

२६. श्लोकः

अनाश्रितः कर्मफलं कार्यं कर्म करोति यः।
स संन्यासी च योगी च न निरग्निर्न चाक्रियः।। (भ. गी. ६.१)

पदच्छेदः

अनाश्रितः, कर्म-फलम्, कार्यम्, कर्म, करोति, यः।
सः, संन्यासी, च, योगी, च, न, निरग्निः, न, च, अक्रियः।।

पदपरिचय :

पदम्	विश्लेषणम्	पदम्	विश्लेषणम्
अनाश्रितः	अका. पुं. प्र. एक. वि.	च	अव्ययम्
कर्मफलम्	अका. नपुं. द्विती. एक.	योगी	नका. पुं. प्र. एक. विशे.
कार्यम्	अका. नपुं. द्विती. एक. वि.	च	अव्ययम्
कर्म	नका. नपुं. द्विती. एक. विशे.	न	अव्ययम्
करोति	कृ-लट् प्रपु. एक. (क्रिया.)	निरग्निः	इ. पुं. प्र. एक. वि.
यः	यद्-दका पुं. प्र. एक. (सर्व.)	न	अव्ययम्
सः	तद्-दका. पुं. प्र. एक. (सर्व.)	च	अव्ययम्
संन्यासी	नका. पुं. प्र. एक. विशे.	अक्रियः	अ. पुं. प्र. एक. वि.

वर्गीकरणाभ्यासः

विशेष्यविशेषणयोः संयोजनं करोतु-

विशेष्यम्	-	विशेषणम्
१. यः	-	....
३. सः	-	....

आकाङ्क्षाविस्तरः (सावधानं पठतु)-

करोति

कः करोति?	....	यः करोति।
यश्च कः?	....	अनाश्रितः।
किम् अनाश्रितः करोति?	....	कर्मफलम् अनाश्रितः करोति।
कर्मफलम् अनाश्रितः किं करोति?	....	कर्म करोति।
कीदृशं कर्म करोति?	....	कार्यं कर्म करोति।
स कः अस्ति?	....	स संन्यासी (अस्ति)।
पुनः स कः अस्ति?	....	स च योगी (अस्ति)।
कः पुनश्च कः अस्ति?	....	स न निरग्निः (अस्ति)
कः पुनश्च स कः अस्ति?	....	स च न अक्रियः (अस्ति)

अन्वयः

कर्मफलम् अनाश्रितः कार्यं कर्म यः करोति स संन्यासी योगी च (भवति) न निरग्निः न अक्रियश्च (संन्यासी योगी वा भवति)।

पदार्थः

पदम्	संस्कृतम्	हिन्दी
कर्मफलम्	कर्मपरिणामम्	कर्मफल पर
अनाश्रितः	अनवलम्बितः	आश्रित न होकर

कार्यम्	कर्तव्यम्	करणीय
कर्म	व्यापारम्	कर्म को
यः	(कर्ता) जनः	जो
करोति	सम्पादयति	सम्पन्न करता है
सः	तथा कर्ता जनः	ऐसा कर्म करने वाला
संन्यासी	सांख्ययोगी	ज्ञानयोगी
योगी	कर्मयोगी (अस्ति)	कर्मयोगी (है)
च	तथा	और
न	नहि	न तो
निरग्निः	अग्निसाध्यकर्मत्यागी	अग्निहोत्रादि कर्म का त्यागी
न	नहि	नहीं
अक्रियः	अनग्निसाध्यकर्मत्यागी	स्मार्त कर्मों का त्याग करने वाला है
च	तथा	और

भावार्थः

संस्कृत–इह कर्मलोके सर्वे जन्तवः कर्मबद्धाः सन्ति। तेषु मानवः श्रेष्ठः, बुद्धिमत्वात्। 'नहि कश्चित्क्षणमपि जातु तिष्ठति, अकर्मकृत्' इति वचनात् निरन्तरं कर्म कुर्वन्नेव मानवोऽपि भवति। कर्मलोकेऽस्मिन् कृतस्य कर्मणः किमपि फलमपि जायते। तत्फलासक्त्या बद्धो मानवः सुखी दुःखी भवंस्तिष्ठति, तन्मूलजन्मान्तरोपलब्धिश्च। तन्मुक्त्यै मार्गद्वयं प्रशस्तम्–ज्ञानयोगः, कर्मयोगश्चेति। गृहस्थानां कर्मयोगः, संन्यासिनां ज्ञानयोगः। किन्तु उभाभ्याम् स्व-स्वाश्रमानुसारं विहितं कर्म करणीयमेवास्ति। तत्कर्मकरणे ताभ्यामुभाभ्यां का युक्तिराश्रयणीयेति येन तत्कृतं कर्म बन्धाय दुःखाय वा न स्यादिति श्रीभगवानत्र निर्दिशति–कर्मफलम् अनपेक्षमाणः अवश्यं कर्तव्यतया विहितं कर्म यः करोति स एव संन्यासी (ज्ञानयोगी) योगी (कर्मयोगी) चास्ति, केवलम् अग्निहोत्रादिकर्मत्यागी संन्यासी नास्ति, न च गृहस्थोचितकर्मत्यागी कर्मयोगी अस्ति। कर्मफलासक्तेः त्याग एव त्यागः, इति भावः, तथा संन्यासाश्रमविहितकर्मफलासक्तित्यागी एव संन्यासी, एवं गृहस्थाश्रमविहितकर्मफलासक्तित्यागी एव योगी (कर्मयोगी) इति भावः।

हिन्दी–इस कर्मलोक में बिना कर्म एक क्षण भी नहीं रहा जा सकता है। कर्म का कुछ न कुछ फल भी बनता है। उस फल से आसक्त होने वाला कर्ता दुःख-पुनर्जन्मादि बन्धन से बद्ध होता है, इससे मुक्ति हेतु श्रीभगवान् यहाँ युक्ति प्रदान करते हैं कि–

कर्म फल की आसक्ति न रखते हुए कर्म करना चाहिए। विहित कर्म करना चाहिए, विहित कर्म का त्याग नहीं करना चाहिए, केवल कर्म फल की आसक्ति का त्याग करना चाहिए ऐसा त्यागी, कर्म फल की आसक्ति न रखते हुए कर्म करने वाला पुरुष ही संन्यास-आश्रम का संन्यासी (ज्ञानयोगी) तथा गृहस्थाश्रम का योगी (कर्मयोगी) है। केवल अग्निहोत्रादि कर्म का त्याग करने वाला संन्यासी नहीं तथा गृहस्थोचित-विहित कर्म का त्याग करने वाला योगी (कर्मयोगी) नहीं है। सारांशतः अपने आश्रमोचित विहित कर्म फल की आसक्ति का त्याग करने वाला ही यहाँ इष्ट है।

व्याकरणाभ्यासः

(अ) सन्धिः

निरग्निर्न - निरग्निः + न = (विसर्ग-रेफ-सन्धिः)

चाक्रियः - च + अक्रियः = (दीर्घसन्धिः)

एतेषां पदानां विच्छेदं विधाय सन्धिनाम लिखतु–

(i) तथागतः - ....

(ii) श्रीर्वचः - ....

(iii) गिरीशः - ....

(iv) हरिर्जयति - ....

(v) फलादेशः - ....

(vi) मतिर्भ्रमति - ....

(आ) समासः

अनाश्रितः - न आश्रितः (नञ्-समासः)

कर्मफलम् - कर्मणः फलम् (षष्ठी तत्पु.)

निरग्निः - अग्नेः निर्गतः (पञ्चतत्पु.)

अक्रियः - अविद्यमाना क्रिया यस्य सः (बहुव्रीहिसमासः)

अभ्यासः

अनाश्रितः - अ + आश्रितः - इत्यत्र आश्रितः - अजादिपदत्वात् नुडागमः, तेन अ + नुड् - अन् + आश्रितः - अनाश्रितः,

आश्रितः - आ + श्रि + क्त (अका. पुं. एक. वि.)

कार्यम् - कृ + ण्यत् - प्रत्ययः

संन्यासी - सम् + नि + अस् + घञ् - संन्यासः,

संन्यास + इनिः - संन्यासी

योगी - युज् + घञ् - योग + इनिः - योगी

एतेषां पदानां प्रत्ययनिर्देशेन सह व्युत्पत्तिः विधेया–

हार्यम् - ....

धनी - ....

अनाधृतः - ....

रोगः - ....

धार्यम् - ....

भोगः - ....

अवलम्बितः - ....

(इ) पर्यायशब्दाः

संन्यासी - परिव्राजकः, दण्डी (दण्डिन् - न. पुं.), यतिः (यति - इ. पुं.)

अग्निः - अनलः, वह्निः (वह्नि - इ. पुं.), पावकः

व्यावहारिकता-बोधनम्

उत्पत्स्यमानं कर्मफलम् आश्रित्य कर्म कुर्वन् जनः तथा फलासक्तिबद्धो भवति येन अभिवाञ्छितमात्रके फले कारणविशेषाद् अनधिगते सति विहितकर्तव्यकर्मणोऽपि विमुखः विहितान्तरे अकर्तव्यकर्मणि व्यापृतो भवतीति। अतः सामान्यसिद्धान्तेनापि व्यावहारिकमार्गे केवलकर्मफलाश्रयणेन कर्मकरणं नोचितम्।

काव्य-शास्त्रीय-विशेषता

अस्मिन् श्लोके–'कार्यं कर्म करोति' इत्यत्र ककारस्य अनुप्रासः शब्दालङ्कारः।

◆◆◆

प्रसङ्गः

सर्वसङ्कल्पसंन्यासी योगारूढः किं कुर्यादिति प्रतिपाद्यते भगवता–

२७. श्लोकः

उद्धरेदात्मनात्मानं नात्मानमवसादयेत्।
आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः।। (भ. गी. ६.५)

पदच्छेदः

उद्धरेत्, आत्मना, आत्मानम्, न, आत्मानम्, अवसादयेत्।
आत्मा, एव, हि, आत्मनः, बन्धुः. आत्मा, एव, रिपुः, आत्मनः।।

पदपरिचयः

पदम्	विश्लेषणम्
उद्धरेत्	उत्+हृ+वि. लि. प्रपु. एक. (क्रिया.)
आत्मना	नका. पुं. तृ. एक.
आत्मानम्	नका. पुं. द्विती. एक.
न	अव्ययम्
आत्मानम्	नका. पुं. द्विती. एक.
अवसादयेत्	अव+सद्+णिच्+वि.लि.प्र.एक.(क्रिया.)
आत्मा	नका. पुं. प्र. एक.
एव	अव्ययम्
हि	अव्ययम्
आत्मनः	नका. पुं. षष्ठी. प्र. एक.
बन्धुः	उका. पुं. प्र. एक. वि.
आत्मा	नका. पुं. प्र. एक. विशे.
एव	अव्ययम्
रिपुः	उका. पुं. प्र. एक. वि.
आत्मनः	न. पुं. षष्ठी एक. विशे.

वर्गीकरणाभ्यासः

सुबन्तपदानां विभक्त्यनुसारं वर्गीकृत्य लिखतु-

प्रथमा	द्वितीया	तृतीया	षष्ठी
....	....	....	....
....	....		....
....			
....			

आकाङ्क्षा-विस्तरः

उद्धरेत्

(योगारूढः योगी) कम् उद्धरेत्? आत्मानम् उद्धरेत्।
केन - उद्धरेत्? आत्मना उद्धरेत्।

अवसादयेत्

स किं न कुर्यात्? न अवसादयेत्।
कं न अवसादयेत्? आत्मानं न अवसादयेत्।
(किं मत्वा कुतः) आत्मानं न अवसादयेत्? (यतः) हि आत्मैव आत्मनः बन्धुः (अतः न अवसादयेत्)
(अन्यथाकरणे आत्मनः अवसादने) आत्मैव आत्मनः रिपुः (भवति।)
कः आत्मानः रिपुः (भवति)?

अन्वयः

आत्मना आत्मानम् उद्धरेत्। हि आत्मा एव आत्मनः बन्धुः आत्मानं न अवसादयेत् (तथा कृते अर्थात् आत्मनः अवसादे कृते) आत्मा एव आत्मनः रिपुः भवति।

पदार्थः

पदम्	संस्कृते	हिन्दी
आत्मना	विवेकयुक्तेन मनसा	विवेकयुक्त मन से
आत्मानम्	स्वं जीवं संसारसमुद्रे	संसार समुद्र में निमग्न निमग्नम् अपने जीवात्म रूप को
उद्धरेत्	ऊर्ध्वं नयेत्	संसार-स्तर से ऊपर ले जाये
आत्मानम्	स्वं जीवम्	अपने जीवात्मरूप को
न	नहि	नहीं
अवसादयेत्	संसारसमुद्रे मज्जयेत् (अधो नयेत्)	संसार-समुद्र में डुबोएँ
हि	यतः	क्योंकि
आत्मा एव	मनः सङ्गाद् उपरतः स्वरूपजीवात्मा एव	मनःसङ्ग से उपरत अपना जीवात्म रूप ही

आत्मनः	स्वस्य	अपना
बन्धुः	संसारबन्धनान्मोचनहेतुः	हितकारी हितकर्ता
आत्मा एव	तथास्वरूपजीव एव	अपना जीवात्म रूप ही
आत्मनः	स्वस्य	अपना
रिपुः	अहितकारी (अस्ति भवतीति शेषः)	अहितकर्ता

भावार्थः

संस्कृते–योगारूढो मुमुक्षुः विवेकयुक्तेन मनसा संसारसमुद्रे निमग्नं स्वं जीवं ततः ऊर्ध्वं हरेत्। विषयसङ्गपरित्यागेन योगारूढताम् आपादयेत्। न तु विषयसङ्गेन संसारसमुद्रे स्वं जीवं मज्जयेत्। यतोहि संसार-बन्धनान्मोचनहेतुः स्वात्मैव स्वस्यात्मनो हितकारी बन्धुः, नान्यः कश्चित्। तथा विषयबन्धनागार-प्रवेशनात् अहितकारित्वात् स्वात्मैव स्वस्यात्मनः शत्रुः, नान्यः कश्चित्।

हिन्दी–योगारूढ मुमुक्षु जन विवेकयुक्त मन से संसार-समुद्र में निमग्न अपने आपको वहाँ से बाहर करे। विषयासक्ति का परित्याग कर योगारूढ-स्थिति को प्राप्त करावे। न कि विषयों की आसक्ति से संसार-समुद्र में अपने आपको डूबो दे। क्योंकि संसार-बन्धन (आवागमन-चक्र) से मुक्ति का कारण अपना हितकारी बन्धु अपनी आत्मा ही है, अन्य कोई नहीं, तथा विषय-बन्धन रूप कारागार में प्रवेश कराने के कारण अहितकारी होने से अपनी आत्मा ही अपना शत्रु है।

व्याकरणाभ्यासः

(अ) सन्धिः

उद्धरेदात्मना उद्धरेत् + आत्मना (जश्त्व-सन्धिः)

उद्धरेदात्मनात्मानम् उद्धरेदात्मना + आत्मानम् (दीर्घ-सन्धिः)

नात्मानम् - न + आत्मानम् (दीर्घ-सन्धिः)

आत्मैव - आत्मा + एव (वृद्धि-सन्धिः)

ह्यात्मनः - हि + आत्मनः (यण्-सन्धिः)

बन्धुरात्मैव - बन्धु + आत्माः - बन्धुरात्मा (रेफ-सन्धिः)

बन्धुरात्मा + एव - बन्धुरात्मैव (वृद्धि-सन्धिः)

रिपुरात्मनः - रिपुः + आत्मनः (रेफ-सन्धिः)

एतेषां पदानां विच्छेदं विधाय सन्धि-नाम लिखतु–

(i) गच्छेदेकाकी – ....

(ii) गङ्गैव – ....

(iii) नाकृतिः – ....

(iv) साधुरात्मा – ....

(v) भवेदिव – ....

(vi) ह्यपास्तम् – ....

(vii) मालैकाकिनी – ....

(viii) नालम् – ....

(ix) भानुरेति – ....

(x) इन्दुरिव – ....

(आ) पर्यायशब्दः

बन्धुः – बान्धवः, मित्रम्, स्वजनः

रिपुः – शत्रुः, परः, विपक्षः

आत्मा – क्षेत्रज्ञः, पुरुषः

पद-व्युत्पत्तिः

रिपुः – रपति – लपति दोषम्, इति रिपुः

(रप् व्यक्तायां वाचि) 'रपेरिच्चोपधायाः' इति कुः

बन्धुः – बध्नाति इति बन्धुः

(बन्ध् + बन्धने) – 'शृस्वस्विहि' इत्युः

आत्मन् – अतति इति आत्मा

(अत सातत्यगमने)

'सातिभ्यां मनिन्मनिणौ' इति मनिण् – प्रत्ययः

अभ्यासः

उद्धरेत् - निष्कासयेत् - विधि लि. प्रपु. एकवचने

एवमेव विधिलिङ्लकारे पर्यायान्तरं देयम् -

अवसादयेत् - मज्जयेत्, पीडयेत्

एवमेव विधिलिङ्लकारे पर्यायान्तरं देयम्-

काव्य-शास्त्रीय-विशेषता

अस्मिन् श्लोके–'आत्मैव बन्धुः' 'आत्मैव रिपुः' इत्यत्र आत्मनि बन्धुत्वस्य, रिपुत्वस्य चारोपः। तेनात्र रूपकम् अर्थालङ्कारः।

◆◆◆

२८. श्लोकः

युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु।
युक्तस्वप्नावबोधस्य योगो भवति दुःखहा।।(भ. गी. ६.१७)

पदच्छेदः

युक्त+आहार-विहारस्य, युक्त-चेष्टस्य, कर्मसु।
युक्त-स्वप्न+अवबोधस्य, योगः, भवति, दुःखहा।।

पदच्छेदाभ्यासः

अधः पदानि विभजतु–

(i) युक्ताहारविहारस्य – ....

(ii) युक्तचेष्टस्य – ....

(iii) युक्तस्वप्नावबोधस्य – ....

(iv) योगो भवति – ....

पदपरिचयः

पदम्	विश्लेषणम्
युक्ताहारविहारस्य	अका. पुं. षष्ठी एक. समस्तं वि. १
युक्तचेष्टस्य	अका. पुं. षष्ठी एक. समस्तं वि. २
कर्मसु	कर्मन्- नका. नपुं. सप्त. बहु.
युक्तस्वप्नावबोधस्य	अका. पुं. षष्ठी एक. समस्तं वि. ३
योगः	अका. पुं. प्र. एक.
भवति	भू+लट् प्रपु. एक. कर्तरि क्रिया
दुःखहा	दुःखहन्- नका. पुं. प्र. एक. वि.

वर्गीकरणाभ्यासः

यथानिर्देशम् अधः पदानि वर्गशः विभजतु–

(i) प्रथमान्तम् (५) ....

(ii) षष्ठ्यन्तम् (३) ....

(iii) सप्तम्यन्तम् (१) ....

(iv) क्रियापदम् (१) ....

(v) अकारान्तम् (४) ....

(vi) नकारान्तम् (२) ....

(vii) पुंलिङ्गम् (५) ....

(viii) नपुंसकलिङ्गम् (१) ....

(ix) विशेषणम् (४) ....

आकाङ्क्षाविस्तरः

भवति

कः भवति? .... (अका. प्र.)

योगः कीदृशः भवति? .... (नका. प्र.)

दुःखहा योगः कस्य भवति? .... (अका. षष्ठी वि. १)

युक्ताहारविहारस्य पुनश्च कीदृशस्य दुःखहा योगः भवति? .... (अका. षष्ठी वि. २)

युक्ताहारविहारस्य केषु युक्तचेष्टस्य दुःखहा योगः भवति? .... (नका. सप्त. बहु.)

युक्ताहारविहारस्य कर्मसु युक्तचेष्टस्य पुनश्च कीदृशस्य दुःखहा योगः भवति? .... (अका. षष्ठी वि. ३)

अन्वयः

युक्ताहारविहारस्य कर्मसु युक्तचेष्टस्य युक्तस्वप्नावबोधस्य (जनस्य) दुःखहा योगः भवति।

पदार्थः

पदम्	संस्कृतम्	हिन्दी
युक्ताहारविहारस्य	नियमितभोज्यविहरणस्य	नियत आहार-विहार वाले
कर्मसु	कार्येषु	कर्मों में
युक्तचेष्टस्य	यथायोग्यक्रियस्य	नियत चेष्टा करने वाले
युक्तस्वप्नावबोधस्य	नियतनिद्राजागरस्य	नियत नींद और जागने

(जनस्य)		वाले को
दुःखहा	दुःखनिवर्तकः	दुःखों का नाश करने वाला
योगः	योगः (कौशलम्)	योग
भवति	सिध्यति	सिद्ध होता है।

भावार्थः

संस्कृतम्–कीदृशः जनः कर्मसु कौशलं योगं प्राप्नोति? इति शङ्कां समाधत्ते भगवान् श्रीकृष्णः–

यस्य भोजनं गमनं च नियमितमस्ति, यस्य जपाध्ययनादिव्यापारेषु मानसिकव्यापाररूपा चेष्टा नियमिता वर्तते तथा यस्य निद्रा जागरणं च युक्तियुक्ते स्तः तस्य जनस्य दुःखनाशकः योगः सिध्यति। सः एव योगी भवति, कौशलं च अवाप्नोति। यस्तु भोजनजागरणादिषु नियमितो नास्ति, स कौशलं नावाप्नोति, योगी न भवितुम् अर्हति, तस्य योगः न सिध्यतीति भावः।

हिन्दी–भगवान् ने योग की परिभाषा की है–योगः कर्मसु कौशलम्–अर्थात् कर्म में कुशलता ही योग है। यह योग किसे सिद्ध होता? किसके लिए दुःख नाशक होता है? इस प्रश्न का समाधान यहाँ हुआ है–

जिस व्यक्ति का आहार और विहार नियमित है, अध्ययनादि विभिन्न क्रियाओं में जिसका मानसिक व्यापार सन्तुलित है तथा निद्रा और जागना जिसका नियमित है, उसी व्यक्ति को दुःख-निवारक योग सिद्ध होता है। आहार-विहार, सोना-जगना और मानसिक व्यापार को नियमित रखने से ही कौशल प्राप्त होता है, यही योग की कुंजी है और यही योग दुःखों का नाश करने वाला होता है। इसके विपरीत अनियमित आहार-विहार करने वाला व्यक्ति कभी योगी हो ही नहीं सकता।

अवबोधाभ्यासः

अधः प्रदत्तान् प्रश्नान् उत्तरतु–

(i) योगस्य का परिभाषा? ....

(ii) चेष्टापदेन कीदृशी क्रिया गृह्यते? ....

(iii) दुःखहा कः भवति? ....

(iv) योगेन युक्तः किम् उच्यते? ....

(v) योगः कस्य न सिध्यति? ....

(vi) योगसिद्धये किं कर्तव्यम्? ....

व्याकरणाभ्यासः

(अ) सन्धिः

युक्ताहारः - युक्त+आहारः (दीर्घसन्धिः)

स्वप्नावबोधस्य - स्वप्न+अवबोधस्य (दीर्घसन्धिः)

योगो भवति - योगः+भवति (ओभावसन्धिः)

अधः ससन्धीनि पदानि विसन्धीनि, विसन्धीनि च पदानि ससन्धीनि करोतु–

(i) निस्पृहो भवति। ....

(ii) युक्तः + निर्विकल्पकः। ....

(iii) दीपो निवातस्थो नेङ्गते। ....

(iv) योगी सर्वेभ्यः + विषयेभ्यः + निवर्तते। ....

(v) दिवि दुन्दुभयो नेदुः। ....

(vi) क्षीरोदेन + आवृतः। ....

(vii) योजनायुतमुच्छ्रितः। ....

(viii) निर्झराम्भसां निर्घोषैः रोचयन्नास्ते। ....

(ix) सरोवराभ्याम् अथ + आगमद् द्रुतम्। ....

(x) दृष्ट्वा + असुराः। ....

(xi) अमृताम्बु निर्मलं सरः। ....

(xii) हेमारविन्दरेणु वासितम्। ....

(आ) समासः

युक्ताहारविहारस्य - आहारश्च विहारश्च इति आहारविहारौ (द्वन्द्वः)

युक्तौ आहारविहारौ यस्य, तस्य (बहुव्रीहिः)

युक्तचेष्टस्य - युक्ता चेष्टा यस्य, तस्य (बहुव्रीहिः)

युक्तस्वप्नावबोधस्य - स्वप्नश्च अवबोधश्च इति स्वप्नावबोधौ (द्वन्द्वः)

युक्तौ स्वप्नावबोधौ यस्य, तस्य (बहुव्रीहिः)

अधः पदेषु समासविग्रहौ विधेयौ–

(i) धृतशङ्खचक्रः – ....

(ii) लसत्कुण्डलपङ्कजम् – ....

(iii) मत्तभ्रमरमथम् – ....

(iv) आकीर्णहंससारसकुक्कुटम् – ....

(v) निवारितशीतातपे – ....

(vi) नियमितनिद्राजागरः – ....

(इ) कृत्प्रत्ययः

दुःखहा – दुःखं हन्ति इति (दुःख + हन् + क्विप्) = दुःखहन्

अधः यथाविग्रहं प्रकृतिप्रत्ययविभागं करोतु–

(i) गदं हन्ति – ....

(ii) वृत्रं हतवान् – ....

(iii) आत्मानं हन्ति – ....

(iv) दैत्यं हतवान् – ....

यथा– युक्तः (युज् + क्त)

अधः पदेषु प्रकृतिप्रत्ययविभागं करोतु–

(i) क्रुष्टः – ....

(ii) आकृष्टः – ....

(iii) दुष्टः – ....

(iv) मुष्टः – ....

(v) दृष्टः – ....

(vi) हृष्टः – ....

(vii) मृष्टः – ....

(viii) घुष्टः – ....

(ix) घोषितः – ....

(x) मोषितः – ....

(xi) हर्षितः – ....

(xii) दर्शितः – ....

(ई) क्रियाकारकसम्बन्धः

भवति – कर्तरि क्रिया

योगः – कर्ता

दुःखहा – कर्तृविशेषणम्

युक्ताहारविहारस्य – कर्तृसम्बन्धी

युक्तचेष्टस्य – कर्तृसम्बन्धी

कर्मसु – सम्बन्धिनः अधिकरणम्

युक्तस्वप्नावबोधस्य – कर्तृसम्बन्धी

(उ) पर्यायशब्दः

आहारः – १. भोजनम्, २. जेमनम्, ३. जग्धिः, ४. निघसः, ५. न्यादः

विहारः – १. परिक्रमः, २. पादक्रमः, ३. गमनम्, ४. गतिः

स्वप्नः – १. निद्रा,२. शयनम्, ३. स्वापः, ४. संवेशः

अवबोधः – १. जागरा, २. जागरः, ३. जागर्या, ४. जागरणम्

◆◆◆

२९. श्लोकः

यो मां पश्यति सर्वत्र सर्वं च मयि पश्यति।
तस्याहं न प्रणश्यामि स च मे न प्रणश्यति।। (भ. गी. ६.३०)

पदच्छेदः

यः, माम्, पश्यति, सर्वत्र, सर्वम्, च, मयि, पश्यति।
तस्य, अहम्, न, प्रणश्यामि, सः, च, मे, न, प्रणश्यति।।

पदच्छेदाभ्यासः

अधः प्रदत्तपदानां पदच्छेदं करोतु–

(i) यो माम् – ....
(ii) मां पश्यति – ....
(iii) सर्वं च – ....
(iv) तस्याहम् – ....
(v) स च – ....

पदपरिचयः

पदम्	विश्लेषणम्	पदम्	विश्लेषणम्
यः	यद्–दका. पुं. प्र. एक. सर्व.	अहम्	अस्मद्–दका. त्रि. प्र. एक. सर्व.
माम्	अस्मद्–दका. द्विती. एक. सर्व.	न	अव्ययम्
पश्यति	दृश+लट् प्रपु.एक.कर्तरि परस्मै.क्रिया	प्रणश्यामि	प्र+नश्+लट् उपु.एक.परस्मै.कर्तरि क्रिया
सर्वत्र	त्रलन्तम् अव्ययम्	सः	तद्–दका. पुं. प्र. एक. सर्व.
सर्वम्	अका. नपुं. द्विती. एक. सर्व.	च	अव्ययम्
च	अव्ययम्	मे	अस्मद्–दका. त्रि. षष्ठी एक. सर्व.
मयि	अस्मद्–दका. सप्त. त्रि. एक. सर्व.	न	अव्ययम्
पश्यति	दृश्+लट् प्रपु.एक.कर्तरि परस्मै.क्रिया	प्रणश्यति	प्र+नश्+लट् प्रपु.एक.परस्मै.कर्तरि क्रिया
तस्य	तद्–दका. पुं. षष्ठी एक. सर्व.		

वर्गीकरणाभ्यासः

अधः यथानिर्देशं श्लोकपदानि वर्गशः लेखनीयानि–

(i) प्रथमान्तम् (३) ....

(ii) द्वितीयान्तम् (२) ....

(iii) षष्ठ्यन्तम् (२) ....

(iv) सप्तम्यन्तम् (१) ....

(v) पुंलिङ्गम् (३) ....

(vi) नपुंसकम् (१) ....

(vii) सर्वनाम (८) ....

(viii) अव्ययम् (५) ....

(ix) क्रियापदम् (४) ....

(x) त्रलन्तमव्ययम् (१) ....

आकाङ्क्षाविस्तरः

पश्यति (दर्शनं करोति)।

कः पश्यति? .... (यद् प्र. एक.)

यः कं पश्यति? .... (अस्मद् द्विती. एक. सर्व.)

यः मां कुत्र पश्यति? .... (त्रलन्तम्)

पश्यति।

कः पश्यति? .... (यद् प्र. एक.)

यः किं पश्यति? .... (अका. नपुं. द्विती. एक.)

यः सर्वं कस्मिन् पश्यति .... (अस्मद् सप्त. एक. सर्व.)

न प्रणश्यामि (न भवामि)।

कः न प्रणश्यति? अहं न प्रणश्यामि।

अहं कस्य न प्रणश्यामि? .... (तद् षष्ठी. एक. सर्व.)

न प्रणश्यति (अदृश्यः न भवति)।

कः न प्रणश्यति? .... (तद् प्र. एक.)

सः च कस्य न प्रणश्यति? .... (अस्मद् ष.)

अन्वयः

यः मां सर्वत्र पश्यति सर्वं च मयि पश्यति, अहं तस्य न प्रणश्यामि, सः च मे न प्रणश्यति।

पदार्थः

पदम्	संस्कृतम्	हिन्दी
यः	यः (भक्तजनः)	जो (व्यक्ति)
माम्	माम् (ईश्वरम्)	मुझ (ईश्वर) को
सर्वत्र	सर्वेषु स्थानेषु	सबमें
पश्यति	अवलोकते	देखता है
सर्वम्	सम्पूर्णं (वस्तुजातम्)	सबको
च	तथा	और
मयि	वासुदेवे	मुझ (ईश्वर) में
पश्यति	विलोकते	देखता है
अहम्	वासुदेवः	मैं (ईश्वर)
तस्य	तादृशस्य (भक्तस्य)	उस (भक्त) को
न	न हि	नहीं
प्रणश्यामि	लुप्यामि	अदृश्य होता हूँ
सः	सः (भक्तः)	वह
च	तथा	और
मे	मम	मुझे (ईश्वर) को
न	नहि	नहीं
प्रणश्यति	लुम्पति	अदृश्य होता है।

भावार्थः

संस्कृतम्–भक्तियोगं साधयतः योगिनः चरमां स्थितिम्, तस्य सर्वत्र भगवद्दर्शनं तत्फलं च वर्णयति–

यः जनः मां भगवन्तं वासुदेवं सर्वभूतेषु पश्यति, सर्वं च ब्रह्मादि भूतजातं प्राणिमात्रं मयि ईश्वरे स्थितं पश्यति। तस्य एकात्मदर्शिनः जनस्य अहं परोक्षः न भवामि, सः च परोक्षः न भवति; तस्य च मम च एकात्मकत्वात्। स्वात्मा हि नाम आत्मनः प्रियः एव भवति। अतः प्रत्यक्षः भूत्वा कृपादृष्ट्या तं भक्तजनम् अनुगृह्णामि। एवञ्च प्राणिमात्रे ईश्वरबुद्धिः कार्या, ईश्वरे च सर्वप्राणिस्थितिः विज्ञेया इति भावः।

हिन्दी–इस श्लोक में भक्तियोग की साधना करने वाले योगी की अन्तिम स्थिति का और उसके सर्वत्र ईश्वरदर्शन का वर्णन है–

जो पुरुष सभी प्राणियों में मुझ वासुदेव भगवान् को व्याप्त देखता है और सम्पूर्ण भूतों को मुझ वासुदेव ईश्वर में स्थित समझता है। जैसे–बादल में आकाश और आकाश में बादल है, वैसे सम्पूर्ण भूतों में भगवान् और भगवान् में सम्पूर्ण भूत हैं। भगवान् और सम्पूर्ण चराचर जगत् में कार्य-कारणभाव, व्याप्यव्यापकभाव या आधार-आधेयभाव का अनुभव करना ही यहाँ देखना है।

भगवान् और सभी प्राणियों में एकात्म-दर्शन का फल श्लोक के उत्तरार्ध में वर्णित है–एकात्मदर्शी व्यक्ति के लिए मैं अदृश्य नहीं होता और वह मेरे लिए अदृश्य नहीं होता है। क्योंकि वह और मैं एक आत्मा हो गये। अपनी आत्मा तो सबको प्रिय और प्रत्यक्ष अनुभवगम्य है। अतः प्रत्यक्ष होकर मैं ईश्वर उस भक्त को दर्शन देता हूँ और उस पर अनुग्रह करता हूँ।

अवबोधाभ्यासः

अधः प्रदत्तान् प्रश्नान् उत्तरतु–

(i) अस्मिन् श्लोके किं वर्णितम्? ....

(ii) इह पश्यति इति पदस्य किं तात्पर्यम्? ....

(iii) सर्वभूतानाम् ईश्वरस्य संबन्धं लिखतु। ....

(iv) एकात्मदर्शनस्य फलं वर्णयतु। ....

(v) आत्मा कथं प्रत्यक्षः? ....

(vi) ईश्वरः भक्ताय किं करोति? ....

व्याकरणाभ्यासः

(अ) सन्धिः

यो माम् – यः+माम् (ओभावसन्धिः)

स च - सः+च (विवृतिः)

मां पश्यति - माम्+पश्यति (अनुस्वारसन्धिः)

सर्वं च - सर्वम्+च (अनुस्वारसन्धिः)

अहं न - अहम्+न (अनुस्वारसन्धिः)

तस्याहम् - तस्य+अहम् (दीर्घसन्धिः)

अधः प्रदत्तपदानां सन्धिं विसन्धिं वा करोतु–

(i) अयम् + तु युगधर्मः + हि वर्तते। ....

(ii) एवं प्रलयतां प्राप्तो वस्तुसारः स्थले-स्थले। ....

(iii) तद्वचनम् + श्रुत्वा विस्मयम् + परमम् + गता। ....

(iv) कल्मशं ते गमिष्यति। ....

(v) प्रेमतः श्रवणम् + कुरु। ....

(vi) इमं मे संशयं छिन्धि। ....

(viii) बद्ध्वा + अञ्जलिं त्वया पृष्टम्। ....

(ix) त्वां तदा + आज्ञापयत् कृष्णः। ....

(x) कृतादिद्वापरस्यान्तं महानन्देन संस्थिता। ....

(xi) स तदा मारुतगतिः। ....

(xii) एष निर्यापितः श्रीमान्। ....

(xiii) सः + बालः उच्चैर्हसति। ....

(xiv) एषः + दन्तान् गणयति। ....

(आ) तद्धितप्रत्ययः

अधः पदेषु प्रकृति-प्रत्यय-विभागं दर्शयतु–

			विग्रहः	प्रकृति-प्रत्ययौ
	सर्वत्र	–	**सर्वस्मिन् देशे इति**	**(सर्व + त्रल्) = सर्वत्र**
(i)	उभयत्र	–	....	....
(ii)	बहुत्र	–	....	....

(iii)	कुत्र	–	....	....
(iv)	अत्र	–	....	....
(v)	तत्र	–	....	....
(vi)	यत्र	–	....	....
(vii)	इतरत्र	–	....	....
(viii)	अन्यत्र	–	....	....
(ix)	एकत्र	–	....	....

(इ) क्रियाकारकसम्बन्धः

पश्यति	–	कर्तरि क्रिया	प्रणश्यामि	–	कर्तरि क्रिया
यः	–	कर्ता	न	–	क्रिया.
माम्	–	कर्म	अहम्	–	कर्ता
सर्वत्र	–	अधिकरणम्	तस्य	–	सम्बन्धबोधकम्
पश्यति	–	कर्तरि क्रिया	प्रणश्यति	–	कर्तरि क्रिया
यः	–	कर्ता	न	–	क्रियावि.
सर्वम्	–	कर्म	सः	–	कर्ता
मयि	–	अधिकरणम्	मे	–	सम्बन्धबोधकम्

(ई) पर्यायशब्दः

सर्वम् – १. कृत्स्नम् २. सम्पूर्णम् ३. सकलम् ४. निखिलम् ५. अखिलम्

प्रणाशः – १. अदर्शनम् २. लोपः ३. परोक्षता ४. पारोक्ष्यम्

◆◆◆

३०. श्लोकः

अर्जुन उवाच

चञ्चलं हि मनः कृष्ण प्रमाथि बलवद्दृढम्।
तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम्।। (भ. गी. ६.३४)

पदच्छेदः

चञ्चलम्, हि, मनः, कृष्ण, प्रमाथि, बलवत्, दृढम्।
तस्य, अहम्, निग्रहम्, मन्ये, वायोः, इव, सुदुष्करम्।।

पदच्छेदाभ्यासः

अधः पदानि छिनत्तु–

(i) चञ्चलं हि – ....

(ii) तस्याहम् – ....

(iii) निग्रहं मन्ये – ....

(iv) वायोरिव – ....

पदपरिचयः

पदम्	विश्लेषणम्	पदम्	विश्लेषणम्
चञ्चलम्	अका. नपुं. प्र. एक. वि. १	तस्य	तद्–दका.नपुं.षष्ठी एक.सर्व.उपमेयम्
हि	अव्ययम्	अहम्	अस्मद्–दका. प्र. एक. सर्व.
मनः	मनस्–सका. नपुं. प्र. एक. वि.	निग्रहम्	अका. पुं. द्विती. एक. विशे.
कृष्ण	अका. पुं. सम्बो. प्र. एक.	मन्ये	मन्+लट् उपु.एक.कर्तरि आत्मने.क्रिया
प्रमाथि	प्रमाथिन्– नका.नपुं.प्र.एक. वि. २	वायोः	वायु–उका.पुं.षष्ठी.एक.उपमानम्
बलवत्	तका. नपुं. प्र. एक. वि. ३	इव	अव्ययम्
दृढम्	अका. नपुं. प्र. एक. वि. ४	सुदुष्करम्	अका. पुं.द्विती.एक.वि.

वर्गीकरणाभ्यासः

यथानिर्देशमधः श्लोकपदानि वर्गशः लिखतु–

(i) प्रथमान्तम् (६) ....

(ii) द्वितीयान्तम् (२) ....

(iii) षष्ठ्यन्तम् (२) ....

(iv) सम्बोधनान्तम् (१) ....

(v) पुंलिङ्गम् (४) ....

(vi) नपुंसकलिङ्गम् (६) ....

(vii) अकारान्तम् (५) ....

(viii) उकारान्तम् (१) ....

(ix) सकारान्तम् (१) ....

(x) तकारान्तम् (१) ....

(xi) नकारान्तम् (१) ....

(xii) अव्ययम् (२) ....

(xiii) सर्वनाम (२) ....

(xiv) विशेषणम् (५) ....

(xv) विशेष्यम् (२) ....

(xvi) उपमानम् (१) ....

(xvii) उपमेयम् (१) ....

(xviii) क्रियापदम् (१) ....

(xix) उपमानेन सह उपमेयं लिखतु।

(xx) विशेषणेन सह विशेष्यं च लिखतु।

आकाङ्क्षाविस्तरः

अस्ति इति आक्षेपगम्या क्रिया

किम् अस्ति? .... (सका. प्र.)

मनः कीदृशम् अस्ति? .... (वि. १)

मनः चञ्चलं पुनश्च कीदृशम्? .... (वि. २)

मनः चञ्चलं प्रमाथि पुनश्च कीदृशम्? .... (वि. ३)

मनः चञ्चलं प्रमाथि बलवत् पुनश्च कीदृशम्? .... (वि. ४)

हे कृष्ण! मनः चञ्चलं प्रमाथि बलवत् दृढम् अस्ति।

मन्ये (मानयामि)

कः मन्यते? अहं मन्ये।

अहं कं मन्ये? .... (अका. विशे.)

अहं निग्रहं कीदृशं मन्ये? .... (अका. वि.)

अहं कस्य निग्रहं सुदुष्करं मन्ये? .... (तद् षष्ठी)

अहं तस्य निग्रहं कस्य इव सुदुष्करं मन्ये .... (उका. षष्ठी)

अन्वयः–कृष्णा! मनः हि चञ्चलं प्रमाथि बलवद् दृढम् (अस्ति)। अहं तस्य वायोः इव निग्रहं सुदुष्करं मन्ये।

पदार्थः

पदम्	संस्कृतम्	हिन्दी
कृष्ण!	हे वासुदेव!	हे कृष्ण!
हि	यतोहि	क्योंकि
मनः	मानसम्	मन
चञ्चलम्	चपलम्	चञ्चल
प्रमाथि	अशान्तकरम्	अशान्त कारक
बलवद्	बलशालि	बलवान्
दृढम्	दुर्भेद्यम्	दुर्धर्ष
(अस्ति)	(अस्ति)	(है)
अहम्	अहम्	मैं
तस्य	तस्य (मनसः)	उस (मन) को
निग्रहम्	बन्धनम्	बाँधना
वायोः	वातस्य	हवा की

इव	यथा	भाँति
सुदुष्करम्	सर्वथा कर्तुमशक्यम्	अत्यन्त कठिन
मन्ये	मन्वे	मानता हूँ।

भावार्थः

संस्कृतम्—अर्जुनः पृच्छति, हे भगवन्, मनः अत्यन्तं चञ्चलम्, अतः सर्वत्र समदृष्टिलक्षणः समत्वयोगः असम्भवः, मनोनिग्रहस्य कर्तुमशक्यत्वात्। तथाहि—

हे कृष्ण! यस्मात् कारणात् एतन्मनः स्वभावेनैव चपलम्, प्रमथनशीलं देहेन्द्रियादिषु विक्षोभम् उत्पादयति, किञ्च विचारेणापि जेतुम् अशक्यम् अतः बलवत्, विषयवासनानुबद्धतया च दुर्भेद्यम् अस्ति। अतः अहम् एतस्य नीरूपस्य मनसः निरोधं कर्तुं सर्वथा दुष्करम् अत्यन्तं कठिनं मन्ये, यथा आकाशे प्रवहमानस्य वायोः कुम्भादिषु निरोधनम् अशक्यम्। अस्यां स्थितौ समत्वयोगः भवदुपदिष्टः कथं स्यादिति प्रश्नः।

हिन्दी—इस श्लोक में अर्जुन ने अपनी शंका रखी है कि मन अत्यन्त चंचल है, अतः सर्वत्र सम्यक् दर्शन रूप समत्वयोग की स्थिर स्थिति सम्भव नहीं है। अर्जुन पूछते हैं—

हे भगवन्! मन स्वभाव से ही बड़ा चंचल है, इसे वश में करना अत्यन्त कठिन है। चंचल होने के साथ-साथ यह देह और इन्द्रियों को मथानी की भाँति मथकर क्षुब्ध कर देता है। जैसे मत्त गजराज पर बार-बार विवेक अंकुश का प्रयोग करने पर भी वह बलवान् मन विषयों के बीहड़-वन से निकलना नहीं चाहता। यह मन गोह के समान इतनी मजबूती से विषय को पकड़ता है कि उसके साथ तदाकार हो जाता है, यह बड़ा ही दृढ है।

इसलिए जैसे निरन्तर चलने वाले श्वासोच्छ्वास रूपी वायु के प्रवाह को हठ, विचार, विवेक और बल आदि साधनों से रोक लेना कठिन है, उसी प्रकार मैं विषयों में निरन्तर विचरणशील, प्रमाथी, बलवान् एवं दृढ़ मन को रोकना भी अत्यन्त कठिन मानता हूँ। ऐसी स्थिति में 'समत्वयोग' कैसे सम्भव है।

अवबोधाभ्यासः

अधः प्रश्नानामुत्तराणि लिखतु—

(i) अर्जुनस्य शङ्कां लिखतु? ....

(ii) प्रमाथिपदस्य किं तात्पर्यम्? ....

(iii) 'मनः बलवत्' इति कथनस्य कोऽभिप्रायः? ....

(iv) मनसः दृढत्वं दृष्टान्तेन स्पष्टं करोतु। ....

(v) उपमानोपमेययोः असमाना समाना वा विभक्तिः भवति?

....

(vi) समत्वयोगस्य स्वरूपं लिखतु? ....

(vii) इह श्लोके का क्रिया आक्षिप्यते? ....

व्याकरणाभ्यासः

(अ) सन्धिः

चञ्चलं हि - चञ्चलम्+हि (अनुस्वारसन्धिः)

अहं निग्रहम् - अहम्+निग्रहम् (अनुस्वारसन्धिः)

निग्रहं मन्ये - निग्रहम्+मन्ये (अनुस्वारसन्धिः)

वायोरिव - वायोः+इव (विसर्गरेफसन्धिः)

बलवद्दृढम् - बलवत्+दृढम् (जश्त्वसन्धिः)

तस्याहम् - तस्य+अहम् (दीर्घसन्धिः)

अधः प्रदत्तेषु पदेषु सन्धिं सन्धिच्छेदं वा करोतु–

(i) यं प्रव्रजन्तम् अनुपेतम् अपश्यत्। ....

(ii) सर्वभूतहृदयम् + मुनिम् आनतोऽस्मि। ....

(iii) सूत + आख्याहि कथासारम्। ....

(iv) भक्तिज्ञानविरागाप्तो विवेको वर्धते। ....

(v) जीवश्च + असुरतां गतः। ....

(vi) चिन्तामणिर्लोकसुखं प्रयच्छति। ....

(vii) क्व काचः क्व मणिः + महान्। ....

(viii) विह्वला चाब्रवीत् + वचः। ....

(ix) कस्मादिदं परित्यज्य स्थानम्। ....

(x) बलवद्भिरिहार्दिता। ....

(xi) सहचारित्वात् + वैपरीत्यं कुतः पुनः। ....

(xii) पाखण्डैरेभिः श्रद्धा नश्यति। ....

(xiii) किञ्चित् + आत्मसुखेन प्रसुप्तिः + अनयोः ....
+ अस्ति।

(आ) तद्धितप्रत्ययः

बलवत् - बलमस्य अस्तीति (बल + मतुप्) - बलवत्

अधः रेखाङ्कितेषु विग्रहपूर्वकं प्रकृतिप्रत्ययविभागं दर्शयतु–

(i) इह नगरे कश्चिद् धनवान् श्रेष्ठी प्रतिवसति। ....

(ii) तस्य चत्वारः ज्ञानवन्तः पुत्राः सन्ति। ....

(iii) ज्ञानवत्सु तेषु एकः नीतिमान् अस्ति। ....

(iv) तत्रैकः भूमिमान् तथा अपरः लक्ष्मीवान् स्तः। ....

(v) तत्र चतुर्थः मेधावान् भूमिमता सह निवसति। ....

(vi) सर्वे मेधावति स्नेहवन्तः सन्ति। ....

(इ) कृत्प्रत्ययः

प्रमाथि - प्रकर्षेण मथति (मथ् + णिनि) - प्रमाथिन्

सुदुष्करम् - अत्यन्तं दुःखेन कर्तुं योग्यम् (सु + दुस् + कृ + खल्) - सुदुष्कर

निग्रहम् - निग्रहणम् इति (नि + ग्रह् + अप्) - निग्रह

दृढम् - (दृह् + क्त) - दृढ

अधः पदेषु प्रकृतिप्रत्ययविभागं करोतु–

(i) प्रमाथी - ....

(ii) ग्राही - ....

(iii) अवग्रहः - ....

(iv) विग्रहः - ....

(v) प्रग्रहः - ....

(vi) सुकरम् - ....

(vii) अकिञ्चित्करम् - ....

(viii) परिवृढः - ....

(ई) क्रियाकारकसम्बन्धः

अस्ति	-	आक्षिप्ता कर्तरि क्रिया	मन्ये	-	कर्तरि आत्मने. क्रिया
मनः	-	कर्ता	अहम्	-	कर्ता
चञ्चलम्	-	कर्तृविशेषणम्	निग्रहम्	-	कर्म
बलवत्	-	कर्तृविशेषणम्	सुदुष्करम्	-	कर्मविशेषणम्
दृढम्	-	कर्तृविशेषणम्	तस्य	-	कर्मसम्बन्धिबोधकम्
हि	-	क्रियाविशेषणम्	वायोः	-	सम्बन्धिनः उपमानम्
कृष्ण	-	सम्बोधनम्	इव	-	उपमावाचकम्

(उ) अलङ्कारः

श्लोकस्य उत्तरार्धे उपमालङ्कारः।

उपमानम् वायोः, उपमेयम् तस्य, वाचकपदम् इव, साधर्म्यम् सुदुष्करम्। अन्येऽपि चाञ्चल्यं क्षोभकत्वं बलवत्त्वं दृढत्वं चेति धर्माः उभयत्र मनसि वायौ च समानाः सन्तीति 'पूर्णोपमालंकारः' इह विज्ञेयः।

(ई) पर्यायशब्दः

चञ्चलम्- १. चलनम्, २. लोलम्, ३. कम्पनम्, ४. चलाचलम्, ५. तरलम्, ६. पारिप्लवम्

निग्रहः - १. निग्रहणम्, २. निरोधः, ३. अवरोधः, ४. बन्धनम्

वायुः - १. वातः, २. पवनः, ३. मारुतः, ४. अनिलः, ५. समीरः

प्रमाथि - १. अशान्तकरम्, २. विक्षोभकम्, ३. विक्षुब्धकरम्

बलवत् - १. बलशालि (बलशालिन्-नका.), २. शक्तिमत् (तका.), ३. विक्रमि (विक्रमिन्-नका.), ४. पराक्रमि (पराक्रमिन्-नका.)

दृढम् - १. स्थिरम्, २. सुपुष्टम्, ३. स्थूलम्, ४. बलवत्, (तका. त्रि.)

◆◆◆

३१. श्लोकः

श्रीभगवानुवाच

असंशयं महाबाहो मनो दुर्निग्रहं चलम्।
अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते।। (भ. गी. ६.३५)

पदच्छेदः

श्री, भगवान्, उवाच

असंशयम्, महाबाहो, मनः, दुर्निग्रहम्, चलम्।

अभ्यासेन, तु, कौन्तेय, वैराग्येण, च, गृह्यते।।

पदच्छेदाभ्यासः

अधः पदानि छिनत्तु–

(i) श्रीभगवानुवाच – ....

(ii) असंशयं महाबाहो – ....

(iii) मनो दुर्निग्रहम् – ....

(iv) दुर्निग्रहं चलम् – ....

पदपरिचयः

पदम्	विश्लेषणम्	पदम्	विश्लेषणम्
श्रीभगवान्	श्रीभगवत्–तका. पुं.प्र.एक.समस्तम्	अभ्यासेन	अका. पुं. तृ. एक.
उवाच	वच्+लिट् प्रपु.एक.कर्तरि क्रिया	तु	अव्ययम्
असंशयम्	अका.नपुं.द्विती.एक.समस्तम्	कौन्तेय	अका. पुं. सम्बो. एक.
महाबाहो	महाबाहु–उका.पुं.सम्बो.प्र.एक.समस्तम्	वैराग्येण	अका. नपुं. तृ. एक.
मनः	मनस्–सका.नपुं.प्र.एक.विशे०	च	अव्ययम्
दुर्निग्रहम्	अका.नपुं.प्र.एक.विशे. १	गृह्यते	ग्रह्+लट् प्रपु.एक. कर्मणि क्रिया
चलम्	अका.नपुं.प्र.एक.विशे. २		

वर्गीकरणाभ्यासः

यथानिर्देशं श्लोकपदानि वर्गशः लेखनीयानि–

(i) प्रथमान्तम् (३) ....

(ii) द्वितीयान्तम् (१) ....

(iii) तृतीयान्तम् (२) ....

(iv) सम्बोधनम् (२) ....

(v) अकारान्तम् (६) ....

(vi) सकारान्तम् (१) ....

(vii) उकारान्तम् (१) ....

(viii) पुंलिङ्गम् (३) ....

(ix) नपुंसकम् (५) ....

(x) अव्ययम् (२) ....

(xi) क्रियापदम् (१) ....

(xii) विशेषणेन सह विशेष्यं लिखतु–

आकाङ्क्षाविस्तरः

अस्ति - क्रियायाः आक्षेपः।

किम् अस्ति? .... (सका. प्र.)

मनः कीदृशम् अस्ति? .... (अका. प्र.)

चलं मनः किम् अस्ति? .... (अका. वि० १)

चलं मनः दुर्निग्रहं कथम् अस्ति? .... (अका. द्विती.)

चलं मनः दुर्निग्रहम् असंशयम् अस्तीति वाक्ये सम्बोधनं किम्? 'महाबाहो' इति।

गृह्यते - कर्मणि क्रिया।

किं गृह्यते तन्मनः गृह्यते (कर्तुराक्षेपः)।

केन गृह्यते? .... (तृ. पुं.)

अभ्यासेन पुनश्च केन गृह्यते? .... (तृ. नपुं.)

अभ्यासेन वैराग्येण च गृह्यते – अस्मिन् वाक्ये किं संबोधनं किं च पूर्ववाक्येन सह सम्बन्धतत्त्वम्? 'कौन्तेय' इति सम्बोधनम्, 'तु' इति सम्बन्धबोधकतत्त्वम्।

अन्वयः

महाबाहो! मनः चपलं दुर्निग्रहम् असंशयं तु कौन्तेय! अभ्यासेन वैराग्येण च गृह्यते।

पदार्थः

पदम्	संस्कृतम्	हिन्दी
महाबाहो!	दीर्घभुज!	हे विशाल बाहु!
मनः	मानसम्	मन
चपलम्	चञ्चलम्	चञ्चल
दुर्निग्रहम्	दुर्निरोधम्	कठिनाई से वश में होने वाला
असंशयम्	निःसन्देहम्	निःसन्देह
तु	किन्तु	परन्तु
कौन्तेय!	कुन्तीपुत्र!	हे कुन्तीपुत्र!
अभ्यासेन	पुनः पुनः विवेकदर्शनाभ्यासेन	अभ्यास से
वैराग्येण	विषयवैतृष्ण्येन	वैराग्य से
च	तथा	और
गृह्यते	वशीक्रियते	वश में होता है।

भावार्थः

संस्कृतम्–मनोनिग्रहविषये अर्जुनस्य उक्तिम् अङ्गीकुर्वन् भगवान् श्रीकृष्णः मनोनिग्रहाय उपायान् विवक्षुः अवदत्–

हे विशालबाहो अर्जुन! सर्वेषां जीवानां चित्तम् अत्यन्तं चपलम्, अत एव तस्य वशीकरणं नितान्तं कठिनम् इति तवोक्तौ कोऽपि सन्देहः नास्ति। तथापि हे कुन्तीपुत्र! अभ्यासेन वैराग्येण च तन्मनः वशीकर्तुं निग्रहीतुं कोऽपि शक्नोति

तत्र अभ्यासो नाम पुनः पुनः विवेकदर्शनप्रयासः, वैराग्यं च दृष्टादृष्टेषु भोगेषु दोषदर्शनाद् वितृष्णा। आभ्यां चित्तनिरोधः क्रियते। तदुक्तं पातञ्जलयोगदर्शने–'अभ्यासवैराग्याभ्यां तन्निरोधः'–इति। यथा तीव्रवेगं नदीप्रवाहं सेतुबन्धनेन निवार्य कुल्याप्रणयनेन क्षेत्राभिमुखं तिर्यक् प्रवाहान्तरम् उत्पाद्यते, तथा वैराग्येण चित्तनद्याः विषयप्रवाहं निवार्य समाधेरभ्यासेन प्रशान्तवाहिता सम्पाद्यते।

'महाबाहो' इति सम्बोधनेन भगवान् अर्जुनं स्मारयति यत् त्वं देवदानवमानवेषु महतो महतः भटान् पराजयसि, अतः मनोऽपि जेतुं शक्नोसि। 'कौन्तेय' इति सम्बोधनेन च त्वं मया अवश्यं सुखी कर्तव्यः इति स्नेह-सम्बन्धं सूचयति।

हिन्दी–मनोनिग्रह के सम्बन्ध में अर्जुन की उक्ति को स्वीकार करते हुए भगवान् मन को वश में करने के उपाय बतलाते हैं–

श्रीभगवान् बोले–हे महाबाहो! निःसन्देह मन चञ्चल और कठिनता से वश में होने वाला है। तुम्हारा यह कथन बिल्कुल ठीक है। परन्तु हे कुन्तीपुत्र अर्जुन! यह अभ्यास और वैराग्य से वश में होता है।

पातञ्जल योगदर्शन में भी कहा है–अभ्यास-वैराग्याभ्यां तन्निरोधः। अन्य विषयों में आसक्त चित्त को वहाँ से खींच-खींचकर बार-बार उसे भगवान् के ध्यान में लगाने का प्रयास ही अभ्यास है। इह लोक तथा परलोक में सम्पूर्ण भोग पदार्थों और कामनाओं में दोष देखकर उससे मन और इन्द्रियों को विमुख करना वैराग्य कहलाता है। इस अभ्यास और वैराग्य से ही चित्त का निरोध सम्भव है। वस्तुतः ये दोनों एक-दूसरे के पूरक हैं। जैसे–नदी के तीव्र प्रवाह को बाँध बनाकर रोकते हैं और नदी बनाकर उसे अपेक्षित खेतों में प्रवाहित करते हैं, वैसे चित्त-नदी के विषय-प्रवाह को वैराग्य से रोकते हैं और समाधि के अभ्यास से उसे प्रशान्तवाहित ईश्वर में प्रवाहित करते हैं।

यहाँ 'महाबाहो' सम्बोधन करके भगवान् ने अर्जुन को यह स्मरण कराया है कि तुम देव, दानव और मानव में बड़े-बड़े योद्धाओं को परास्त किये हो, अतः मन को परास्त करके उसे वश में करना तुम्हारे लिए कठिन नहीं है। इसी प्रकार यहाँ 'कौन्तेय' सम्बोधन से अपनी बूआ कुन्ती का स्मरण कराकर भगवान् ने अपने स्नेह-सम्बन्ध को सूचित किया है।

अवबोधाभ्यासः

अधः प्रश्नाः समाधेयाः–

(i) अस्मिन् श्लोके किमुपदिष्टम्? ....

(ii) अभ्यासस्य किं स्वरूपम्? ....

(iii) वैराग्यं कथं जायते? ....

(iv) मनोनिग्रहे वैराग्यं किं साहाय्यं करोति? ....

(v) नदी दृष्टान्तेन किं स्पष्टं क्रियते? ....

(vi) 'महाबाहो' सम्बोधनस्य प्रयोजनं लिखतु? ....

(vii) 'कौन्तेय' सम्बोधनेन किमिह सूच्यते? ....

(viii) पूर्वस्मिन् श्लोके अर्जुनेन किमुक्तम्? ....

व्याकरणाभ्यासः

(अ) सन्धिः

असंशयं महाबाहो - असंशयम् + महाबाहो (अनुस्वारसन्धिः)

दुर्निग्रहं चलम् - दुर्निग्रहम् + चलम् (अनुस्वारसन्धिः)

मनो दुर्निग्रहम् - मनः + दुर्निग्रहम् (ओभावः) सः, उकारः, गुणः

अधः प्रदत्तेषु पदेषु सन्धिमसन्धिं च करोतु–

(i) श्रीकृष्णचरणाम्भोजं स्मर। ....

(ii) तव दुःखम् + गमिष्यति। ....

(iii) सततम् + प्राणतोऽधिका। ....

(iv) सद्रूपाम् + त्वाम् + ससर्ज ह। ....

(v) बद्धवाञ्जलिं त्वया पृष्टं किं करोमीति चैकदा। ....

(vi) हरेर्दासो लोके त्वां तु प्रवर्तये। ....

(vii) न प्रेतः + न पिशाचः + वा तव स्पर्शे प्रभुर्भवेत्। ....

(viii) कारुण्यं नारदः + गतः। ....

(ix) ऋषिश्चिन्तापरः + जातः। ....

(x) भवन्तः + योगिनः सर्वे बुद्धिमन्तः + बहुश्रुताः। ....

(आ) समासः

असंशयम् - न संशयः इति असंशयः, तम् (नञ्तत्पु.)

महाबाहो - महान्तौ बाहू यस्य तत्सम्बुद्धौ (बहुव्रीहिः)

दुर्निग्रहम् - दुष्करः निग्रहः यस्य तत् (प्रादिबहुव्रीहिः)

अधः रेखाङ्कितेषु पदेषु विग्रहपूर्वकं समासनाम लिखतु–

(i) लम्बजानुं जनं दृष्ट्वा चकितः। ....

(ii) विशालवक्षाः प्रत्याशी एव आरक्षिदले चितः। ....

(iii) महाप्रभोः चैतन्यस्य चरितामृतम्। ....

(iv) असन्दिग्धं गमिष्यति जयपुरम्। ....

(v) अज्ञानेनावृतं ज्ञानम्। ....

(vi) असत्यं नरकद्वारम्। ....

(vii) विशोकं पितरं कुरुते। ....

(viii) निष्पन्नाः शाखाः न शोभन्ते। ....

(ix) अकिञ्चनानां परमं धनं प्रभुः। ....

(x) उदारहृदयानां तु प्रेम सर्वत्र वर्षति। ....

(इ) तद्धितप्रत्ययः

कौन्तेय - कुन्त्याः अपत्यं पुमान् (कुन्ती + ढक्) - कौन्तेय

वैराग्यम् - विरागस्य भावः (विराग + ष्यञ्) - वैराग्य

अधः यथाविग्रहं प्रत्यययोगेन निष्पन्नं रूपं लिखतु–

(i) मानुषस्य भावः - ....

(ii) सर्वज्ञस्य भावः - ....

(iii) कृतज्ञस्य भावः - ....

(iv) अधमर्णस्य भावः - ....

(v) मह्याः अपत्यं पुमान् - ....

(vi) उत्तरायाः अपत्यं पुमान् - ....

(vii) शङ्कायाः अपत्यं पुमान् - ....

(ई) कृत्प्रत्ययः

चलम् - चलति इति (चल् + अच्) - चल

अभ्यासेन -- अभ्यसनम् = (अभि + अस् + घञ्) - अभ्यास

अधः प्रदत्तेषु पदेषु प्रकृतिप्रत्ययविभागं करोतु–

(i) अभ्यासः - ....

(ii) अनुरागः - ....

(iii) अभिरामः - ....

(iv) परिहारः - ....

(v) चोरः - ....

(vi) देवः - ....

(vii) पतः - ....

(viii) जारभरा - ....

(उ) वाच्यप्रयोगः

१. पुरुषेण इदं मनः अभ्यासेन गृह्यते - कर्मणि

पुरुषः इदं मनः अभ्यासेन गृह्णाति - कर्तरि

२. मनीषिणा लेखिन्या ग्रन्थः लिख्यते -- कर्मणि

मनीषी लेखिन्या ग्रन्थं लिखति - कर्तरि

३. चित्रकारेण तूलिकया आकृतिः रज्यते - कर्मणि

चित्रकारः तूलिकया आकृतिं रजति - कर्तरि

४. कृषकेण हलेन बीजम् उप्यते - कर्मणि

कृषकः हलेन बीजं वपति - कर्तरि

(ऊ) क्रियाकारकसम्बन्धः

अस्ति	-	आक्षिप्ता क्रिया कर्तरि	गृह्यते	-	कर्मणि क्रिया
मनः	-	कर्ता	मनः	-	कर्मकारकम्
दुर्निग्रहम्	-	कर्तृविशेषणम्	अभ्यासेन	-	करणम्

चलम्	-	कर्तृविशेषणम्	वैराग्येण	-	करणम्
असंशयम्	-	क्रियाविशेषणम्	कौन्तेय	-	सम्बोधनम्
महाबाहो	-	सम्बोधनम्	तु	-	वाक्ययोजकम्

(ए) पर्यायशब्दः

अभ्यासः - १. आवृत्तिः, २. आवर्तनम्

वैराग्यम् - १. वैतृष्ण्यम्, २. वितृष्णा, ३. विरागः, ४. विरागिता, ५. वैमुख्यम्

◆◆◆

वेत्ति - जानाति।

क: वेत्ति? .... (सर्व.+अव्ययम्)

केषां कश्चित् वेत्ति? .... (अका. पुं. षष्ठी. बहु. विशे.)

कीदृशानां सिद्धानां कश्चित् वेत्ति? .... (तका. षष्ठी. बहु.)

यतताम् अपि सिद्धानां कश्चित् कं वेत्ति? .... (अस्मद् द्विती. एक.)

यतताम् अपि सिद्धानां कश्चित् मां कथं वेत्ति? .... (अव्ययम् तस्यन्तम्)

अन्वय:–मनुष्याणां सहस्रेषु कश्चित् सिद्धये यतति। यततामपि सिद्धानां कश्चित् मां तत्त्वत: वेत्ति।

पदार्थ:

पदम्	संस्कृतम्	हिन्दी
मनुष्याणाम्	नराणाम्	मनुष्यों की
सहस्रेषु	सहस्रसंख्यासु	हजार की टोली में
कश्चित्	कोऽपि एक:	कोई एक
सिद्धये	स्वरूपबोधाय	स्वरूप बोध के लिए
यतति	प्रयतते	प्रयास करता है।
यतताम्	प्रयत्नं कुर्वताम्	प्रयास करने वाले
अपि	अपि	भी
सिद्धानाम्	योगिनाम्	सिद्धों में
कश्चित्	कोऽपि एक:	कोई एक
माम्	परमात्मानम्	मुझ परमात्मा को
तत्त्वत:	स्वरूपत:	स्वरूप से
वेत्ति	जानाति	जान पाता है।

भावार्थ:

संस्कृतम्–भगवत: भक्तिं विना स्वरूपज्ञानं विज्ञानं च अति दुर्लभम् इति प्रतिपादयति–

सहस्रेषु अनेकेषु अपरिगणितेषु असंख्याकेषु जीवेषु मनुष्यातिरिक्तानां जीवानां श्रेयसि प्रवृत्ति: एव न भवति, मनुष्याणां तु सहस्रेषु कश्चिदेव प्रकृष्टपुण्यवशात् आत्मज्ञानाय विज्ञानाय च प्रयतते। यतमानानाम्

यतति	यत्+लट् प्रपु.एक.कर्तरि परस्मै.क्रिया	वेत्ति	विद्+लट् प्रपुएक परस्मैकर्तरि क्रिया
सिद्धये	सिद्धि–इका. स्त्री. चतु. एक.	तत्त्वतः	तस्यन्तम् अव्ययम्
यतताम्	यतत्–तका.पुं.षष्ठी बहु.शत्रन्तम् वि.		

वर्गीकरणाभ्यासः

श्लोकपदानि वर्गशः करोतु–

(i) प्रथमान्तम् (२) ....

(ii) द्वितीयान्तम् (१) ....

(iii) षष्ठ्यन्तम् (३) ....

(iv) चतुर्थ्यन्तम् (१) ....

(v) सप्तम्यन्तम् (१) ....

(vi) पुंलिङ्गम् (५) ....

(vii) स्त्रीलिङ्गम् (१) ....

(viii) नपुंसकलिङ्गम् (१) ....

(ix) अकारान्तम् (३) ....

(x) सर्वनाम (३) ....

(xi) अव्ययम् (४) ....

(xii) क्रियापदम् (२) ....

(xiii) विशेषणेन सह विशेष्यं लिखतु।

आकाङ्क्षाविस्तरः

यतति – यत्नं करोति।

कः यतति? .... (सर्व.+अव्ययम्)

कश्चित् कस्यै यतति? .... (इका. स्त्री. चतु.)

केषु कश्चित् सिद्धये यतति? .... (अका. सप्त. बहु.)

केषां सहस्रेषु कश्चित् सिद्धये यतति? .... (अका. षष्ठी. बहु.)

अथ सप्तमोऽध्यायः

३२. श्लोकः

मनुष्याणां सहस्त्रेषु कश्चिद्यतति सिद्धये।
यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्त्वतः।। (भ. गी. ७.३)

पदच्छेदः

मनुष्याणाम्, सहस्त्रेषु, कः-चित्, यतति, सिद्धये।
यतताम्, अपि, सिद्धानाम्, कः-चित्, माम्, वेत्ति, तत्त्वतः।।

पदच्छेदाभ्यासः

अधः पदानि छिनत्तु–

(i) कश्चिद्यतति – ....

(ii) यततामपि – ....

(iii) कश्चिन्माम् – ....

(iv) कश्चित् – ....

पदपरिचयः

पदम्	विश्लेषणम्
मनुष्याणाम्	अका. पुं. प्र. षष्ठी बहु.
सहस्त्रेषु	अका. नपुं. सप्त बहु.
कः	किम्–मका. पुं. प्र. एक. सर्व.
चेत्	अव्ययम्
अपि	अव्ययम्
सिद्धानाम्	अका. पुं. षष्ठी. बहु. वि.
कः-चित्	किम्–मका.पुंप्र.एक.सर्व.(अव्ययम्)
माम्	अस्मद्–दका. त्रि. द्विती. एक. सर्व.

अपि सहस्रेषु कश्चित् एव प्रकृष्टपुण्यवशात् आत्मानं वेत्ति, तादृशानां च आत्मज्ञान सिद्धानां सहस्रेषु कश्चिदेव मां परमात्मानं मत्प्रसादेन तत्त्वतः ज्ञानविज्ञानतः जानाति। तदेवं सुदुर्लभं भगवतः स्वरूपज्ञानं विज्ञानं चेति भावः।

इह परमात्मनः निर्गुणनिराकाररहस्यस्य बोधः 'ज्ञानम्' तथा सगुणसाकारलीलारहस्यस्य बोधः 'विज्ञानम्' इति भेदः अवधारणीयः।

हिन्दी–'ज्ञान-विज्ञान योग' नामक इस अध्याय के इस श्लोक में ज्ञान और विज्ञान की अत्यन्त दुर्लभता का कथन हुआ है। लाखों अथवा करोड़ों मनुष्यों में जिसको वह ज्ञान होता भी है तो वह भगवान् की अनुकम्पा से ही। यहाँ परमात्मा के निर्गुण-निराकार रहस्य को जानना 'ज्ञान' तथा उसके सगुण-साकार लीला-रहस्य को जानना 'विज्ञान' कहा गया है।

हे अर्जुन! असंख्य अनगिनत जीवों में केवल मनुष्य की ही श्रेयस् मार्ग में प्रवृत्ति सम्भव है। मनुष्यों में ही हजारों में कोई एक ही अनेक जन्मार्जित पुण्य के कारण भगवत् स्वरूप के ज्ञान और विज्ञान के लिए प्रयत्न करता है। प्रयत्न करने वालों में भी हजारों में से किसी-किसी साधक को उत्कृष्ट पुण्य के कारण आत्मज्ञान होता है तथा आत्मज्ञान से सिद्ध हजारों में कोई ही मेरी कृपा से मेरे यथार्थ स्वरूप को जान पाता है, अर्थात् भगवत्स्वरूप ज्ञान और विज्ञान से सम्पन्न हो पाता है। इस प्रकार परमात्म स्वरूप का ज्ञान और विज्ञान अत्यन्त दुर्लभ है।

अवबोधाभ्यासः

अधः प्रदत्तान् प्रश्नान् उत्तरतु–

(i) अस्मिन् श्लोके किं प्रतिपादितम्? ....

(ii) इह ज्ञानपदेन किं गृह्यते? ....

(iii) अस्मिन् प्रसंगे विज्ञानपदस्य कः अर्थः? ....

(iv) अस्मिन् भावार्थे 'सहस्रेषु' पदस्य कुत्र-कुत्र अन्वयः कृतः?

....

(v) जीवेषु केषां धर्मे प्रवृत्तिः? ....

(vi) पशुषु मानवेषु च का प्रवृत्तिः समाना दृश्यते? ....

व्याकरणाभ्यासः

(अ) सन्धिः

कश्चित् – कः+चित् (विसर्गस्य शत्वम्) कस्+चित्। श्चुत्वम्

कश्चिद्यतति - कश्चित्+यतति (जश्त्वसन्धिः)

कश्चिन्माम् - कश्चित्+माम् (अनुनासिकसन्धिः)

अवधेयम्–

१. एकवारम् प्रयुक्तस्य शब्दस्य यदि अनेकवारम् अन्वयः क्रियते तदा तस्मिन् शब्दे 'एकशेषवृत्तिः तन्त्रवृत्तिः' वा स्वीक्रियते–इत्यवधेयम्।

२. अधः विसर्गस्य परिवर्तनं जानातु–

(i) : + च, छ, श = श्

(ii) : + ट, ठ, ष = ष्

(iii) : + त, थ, स = स्

सन्धिच्छेदं करोतु–

(i) विक्रान्तस्त्वम् - ....

(ii) समर्थस्त्वम् - ....

(iii) प्राज्ञस्त्वम् - ....

(iv) प्रभावष्टीकायाः - ....

(v) मनश्चञ्चलम् - ....

(vi) कश्चिन्मां तारयिष्यति - ....

(vii) व्यसनादस्मान्मोचयिष्यति - ....

(viii) विवासान्मयि राघवः - ....

(ix) क्वचिदेष्यति - ....

(x) स्नेहाद्विशिष्टः - ....

(आ) तद्धितप्रत्ययः

अधः तस्यन्तेषु प्रकृतिप्रत्ययविभागं करोतु–

यथा– तत्त्वतः - तत्त्व + तसिल् (तस्)

(i) स्वभावतः सरलः मृगः। ....

(ii) ऋषेः पार्श्वतः इतस्ततः उच्छलति। ....

(iii) आदितः सः आश्रमे एव वसति। ....

(iv) वस्तुतः सः अपि आश्रमसदस्य एव। ....

(इ) कृत्प्रत्ययः

अधः शत्रन्तेन रिक्तं स्थानं पूरयतु–

यथा– यतताम् - यत् + शतृ - यतत् + आम् (षष्ठी बहु.)

(i) .... मृगं पश्यतु। (धाव + शतृ)

(ii) .... बालकयोः एकम् आकारय। (सलप् + शतृ)

(iii) .... न गच्छेत्। (खाद् + शतृ)

(iv) .... छात्रेभ्यः पुस्तकानि देहि। (व्रज् + शतृ)

(v) .... जनानां स्वागतं करोतु। (आगम् + शतृ)

(ई) कारकप्रयोगः

समुदायात् एकदेशस्य यतः निर्धारणं ततः षष्ठी सप्तमी वा विभक्तिः प्रयुज्यते।

यथा– सहस्रेषु कश्चित्।

अधः विभक्तिं योजयित्वा रिक्तं स्थानं पूरयतु–

(i) .... गौः सरलः। (पशु)

(ii) .... नाटकं रम्यम्। (काव्य)

(iii) .... गणेशः प्रथमः। (देव)

(iv) .... वाल्मीकिः आदिः। (कवि)

(उ) क्रियाकारकसम्बन्धः

यतति	-	कर्तरि क्रिया	कश्चित्	-	कर्ता
कश्चित्	-	कर्ता	माम्	-	कर्म
सिद्धये	-	तादर्थ्यम्	सिद्धानाम्	-	निर्धारणे षष्ठी
सहस्रेषु	-	निर्धारणे सप्तमी	तत्त्वतः	-	क्रियाविशेषणम्
मनुष्याणाम्	-	सम्बद्धसमुदायः	यतताम्	-	निर्धारणसमुदायविशेषणम्
वेत्ति	-	कर्तरि क्रिया			

(ऊ) पर्यायशब्दः

मनुष्यः - १. मानवः, २. नरः, ३. ना नृ - ऋका. पु., ४. जनः

सिद्धिः - १. प्राप्तिः, २. मुक्तिः, ३. लाभः

◆◆◆

३३. श्लोकः

चतुर्विधा भजन्ते मां जनाः सुकृतिनोऽर्जुन।
आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ।।(भ. गी. ७.१६)

पदच्छेदः

चतुर्-विधाः, भजन्ते, माम्, जनाः, सुकृतिनः, अर्जुन।
आर्तः, जिज्ञासुः, अर्थ+अर्थी, ज्ञानी, च, भरत+ऋषभ।।

पदच्छेदाभ्यासः

अधः प्रदत्तपदानां पदच्छेदः कार्यः–

(i) चतुर्विधा भजन्ते – ....

(ii) सुकृतिनोऽर्जुन – ....

(iii) आर्तो जिज्ञासुः – ....

(iv) जिज्ञासुरर्थार्थी – ....

(v) अर्थार्थी – ....

(vi) भरतर्षभ! – ....

पदपरिचयः

पदम्	विश्लेषणम्	पदम्	विश्लेषणम्
चतुर्विधाः	अका. पुं. प्र. बहु. तद्धितान्तं वि. १	आर्तः	अका. पुं. प्र. एक.
भजन्ते	भज्+लट् प्रपु.बहु.आत्मने.कर्तरि क्रिया	जिज्ञासुः	उका. पुं. प्र. एक.
माम्	अस्मद्-दका. द्विती. एक. सर्व.	अर्थार्थी	अर्थार्थिन्-नका.पुं.प्र.एक.समस्तम्
जनाः	अका. पुं. प्र. बहु. विशे.	ज्ञानी	ज्ञानिन्-नका. पुं. प्र. एक.
सुकृतिनः	सुकृतिन्-नका. पुं. प्र. बहु. वि. २	भरतर्षभ!	अका. पुं. सम्बो. प्र. एक.
अर्जुन	अका. पुं. सम्बो. प्र. एक.		

वर्गीकरणाभ्यासः

अधः श्लोकपदानि यथानिर्देशं वर्गशः विभजतु–

(i) प्रथमान्तम् (७) ....

(ii) द्वितीयान्तम् (१) ....

(iii) सम्बोधनान्तम् (२) ....

(iv) क्रियापदम् (१) ....

(v) अकारान्तम् (५) ....

(vi) उकारान्तम् (१) ....

(vii) नकारान्तम् (३) ....

(viii) सर्वनाम (१) ....

(ix) अव्ययम् (१) ....

(x) विशेषणसहितं विशेष्यं लिखतु। ....

आकाङ्क्षाविस्तरः

भजन्ते - (सेवन्ते)।

के भजन्ते? .... (प्र. बहु. विशे.)

कीदृशाः जनाः भजन्ते? .... (नका. प्र. बहु.)

सुकृतिनः कतिविधाः जनाः भजन्ते? .... (अका. प्र. बहु. वि.)

सुकृतिनः चतुर्विधाः जनाः कं भजन्ते? .... (सर्व.)

हे भरतर्षभ! चतुर्विधेषु कः कः अस्ति?

आर्तः (अस्ति)।

पुनश्च कः (अस्ति)? .... (उका.)

आर्तः जिज्ञासुः पुनश्च कः (अस्ति)? .... (नका. प्र. समस्तम्)

आर्तः जिज्ञासुः अर्थार्थी पुनश्च कः (अस्ति)? ज्ञानी (अस्ति)। .... (नका. प्र. एक.)

अन्वयः

अर्जुन! सुकृतिनः चतुर्विधाः जनाः मां भजन्ते। भरतर्षभ! आर्तः जिज्ञासुः अर्थार्थी ज्ञानी च।

पदार्थः

पदम्	संस्कृतम्	हिन्दी
अर्जुन!	हे अर्जुन!	हे अर्जुन!
सुकृतिनः	पुण्यकर्माणः	पुण्य किये हुए
चतुर्विधाः	चतुःप्रकारकाः	चार प्रकार के
जनाः	नरोत्तमाः	उत्तम लोग
माम्	मां भगवन्तम्	मुझे परमात्मा को
भजन्ते	भक्तिं कुर्वन्ति	भजन करते हैं।
भरतर्षभ	हे भरतवंश श्रेष्ठ!	भरतवंशियों में श्रेष्ठ हे अर्जुन!
आर्तः	शत्रुव्याधिग्रस्तः	दुःखी
जिज्ञासुः	आत्मज्ञानेच्छुः	ज्ञान की इच्छा वाला मुमुक्षु
अर्थार्थी	भोगसाधनलिप्सुः	अर्थ का इच्छुक
ज्ञानी	आत्मवित्	ज्ञानी
च	तथा	और

भावार्थः

संस्कृतम्—भगवदनुग्रहम् अन्तरेण आत्मज्ञानाय कश्चिन्न प्रवर्तते इत्युक्तम्। ते च भगवत्कृपाकाङ्क्षिणः पुण्यवन्तः भक्ताः चतुर्विधाः भवन्ति। इत्याह—

हे अर्जुन! पूर्वजन्मसु ये कृतपुण्याः जनाः ते पुण्यतारतम्येन चतुर्विधाः सन्तः मां भजन्ति। हे भरतर्षभ! तेषु कश्चित् आर्त्या रोगादिना पीडितः सन् मां भजतीति सः आर्तः भक्तः, कश्चित् जिज्ञासया आत्मज्ञानेच्छया, कश्चित् च इह लोके परत्र वा भोगसाधनभूतम् अर्थं प्राप्तुं मम भक्तौ प्रवर्तते। एवञ्च आर्तः, जिज्ञासुः, अर्थार्थी इत्येते त्रयोऽपि भक्ताः कामनावशेन भक्तौ प्रवर्तनात् सकामभक्ताः कथ्यन्ते। यथा—मखभङ्गेन कुपिते इन्द्रे वर्षति व्रजवासी जनः, यथा वा द्यूतसभायां वस्त्रापकर्षणे द्रौपदी, ग्राहग्रस्तः गजेन्द्रश्च इत्येते आर्तभक्ताः अभवन्। जिज्ञासुः मुमुक्षुः यथा—मुचुकुन्दः, मैथिलः जनकः श्रुतदेवश्च। अर्थार्थी भक्तः यथा सुग्रीवः, विभीषणः, ध्रुवः वा। तदेते त्रयः सकामाः।

चतुर्थः निष्कामभक्तश्च ज्ञानी इत्युच्यते। ज्ञानं भगवत्तत्त्वसाक्षात्कारः, तेन नित्ययुक्तः निवृत्तसर्वकामः यथा—सनकादिः, नारदः, प्रह्लादः, शुकः, गोपिकाः इत्यादयः निष्कामभक्ताः आसन्। तदेवं भक्तानां चत्वारः प्रकाराः सन्ति।

हिन्दी–भगवत्कृपा के विना आत्मज्ञान की ओर किसी की प्रवृत्ति नहीं होती है और भगवत्कृपा भगवान् की भक्ति से मिलती है। भक्ति भी पूर्वजन्म के पुण्यों के अनुसार चार कारणों से की जाती है, अत: भगवान् के चार प्रकार के भक्त होते हैं, जिन्हें इस श्लोक में भगवान् ने गिनाया है–

हे अर्जुन! पूर्वजन्म में किये हुये पुण्य वाले पुण्यशाली लोग अपने पुण्य के तारतम्य से चार प्रकार से मुझे भजते हैं। हे भरतर्षभ! इनमें कुछ लोग आर्ति (रोग या शत्रु से पीड़ित) होने के कारण मेरा भजन करते हैं, जैसे–इन्द्र के नाराज होने पर व्रजवासी, सभा में चीर-हरण की शिकार द्रौपदी, ग्राह से ग्रस्त गजेन्द्र आदि आर्त भक्त हैं। आत्मज्ञान के इच्छुक मुमुक्षु जिज्ञासु भक्त कहलाते हैं, जैसे–मुचुकुन्द, जनक या श्रुतदेव आदि जिज्ञासु भक्त हुए हैं। सांसारिक सुख चाहने वाले सुग्रीव, विभीषण आदि अथवा पारलौकिक सुख के इच्छुक ध्रुव आदि अर्थार्थी भक्त कहे गये हैं, क्योंकि उन्होंने भोग-साधन की कामना से भक्ति की थी। इस प्रकार आर्त, जिज्ञासु एवं अर्थार्थी ये तीनों प्रकार के भक्त सकाम-भक्त कहलाते हैं।

भगवान् की निष्काम भक्ति करने वाले को ज्ञानी भक्त कहते हैं। जैसे–सनकादिक मुनि, नारद, प्रह्लाद, शुक या गोपियाँ आदि ज्ञानी भक्त की कोटि में आते हैं। यहाँ भगवत् तत्त्व साक्षात्कार को ज्ञान कहा गया है। अपनी सभी प्रकार की कामनाओं को छोड़कर सदा उस ज्ञान में रहने वाला निष्काम भक्त ही चौथे प्रकार का ज्ञानी भक्त है।

अवबोधाभ्यास:

अध: प्रश्ना: उत्तरणीया:–

(i) अस्मिन् श्लोके किं प्रतिपादितम्? ....

....

(ii) कतिविधा: भक्ता:, तेषां विभाग: लेख्य:। ....

....

(iii) पुरा के आर्तभक्ता: अभवन्? ....

....

(iv) जिज्ञासुभक्तानाम् उदाहरणं लेख्यम्। ....

(v) सुग्रीव: विभीषणश्च कीदृश: भक्त:? ....

(vi) चतुर्थ: भक्तप्रकार: सोदाहरणं लेख्य:। ....

(vii) कयो: प्रकारयो: एषां चतुर्णां समाहार:? ....

(viii) केन कारणेन भक्तानां चत्वार: प्रकारा: भवन्ति? ....

व्याकरणाभ्यासः

(अ) सन्धिः

सुकृतिनोऽर्जुन - सुकृतिनः + अर्जुन (ओभावः पूर्वरूपः च सन्धिः)

आर्तो जिज्ञासुः - आर्तः + जिज्ञासुः (ओभावसन्धिः)

जिज्ञासुरर्थार्थी - जिज्ञासुः + अर्थार्थी (विसर्गरेफसन्धिः)

भरतर्षभ - भरत + ऋषभ (गुणसन्धिः)

अर्थार्थी - अर्थः + अर्थी (दीर्घसन्धिः)

अधः रेखाङ्कितेषु पदेषु सन्धिविच्छेदं करोतु–

(i) ततोऽन्यत् प्लुतवान् वेश्म। – ....

(ii) सोऽमन्यत महाकपिः। – ....

(iii) भूयोऽपि विचेतुमुपचक्रमे। – ....

(iv) ततो निहत्य तरसा। – ....

(v) रामो वालिनमाहवे। – ....

(vi) सर्वर्क्षहरिसंघानाम्। – ....

(vii) रामसुग्रीवयोरैक्यम्। – ....

(viii) तयोर्द्वतमुपागतम्। – ....

(ix) मार्गोऽयं पुरुषाकुलः। – ....

(x) उपपन्नैराभिज्ञानैर्दूतं तमधिगच्छति। – ....

(xi) रामनामाङ्कितं चेदम्। – ....

(xii) प्रत्ययार्थं तवानीतम्। – ....

(आ) समासः

अर्थार्थी – अर्थस्य अर्थी इति (षष्ठी तत्पु.)

भरतर्षभ – भरतेषु ऋषभ इति (सप्त. तत्पु.)

अधः यथाविग्रहं समस्तं पदं लिखतु–

(i) सुखस्य अर्थी – ....

(ii) विजयस्य अर्थी - ....

(iii) नृपस्य आसनम् - ....

(iv) पार्थिवेषु ऋषभः - ....

(v) कर्मणि कुशलः - ....

(vi) अध्ययने रतः - ....

(इ) तद्धितप्रत्ययः

सुकृतिनः - सुकृतम् एषाम् अस्ति इति सुकृत + इनि - सुकृतिन्

अर्थार्थी - अर्थः अस्य अस्ति इति अर्थ + इनि) - अर्थिन्

ज्ञानी - ज्ञानम् अस्य अस्ति इति ज्ञान + इनि - ज्ञानिन्

अधः यथाविग्रहम् इनिप्रत्ययान्तं रूपं लिखतु—

(i) अभिमानः अस्य अस्ति - ....

(ii) अहङ्कारः अनयोः अस्ति - ....

(iii) सुखम् एषाम् अस्ति - ....

(iv) विवेकः एषाम् अस्ति - ....

(v) विज्ञानम् अनयोः अस्ति - ....

(vi) आचारः अस्य अस्ति - ....

(ई) क्रियाकारकसम्बन्धः

भजन्ते - आत्मने. कर्तरि क्रिया

जनाः - कर्ता

सुकृतिनः - कर्तृविशेषणम्

चतुर्विधाः - कर्तृविशेषणम्

माम् - कर्म

अर्जुन! - सम्बोधनपदम्

आर्तः जिज्ञासुः अर्थार्थी ज्ञानी - चतुर्विधत्वे विशेषणानि।

आक्षिप्तायाः 'अस्ति' क्रियायाः एते कर्तारश्च।

चतुर्विधाः – चतस्रः विधाः येषां ते (बहुव्रीहिः)

एका विधा यस्य सः – ....।

द्वे विधे यस्य सः – ....।

पञ्च विधाः येषां ते – ....।

षट् विधाः यस्य सः – ....।

(उ) कृत्प्रत्ययः

विधा – विधीयते अनया इति (वि + धा + अङ् + टाप्)

प्रदा – ....

उपदा – ....

श्रद्धा – ....

अन्तर्धा – ....

(ऊ) पर्यायशब्दः

विधा – १. विधिः, २. प्रकारः, ३. वेतनम्, ४. वृद्धिः

सुकृती – १. पुण्यवान् (पुण्यवत्-तका.त्रि.), २. धन्यः, ३. भाग्यवान् (भाग्यवत्-तका. त्रि.)

आर्तः – १. पीडितः, २. दुःखितः

◆◆◆

३४. श्लोकः

तेषां ज्ञानी नित्ययुक्त एकभक्तिर्विशिष्यते।
प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः।। (भ. गी. ७.१७)

पदच्छेदः

तेषाम्, ज्ञानी, नित्य-युक्तः, एक-भक्तिः, विशिष्यते।
प्रियः, हि, ज्ञानिनः, अत्यर्थम्, अहम्, सः, च, मम, प्रियः।।

पदच्छेदाभ्यासः

अधः पदानि विभजतु–

(i) नित्ययुक्त – ....

(ii) एकभक्तिर्विशिष्यते – ....

(iii) प्रियो हि – ....

(iv) ज्ञानिनोऽत्यर्थम् – ....

(v) स च – ....

पदपरिचयः

पदम्	विश्लेषणम्	पदम्	विश्लेषणम्
तेषाम्	तद्-दका. पुं. षष्ठी बहु. सर्व.	ज्ञानिनः	ज्ञानिन्-नका. पुं. षष्ठी एक.
ज्ञानी	ज्ञानिन्-नका. पुं. प्र. एक. विशे.	अत्यर्थम्	अका. नपुं. द्विती. एक. क्रि. वि.
नित्ययुक्तः	अका. पुं. प्र. एक. समस्तं वि. १	अहम्	अस्मद्-प्र. एक. सर्व. वि.
एकभक्तिः	इका. पुं. प्र. एक. समस्तं वि. २	सः	तद्-पुं. प्र. एक. सर्व. विशे.
विशिष्यते	वि+शिष्+यक्+लट् प्रपु.एक.कर्मणि क्रिया	च	अव्ययम् २
प्रियः	अका. पुं. प्र. एक. वि.	मम	अस्मद्-दका. षष्ठी एक. सर्व.
हि	अव्ययम् १	प्रियः	अका. पुं. प्र. एक. वि.

वर्गीकरणाभ्यासः

अधः यथानिर्देशं श्लोकपदानि वर्गशः विभजनीयानि–

(i) प्रथमान्तम् (७) ....

(ii) द्वितीयान्तम् (१) ....

(iii) षष्ठ्यन्तम् (२) ....

(iv) अकारान्तम् (४) ....

(v) इकारान्तम् (१) ....

(vi) नकारान्तम् (२) ....

(vii) सर्वनाम (४) ....

(viii) अव्ययम् (२) ....

(ix) क्रियापदम् (१) ....

(x) पुंलिङ्गम् (८) ....

(xi) नपुंसकलिङ्गम् (१) ....

(xii) विशेष्यम् (३) ....

(xiii) विशेषणानि (५) ....

(xiv) विशेष्येण सह योग्यं विशेषणं लिखतु।

आकाङ्क्षाविस्तरः

विशिष्यते – (विशिष्टः भवति)।

कः विशिष्यते? .... (नका. प्र. एक.)

कीदृशः ज्ञानी विशिष्यते? .... (अका. पुं. प्र. समस्तम्)

पुनश्च कीदृशः नित्ययुक्तः ज्ञानी विशिष्यते? .... (इका. प्र. समस्तम्)

केषां मध्ये नित्ययुक्तः एकभक्तिः ज्ञानी विशिष्यते? .... (ष. बहु. सर्व.)

अहम् अस्मि – (इति क्रियायाः आक्षेपः)।

अहं कीदृशः अस्मि? .... (अका. पुं. प्र. एक.)

अहं कस्य प्रियः अस्मि? .... (नका. षष्ठी एक.)

अहं ज्ञानिनः कियत् प्रियः अस्मि? .... (अका. नपुं. द्विती. एक.)

सः च अस्ति – इति क्रियायाः आक्षेपः।

स च कीदृशः अस्ति? .... (अका. पुं. प्र. एक.)

स च कस्य प्रियः अस्ति? .... (षष्ठी एक. सार्व.)

अन्वयः

तेषां नित्ययुक्तः एकभक्तिः ज्ञानी विशिष्यते, हि अहं ज्ञानिनः अत्यर्थं प्रियः सः च मम प्रियः।

पदार्थः

पदम्	संस्कृतम्	हिन्दी
तेषाम्	चतुर्विधानां भक्तानां मध्ये	उन (चार प्रकार के भक्तों) में
नित्ययुक्तः	सदा समाहितचेताः	मेरे में सदा तल्लीन
एकभक्तिः	अनन्यानुरक्तिः	अनन्य अनुरागी
ज्ञानी	ज्ञानी भक्तः	ज्ञानी भक्त
विशिष्यते	अतिरिच्यते	श्रेष्ठ है
हि	यतो हि	क्योंकि
अहम्	अहं (भगवान्)	मैं (भगवान्)
ज्ञानिनः	ज्ञानिभक्तस्य	ज्ञानी को
अत्यर्थम्	अतिशयेन	अत्यन्त
प्रियः	प्रेमास्पदः (अस्मि)	प्रिय (हूँ)
सः	सः ज्ञानी भक्तः	वह (ज्ञानी)
च	तथा	और
मम	मम (भगवतः)	मुझ (परमात्मा) को
प्रियः	प्रेमास्पदः (अस्ति)	प्रिय (है)

भावार्थः

संस्कृतम्–पूर्वं पूर्वजन्मार्जितस्य सुकृतस्य न्यूनाधिक्येन चतुर्धा भक्ताः प्रोक्ताः। तेषां चतुर्णां मध्ये ज्ञानी भक्तः तेभ्यः त्रिभ्यः भिद्यते। तेभ्यः ज्ञानी उत्तमः इत्यर्थः। यतो हि स नित्ययुक्तः सदा भगवन्निष्ठः तथा एकस्मिन् भगवत्येव अनुरागवान् भवति। अत एव तस्य ज्ञानिनः भक्तस्य अहम् अतिशयेन प्रियः अस्मि। यतोहि तस्य देहाद्यभिमानाभावेन चित्तविक्षेपाभावात् नित्ययुक्तत्वम् एकान्त भक्तित्वं च संभवति, नान्यस्य। सः स आत्मरूपः ज्ञानी भक्तः मम परमात्मनः अत्यन्तं प्रियः अस्ति। आत्मा प्रियः अतिशयेन भवतीति श्रुतिलोकयोः प्रसिद्धमेव। एवञ्च 'नित्ययुक्तः, एकभक्तिः, अहं प्रियः, सः च प्रियः' इत्येभिः चतुर्भिः हेतुभिः ज्ञानी भक्तः सर्वोत्तमः इति भावः।

हिन्दी–पूर्वजन्म में अर्जित पुण्य की न्यूनाधिकता से पूर्व श्लोक में चार प्रकार के भक्त बतलाये गये हैं। उन चारों में ज्ञानी भक्त सर्वश्रेष्ठ है, यह बात यहाँ प्रतिपादित है–

उन चार प्रकार के भक्तों में ज्ञानी भक्त का चित्त सदा मेरे में ही समाहित रहता है तथा वह सूर्यादि अन्य देवताओं को छोड़कर केवल मेरी ही भक्ति करता है। इस प्रकार दूसरे विषय में अनुराग न होने से और सदा मेरे में स्थित रहने के कारण वह ज्ञानी अन्य भक्तों से अलग सर्वोत्कृष्ट है। वह मुझे अपनी आत्मा मानता है, अतः उसे मैं अत्यन्त प्यारा लगता हूँ और मुझे भी वह अत्यन्त प्रिय लगता है, क्योंकि वह मेरी आत्मा है। अपनी आत्मा सबको प्यारी लगती है, यह लोक और वेद में प्रसिद्ध है।

ज्ञानी को देहादि का अभिमान नहीं रहता और उसके चित्त में किसी प्रकार का विक्षेप भी नहीं होता, अतः वह केवल भगवान् में निष्ठा करके उन्हीं में अनुराग रखता है। यहाँ चार कारण गिनाये हैं– नित्ययुक्त, एक भक्ति, अहं प्रियः और सः प्रियः। इन कारणों से ज्ञानी भक्त सर्वश्रेष्ठ है।

अवबोधाभ्यासः

अधः प्रदत्ताः प्रश्नाः समाधेयाः–

(i) भक्तानां चतुर्धा विभागः लेखनीयः? ....

(ii) ज्ञानिनः वैशिष्ट्यं वर्णनीयम्। ....

(iii) ज्ञानिनः श्रेष्ठत्वे कारणानि लेख्यानि। ....

(iv) ज्ञानी कथम् एकभक्तिः भवति? ....

(v) ज्ञानिनः कथमहं प्रियः? ....

(vi) ज्ञानी कथं मम प्रियः? ....

(vii) अस्मिन् श्लोके कस्याः क्रियायाः आक्षेपः भवति?

....

व्याकरणाभ्यासः

(अ) सन्धिः

नित्ययुक्त एकभक्तिः - नित्ययुक्तः+एकभक्तिः (विवृतिः)

एकभक्तिर्विशिष्यते - एकभक्तिः+विशिष्यते (विसर्गरेफसन्धिः)

प्रियो हि - प्रियः+हि (ओभावसन्धिः)

ज्ञानिनोऽत्यर्थम् - ज्ञानिनः+अत्यर्थम् (ओभावः पूर्वरूपश्च सन्धिः)

स च - सः+च (लोपसन्धिः)

अत्यर्थम् - अति+अर्थम् (यणसन्धिः)

अधः ससन्धीनि पदानि विसन्धीनि करणीयानि–

(i) उदग्रशिरोग्रीवो गवां पतिरिव। ....

(ii) स्वभावसिद्धैर्विमलैर्धातुभिः समलंकृतम्। ....

(iii) प्लवगप्रवरैर्दृष्टः। ....

(iv) धूमराजिरिवानलः। ....

(v) सर्वथा कृतकार्योऽहमेष्यामि। ....

(vi) पक्षिराज इव व्रजन्। ....

(vii) स एष कपिशार्दूलः। ....

(viii) प्रत्यर्चयति सागरः। ....

(ix) अतिथिः किल पूजार्हः प्राकृतोऽपि। ....

(x) मन्युरेषोऽपनीयताम्। ....

(xi) ततस्तस्या नखैस्तीक्ष्णैर्मर्माण्युत्कृत्य वानरः। ....

(आ) समासः

नित्ययुक्तः - नित्यं युक्तः इति (द्विती. तत्पु.)

एकभक्तिः - एकस्मिन् भक्तिः यस्य सः (बहुव्रीहिः)

अत्यर्थम् - अतिक्रान्तम् अर्थम् (प्रादितत्पु.)

अधः यथाविग्रहं समस्तं पदं लिखतु–

(i) नित्यं प्रसन्नः – ....

(ii) धनं प्राप्तेन – ....

(iii) कालम् अतीतः – ....

(iv) एकस्मिन् निष्ठा यस्य सः – ....

(v) धर्मे बुद्धिर्यस्य सः – ....

(vi) शास्त्रे रुचिर्यस्य सः – ....

(vii) अतिक्रान्तः कालम् – ....

(viii) अतिक्रान्तेन क्रमेण – ....

(इ) क्रियाकारकसम्बन्धः

विशिष्यते	–	कर्तणि मुख्यक्रिया	प्रियः	–	कर्तृविशेषणम्
ज्ञानी	–	कर्म	ज्ञानिनः	–	प्रीतिकर्मणि षष्ठी
नित्ययुक्तः	–	कर्मविशेषणम्	सः	–	कर्ता आक्षिप्तायाः 'अस्ति' क्रियायाः
एकभक्तिः	–	कर्मविशेषणम्	प्रियः	–	कर्तृविशेषणम्
तेषाम्	–	निर्धारणे षष्ठी	मम	–	प्रीति कर्मणि षष्ठी
अहम्	–	कर्ता 'अस्ति' इति आक्षिप्त क्रियायाः			

(ई) कृत्प्रत्ययः

प्रियः – प्रीणाति इति (प्री + क) = प्रिय

अधः क प्रत्ययान्तं रूपं लिखतु–

(i) जानातीति (ज्ञा + क) – ....

(ii) बुध्यतीति (बुध् + क) – ....

(iii) कृश्यतीति (कृश् + क) – ....

(iv) क्षिपतीति (क्षिप् + क) – ....

(ऊ) पर्यायशब्दः

प्रियः - १. अभीष्टः, २. अभीप्सितः, ३. हृद्यः, ४. दयितः, ५. वल्लभः

नित्यः - १. शाश्वतः, २. ध्रुवः, ३. सदातनः, ४. सनातनः

◆◆◆

अथ अष्टमोऽध्यायः

३५. श्लोकः

किं तद्ब्रह्म किमध्यात्मं किं कर्म पुरुषोत्तम।
अधिभूतं च किं प्रोक्तमधिदैवं किमुच्यते।। (भ. गी. ८.१)

पदच्छेदः

किम्, तद्, ब्रह्म, किम्, अधि+आत्मम्, किम्, कर्म, पुरुष-उत्तम।
अधि-भूतम्, च, किम्, प्र+उक्तम्, अधि-दैवम्, किम्, उच्यते।।

पदच्छेदाभ्यासः

अधः पदानि छिनत्तु–

(i) किमध्यात्मम् – ....

(ii) अध्यात्मम् – ....

(iii) पुरुषोत्तम – ....

(iv) अधिभूतम् – ....

(v) प्रोक्तम् – ....

(vi) अधिदैवम् – ....

पदपरिचयः

पदम्	विश्लेषणम्	पदम्	विश्लेषणम्
किम्	किम्-मका. नपुं. प्र. एक., सर्व., अव्ययम्, १	अधिभूतम्	अव्ययं समस्तम् ६
तद्	दका. नपुं. प्र. एक. सर्व. २	च	अव्ययम् ७
ब्रह्म	ब्रह्मन्-नका. नपुं. प्र. एक.	किम्	मका. नपुं. प्र. एक.,सर्व.,अव्ययम्, ८
किम्	मका. नपुं. प्र. एक., सर्व., अव्ययम्, ३	प्रोक्तम्	अका. नपुं. प्र. एक. क्तान्तम्

अध्यात्मम्	अव्ययं समस्तम् ४	अधिदैवम्	अव्ययं समस्तम् ९
किम्	मका. नपुं. प्र. एक. सर्व. अव्ययम्, ५	किम्	मका. नपुं. प्र. एक., सर्व., अव्ययम् १
कर्म	कर्मन्–नका. नपुं. प्र. एक.	उच्यते	वच्+यक्+लट् प्रपु. एक. कर्मणि क्रिया
पुरुषोत्तम	अका. पुं. सम्बो. प्र. एक.		

वर्गीकरणाभ्यासः

अधः यथानिर्देशं श्लोकपदानि वर्गशः करणीयानि–

(i) प्रथमान्तम् (९) ....

(ii) अव्ययम् (९) ....

(iii) सर्वनाम (६) ....

(iv) क्तान्तम् (१) ....

(v) क्रियापदम् (१) ....

(vi) नकारान्तम् (२) ....

(vii) अकारान्तम् (५) ....

(viii) सम्बोधनान्तम् (१) ....

(ix) पुंलिङ्गम् (१) ....

(x) नपुंसकलिङ्गम्(१२) ....

आकाङ्क्षाविस्तरः

उच्यते = कथ्यते इति कर्मणि क्रियायाः तत् प्रोक्तम् इति अनयोः विशेषणयोश्च इह पञ्चसु अपि प्रश्नात्मकेषु वाक्येषु अन्वयः कार्यः। तथा च अस्मिन् श्लोके पञ्च प्रश्नवाक्यानि सन्ति यथा–

१. तत् प्रोक्तं ब्रह्म किम् उच्यते? ....

२. तत् प्रोक्तम् अध्यात्मं किम् उच्यते? ....

३. तत् प्रोक्तं कर्म किम् उच्यते? ....

४. तत् प्रोक्तम् अधिभूतं किम् उच्यते? ....

तत् प्रोक्तम् अधिदैवं च किम् उच्यते? ....

अन्वयः

पुरुषोत्तम! तद् प्रोक्तं ब्रह्म किम् उच्यते अध्यात्मं किं कर्म किम् अधिभूतं किम् अधिदैवं च किम् उच्यते।

पदार्थः

पदम्	संस्कृतम्	हिन्दी
पुरुषोत्तम!	हे सर्वज्ञ!	हे पुरुषोत्तम!
तद्	तद् (ज्ञेयत्वेन)	वह
प्रोक्तम्	कथितम्	कहा गया
ब्रह्म	ब्रह्मपदवाच्यम्	ब्रह्म अर्थ
किम्	प्रश्ने	किसे
उच्यते	कथ्यते	कहते हैं
अध्यात्मम्	आत्मनि अधिष्ठितम्	अध्यात्म
किम्	किम् (उच्यते)	किसे (कहते हैं)
कर्म	कर्मपदवाच्यम्	कर्म
किम्	किम् (उच्यते)	किसे (कहते हैं)
अधिभूतम्	अधिभूतपदार्थः	अधिभूत
किम्	किम् (उच्यते)	किसे (कहते हैं)
अधिदैवम्	अधिदैवपदवाच्यम्	अधिदैव
च	तथा	और
किम्	किम्	किसे
उच्यते	कथ्यते	कहते हैं।

भावार्थः

संस्कृतम्—सप्तमाध्यायान्ते भगवता श्रीकृष्णेन सप्त पदार्थाः उपदिष्टाः। ते च सन्ति—ब्रह्म, अध कर्म, अधिभूतम्, अधिदैवम्, अधियज्ञम्, प्रयाणकाले भगवदनुध्यानं च। तदेतेषु सप्तसु उ एकैकस्य पदस्य सन्ति अनेके अर्थाः। तत्र कम् अर्थम् उद्दिश्य शब्दप्रयोगः अथवा

वेदितव्य: इति जिज्ञासायाम् इह अर्जुन: सप्त प्रश्नान् पृच्छति। तत्रास्मिन् श्लोके पञ्च प्रश्ना:, अवशिष्टौ च द्वौ प्रश्नौ अग्रिमे श्लोके सन्ति।

अर्जुन: पृच्छति–हे पुरुषोत्तम! पुरुषेषु ज्ञानवत्सु उत्तम: सर्वज्ञ: इत्यर्थ:।

१. ज्ञेयत्वेन उपदिष्टं तत् ब्रह्म किमुच्यते? अर्थात् ब्रह्मपदेन वेद:, ब्रह्मा, निर्गुण: परमात्मा, प्रकृति: ओङ्कारश्चेति सर्वं गृह्यते। तत्र इह ब्रह्मपदेन किं ज्ञेयम्?

२. तद् उपदिष्टम् अध्यात्मं किम् उच्यते? यतोहि आत्मानम् इन्द्रियं मन: बुद्धि: जीव: परमात्मा च अधितिष्ठन्ति। तदेतेषु इह अध्यात्मपदेन किम् ज्ञेयम्?

३. तदुपदिष्टं कर्म किमस्ति। यतोहि यज्ञदानादि कर्म, क्रियामात्रं कर्म, प्रारब्धं कर्म, ईश्वरस्य सृष्टिरचनादि कर्म, इति चतुर्विधं कर्म। तदत्र किं कर्म ग्राह्यम् इति प्रश्न:।

४. एवमेव अधिभूतपदेन पञ्चमहाभूतानि, प्राणिमात्रम्, सर्वोऽपि दृश्यवर्ग: अथवा तत्त्वान्तरं वा किं ज्ञेयम्?

५. अधिदैवपदमपि देवताविषयम् अनुध्यानम्, आदित्यमण्डलादिषु अनुस्यूतं चैतन्यम्, हिरण्यगर्भम्, अदृष्टं जीवं वा प्रकटयति। तत्र इह अनेन किं बोध्यम्?

एवमेते अर्जुनस्य पञ्च प्रश्ना: इह श्लोके सन्ति।

हिन्दी–सातवें अध्याय के अन्त में भगवान् श्रीकृष्ण ने सात शब्दों का प्रयोग करके उनको जानने और आचरण करने का उपदेश किया है। वे सात शब्द हैं–ब्रह्म, अध्यात्म, कर्म, अधिभूत, अधि दैव, अधियज्ञ और शरीर छूटते समय भगवान् का अनुध्यान। इनमें प्रत्येक शब्द के अनेक अर्थ होते हैं। उनमें कौन-सा अर्थ यहाँ वांछित है, इस जिज्ञासा से अर्जुन ने श्रीकृष्ण से सात प्रश्न पूछे हैं। उनमें पाँच प्रश्न इस श्लोक में हैं और शेष दो प्रश्न अगले श्लोक में।

यहाँ अर्जुन भगवान् के लिए पुरुषोत्तम सम्बोधन का प्रयोग करते हैं, क्योंकि पुरुष ज्ञानवान् होता है और उनमें उत्तम को सर्वज्ञ ही कहेंगे। इस प्रकार आप सर्वज्ञ हैं, अत: मेरे प्रश्नों का उत्तर देने में आप समर्थ हैं।

अर्जुन के प्रश्न– १. ब्रह्म शब्द के वेद, ब्रह्मा, निर्गुण-परमात्मा, प्रकृति और ओंकार आदि अर्थ होते हैं। इनमें यहाँ ब्रह्म से कौन-सा अर्थ वांछित है।

२. अध्यात्म किसे कहते हैं? क्योंकि इन्द्रिय, मन, बुद्धि, जीव और परमात्मा ये सभी अध्यात्म कहलाते हैं।

३. कर्म चार प्रकार के हैं–यज्ञ-दानादि धार्मिक कर्म, सामान्य क्रिया, प्रारब्ध और ईश्वरीय सृष्टि-आदि कर्म। इनमें यहाँ कर्म से क्या विवक्षित है?

४. अधिभूत शब्द भी पंचमहाभूत, सम्पूर्ण जीव-निकाय, समस्त अचर वस्तु आदि का वाचक है। अत: यहाँ अधिभूत किसे कहते हैं?

५. इसी प्रकार देवता का ध्यान, सूर्यादिमण्डल में व्याप्त चैतन्य, हिरण्यगर्भ, अदृष्ट और जीव आदि के लिए अधिदैव शब्द का प्रयोग होता है। अतः यहाँ अधिदैव किसे कहते हैं?

इस प्रकार यहाँ अर्जुन के पाँच प्रश्न हैं।

अवबोधाभ्यासः

अधः प्रदत्ताः प्रश्नाः समाधेयाः–

(i) अस्मिन् श्लोके किं पृष्टम्? ....

(ii) इह अर्जुनेन कति प्रश्नाः पृष्टाः? ....

(iii) अधिदैवपदस्य के-के अर्थाः प्रसिद्धाः सन्ति?

....

(iv) कति कर्माणि लोके प्रथितानि? ....

(v) अधिभूतपदं केषु अर्थेषु प्रयुज्यते? ....

(vi) अध्यात्मशब्देन किं किं गृह्यते? ....

(vii) ब्रह्मपदार्थे सन्देहस्य किं कारणम्? ....

(viii) पुरुषोत्तम सम्बोधनेन किं द्योत्यते? ....

(ix) इह श्लोके 'उच्यते' कतिवारम् आवृत्तिः क्रियते?

....

(x) इह श्लोके कति वाक्यानि सन्ति? ....

व्याकरणाभ्यासः

(अ) सन्धिः

तद्ब्रह्म – तत् + ब्रह्म (जश्त्वसन्धिः)

अध्यात्मम् – अधि + आत्मन् (यणसन्धिः)

पुरुषोत्तम – पुरुष + उत्तम (गुणसन्धिः)

अधः रेखाङ्कितेषु सन्धिच्छेदः विधेयः–

(i) यथा विहङ्गा वि<u>हगोपगू</u>ढाः। ....

(ii) अन्याः पुनर्ह<u>र्म्यतलो</u>पविष्टाः। ....

(iii) तत्र प्रियाङ्के सुसुखोपविष्टाः। ....

(iv) तस्माद् वृक्षाद् उदपतन्। ....

(v) गृहाद्गृहं प्रसरतु संस्कृतम्। ....

(vi) महद्वनं समाकीर्णम्। ....

(vii) दिव्यान्याभरणानि सन्ति। ....

(viii) शयनान्यासनानि च। ....

(ix) न हि रूपोपमा ह्यन्या। ....

(आ) समासः

अध्यात्मम् - आत्मनि इति (अव्ययीभावः)

अधिभूतम् - भूतेभ्यः इति (अव्ययीभावः)

अधिदैवम् - दैवेषु इति (अव्ययीभावः)

पुरुषोत्तम - पुरुषेषु उत्तम (सप्त. तत्पु.)

अधः पदानां समासविग्रहौ कार्यौः–

	पदम्		विग्रहः	समासः
(i)	अधिगृहम्	–	....	....
(ii)	उपकूलम्	–	....	....
(iii)	अनुगङ्गम्	–	....	....
(iv)	सभाष्यम् अधीते	–	....	....
(v)	दुर्दिनम्	–	....	....
(vi)	नरोत्तमः	–	....	....
(vii)	जीवाधमः	–	....	....
(viii)	व्याकरणनिपुणः	–	....	....
(ix)	व्यवहारदक्षः	–	....	....
(x)	धर्मभीरुः	–	....	....

(इ) कृत्प्रत्ययः

प्रोक्तम् - प्र + वच् + क्त = प्रोक्त

भूतम् - भू + क्त = भूत

अधः क्तान्तेन रिक्तं वाक्यं पूरणीयम्–

(i) राज्ञा अश्वमेधेन.................। (यज् + क्त)

(ii) द्विभाषिकेन हिन्द्यां तद्.................। (अनु + वद् + क्त)

(iii) ....पाणिना न गन्तव्यम्। (रिच् + क्त)

(iv) ....सर्वस्मै श्रावणीयम्। (अनु + भू + क्त)

(v) ....निलीयन्ते जनाः। (दण्ड + क्त)

(ई) क्रियाकारकसम्बन्धः

उच्यते	–	कर्मणि क्रिया	अधिभूतम्	–	कर्म
ब्रह्म	–	कर्म	अधिदैवम्	–	कर्म
तद्	–	कर्मविशेषणम्	प्रोक्तम्	–	कर्मविशेषणम्
अध्यात्मम्	–	कर्म	किम्	–	प्रश्नवाचकम्
कर्म	–	कर्मकारकम्			

(उ) वाच्यप्रयोगः

त्वया तद् ब्रह्म किम् उच्यते – कर्मणि

त्वं तद् ब्रह्म किम् वक्षि – कर्तरि

अधः प्रयोगम् अभ्यस्यतु–

(i) राजा अश्वमेधेन इष्टम् – कर्मणि

राजा अश्वमेधेन इष्टवान् – कर्तरि

(ii) अहं तस्य भावम् अनुवदामि – कर्तरि

मया तस्य भावः अनूद्यते – कर्मणि

(iii) अनेन अयं शास्त्रार्थे निगृहीतः – कर्मणि

अयम् इमं शास्त्रार्थे निगृहीतवान् – कर्तरि

(iv) कृषकः शीतगृहे आलुकं निक्षेप्स्यति – कर्तरि

कृषकेण शीतगृहे आलुकं निक्षेप्स्यते – कर्मणि

◆◆◆

३६. श्लोकः

अधियज्ञः कथं कोऽत्र देहेऽस्मिन्मधुसूदन।
प्रयाणकाले च कथं ज्ञेयोऽसि नियतात्मभिः।। (भ. गी. ८.२)

पदच्छेदः

अधि-यज्ञः, कथम्, कः, अत्र, देहे, अस्मिन्, मधु-सूदन।
प्रयाण-काले, च, कथम्, ज्ञेयः, असि, नियत+आत्मभिः।।

पदच्छेदाभ्यासः

अधः प्रदत्तपदानां पदच्छेदं करोतु-

(i) अधियज्ञः - ....

(ii) कोऽत्र - ....

(iii) देहेऽस्मिन् - ....

(iv) प्रयाणकाले - ....

(v) ज्ञेयोऽसि - ....

(vi) नियतात्मभिः - ....

पदपरिचयः

पदम्	विश्लेषणम्	पदम्	विश्लेषणम्
अधियज्ञः	अका. पुं. प्र. एक. समस्तम् विशे.	प्रयाणकाले	अका. पुं. सप्त. एक. समस्तम्
कथम्	अव्ययम्	च	अव्ययम्
कः	किम्-पुं. प्र. एक. सर्व. वि.	कथम्	अव्ययम्
अत्र	त्रलन्तम् अव्ययम्	ज्ञेयः	अका. पुं. प्र. एक. वि.
देहे	अका. पुं. स. एक. विशे.	असि	अस्+लट् मपु. एक. कर्तरि क्रिया
अस्मिन्	इदम्-मका. पुं. सप्त. एक. सर्व. वि.	नियतात्मभिः	नियतात्मन्-नका. पुं. तृ. बहु. समस्तम्
मधुसूदन	अका. पुं. सम्बो. एक. समस्तम्		

वर्गीकरणाभ्यासः

अधः श्लोकपदानि यथानिर्देशं वर्गशः करणीयानि–

(i) प्रथमान्तम् (३) ....

(ii) तृतीयान्तम् (१) ....

(iii) सप्तम्यन्तम् (३) ....

(iv) सम्बोधनान्तम् (१) ....

(v) पुंलिङ्गम् (८) ....

(vi) सर्वनाम (२) ....

(vii) अव्ययम् (४) ....

(viii) विशेष्यम् (२) ....

(ix) विशेषणम् (३) ....

(x) क्रियापदम् (१) ....

आकाङ्क्षाविस्तरः

अस्ति (इति क्रियायाः आक्षेपः)।

अधियज्ञः कः अस्ति (इति एको वाक्यांशः)।

कुत्र अधियज्ञः कः अस्ति? .... (त्रलन्तम्)

अस्मिन् देहे कथम् अस्ति? इति वाक्यस्य द्वितीयः अंशः।

अनयोः वाक्यांशयोः मेलनेन एकं वाक्यम् इत्थं भवति–

'अत्र अधियज्ञः कः, अस्मिन् देहे कथं च अस्ति' इति।

असि (कर्तरि क्रिया)

कः असि? (त्वम् इति कर्ता आक्षेपगम्यः)

त्वं कीदृशः असि? .... (अका. पुं. प्र. एक. वि.)

त्वं केन कैः ज्ञेयः असि? .... (तृतीयान्तम्)

त्वं नियतात्मभिः कदा ज्ञेयः असि? .... (स. एक.)

प्रयाणकाले नियतात्मभिः कथं ज्ञेयः असि? (इति साधन् जिज्ञासायां प्रश्नात्मकं वाक्यं द्वितीयम्।)

अन्वयः

मधुसूदन! अत्र अधियज्ञः कः अस्मिन् देहे च कथं (ज्ञेयः)? नियतात्मभिः प्रयाणकाले कथं ज्ञेयः असि।

पदार्थः

पदम्	संस्कृतम्	हिन्दी
मधुसूदन!	हे मधुमथन!	हे मधुसूदन!
अत्र	इह	यहाँ
अधियज्ञः	यज्ञम् अधिगतः	अधियज्ञ
कः	कीदृशः	कौन है
अस्मिन्	एतस्मिन्	इस
देहे	शरीरे	देह में
च	तथा	और
कथम्	केन प्रकारेण	कैसे है
प्रयाणकाले	प्राणत्यागसमये	प्राण छूटते समय
नियतात्मभिः	नियतचित्तैः	युक्त चित्त वाले पुरुषों के द्वारा
कथम्	केनोपायेन	किस उपाय से
ज्ञेयः	अवगम्यः	जानने में
असि	(त्वं) भवसि	(आप) आते हैं।

भावार्थः

संस्कृतम्—अर्जुनः पूर्वश्लोके पञ्च प्रश्नान् पृष्टवान्, तत्रावशिष्टं प्रश्नद्वयम् अस्मिन् श्लोके पृच्छति—

हे मधुसूदन! इह उक्तः अधियज्ञः कः किंस्वरूपः? यज्ञम् अधिगतः अधिष्ठाता, प्रयोजकः, फलदाता वा कः अधियज्ञः? सः च अस्मिन् देहे केन प्रकारेण यज्ञम् अधितिष्ठति? इति मां बोधय। यतोहि त्वं दुर्दान्तं मधु–राक्षसं निवारयितुं समर्थोऽसि, अतः मम सन्देहोपद्रवनिवारणं तु ईषत्करं कुरुष्वेति भावः।

अपि च प्राणोत्क्रमणदशायां युक्तचेतसः जनाः त्वां कथं केनोपायेन जानन्ति। यतोहि तदानीं सर्वाणि इन्द्रियाणि व्याकुलितानि भवन्तीति चित्तैकाग्रता दुर्घटा स्यात्।

हिन्दी–पूर्व श्लोक में अर्जुन ने पाँच प्रश्न पूछे थे। शेष दो प्रश्न यहाँ पूछे जा रहे हैं–

१. हे मधुसूदन! यहाँ अधियज्ञ कौन है, उसका क्या स्वरूप है? और वह इस शरीर में कैसे किस प्रकार रहता है? शरीर में तो मन, बुद्धि, प्राण, जीव रहते हैं और वे सभी कर्म करते हैं, अतः इनमें अधियज्ञ कौन है? अथवा इनसे भिन्न कोई दूसरा यज्ञ-संचारी देवता या परब्रह्म अधियज्ञ कहलाता है?

२. प्राण निकलते समय तो सारी इन्द्रियाँ व्याकुल रहती हैं। उस दशा में चित्त में एकाग्रता न होने से आपका ध्यान-चिन्तन किस साधन से कैसे होगा? आप कहते हैं कि उस दशा में भी संयतचित्त होकर मुझे जानना चाहिए, सो कैसे सम्भव है? मुझ शरणागत को आप यह बतावें। आप तो मधु नामक घोर राक्षस का विनाश करने वाले हैं, अतः मेरे इस सन्देहरूपी उपद्रव को भी शान्त करें।

अवबोधाभ्यासः

अधः प्रदत्तानां प्रश्नानां समाधानं करोतु–

(i) अस्मिन् श्लोके कति प्रश्नाः सन्ति? ....

(ii) अधियज्ञः शरीरान्तः तिष्ठति बहिर्वा? ....

(iii) अधियज्ञे सन्देहस्य किं कारणम्? ....

(iv) प्रथमप्रश्नस्य अंशद्वयं लिखतु? ....

(v) द्वितीयप्रश्नस्य भावं लिखतु। ....

(vi) मधुसूदन सम्बोधने किं तात्पर्यम्? ....

(vii) इह का क्रिया आक्षिप्यते? ....

(viii) इह द्वितीयप्रश्ने कस्य पदस्य आक्षेपः क्रियते?

....

व्याकरणाभ्यासः

(अ) सन्धिः

कोऽत्र – कः + अत्र (ओभावः पूर्वरूपं च सन्धिः)

ज्ञेयोऽसि – ज्ञेयः + असि (ओभावः पूर्वरूपं च सन्धिः)

देहेऽस्मिन् – देहे + अस्मिन् (पूर्वरूपसन्धिः)

नियतात्मभिः – नियत + आत्मभिः (दीर्घसन्धिः)

एवमेव अधः सन्धिच्छेदं करोतु–

(i) प्राप्तोऽद्य तव दर्शनाम्। ....

(ii) तेऽम्बरं सहसा उदपतन्। ....

(iii) उच्यतेऽनुक्रमेण। ....

(iv) कोऽधियज्ञः। ....

(v) अस्य स्पष्टोऽर्थः। ....

(vi) देवानुध्यानम् आचरति। ....

(vii) अनायासेनापि सेत्स्यति। ....

(viii) त्यागादीनि कर्माणि। ....

(ix) कर्माणि तनुतेऽपि च। ....

(x) जलेऽवतु नाविकः। ....

(आ) समासः

अधियज्ञः – अधिकृतः यज्ञः यस्मात् सः इति (बहुव्रीहिः)

प्रयाणकाले – प्रयाणस्य काले (षष्ठी तत्पु.)

नियतात्मभिः – नियतः आत्मा येषां तैः (बहुव्रीहिः)

अधः प्रदत्तानि पदानि समासविग्रहेण योजनीयानि–

	पदम्		विग्रहः	समासः
(i)	अधिहर्षः	–	....	....
(ii)	उपग्रामः	–	....	....
(iii)	अनुकूलः	–	....	....
(iv)	गमनवेलायाम्	–	....	....
(v)	उत्थानसमये	–	....	....
(vi)	भोजनकाले	–	....	....
(vii)	संयतचित्तैः	–	....	....
(viii)	वीतशोकः	–	....	....
(ix)	प्राप्तमनोरथम्	–	....	....
(x)	निक्षिप्तभाराय	–	....	....

(इ) कृत्प्रत्ययः

मधुसूदन - मधुं सूदयति इति (मधु + सूद + णिच् + ल्यु) = मधुसूदन

ज्ञेयः - ज्ञातुं योग्यः इति (ज्ञा + यत्) = ज्ञेय

यज्ञः - यजनस्य भावः इति (यज् + नङ्) = यज्ञ

विग्रहानुसारं प्रत्ययान्तं रूपं लिखतु–

(i) शत्रुं सूदयतीति - ....

(ii) सर्वं दमयतीति - ....

(iii) जनं रमयतीति - ....

(iv) विशेषेण भीषयतीति - ....

(v) पातुं योग्यम् - ....

(vi) दातुं योग्यम् - ....

(vii) नेतुं योग्या - ....

(viii) याचनस्य भावः - ....

(ix) रक्षणस्य भावः - ....

(x) यतनस्य भावः - ....

(ई) क्रियाकारकसम्बन्धः

अधियज्ञः	-	कर्ता आक्षिप्तायाः 'अस्ति' क्रियायाः	असि	-	कर्तरि क्रिया
कः	-	कर्तृविशेषणम्	ज्ञेयः	-	आक्षिप्तस्य त्वमिति कर्तुः विशेषणम्
अत्र	-	अधिकरणम्	नियतात्मभिः	-	कर्मवाच्यायाः ज्ञानक्रियायाः कर्ता
देहे	-	अधिकरणम्	प्रयाणकाले	-	अधिकरणम्
अस्मिन्	-	अधिकरणविशेषणम्	कथम्	-	साधनविषयके प्रश्ने

(उ) पर्यायशब्दः

देहः - १. संहननम्, २. मूर्तिः, ३. तनुः (उका. स्त्री.), ४. तनूः

यज्ञः - १. सवः, २. सप्ततन्तुः, ३. अध्वरः, ४. क्रतुः (उका. पुं.), ५. मखः

◆◆◆

३७. श्लोकः

श्रीभगवानुवाच–

अक्षरं ब्रह्म परमं स्वभावोऽध्यात्ममुच्यते।
भूतभावोद्भवकरो विसर्गः कर्मसंज्ञितः।। (भ. गी. ८.३)

पदच्छेदः

अक्षरम्, ब्रह्म, परमम्, स्वभावः, अध्यात्मम्, उच्यते।
भूत-भाव+उद्भव-करः, विसर्गः, कर्म-संज्ञितः।।

पदच्छेदाभ्यासः

अधः प्रदत्तपदानां पदच्छेदः कार्यः–

(i) स्वभावोऽध्यात्मम् – ....

(ii) भावोद्भव – ....

(iii) भूतभाव – ....

(iv) करो विसर्गः – ....

(v) कर्मसंज्ञितः – ....

पदपरिचयः

पदम्	विश्लेषणम्	पदम्	विश्लेषणम्
अक्षरम्	अका.नपुं.प्र.एक.विधेयं विशे.समस्तम्	उच्यते	वच्+यक्+लट् प्रपु. एक. कर्मणि क्रिया
ब्रह्म	ब्रह्मन्-नका.नपुं.प्र.एक.उद्देश्यम्	भूतभावो-द्भवकरः	अका.प्र.एक.समस्तं विधेयविशेषणम् १
परमम्	अका.नपुं.प्र.एक.विधेयविशेषणम्	विसर्गः	अका.पुं.प्र.एक.विधेयम्
स्वभावः	अका.पुं.प्र.एक.समस्तं विधेयम्	कर्मसंज्ञितः	अका.पुं.प्र.एक.समस्तं विधेयविशेषणम् २
अध्यात्मम्	अका.नपुं.प्र.एक.समस्तम् अव्ययम् उद्देश्यम्		

वर्गीकरणाभ्यासः

अधः प्रदात्तानि श्लोकपदानि यथानिर्देशं वर्गशः करणीयानि–

(i) प्रथमान्तम् (८) ....

(ii) पुंलिङ्गम् (४) ....

(iii) नपुंसकलिङ्गम् (४) ....

(iv) अकारान्तम् (७) ....

(v) नकारान्तम् (१) ....

(vi) विधेयम् (३) ....

(vii) उद्देश्यम् (३) ....

(viii) विशेषणम् (३) ....

(ix) उद्देश्येन सह विधेयं लिखतु।

(x) विशेष्येण सह विशेषणं स्थापयतु।

आकाङ्क्षाविस्तरः

उच्यते - (कथ्यते)।

किम् उच्यते? .... (नका. प्र.)

ब्रह्म कीदृशम् उच्यते? .... (अका. प्र. विधेयम्)

ब्रह्म कीदृशम् अक्षरम् उच्यते? .... (अका. विधेयविशेषणम्)

पुनश्च किम् उच्यते? .... (अका. नपुं. उद्देश्यम्)

अध्यात्मं कीदृशम् उच्यते? .... (अका. पुं. विधेयम्)

विसर्गः अस्ति इति क्रियाक्षेपः।

विसर्गः कीदृशः अस्ति? .... (अका. विधेयविशेषणम् १)

भूतभावोद्भवकरः विसर्गः किम् अस्ति? .... (अका. विधेयविशेषणम् २)

तेन के मुह्यन्ति? .... (उका. प्र. बहु.)

अन्वयः

परमम् अक्षरम् ब्रह्म उच्यते, अध्यात्मं स्वभावः, भूतभावोद्भवकरः विसर्गः कर्मसंज्ञितः।

पदार्थः

पदम्	संस्कृतम्	हिन्दी
परमम्	परम्	परम
अक्षरम्	अविनाशि व्यापकम्	ईश्वर को
ब्रह्म	ब्रह्मपदार्थः	ब्रह्म
उच्यते	उद्यते	कहते हैं
अध्यात्मम्	अध्यात्मपदार्थः	अध्यात्म
स्वभावः	जीवात्मा (उच्यते)	जीवात्मा (कहा जाता है।)
भूतभावोद्भवकरः	चराचरोत्पत्तिवृद्धिकरः	चराचर जगत् की उत्पत्ति और वृद्धि करने वाला
विसर्गः	त्यागः	त्याग
कर्मसंज्ञितः	कर्मपदवाच्यः	कर्म कहलाता है।

भावार्थः

संस्कृतम्—पूर्वयोः श्लोकयोः अर्जुनेन पृष्टानां सप्तानामपि प्रश्नानां भगवान् श्रीकृष्णः यथाक्रमं संक्षिप्तं समाधानं प्रस्तौति। तत्र अस्मिन् श्लोके त्रयः प्रश्नाः समाहिताः—

१. इह ब्रह्मपदेन परमम् अक्षरं गृह्यते। जीवः अपि अक्षरः, परमात्मनः अंशत्वात्, चैतन्यात्, परमार्थतः तद्रूपत्वाद् वा। अत इह जीवव्यावृत्तये 'परमं' विशेषणम् उपात्तम्। तथा चेह परमम् अक्षरं परमात्मा भगवानेव ब्रह्म कथ्यते।

२. इह अध्यात्मशब्देन स्वभावः उच्यते। कस्य स्वभावः? ब्रह्मणः एव। स्वस्य ब्रह्मणः अंशतः भावः जीवरूपेण भवनं स्वभावः जीवः, सः एव आत्मानं देहम् अधिकृत्य भोक्ता कर्ता वा। एवञ्च इह स्वभावः = जीवात्मा एव अध्यात्मम् अभिधीयते।

३. भूतानां स्थावरजङ्गमानाम् उत्पत्तौ अभिवृद्धौ च यः कार्यकलापः कारणरूपः सः सर्वोऽपि विसर्गः = त्यागः एव। तादृशः रचनात्मकः शास्त्रोक्तः विसर्गः एव इह कर्मपदवाच्यः। एवञ्च आदितः प्रश्नत्रयस्य संक्षिप्तं समाधानमिदम्।

हिन्दी—पहले के दो श्लोकों में अर्जुन ने सात प्रश्न पूछे हैं। अब भगवान् श्रीकृष्ण प्रश्नक्रम से संक्षिप्त उत्तर दे रहे हैं। उनमें प्रारम्भिक तीन प्रश्नों का समाधान इस श्लोक में हुआ है—

१. यहाँ ब्रह्म शब्द से 'परम अक्षर' समझना चाहिए। जीव भी परमात्मा का अंश है, चैतन्य है तथा परमार्थतः तद्रूप है, अतः वह भी अक्षर = अविनाशी कहलाता है। ब्रह्मशब्द से जीव अर्थ न समझा जाय इसके लिए यहाँ अक्षर के साथ 'परम' विशेषण लगाया गया। एवञ्च 'परम अक्षर' परमात्मा

भगवान् ही ब्रह्म कहलाते हैं।

२. स्वभाव को अध्यात्म कहते हैं। किसका स्वभाव? ब्रह्म का। स्व अर्थात् ब्रह्म का अंशतः जीवरूप में भवन ही स्वभाव है। वह स्वभाव जीव ही आत्मा = शरीर का अधिकारी बनकर भोक्ता, कर्ता जीवात्मा है। यहाँ उसे ही 'अध्यात्म' कहा गया है।

३. स्थावर और जङ्गम को भूत कहते हैं। उस भूत की उत्पत्ति और अभिवृद्धि करने वाले सारे रचनात्मक क्रिया-कलाप ही विसर्ग अर्थात् त्याग है। सभी प्रकार के रचनात्मक त्याग शास्त्रानुमत हैं। इस त्यागरूप विसर्ग को ही यहाँ कर्म नाम दिया गया है।

इस प्रकार अर्जुन के प्रथम तीन प्रश्नों का यह संक्षिप्त समाधान है।

अवबोधाभ्यासः

अधः प्रदत्ताः प्रश्नाः समाधेयाः–

(i) श्लोकेऽस्मिन् किं प्रतिपादितम्? ....

(ii) इह अर्जुनस्य कति प्रश्नाः समाहिताः? ....

(iii) श्लोकस्य पूर्वार्द्धे कति वाक्यानि सन्ति? ....

(iv) पूर्वार्द्धे कस्याः क्रियायाः कतिवारम् आवृत्तिः? ....

(v) स्वभावपदेन किं गृह्यते ? ....

(vi) अर्जुनस्य प्रथमं प्रश्नं लिखतु? ....

(vii) किं तद्ब्रह्म उच्यते? ....

(viii) अर्जुनस्य द्वितीयः प्रश्नः लेखितव्यः? ....

(ix) अध्यात्मं किमस्ति? ....

(x) किं कर्म उच्यते? ....

व्याकरणाभ्यासः

(अ) सन्धिः

स्वभावोऽध्यात्मम् - स्वभावः+अध्यात्मम् (ओभावः पररूपं च)

अध्यात्मम् - अधि+आत्मम् (यण्सन्धिः)

भूतभावोद्भव - भूतभाव+उद्भव (गुणसन्धिः)

उद्भवकरो विसर्गः- उद्भवकरः+विसर्गः (ओभावसन्धिः)

अधः प्रदत्तेषु पदेषु सन्धिः कार्यः–

(i) वस्तुभावः + अपरिहर्त्तव्यः। ....

(ii) परित्यागः + अधमस्य श्रेयसे। ....

(iii) सद्भावः + वस्तुभावः स्यात्। ....

(iv) विसर्गः + देवतायै हविषाम्। ....

(v) सर्वतः + गृह्यते ज्ञानम्। ....

(vi) फल + उद्देश्येन बीजं वपति। ....

(vii) अङ्कुर + उत्पत्तिः जायते बीजेभ्यः ....

(viii) पत्राणि + अश्नन्ति + अजाः। ....

(आ) समासः

अध्यात्मम् – आत्मनि इति (अव्ययीभावः)

स्वभावः – स्वस्य भावः (षष्ठी तत्पु.)

भूतभावोद्भवकरः – भावश्च उद्भवश्च इति भावोद्भवौ (द्वन्द्वः)

भूतानां भावोद्भवौ इति भूतभावोद्भवौ (षष्ठी तत्पु.)

भूतभावोद्भवयोः करः इति भूतभावोद्भवकरः (षष्ठी तत्पु.)

अक्षरम् – न क्षरम् इति (नञ् तत्पु.)

कर्मसंज्ञा – कर्मणः संज्ञा इति (षष्ठी तत्पु.)

अधः पदानां विग्रहः समासश्च लेखनीयः–

	पदानि		विग्रहः	समासः
(i)	उपनदि	–	....	....
(ii)	प्रतिपदम्	–	....	....
(iii)	सुखदुःखे	–	....	....
(iv)	हरिहरौ	–	....	....
(v)	द्रव्यत्यागः	–	....	....
(vi)	प्रतिवचनोपक्रमः	–	....	....

(vii) संस्कृतप्रचारप्रसारसाधनम् – ....

(viii) पुस्तकक्रयविक्रयव्यवस्था – ....

(इ) तद्धितप्रत्ययः

कर्मसंज्ञितः – कर्मसंज्ञा सञ्जाता अस्य (कर्मसंज्ञा + इतच्)

अधः वाक्यम् इतजन्तेन पूरणीयम्–

(i) ....इयं कथा। (चर्चा + इतच्)

(ii) अनेन....................किं प्रयोजनम्। (गर्व + इतच्)

(iii) क्षेत्रे बीजानि....................। (अङ्कुर + इतच्)

(iv) ....सरोवरमिदम्। (कुवलय + इतच्)

(v) विद्युदभावे....................सर्वं प्रकोष्ठम्। (अन्धकार + इतच्)

(ई) कृत्प्रत्ययः

अक्षरम् – न क्षरम् – अक्षरम् (क्षर् + अच्) कर्तरि

भावः – भवनं भावः – (भू + घञ्)

करः – करोति इति – (कृ + अच्)

विसर्गः – विविधं सृजति इति – (वि + सृज + अच्)

(उ) क्रियाकारकसम्बन्धः

उच्यते	–	कर्मणि क्रिया	स्वभावः	–	कर्म विशेषणम्
ब्रह्म	–	कर्म	अस्ति	–	आक्षेपगम्या क्रिया
अक्षरम्	–	कर्म विशेषणम्	विसर्गः	–	कर्ता
परमम्	–	अक्षरविशेषणम्	भूतभावोद्भवकरः	–	कर्तृविशेषणम्
उच्यते	–	आवृत्त्या अन्वयिनी क्रिया	कर्मसंज्ञितः	–	कर्तृविशेषणम्
अध्यात्मम्	–	कर्म			

(ऊ) पर्यायशब्दः

अक्षरम् – १. अविनाशि (नका. त्रि.),२. व्यापकम्, ३. कूटस्थम् (उका. त्रि.), ४. वर्णः

परमम् – १. उत्कृष्टम् (अका. त्रि.), २. उत्तमम् (अका. त्रि.), ३. परम् (अका. त्रि.), ४. सर्वश्रेष्ठम् (अका. त्रि.)

◆◆◆

३८. श्लोकः

अधिभूतं क्षरो भावः पुरुषश्चाधिदैवतम्।
अधियज्ञोऽहमेवात्र देहे देहभृतां वर ।। (भ. गी. ८.४)

पदच्छेदः

अधि-भूतम्, क्षरः, भावः, पुरुषः, च, अधि-दैवतम्।

अधि-यज्ञः, अहम्, एव, अत्र, देहे, देह-भृताम्, वर।।

पदच्छेदाभ्यासः

अधः प्रदत्तानि पदानि छिन्नानि करोतु–

(i) क्षरो भावः – ....

(ii) पुरुषश्च – ....

(iii) चाधिदैवतम् – ....

(iv) अधियज्ञोऽहम् – ....

(v) एवात्र – ....

(vi) देहभृताम् – ....

पदपरिचयः

पदम्	विश्लेषणम्	पदम्	विश्लेषणम्
अधिभूतम्	अका. नपुं. प्र. एक. समस्तम्, अव्ययम्, उद्देश्यम्	अहम्	अस्मद्-दका. प्र. एक. सर्व. वि.
क्षरः	अका. पुं. प्र. एक. वि.	एव	अव्ययम्
भावः	अका. पुं. प्र. एक. विधेयम्	अत्र	त्रलन्तम् अव्ययम् वि.
पुरुषः	अका. पुं. प्र. एक. विधेयम्	देहे	अका. पुं. सप्त. एक. विशे.
च	अव्ययम्		
अधिदैवतम्	अका. नपुं. प्र. एक. समस्तम्, अव्ययम्, उद्देश्यम्	देहभृताम्	देहभृत्-तका. नपुं. षष्ठी. एक. समस्तम्
अधियज्ञः	अका. पुं. प्र. एक. समस्तम्, उद्देश्यम्	वर	अका. पुं. सम्बो. प्र. एक.

वर्गीकरणाभ्यासः

अधः श्लोकपदानि निर्दिष्टवर्गे करणीयानि–

(i) प्रथमान्तम् (७) ....

(ii) षष्ठ्यन्तम् (१) ....

(iii) सप्तम्यन्तम् (१) ....

(iv) सम्बोधनान्तम् (१) ....

(v) अकारान्तम् (८) ....

(vi) तकारान्तम् (१) ....

(vii) पुंलिङ्गम् (७) ....

(viii) नपुंसकम् (२) ....

(ix) सर्वनाम (१) ....

(x) अव्ययम् (५) ....

(xi) उद्देश्यम् (३) ....

(xii) विधेयम् (३) ....

(xiii) विशेष्यम् (२) ....

(xiv) विशेषणम् (२) ....

(xv) उद्देश्यविधेयं विशेषणविशेष्यं च साकं लिखतु।

आकाङ्क्षाविस्तरः

अधिभूतम् अस्ति। (क्रियाक्षेपः)

अधिभूतं किमस्ति? .... (अका. पुं. विधेयम् विशे०)

अधिभूतं कीदृशः भावः अस्ति? .... (पुं. विशे०)

अधिदैवतम् उच्यते। (क्रियाक्षेपः)

अधिदैवतं किम् उच्यते? .... (अका. विधेयम्)

अधियज्ञः उच्यते। (क्रियाक्षेपः)

अधियज्ञः कः उच्यते? .... (सर्व विधेयम् + अव्ययम्)

अहमेव अधियज्ञः कस्मिन् अधिकरणे? .... (अका. सप्त. एक.)

अहमेव अधियज्ञः कुत्र देहे? .... (त्रलन्तम्)

अधियज्ञः अहमेव अत्र देहे अस्मि।

अर्जुनाय किं सम्बोधनम्? .... (अका. सम्बो. प्र.)

अन्वयः

क्षरः भावः अधिभूतम्, पुरुषः च अधिदैवतम्, देहभृतां वर! अत्र देहे अहम् एव अधियज्ञः।

पदार्थः

पदम्	संस्कृतम्	हिन्दी
क्षरः	उत्पादविनाशशीलः	उत्पत्ति-विनाश धर्म वाले
भावः	पदार्थः	पदार्थ
अधिभूतम्	अधिभूतम् इति (उच्यते)	अधिभूत (हैं)
पुरुषः	हिरण्मयः पुरुषः	हिरण्यमय पुरुष
च	तथा	और
अधिदैवतम्	सर्वदेवतानाम् अधिपतिः	अधिदैव (है)
देहभृताम्	शरीरधारिणाम्	देहधारियों में
वर!	श्रेष्ठ हे अर्जुन!	श्रेष्ठ हे अर्जुन!
अत्र	अस्मिन्	इस
देहे	शरीरे	देह में
अहम् एव	अहं (वासुदेवः) एव	मैं (वासुदेव) ही
अधियज्ञः	अधियज्ञ शब्दार्थः (अस्मि)	अधियज्ञ (हूँ)

भावार्थः

संस्कृतम्—अर्जुनेन पृष्टेषु प्रश्नेषु चतुर्थपञ्चमषष्ठानां प्रश्नानां समाधानं दातुम् अयं श्लोकः—

तनुभृतां = शरीरिणां मध्ये श्रेष्ठ हे अर्जुन! भूतं प्राणिमात्रम् अधिकृत्य बुद्धीन्द्रियदेहादिः विनश्वरः पदार्थसार्थः अस्ति, स सर्वोऽपि उत्पादविनाशधर्मी भावः अधिभूतम् इत्युच्यते।

पुरुषः वैराजः सूर्यमण्डलमध्यवर्ती सर्वदेवतानाम् अधिपतिः सर्वप्राणिनां वर्षाभिः अनुग्राहकः अस्ति। स एव अधिदैवतम् अधिष्ठातृदेवता उच्यते। तथा च श्रुतिः–'स वै शरीरी प्रथमः स वै पुरुष उच्यते। आदिकर्ता स भूतानां ब्रह्माग्रे समवर्तत' इति।

अस्मिन् शरीरे अन्तर्यामिरूपेण स्थितः अहं भगवान् वासुदेवः एव 'अधियज्ञः' यज्ञाधिष्ठात्री देवता अस्मि। न च कर्मणां प्रवर्तकः जीवः इति शङ्कनीयम्, तस्य जीवस्य फलदातृत्वाभावात्, अतः जीवभिन्नः असंगत्वादिगुणैः युक्तः देहान्तर्वर्त्ती अन्तर्यामी परमेश्वरः एव कर्मप्रवर्तकः तत्फलदाता च। जीवस्तु तत्फलभोक्ता प्रसिद्धः।

हिन्दी–अर्जुन के चौथे, पाँचवें और छठे प्रश्नों का क्रमिक समाधान इस श्लोक में वर्णित है–

देहधारियों में श्रेष्ठ हे अर्जुन! संसार की नाशवान् सारी वस्तुएँ अधिभूत हैं, क्योंकि वे सब भूत = प्राणिमात्र के लिए हैं। इन अधिभूत भावों का क्षरण और सर्जन निरन्तर होता रहता है।

सूर्यमण्डल के मध्य में विराजमान सभी देवताओं के अधिपति वैराज पुरुष को 'अधिदैवत' कहते हैं। उसी को हिरण्यमय, हिरण्यगर्भ और अधिष्ठात्री देवता भी कहते हैं। वह वर्षा आदि के द्वारा प्राणिमात्र का अनुग्राहक है और शास्त्रों में प्रसिद्ध है।

इस शरीर में अन्तर्यामी रूप से स्थित मैं वासुदेव ही अधियज्ञ हूँ। सम्पूर्ण यज्ञों = कर्मों के प्रवर्तक और उनका फल देने वाले भगवान् ही हैं। से सभी जीवों के शरीर में अन्तर्यामी होकर स्थित हैं। इसीलिए श्रुतियों में कहा है–जीव और ईश्वर दोनों शरीर में रहते हैं, एक फल भोगता है और दूसरा केवल प्रकाशमान है।

हे अर्जुन! तुम श्रेष्ठ शरीर धारी हो, अतः उस अन्तर्यामी को पराधीन स्व प्रवृत्ति-निवृत्ति और अन्वय-व्यतिरेक के द्वारा पहचान सकते हो।

अवबोधाभ्यासः

अधः प्रदत्तानि वाक्यानि समाधेयानि–

(i) अस्मिन् श्लोके कस्य कति प्रश्नाः समाहिताः? ....

(ii) चतुर्थं प्रश्नं तस्य उत्तरं च लिखतु? ....

(iii) अधिदैवतं किमुच्यते? ....

(iv) अधियज्ञः कोऽस्ति? ....

(v) ईश्वरः शरीरे केन रूपेण निवसति? ....

(vi) इह श्लोके कति वाक्यानि, तत्र काः क्रियाः आक्षिप्यन्ते?

....

व्याकरणाभ्यासः

(अ) सन्धिः

क्षरो भावः - क्षरः+भावः (ओभावः)

पुरुषश्च - पुरुषः+च (श्चुत्वसन्धिः)

अधियज्ञोऽहम् - अधियज्ञः+अहम् (ओभावः पूर्वरूपं च सन्धिः)

एवात्र - एव+अत्र (दीर्घसन्धिः)

चाधिदैवतम् - च + अधिदैवतम् (दीर्घसन्धिः)

अधः प्रदत्तेषु पदेषु सन्धिं करोतु–

(i) इत्युदीर्य गतः + जीवः। ....

(ii) जीवः + देहे निवसति। ....

(iii) ईश्वरः + अपि तत्रैव वसति। ....

(iv) मौनेन संयतप्राणः + अवन्दत। ....

(v) प्रीतः + विद्यामेतां पठितवान्। ....

(vi) न + अतिप्रियः कश्चित्। ....

(vii) न + अप्रियः स्वः परः + अपि वा। ....

(viii) प्रीतः + चित्रकेतुम् उवाच। ....

(ix) चाणक्यः + चन्द्रगुप्तम् अनुशास्ति। ....

(x) ततः + च + अन्तर्दधे हरिः। ....

(xi) नभः + चरः + छायायाम् उपविष्टः। ....

(आ) समासः

अधिभूतम् - भूतेभ्यः इति (विभक्त्यर्थेऽव्ययीभावः)

अधिदैवतम् - दैवतेषु अधिकृतमिति (अव्ययीभावः)

अधियज्ञः - अधिगतः यज्ञः यस्मात् सः इति (बहुव्रीहिः)।

अधः प्रदत्तेषु पदेषु विग्रहसमासौ कार्यौ–

	पदम्		विग्रहः	समासः
(i)	अधिहरि	–	....	....
(ii)	यथाविग्रहम्	–	....	....
(iii)	यथानिर्देशम्	–	....	....
(iv)	अधिदैवम्	–	....	....
(v)	अधिकारी	–	....	....
(vi)	अधिनायकः	–	....	....
(vii)	अधिपतिः	–	....	....

(इ) कृत्प्रत्ययः

भूतम् – अभूयत इति (भू + क्त)

क्षरः – क्षरति इति कर्तरि (क्षर् + अच्

पुरुषः – पुरि शेते इति, पूर्णं सर्वम् अनेन इति वा (पुर् + वेस् + क)

देहः – देग्धि इति (दिह् + अच्)

देहभृताम्– देहं बिभर्ति इति (देह् + भृ + क्विप्)

अधः पदेषु विग्रहं प्रत्ययं च दर्शयतु–

	पदानि		विग्रहः	प्रत्ययः
(i)	कर्मकृत्	–	....	....
(ii)	वाहभ्रट्	–	....	....
(iii)	पर्णध्वत्	–	....	....
(iv)	धर्मधृत्	–	....	....
(v)	मधुलिट्	–	....	....
(vi)	गोधुक्	–	....	....
(vii)	विद्विट्	–	....	....

(ई) तद्धितप्रत्ययः

दैवतम् – देव एव स्वार्थे (देव + तल्) देवता

देवता एव स्वार्थे (देवता + अण्) दैवतः

यथाविग्रहं स्वार्थिकप्रत्ययेन रूपं लिखतु–

				पदम्
(i)	बन्धुः एव	(बन्धु + अण्)	–	....
(ii)	प्रज्ञ एव	(प्रज्ञ + अण्)	–	....
(iii)	ओषधिः एव	(ओषधि + अण्)	–	....
(iv)	कर्म एव	(कर्म + अण्)	–	....
(v)	वाक् एव	(वाच् + ठक्)	–	....
(vi)	विनयः एव	(विनय + ठक्)	–	....
(vii)	उपायः एव	(उपाय + ठक्)	–	....
(viii)	चोरः एव	(चोर + अण्)	–	....
(ix)	शत्रुः एव	(शत्रु + अण्)	–	....
(x)	मनः एव	(मनस् + अण्)	–	....

(उ) क्रियाकारकसम्बन्धः

उच्यते	–	पूर्वश्लोकात् आक्षिप्ता क्रिया।	उच्यते	–	आक्षिप्ता क्रिया
अधिभूतम्	–	कर्म	अधियज्ञः	–	कर्म
भावः	–	कर्मविशेषणम्	अहम्	–	कर्मविशेषणम्
क्षरः	–	भावविशेषणम्	देहे	–	अधिकरणम्
उच्यते	–	आक्षिप्ता क्रिया	अत्र	–	अधिकरणविशेषणम्
अधिदैवतम्	–	कर्म	देहभृताम्	–	सम्बोधनसम्बन्धी
पुरुषः	–	कर्मविशेषणम्	वर	–	सम्बोधनम्

(उ) पर्यायशब्दः

दैवतम् - १. देवता, २. देवः, ३. वृन्दारकः

भावः - १. सत्ता, २. स्वभावः, ३. अभिप्रायः, ४. आत्मा (आत्मन्- नका. पुं.), ५. जन्म (जन्मन्- नका. नपुं.), ६. वस्तु (उका. नपुं.)

पुरुषः - १. वैराजः, २. हिरण्यगर्भः, ३. ब्रह्मा (ब्रह्मन्- नका. पुं.), ४. प्रजापतिः

देहः - १. कायः, २. वपुः (वपुस्- सका. नपुं.), ३. गात्रम्, ४. वर्ष्म (वर्ष्मन्- नका. नपुं.)

◆◆◆

३९. श्लोकः

अन्तकाले च मामेव स्मरन्मुक्त्वा कलेवरम्।
यः प्रयाति स मद्भावं याति नास्त्यत्र संशयः।। (भ. गी. ८.५)

पदच्छेदः

अन्त-काले, च, माम्, एव, स्मरन्, मुक्त्वा, कलेवरम्।
यः, प्रयाति, सः, मद्-भावम्, याति, न, अस्ति, अत्र, संशयः।।

पदच्छेदाभ्यासः

अधः पदानि विभजनीयानि–

(i) अन्तकाले – ....

(ii) मामेव – ....

(iii) स मद्भावम् – ....

(iv) मद्भावम् – ....

(v) नास्त्यत्र – ....

पदपरिचयः

पदम्	विश्लेषणम्	पदम्	विश्लेषणम्
अन्तकाले	अका. पुं. सप्त. एक. समस्तम्	प्रयाति	प्र+या+लट् प्रपु. एक. कर्तरि क्रिया
च	अव्ययम्	सः	तद्-दका. पुं. प्र. एक. सर्व.
माम्	अस्मद्-दका. त्रि. द्विती. एक. सर्व.	मद्भावम्	अका. पुं. द्विती. एक. समस्तम्
एव	अव्ययम्	याति	या+लट् प्रपु. एक. कर्तरि क्रिया
स्मरन्	स्मरत्-तका.पुं.प्र.एक.शत्रन्तम् वि.	न	अव्ययम्
मुक्त्वा	त्वान्तम् अव्ययम्	अस्ति	अस्+लट् प्रपु. एक. कर्तरि क्रिया
कलेवरम्	अका. नपुं. द्विती. एक.	अत्र	त्रलन्तम् अव्ययम्
यः	यद्-दका. पुं. प्र. एक. सर्व. विशे.	संशयः	अका. पुं. प्र. एक.

वर्गीकरणाभ्यासः

अधः श्लोकपदानि यथावर्गं लिखतु–

(i) द्वितीयान्तम् (३) ....

(ii) सप्तम्यन्तम् (१) ....

(iii) पुंलिङ्गम् (६) ....

(iv) नपुंसकम् (१) ....

(v) शत्रन्तम् (१) ....

(vi) क्त्वान्तम् (१) ....

(vii) समस्तम् (२) ....

(viii) क्रियापदम् (३) ....

(ix) अव्ययम् (५) ....

(x) सर्वनाम (३) ....

(xi) विशेषणेन सह विशेष्यं लिखतु। ....

आकाङ्क्षाविस्तरः

प्रयाति – (परलोकं गच्छति)।

कः प्रयाति? .... (प्र. सर्व. विशे.)

किं कृत्वा कः प्रयाति? .... (क्त्वान्तम्)

किं मुक्त्वा कः प्रयाति? .... (नपुं. द्विती.)

कलेवरं मुक्त्वा कः किं कुर्वन् प्रयाति? .... (शत्रन्तम्)

कं स्मरन् कलेवरं मुक्त्वा प्रयाति? .... (द्विती. सर्व.)

कदा माम् एव स्मरन्? .... (अका. सप्त.)

अन्तकाले माम् एव स्मरन् कलेवरं च मुक्त्वा यः प्रयाति।

सः किं भवति? .... (या+लट्)

सः कं याति? .... (अका. पुं. द्वि.)

नास्ति – (न विद्यते)।

कः नास्ति? .... (अका. पुं.प्र.)

संशयः कुत्र नास्ति? .... (त्रलन्तम्)

अन्वयः

यः अन्तकाले च माम् एव स्मरन् कलेवरं मुक्त्वा प्रयाति सः मद्भावं याति अत्र संशयः न अस्ति।

पदार्थः

पदम्	संस्कृतम्	हिन्दी
यः	यः (कश्चित् जनः)	जो (व्यक्ति)
अन्तकाले	मृत्युसमये	मरते समय
च	अपि	भी
माम्	माम् (अन्तर्यामिणं परमेश्वरम्)	मुझ परमात्मा को
एव	हि (अन्येषां व्यवच्छेद)	ही
स्मरन्	अनुचिन्तयन्	स्मरण करता हुआ
कलेवरम्	शरीरम्	शरीर को
मुक्त्वा	त्यक्त्वा	छोड़कर
प्रयाति	प्रकर्षेण याति	जाता है
सः	तादृशः जनः	वह व्यक्ति
मद्भावम्	मद्रूपताम्	मेरे रूप को
याति	प्राप्नोति	पाता है
अत्र	अस्मिन् विषये	इसमें
संशयः	सन्देहः	सन्देह
न	न	नहीं
अस्ति	वर्तते	है।

भावार्थः

संस्कृतम्–परलोकप्रयाणकाले भगवतः ज्ञानोपायं निर्दिशन् सप्तमं प्रश्नं समाधत्ते–

भक्तः पूर्वकाले तु मां भजत्येव, किन्तु मरणकाले अवश्यं ममैव स्मरणं कुर्यात्, नान्येषां गृहवित्तपुत्रादीनाम्। एवं यः मृत्युसमये माम् एव अनुध्यायन् पाञ्चभौतिकं शरीरं परित्यजति, सः प्रकर्षेण अर्चिरादिमार्गेण याति। सः च उपासकः हिरण्यगर्भलोकस्य भोगान्ते मम स्वरूपं विष्णुलोकं मोक्षं प्राप्नोति। अत्र च सन्देहः नास्ति। एवञ्च इह स्मरणं ज्ञानसाधनम्, मद्भावाप्तिः च फलमुपदिष्टम्।

हिन्दी–प्राण निकलते समय भगवान् के ज्ञान का उपाय बताते हुए अर्जुन के सातवें प्रश्न का समाधान किया गया है–

जो भक्त मरते समय घर-घरनी, धन-पुत्रादि की चिन्ता न करके केवल मेरा ही स्मरण करता है, वह पार्थिव शरीर को छोड़कर उत्कृष्ट देवयान मार्ग से जाता है। वहाँ वह स्वर्ग का भोग करके अन्त में मेरे धाम मोक्ष को प्राप्त करता है। इसमें तनिक भी सन्देह नहीं है।

यहाँ मृत्यु के समय भगवत्-स्मरण को ज्ञान का साधन बताया गया है। स्मरण पूर्व-ज्ञात वस्तु का होता है, अतः मृत्यु से पहले भगवत्-स्वरूप का ज्ञान, उनका भजन-संकीर्तन आवश्यक है, तभी मरते समय भगवान् का स्मरण होगा। स्मरण से ज्ञान और उससे मद्भाव = मोक्ष की प्राप्ति, यह क्रम है। इस प्रकार स्मरण का फल मोक्षप्राप्ति है।

अवबोधाभ्यासः

अधः वाक्यानि समादधातु–

(i) अर्जुनस्य सप्तमं प्रश्नं लिखतु। ....

(ii) प्राणवियोगे ज्ञानोपायः कः? ....

(iii) कस्य स्मरणं भवति? ....

(iv) श्लोके एवकारस्य किं प्रयोजनम्? ....

(v) स्मरणस्य फलं लिखतु। ....

(vi) फलावाप्तौ कः क्रमः निर्धारितः? ....

(vii) इह श्लोके कति वाक्यानि सन्ति? ....

व्याकरणाभ्यासः

(अ) सन्धिः

स मद्भावम् – सः + मद्भावम् (विवृतिः)

मद्भावं याति – मद्भावम् + याति – (अनुस्वारसन्धिः)

नास्ति – न + अस्ति – (दीर्घसन्धिः)

अस्त्यत्र – अस्ति + अत्र – (यणसन्धिः)

अधः प्रदत्तपदानां सन्धिः विधेयः–

(i) सः + नोऽस्तु पारः। ....

(ii) एषः + विद्यान्तं यास्यति। ....

(iii) सः + एव हि भागं दत्तवान्। ....

(iv) मा चिरम् + जहि विद्विषम्। ....

(v) विष्वग् विवर्धमानम् + तम्। ....

(vi) कृतान्तः + इव लोकानाम्। ....

(vii) सोमपीथं तु तत्तस्य शिरः + आसीत्। ....

(viii) यम् + यम् + पश्यति चक्षुषा। ....

(ix) बन्धनानि + अवाशातयत्। ....

(x) अस्थीनि + आदाय विस्मितः। ....

(xi) सर्वे ईक्षण + आह्लादविक्लवाः। ....

(xii) येन + आवृताः + इमे लोकाः। ....

(xiii) स्वैः दिव्य + अस्त्रैः सः + अग्रसत्। ....

(आ) समासः

अन्तकाले - अन्तस्य कालः इति अन्तकालः, तस्मिन् (षष्ठी तत्पु.)

मद्भावम् - मम भावः इति मद्भावः, तम् (षष्ठी तत्पु.)

अधः रेखाङ्कितानां पदानां समासविग्रहौ विधेयौ–

(i) लोकानां युगान्तसमये यथा। ....

(ii) स्वतेजसा ग्रस्तसमस्ततेजाः। ....

(iii) मध्याह्नार्कः उग्रलोचनः। ....

(iv) श्वलाङ्गूलेन तितीर्षति सिन्धुम्। ....

(v) ईशो निजमायया नः सृजति। ....

(vi) लोकैकनाथाय जगदाधाराय सर्वेश्वराय ते नमः। ....

(vii) आत्मैश्वर्यस्मृतिवपुषां जायते यस्य दर्शनात्। ....

(viii) परिश्रमोपशमनीं छायामाश्रय। ....

(इ) कृत्प्रत्ययः

स्मरन् - स्मृ + शतृ = स्मरत्, पुं. प्र. एक.

मुक्त्वा - मुच् + क्त्वा = मुक्त्वा

अधः शत्रन्तेन क्त्वान्तेन च पदेन वाक्यं पूरयतु–

(i) अहम्.............प्रियं संत्यजानि। (त्यज् + शतृ)

(ii) गीतं.............ते यान्ति। (श्रु + शतृ)

(iii) ....इव सखा अवदत्। (प्र + हस् + शतृ)

(iv) ....विश्वरूपाय गात्रम् अदात्। (याच् + शतृ)

(v) ....सर्वेषां यानम् उदपतत्। (दृश् + शतृ)

(vi) ....आभूषणानि ते ददुः। (मुच् + क्त्वा)

(vii) अधिकारिणं.............गतः। (सम् + आ + दिश् + क्त्वा)

(viii) शस्त्रम्.............सैनिकाः अटन्ति। (उद् + यम् + क्त्वा)

(ix) जनान्.............प्रवेशयन्ति। (दृश् + क्त्वा)

(ई) क्रियाकारकसम्बन्धः

प्रयाति	–	कर्तरि मुख्यक्रिया	याति	–	कर्तरि क्रिया
यः	–	कर्ता	सः	–	कर्ता
स्मरन्	–	कर्तृविशेषणम्	मद्भावम्	–	कर्म
माम्	–	स्मरणक्रियायाः कर्म	अस्ति	–	कर्तरि क्रिया
अन्तकाले	–	अधिकरणम्	न	–	क्रियाविशेषणम्
मुक्त्वा	–	पूर्वकालिकी गौणक्रिया	संशयः	–	कर्ता
कलेवरम्	–	गौणक्रियायाः कर्म	अत्र	–	वैषयिकाधिकरणम्

(उ) पर्यायशब्दाः

अन्तः – १. पञ्चता, २. दिष्टान्तः, ३. कालधर्मः, ४. नाशः, ५. मृत्युः, ६. मरणम्

◆◆◆

४०. श्लोकः

यं यं वापि स्मरन्भावं त्यजत्यन्ते कलेवरम्।
तं तमेवैति कौन्तेय सदा तद्भावभावितः।। (भ. गी. ८.६)

पदच्छेदः

यम्, यम्, वा, अपि, स्मरन्, भावम्, त्यजति, अन्ते, कलेवरम्।
तम्, तम्, एव, एति, कौन्तेय, सदा, तद्-भाव-भावितः।।

पदच्छेदाभ्यासः

अधः पदानि छिनत्तु–

(i) वापि – ....

(ii) त्यजत्यन्ते – ....

(iii) एवैति – ....

(iv) तद्भावभावितः – ....

(v) यं यम् – ....

(vi) तं तम् – ....

पदपरिचयः

पदम्	विश्लेषणम्	पदम्	विश्लेषणम्
यं यम्	यद्–दका.पुं.द्विती.एक.सर्व.वीप्सायां द्विरुक्तम्	कलेवरम्	अका. नपुं. द्विती. एक.
वा	अव्ययम्	तं तम्	तद्–दका.पुंद्विती.एक.सर्व द्विरुक्तम्
अपि	अव्ययम्	एव	अव्ययम्
स्मरन्	स्मरत्– तका. पुं. प्र. एक. शत्रन्तम्	एति	इ+लट् प्रपु. एक. कर्तरि क्रिया
भावम्	अका. पुं. द्विती. एक.	कौन्तेय	अका. पुं. सम्बो. प्र. एक.
त्यजति	त्यज्+लट् प्रपु. एक. कर्तरि क्रिया	सदा	अव्ययम्
अन्ते	अका. पुं. सप्त. एक.	तद्भावभावितः	अका. पुं. प्र. एक. समस्तं वि.

वर्गीकरणाभ्यासः

अधः पदानि यथावर्गं विभजनीयानि–

(i) प्रथमान्तम् (२) ....

(ii) द्वितीयान्तम् (४) ....

(iii) सप्तम्यन्तम् (१) ....

(iv) सम्बोधनान्तम् (१) ....

(v) शत्रन्तम् (१) ....

(vi) अकारान्तम् (५) ....

(vii) पुंलिङ्गम् (७) ....

(viii) नपुंसकलिङ्गम् (१) ....

(ix) सर्वनाम (२) ....

(x) अव्ययम् (४) ....

(xi) क्रियापदम् (२) ....

(xii) विशेषणयोः विशेष्यद्वयम् आक्षिपतु।

आकाङ्क्षाविस्तरः

त्यजति - (जहाति)।

कः त्यजति? .... 'जनः' इति आक्षेपगम्यः कर्ता।

कदा त्यजति? .... (अका. सप्त.)

अन्ते किं त्यजति? .... (नपुं. द्विती.)

अन्ते किं कुर्वन् कलेवरं त्यजति? .... (शत्रन्तम्)

अन्ते कं स्मरन् कलेवरं त्यजति? .... (अका. पुं. द्विती.)

अन्ते कं भावं स्मरन् कलेवरं त्यजति? .... (द्विती. द्विरुक्तम्)

अन्त यं यं वापि भावं स्मरन् कलेवरं त्यजति,

एति (गच्छति)

सः किं भवति? सः एति = गच्छति।

स: कम् एति? .... (सर्व. द्विती.)

स: कथं तं तमेव एति? .... (अका. प्र. समस्तम्)

स: कदा तद्भावभावित: तं तमेव एति? .... (अव्ययम् ४)

अन्वय:

कौन्तेय! (जीव:) अन्ते यं यं वाऽपि भावं स्मरन् कलेवरं त्यजति, सदा तद्भावभावित: (स:) तं तमेव एति।

पदार्थ:

पदम्	संस्कृतम्	हिन्दी
कौन्तेय!	हे कुन्तीपुत्र!	कुन्तीपुत्र हे अर्जुन!
अन्ते	मरणकाले	मरते समय
यं यम्	यादृशं यादृशम्	जिस-जिस
भावम्	पदार्थम्	भाव का
वा	अन्यत्	अथवा
अपि	अपि	किसी दूसरे का भी
स्मरन्	अनुचिन्तयन्	स्मरण करता हुआ
कलेवरम्	शरीरम्	देह को
त्यजति	मुञ्चति	छोड़ता है
सदा	सर्वदा	सदा
तद्भावभावित:	तस्य भावेन वासितचित्त:	उस भावना से भावित होने के कारण (वह)
तं-तम्	तादृशं-तादृशम्	उसी-उसी (भाव को)
एव	अवश्यम्	ही
एति	प्राप्नोति	प्राप्त होता है।

भावार्थ:

संस्कृतम्–प्राणवियोगकाले य: मनुष्य: भगवन्तं स्मरति स: भगवद्धाम गच्छतीति पूर्वश्लोके उक्तम्। इदानीं श्रीकृष्ण: अस्मिन् विषये सिद्धान्तम् उपस्थापयति–

हे कुन्तीपुत्र! मनुष्य: मृत्युसमये यं यं चेतनाचेतनं पदार्थं अन्यद् वा देवतान्तरं ध्यायन् शरीरं त्यजति, स: तं तमेव स्मृतं भावं प्राप्नोति-इति सनातन: नियम:। यतोहि स: पूर्वजीवने तेनैव भावविशेषेण सदा अभ्यासात् प्रभावित: भवति, अत एव प्राणोत्सर्गसमये तदेव अनुचिन्तितं रूपं हठात् स्मृतिपथम्

आरोहति। अत एव यावद्जीवनं शुद्धः भावः ईश्वरः सदा स्मरणीयः, येन अन्तकालेऽपि सः एव झटिति स्मृतिम् आगच्छेत्। एवञ्च लोकान्तरप्राप्तौ स्मरणमेव हेतुः।

हिन्दी–जिस प्रकार मरते समय मनुष्य भगवान् का स्मरण करने से उनके धाम को प्राप्त करता है, उसी प्रकार जिसका भी स्मरण करता है, दूसरे जन्म में उस रूप को पाता है। यहाँ श्रीकृष्ण ने तन से प्राण निकलते समय का वर्णन किया है–

मेरी बुआ कुन्ती के पुत्र हे अर्जुन! तन से प्राण निकलते समय मनुष्य जिस-जिस भाव का अथवा किसी दूसरे देवता या रूप का स्मरण करता है और उसी स्थिति में इस देह को छोड़कर जाता है, वह मनुष्य पुनर्जन्म होने पर उसी-उसी भावविशेष अथवा रूप को प्राप्त करता है, क्योंकि वह मरने से पहले जीवन में दीर्घकाल तक सदा उसी भाव या रूप का चिन्तन करते-करते उससे प्रभावित रहता है। उसकी वासना से वासित-चित्त होने के कारण ही मरते समय वही याद आता है, अतः मरने के बाद वह उसी स्वरूप को अथवा उसी योनि को प्राप्त करता है। एवञ्च मरने के बाद स्वरूप निर्धारण का हेतु अन्तिम स्मरण ही है।

अवबोधाभ्यासः

अधः लिखिताः प्रश्नाः उत्तरणीयाः–

(i) अस्य श्लोकस्य प्रसंगः लेखनीयः। ....

(ii) अस्मिन् श्लोके प्रतिपादितः नियमः वर्णनीयः। ....

(iii) अन्ते भावविशेषस्य स्मरणे किं कारणम्? ....

(iv) लोकान्तरप्राप्तौ कः हेतुः इह निरूपितः? ....

(v) अस्मिन् श्लोके कः कर्ता आक्षिप्यते? ....

(vi) आक्षिप्तकर्तुः विशेषणपदानि लेख्यानि। ....

व्याकरणाभ्यासः

(अ) सन्धिः

वापि - वा+अपि (दीर्घसन्धिः)

त्यजत्यन्ते - त्यजति+अन्ते (यणसन्धिः)

एवैति - एव+एति (वृद्धिसन्धिः)

अधः रेखाङ्कितेषु सन्धिच्छेदं करोतु–

(i) वेष्टि<u>तार्जुन</u>वस्त्रं तं दृष्टवती। ....

(ii) वातात्मजं बुद्धिमतां वरिष्ठं नमति। ....

(iii) स्वप्ने ममायं विकृतः दृष्टः। ....

(iv) स्वस्त्यस्तु रामाय सलक्ष्मणाय। ....

(v) तस्य चिह्नान्यवर्णयत्। ....

(vi) बालः विध्वभिलाषी। ....

(vii) तान्यङ्के दर्शनीयानि। ....

(viii) चित्तैकाग्रेण विषयावगतिः। ....

(ix) तत्रैव योजयेत् चित्तम्। ....

(x) उचितौपयिकेन उपचरेत्। ....

(आ) समासः

तद्भावभाषितः – तस्य भावः तद्भावः, (षष्ठी तत्पु.)

तद्भावेन भावितः – तद्भावभावितः (तृ. तत्पु.)

अथवा

तद्भावः भावितः अभ्यस्तः येन सः (बहुव्रीहिः)

प्रदत्तपदानां समासविग्रहौ प्रदर्शनीयौ–

(i) तद्ज्ञानसंयुतः – ....

(ii) पदातिबलसम्पन्नान् – ....

(iii) रणदुर्मदं – ....

(iv) युद्धनीतिविशारदेभ्यः – ....

(v) घृतपीतस्य – ....

(vi) चक्रपाणिः – ....

(इ) तद्धितप्रत्ययः

कौन्तेय – कुन्त्याः अपत्यं पुत्रान् इत्यर्थे (कुन्ती + ढक्) कौन्तेय

अधः प्रत्यययोगेन निष्पन्नं रूपं लिखतु–

(i) विनता + ढक् – ....

(ii) सुपर्णा + ढक् - ....

(iii) रुक्मिणी + ढक् - ....

(iv) जाम्ववती + ढक् - ....

(v) अञ्जनी + ढक् - ....

(vi) कद्रू + ढक् - ....

अवधेयम्

सर्वांशं व्याप्तुं या इच्छा सा वीप्सा। तां वीप्सां पौनःपुन्यं च बोधयितुं पदस्य द्विः प्रयोगः भवति। तत्र पौनःपुन्यं तिङन्तेषु अव्ययसंज्ञककृदन्तेषु च। यथा–यं यम्, तं तं भावम्। गृहे गृहे। नगरे नगरे। पचति पचति।, भुक्त्वा भुक्त्वा।

अधः वाक्येषु वीप्साम् आभीक्ष्ण्यं च निर्दिशतु–

(i) ग्रामं ग्रामम् अटति योगी। - ....

(ii) द्वारि द्वारि घण्टिकाध्वनिं करोति। - ....

(iii) मासि मासि कृतं व्रतम्। - ....

(iv) जनसमूहं भोजयितुं पचति पचति। - ....

(v) बालः भुक्त्वा भुक्त्वा खेलति। - ....

(vi) स्मारं स्मारं गुरोः गिरः। - ....

(vii) ध्यात्वा ध्यात्वा परं ब्रह्म। - ....

(उ) पर्यायशब्दः

सदा - १. सर्वदा (अव्ययम्), २. सततम् (अका. नपुं.), ३. निरन्तरम्

भावितम् - १. वासितम् (अका. त्रि.), २. आसादितम् (अका. त्रि.), ३. विन्नम् (अका. त्रि.), ४. लब्धम् (अका. त्रि.)

◆◆◆

४१. श्लोकः

तस्मात्सर्वेषु कालेषु मामनुस्मर युध्य च।
मय्यर्पितमनोबुद्धिर्मामेवैष्यस्यसंशयः।। (भ. गी. ८.७)

पदच्छेदः

तस्मात्, सर्वेषु, कालेषु, माम्, अनुस्मर, युध्य, च।
मयि, अर्पित-मनः-बुद्धिः, माम्, एव, एष्यसि, असंशयः।।

पदच्छेदाभ्यासः

अधः प्रदत्तानि पदानि छिनत्तु–

(i) तस्मात्सर्वेषु – ....

(ii) मय्यर्पित – ....

(iii) अर्पितमनोबुद्धिः – ....

(iv) मामेवैष्यसि – ....

(v) बुद्धिर्माम् – ....

(vi) एष्यस्यसंशयः – ....

पदपरिचयः

पदम्	विश्लेषणम्	पदम्	विश्लेषणम्
तस्मात्	तद्-दका. नपुं. पं. एक. सर्व.	मयि	अस्मद्-दका.त्रि.सप्त.एक.सर्व.
सर्वेषु	सर्व-अका.पुं.सप्त.बहु.सर्व.वि.	अर्पितमनोबुद्धिः	इका.पुं.प्र.एक.वि.समस्तम्
कालेषु	अका.पुं.सप्त.बहु.विशेष्यम्	माम्	अस्मद्-दका.त्रि.द्विती.एक.सर्व.
माम्	अस्मद्-दका.द्विती.एक.सर्व	एव	अव्ययम्
अनुस्मर	अनु+स्मृ+लोट् मपु.एक.कर्तरि क्रिया	एष्यसि	इ+लृट् मपु.एक.कर्तरि क्रिया
युध्य	युध्+लोट् मपु.एक.कर्तरि क्रिया	असंशयः	अका.पुं.प्र.एक.वि.समस्तम्
च	अव्ययम्		

वर्गीकरणाभ्यासः

अधः श्लोकपदानि वर्गशः लेखनीयानि–

(i) प्रथमान्तम् (२) ....

(ii) द्वितीयान्तम् (२) ....

(iii) पञ्चम्यन्तम् (१) ....

(iv) सप्तम्यन्तम् (३) ....

(v) पुंलिङ्गम् (४) ....

(vi) नपुंसकलिङ्गम् (१) ....

(vii) विशेषणानि (३) ....

(viii) विशेष्यम् (१) ....

(ix) सर्वनाम (५) ....

(x) अव्ययम् (२) ....

(xi) क्रियापदम् (३) ....

(xii) विशष्यं विशेषणं च लिखतु।

आकाङ्क्षाविस्तरः

अनुस्मर - (स्मरणं कुरु)।

कः अनुस्मरतु? त्वम् अनुस्मर। (कर्ता आक्षेपगम्यः)

त्वं कम् अनुस्मर? .... (द्विती. सर्व.)

मां कस्मात् अनुस्मर? .... (पं. सर्व.)

तस्मात् मां कदा अनुस्मर? .... (अका. स.)

तस्मात् केषु कालेषु माम् अनुस्मर? .... (स. सर्व.)

तस्मात् सर्वेषु कालेषु माम् अनुस्मर। अथ च किं कुरु युध्य च = युद्धं कुरु। 'त्वम्' इति कर्ता आक्षिप्त अनेन किं स्यात्? एष्यसि = प्राप्स्यसि। अपि क्रियायाः कर्ता 'त्वम्' इति आक्षेपगम्यः।

एष्यसि (प्राप्स्यसि)

कः एष्यति? त्वम् एष्यसि।

कीदृशः त्वम् एष्यसि? .... (इका. समस्तं वि.)

त्वं कस्मिन् अर्पितमनोबुद्धि एष्यसि? .... (स. एक. सर्व.)

मयि अर्पितमनोबुद्धिः त्वं पुनश्च कीदृशः एष्यसि? .... (अका. समस्तं वि.)

मयि अर्पितमनोबुद्धिः असंशयः त्वं कम् एष्यसि? .... (द्विती. सर्व. + अव्ययम्)

मयि अर्पितमनोबुद्धिः असंशयः माम् एव एष्यसि।

अन्वयः

तस्मात् सर्वेषु कालेषु माम् अनुस्मर युध्य च, मयि अर्पितमनोबुद्धिः असंशयः माम् एव एष्यसि।

पदार्थः

पदम्	संस्कृतम्	हिन्दी
तस्मात्	पूर्वोक्तकारणात्	इसलिए
सर्वेषु	सम्पूर्णेषु	सभी
कालेषु	समयेषु	समय
माम्	ईश्वरम्	मेरा
अनुस्मर	अनुचिन्तय	चिन्तन करो
युध्य	युध्यस्व	स्वकर्म युद्ध करो
च	तथा	और
मयि	परमात्मनि	मुझ परमात्मा में
अर्पितमनोबुद्धिः	भावितस्वान्तशेमुषीकः	मन और बुद्धि लगा देने पर
असंशयः	संदेहशून्यः सन्	संशय रहित होकर
माम्	परमात्मानम्	मुझ ईश्वर को
एव	एव	ही
एष्यसि	आगमिष्यसि	प्राप्त कर लोगे।

भावार्थः

संस्कृतम्–पूर्ववासनैव अन्तकाले भावविशेषस्मरणे हेतुः। अतः तदानीं भगवद्रूपस्य स्मरणं भवेद् इत्येतदर्थं पूर्वं निरन्तरं भगवतः अनुचिन्तनं स्वकर्तव्यपालनं चावश्यकम्।

अन्तकाले मृत्युशय्यायां परवशो जनः नवं स्मरणोद्यमं कर्तुं न समर्थः। तदानीं तु पूर्वस्मरणाभ्यासवशात् स्वतः एव कापि भावना उदेति। सा च भावना ईश्वरविषया भवेत् इत्यस्मात् कारणात् सर्वदा निरन्तरं भगवच्चिन्तनं करणीयम्, येन शुद्धान्तःकरणे भगवद्विषयिणी वासना जायेत। यदि चित्तम् अशुद्धं स्यात् तदा भगवद्ध्यानं न जायेत, अतः चित्तशुद्धये स्वकर्तव्यपालनं युद्धादिकं परमावश्यकमस्ति। एवञ्च हरिस्मरणं स्वकर्मसम्पादनं चेत्युभयमपि निरन्तरं कर्तव्यम्। यस्य जनस्य संकल्पविकल्पात्मकं मनः निश्चयात्मिका धीश्च भगवति समर्पिते स्तः, सः जनः सर्वथा सन्देहरहितः सन् भगवन्तमेव भगवल्लोकमेव यास्यति इत्यसंशयम्। इह सन्देहो नास्तीत्यर्थः।

हिन्दी—मृत्यु के समय जब आदमी विवश होता है, उस समय पूर्वकाल की वासना ही किसी भाव के स्मरण में कारण होती है। यह रागात्मिका वासना निरन्तर अभ्यास से उत्पन्न होती है। जीवन में हर क्षण ईश्वर के अनुचिन्तन और कर्तव्यपालन से ईश्वर-विषयक वासना बनती है जो अन्तकाल में भगवद्रूप का स्मरण कराती है। इसी तथ्य को भगवान् अर्जुन से कह रहे हैं—

मृत्यु के समय अन्तिम भावना ही पुनर्जन्म का कारण है, इसलिए हे अर्जुन! तुम हर क्षण मेरा स्मरण रखो और इस समय अपना कर्म युद्ध करो। अपना कर्म करने से अन्तःकरण शुद्ध होता है और चित्त शुद्ध होने पर ही भगवान् का अनुचिन्तन ध्यान सम्भव है। इसीलिए कहते हैं—हारिये न हिम्मत बिसारिये न हरि नाम। जीवन में सर्वदा भगवच्चिन्तन पूर्वक कर्म करने का अभ्यास होने से भगवद्-अनुराग रूप वासना बन जाती है, जिससे अन्तकाल में भगवान् का ही स्मरण होता है।

इस प्रकार मेरे में मन और बुद्धि समर्पित कर देने से तुम्हारा सारा सन्देह जाता रहेगा और तुम मेरे को ही प्राप्त होगे। एवञ्च अत्यन्त सहज उपाय से मनुष्य का भगवद्-धाम-प्राप्ति रूप मोक्ष हो जाता है, इसमें तनिक भी सन्देह नहीं है।

अवबोधाभ्यासः

अधः प्रदत्ताः प्रश्नाः समाधेयाः—

(i) अन्तकाले कस्य स्मृतिः जायते? ....

(ii) पूर्ववासना कुत्र कारणम्? ....

(iii) वासना कथमुत्पद्यते? ....

(iv) इह युद्धपदेन कस्य ग्रहणम्? ....

(v) कर्तव्यानुष्ठानेन किं शुद्ध्यति। ....

(vi) सन्देहराहित्यं कस्मिन् चित्ते भवति? ....

अवधेयम्

भगवच्चरणेषु मनसः बुद्धेश्च समर्पणेन सर्वदा भगवतः अनुस्मृतिः जायते। एवञ्च कर्तव्यपालनेन चित्तशुद्धिः, तया संशयनाशः, तेन मनोबुद्धिसमर्पणम्, तेन निरन्तरम् अनुस्मृतिः इति कार्यकारणभावः इह श्लोके प्रतिपादितः।

व्याकरणाभ्यासः

(अ) सन्धिः

मय्यर्पित – मयि+अर्पित (यणसन्धिः)

अर्पितमनोबुद्धिः – अर्पितमनः+बुद्धिः (ओभावः)

बुद्धिर्माम् – बुद्धिः+माम् (विसर्गरेफसन्धिः)

एवैष्यसि – एव+एष्यसि (वृद्धिसन्धिः)

एष्यस्यसंशयः – एष्यसि+असंशयः (यणसन्धिः)

प्रदत्तपदानां सन्धिं करोतु–

(i) स्वशक्त्या सृजति + अत्ति पाति च। ....

(ii) अस्य कबन्धानि + अग्रतः पतितानि। ....

(iii) एवं विधानि + अनेकानि कार्याणि सन्ति। ....

(iv) तमः + द्वारेण रोषेण अलम्। ....

(v) शिरः + भूषणम् उत्तमम्। ....

(vi) मनः + रोगेण ग्रस्तानाम्। ....

(vii) अरुभिः + हेमतालाभैः। ....

(viii) दोर्भिः + वलयवल्गुभिः। ....

(ix) भूतैः पञ्चभिः + आरब्धैः। ....

(x) वीक्ष्य + औत्तानपादिं सः। ....

(xi) आयुषोऽपचयं जन्तोस्वधा + एव उपचयम्। ....

(xii) तीव्र + ओघां भक्तिमुद्वहन्। ....

(xiii) तां दत्त्वा + एडविडः गतः। ....

(आ) समासः

अधः रेखाङ्कितेषु समासविग्रहौ करोतु–

यथा– अर्पितमनोबुद्धिः - मनश्च बुद्धिश्च इति मनोबुद्धी (द्वन्द्वः)

अर्पिते मनोबुद्धी येन सः (बहुव्रीहिः)

(i) निरस्तशोकमोहं महात्मानं मानयन्ति। ....

(ii) जितहर्षशोकः धीरः उच्यते। ....

(iii) मुक्तसुखदुःखात् शिक्षां गृहाण। ....

(iv) अर्पितमनोवचनाय सेवकाय स्पृहयति। ....

(v) प्रदत्तभोगापवर्गस्य शरणं गतोऽस्मि। ....

यथा– असंशयः - अविद्यमानः संशयः यस्मिन् सः (बहुव्रीहिः)

(vi) अविद्यः पदे-पदे विसीदति। ....

(vii) प्रपर्णे पादपे चटकाः अपि न विश्राम्यन्ति। ....

(viii) अधनस्य धनं विद्या। ....

(ix) अपायो विन्दते सुखम्। ....

(इ) तिङन्तम्

युध्य - 'युध संप्रहारे' इति नित्यम् आत्मनेपदी दिवादिगणीयः धातुः, अतः लोटि मध्यमपुरुषैकवचने 'युध्यस्व' इति पाणिनीयं रूपम्। किन्तु अस्य परस्मैपदे प्रयोगं दृष्ट्वा समाधान इमं प्रस्तुतवन्ति वैयाकरणः–

१. युध्यते इति भावे क्विपि 'युध'। युधं = प्रहरणम् इच्छति क्यचि प्रत्यये सति युध्यति।

२. 'अनुदात्तेत्त्वलक्षणमात्मनेपदमनित्यम्' इति परिभाषया अस्य आत्मनेपदम् अनित्यं बोध्यम्।

(ई) क्रियाकारकसम्बन्धः

अनुस्मर	- कर्तरि लोटि क्रिया	एष्यसि	- कर्तरि लृटि क्रिया
युध्य	- कर्तरि लोटि क्रिया	त्वम्	- कर्ता आक्षेपलभ्यः
त्वम्	- कर्ता आक्षेपगम्यः	अर्पितमनोबुद्धिः	- कर्तृवि.

माम्	-	कर्मकारकम्	असंशयः	-	कर्तृवि.
कालेषु	-	अधिकरणम्	माम्	-	कर्मकारकम्
सर्वेषु	-	अधिकरणवि.	मयि	-	अर्पणक्रियायाः अधिकरणम्
तस्मात्	-	पूर्वोक्तहेतोः परामर्शकः	एव	-	निर्धारणे

(उ) पाठान्तरम्

गीताप्रेस, गोरखपुर प्रकाशने 'असंशयम्' इति पाठः। एवं सति 'असंशयम्' इति 'एष्यसि' क्रियायाः विशेषणम्, नपुंसकं द्वितीयैकवचनान्तम्। तथा च समासः - न संशयः इति असंशयः (तत्पु.) तत्। मामेव एष्यसि, अत्र संशयः नास्तीत्यर्थः शङ्करपादैः अपि कृतः।

◆◆◆

४२. श्लोकः

ओमित्येकाक्षरं ब्रह्म व्याहरन्मामनुस्मरन्।
यः प्रयाति त्यजन्देहं स याति परमां गतिम्।। (भ. गी. ८.१३)

पदच्छेदः

ओम्, इति, एक+अक्षरम्, ब्रह्म, व्याहरन्, (वि+आ+हरम्), माम्, अनुस्मरन्।
यः, प्रयाति, त्यजन्, देहम्, सः, याति, परमाम्, गतिम्।।

पदच्छेदाभ्यासः

अधः प्रदत्तानि पदानि छिनत्तु–

(i) ओमित्येकाक्षरम् – ....

(ii) एकाक्षरम् – ....

(iii) स याति – ....

(iv) परमां गतिम् – ....

(v) व्याहरन् – ....

पदपरिचयः

पदम्	विश्लेषणम्	पदम्	विश्लेषणम्
ओम्	अव्ययम् १	प्रयाति	प्र+या+लट् प्रपु.एक.कर्तरि क्रिया
इति	अव्ययम् २	त्यजन्	त्यजत्–तका.पुं.प्र.एक.शत्रन्तम् ३ वि.
एकाक्षरम्	अका.नपुं.द्विती.एक.समस्तं वि.	देहम्	अका.पुं.द्विती.एक.
ब्रह्म	ब्रह्मन्–नका.नपुं.द्विती.एक.विशे.	सः	तद्–दका.पुं.प्र.एक.सर्व.
व्याहरन्	व्याहरत्–तका.पु.प्र.एक.शत्रन्तम् १ वि.	याति	या+लट् प्रपु.एक.कर्तरि क्रिया
माम्	अस्मद्–दका. द्विती. एक. सर्व.	परमाम्	आका.स्त्री.द्विती.एक.वि.
अनुस्मरन्	अनुस्मरत्–तका.पुंप्र.एक.शत्रन्तम् १ वि.	गतिम्	इका.स्त्री.द्विती.एक.वि.
यः	यद्–दका.पुं.प्र.एक.सर्व.विशेष्यम्		

वर्गीकरणाभ्यासः

अधः पदानि यथावर्गं विभजनीयानि–

(i) प्रथमान्तम् (५) ....

(ii) द्वितीयान्तम् (६) ....

(iii) अकारान्तम् (२) ....

(iv) आकारान्तम् (१) ....

(v) इकारान्तम् (१) ....

(vi) तकारान्तम् (३) ....

(vii) नकारान्तम् (१) ....

(viii) पुंलिङ्गम् (६) ....

(ix) स्त्रीलिङ्गम् (२) ....

(x) नपुंसकलिङ्गम्(२) ....

(xi) सर्वनाम (३) ....

(xii) अव्ययम् (२) ....

(xiii) विशेष्यम् (३) ....

(xiv) विशेषणम् (५) ....

(xv) क्रियापदम् (२) ....

(xv) विशेष्येण सह तस्य विशेषणं लिखतु।

आकाङ्क्षाविस्तरः

प्रयाति - (प्रयाणं करोति)।

कः प्रयाति? .... (यद् सर्व.)

यः किं कुर्वन् प्रयाति? .... (शत्रन्तम् १)

यः किं व्याहरन् प्रयाति? .... (नका.)

यः कीदृशं ब्रह्म व्याहरन् प्रयाति? .... (अका. द्विती.)

किं च तद् एकम् अक्षरम्? .... (अव्ययम् १ + २)

यः ओमिति एकाक्षरं ब्रह्म व्याहरन् पुनश्च

किं कुर्वन् प्रयाति? .... (शत्रन्तम् २)

कम् अनुस्मरन् प्रयाति? .... (अस्मद् द्विती.)

यः पुनश्च किं कुर्वन् प्रयाति? .... (शत्रन्तम् ३)

यः कं त्यजन् प्रयाति? .... (अका. पुं. द्विती.)

यः ओम् इति एकाक्षरं ब्रह्म व्याहरन् माम् अनुस्मरन् देहं त्यजन् प्रयाति, सः किं भवति?

सः याति – (प्राप्नोति)।

सः कां याति? .... (इका. द्विती.)

सः कां गतिं याति? .... (आका. द्विती.)

अन्वयः

यः ओम् इति एकाक्षरं ब्रह्म व्याहरन् माम् अनुस्मरन् देहं त्यजन् प्रयाति सः परमां गतिं याति।

पदार्थः

पदम्	संस्कृतम्	हिन्दी
यः	यः साधक भक्तः	जो साधक
ओम् इति	ओ३म् काररूपम्	ओ३म् कार स्वरूप
एकाक्षरम्	एकवर्णात्मकम्	एक वर्ण वाले
ब्रह्म	ईश्वरम्	परमात्मा का
व्याहरन्	(वाचा) उच्चरन्	उच्चारण करते हुए
माम्	श्रीकृष्णम् ईश्वरम्	मुझ परमात्मा का
अनुस्मरन्	चिन्तयन्	चिन्तन करता हुआ
देहम्	शरीरम्	पार्थिव शरीर को
त्यजन्	विजहत्	छोड़कर
प्रयाति	प्रयाणं करोति	(परलोक) जाता है
सः	स साधक भक्तः	वह साधक
परमाम्	श्रेष्ठां ब्रह्मसन्निकृष्टाम्	सर्वोत्तम
गतिम्	मल्लोकम्	मेरे लोक को
याति	प्राप्नोति	प्राप्त करता है।

भावार्थः

संस्कृतम्–अक्षर ब्रह्मोपासकानां योगिनाम् अन्तिमां गतिं वर्णयति। 'ॐ' इति एकः प्रणवो वर्णः ब्रह्मणः वाचकः, अतः तद् अक्षरं ब्रह्म। यथा ब्रह्मणः प्रतिमा ब्रह्मप्रतीकं वा ब्रह्मपदेन उच्यते, तथैव ब्रह्मवाचकत्वात्, 'ओम्' इति अक्षरं ब्रह्म। यः साधकः अन्तकाले वाचा तद् अक्षरम् उच्चारयति, तदक्षरस्य अर्थं मां परमात्मानं मनसा चिन्तयति च। सः साधकः अस्यां स्थितौ पार्थिवं शरीरं विहाय प्रयाणं करोति, स देवयानमार्गेण ब्रह्मलोकं गत्वा तद्भोगान्ते परमां प्रकृष्टां मद्रूपां गतिं प्राप्नोति। तदुक्तं पतञ्जलिना--'ईश्वरप्रणिधानाद् वा, तस्य वाचकः प्रणवः, तज्जपस्तदर्थभावनम्' इति त्रिभिः सूत्रैः।

हिन्दी–निर्गुण निराकार अक्षर-ब्रह्म की उपासना करने वाले योगी साधक की अन्तिम गति का वर्णन इस श्लोक में हुआ है।

'ॐ' यह एक प्रणवाक्षर ब्रह्म का वाचक होने से ब्रह्म कहलाता है। जैसे ब्रह्म की प्रतिमा अथवा ब्रह्म के किसी प्रतीक को ब्रह्म कहते हैं, वैसे ही ॐ कार ब्रह्म है। प्रणवाक्षर ॐ कार का निरन्तर जप और उसके अर्थ का अनुसन्धान करना चाहिए। वाणी से प्रणव जप और मन से उसके अर्थ का चिन्तन निरन्तर एक-साथ हो सकता है। उस प्रणवाक्षर का अर्थ है–मैं अर्थात् परमात्मा श्रीकृष्ण। एवञ्च जो साधक योगी निरन्तर ॐ कार का जप करता हुआ उसका अर्थ मुझ श्रीकृष्ण का चिन्तन करते रहता है तथा चिन्तन करते-करते उसी स्थिति में पार्थिव शरीर छोड़कर प्रयाण करता है, वह साधक देवयान मार्ग से ब्रह्मलोक का भोग करके परम गति मेरे रूप को अर्थात् मोक्ष को प्राप्त कर लेता है।

महर्षि पतञ्जलि ने इन्हीं भावों को अपने तीन सूत्रों से योगदर्शन में दर्शाया है–

१. ईश्वरप्रणिधानाद् वा।

२. तस्य वाचकः प्रणवः।

३. तज्जपस्तदर्थभावनम्।

अवबोधाभ्यासः

अधः प्रदतान् प्रश्नान् उत्तरतु–

१. अस्मिन् श्लोके किं वर्णितम्? ....

२. कः प्रणवः वर्णः? ....

३. ओमित्येकाक्षरं कथं ब्रह्म कथ्यते? ....

४. जपः तदर्थानुसन्धानं च एकदा प्रभवति न वा?

....

५. 'प्रयाति' क्रियापदे कः उपसर्गः? ....

६. 'प्रकर्षेण देवमार्गेण गमनम्' इति क्रियायाः बोधकं पदं किम्?

....

७. 'परमां गतिम्' इति पदयोः कः अभिप्रायः? ....

८. पतञ्जलेः सूत्राणि अनेन श्लोकेन तोलनीयानि। ....

व्याकरणाभ्यासः

(अ) सन्धिः

इत्येकाक्षरम् - इति + एकाक्षरम् (यण्सन्धिः)

एकाक्षरम् - एक + अक्षरम् (दीर्घसन्धिः)

व्याहरन् - वि + आहरन् (यण्सन्धिः)

स याति - सः + याति (लोपः विसर्गस्य)

१. **ससन्धीनि पदानि विसन्धीनि करोतु–**

(क) तस्याहं सुलभः पार्थ। ....

(ख) महात्मानः दुःखालयं नाप्नुवन्ति। ....

(ग) स शान्तिमधिगच्छति। ....

(घ) एष बन्ध्यासुतो याति। ....

(ङ) स महामेघसंनाद्। ....

(च) भावयत्येष सत्त्वेन लोकान्। ....

(छ) यद्येषा माया उपरता। ....

(ज) अहं चाऽध्यगमं तत्र निविष्टः। ....

(आ) समासः

एकाक्षरम् - एकं च तद् अक्षरम् - द्विगुः

समस्तेषु पदेषु विग्रहं कृत्वा समासनाम लिखतु–

(क) रामेति द्व्यक्षरं नाम। ....

(ख) पञ्चाक्षरं मन्त्रं श्रावयतु। ....

(ग) द्वादशाक्षरी विद्या शान्तिकरी। ....

(घ) सर्वं त्रिभुवनम् एतद् ग्रस्तं तस्य प्रभावतः। ....

(ङ) दशाननः कोपनिवृत्तनेत्रः। ....

(इ) कृत्प्रत्ययः

अधस्तनेभ्यः धातुभ्यः प्रत्यययोगं कृत्वा निष्पन्नं प्रातिपादिकरूपं पुं.- स्त्री.- नपुंसकलिङ्गेषु तस्य प्रथमैकवचनरूपाणि च लिखतु–

व्याहरन् - वि+आ (आङ्) हृ+अत् (शतृ)–व्याहरत्।

त्यजन् - त्यज्+अत् (शतृ)–त्यजत्।

अनुस्मरन् - अनु+स्मृ + अत् (शतृ)–अनुस्मरत्।

एवमेव अधः उदाहरणानुगुणं रिक्तस्थानानि पूरयतु -

(क) सम् + वद् + शतृ - ....

(ख) अनु + वद् + शतृ - ....

(ग) श्रु + शतृ - ....

(घ) दृश् + शतृ - ....

(ङ) प्र + पठ् + शतृ - ....

(च) वि + चारि + शतृ - ....

(छ) वि + मुच् + शतृ - ....

(ज) सिच् + शतृ - ....

अधस्तनेभ्यो धातुभ्यः प्रत्ययं संयोज्य प्रतिपादिकरूपं लिखतु–

यथा– गतिः - गम् + ति (क्तिन्) - गति

(क) कृ + ति - ....

(ख) वच् + ति - ....

(ग) स्वप् + ति - ....

(घ) यज् + ति - ....

(ङ) मन् + ति - ....

(च) धृ + ति - ....

(ई) क्रियाकारकसम्बन्धः

प्रयाति - कर्तरि क्रिया माम् - अनुस्मरणक्रियायाः कर्म

यः	-	कर्ता	त्यजन्	-	कर्तृविशेषणम्
व्याहरन्	-	कर्तृविशेषणम्	देहम्	-	त्यागक्रियायाः कर्म
ओम्	-	व्याहरणक्रियायाः कर्म	याति	-	कर्तरि क्रिया
इति	-	स्वरूपं बोधयत् कर्मत्वेन सम्बध्नाति	सः	-	कर्ता
एकाक्षरम्	-	कर्मविशेषणम्	गतिम्	-	कर्म
ब्रह्म	-	कर्मविशेषणम्	परमाम्	-	कर्मविशेषणम्
अनुस्मरन्	-	कर्तृविशेषणम्			

(उ) धात्वर्थनिर्देशः

प्रयाति - प्रयाणं करोति।

अत्र उपसर्गबलाद् 'या' धातोः विशिष्टगमनम् अर्थः।

याति - प्राप्नोति।

अत्र 'या' धातोः प्राप्तिः अर्थः।

(ऊ) पर्यायशब्दाः

ओम् - १. ओङ्कारः, २. प्रणवः, ३. ॐ, ४. ॐ कारः

अस्य शब्दस्य अपरोऽपि अर्थः। **यथा–** १. स्वीकारः, २. अनुमतिः

अक्षरम् - १. वर्णः, २. परब्रह्म, ३. मोक्षः ४. अनश्वरम्

परमा - १. उत्तमा, २. श्रेष्ठा, ३. मुक्तिः

◆◆◆

अथ नवमोऽध्यायः

४३. श्लोकः

पिताहमस्य जगतो माता धाता पितामहः।
वेद्यं पवित्रमोङ्कार ऋक्साम यजुरेव च।।(भ. गी. ९.१७)

पदच्छेदः

पिता, अहम्, अस्य, जगतः, माता, धाता, पितामहः।
वेद्यम्, पवित्रम्, ओङ्कारः, ऋक्, साम, यजुः, एव, च।।

पदच्छेदाभ्यासः

अधस्तनानि पदानि छिनत्तु–

(i) पिताहमस्य – ....

(ii) जगतो – ....

(iii) पवित्रमोङ्कारः – ....

(iv) यजुरेव – ....

पदपरिचयः

पदम्	विश्लेषणम्	पदम्	विश्लेषणम्
पिता	पितृ–ऋकां.पुं.प्र.एक.विधेयम्	ओङ्कारः	अकां.पुं.प्र.एक.विधेयम्
अहम्	अस्मद्–दकां.त्रि.प्र.एक.सर्व.उद्देश्यम्	ऋक्	ऋच्–चकां.स्त्री.प्र.एक.विधेयम्
अस्य	इदम्–मकां.नपुं.षष्ठी एक.सर्व.वि.	साम	सामन्–नकां.नपुं.प्र.एक.विधेयम्
जगतः	जगत्–तकां.नपुं.षष्ठी एक.विशे.	यजुः	यजुष्–षकां.नपुं.प्र.एक.विधेयम्
माता	मातृ–ऋ कां.स्त्री.प्र.एक.विधेयम्	एव	अव्ययम्
धाता	धातृ–ऋकां.पुं.प्र.एक.विधेयम्	च	अव्ययम्
पितामहः	अकां.पुं.प्र.एक.विधेयम्		
वेद्यम्	अकां.नपुं.प्र.एक.वि.(विधेयम्)		

वर्गीकरणाभ्यासः

निर्देशानुसारं श्लोकपदानि वर्गशः विभजतु–

(i) प्रथमान्तम् (११) ....

(ii) षष्ठ्यन्तम् (२) ....

(iii) पुंलिङ्गम् (४) ....

(iv) स्त्रीलिङ्गम् (२) ....

(v) नपुंसकम् (६) ....

(vi) सर्वनाम (२) ....

(vii) अव्ययम् (२) ....

(viii) उद्देश्यम् (१) ....

(ix) विधेयम् (१) ....

(x) विशेष्यम् (१) ....

(xi) विशेषणम् (३) ....

(xii) विशेष्यविशेषणयोः (४) .... संयोजनं करोतु।

आकाङ्क्षाविस्तरः

अहम् - इति कर्तृपदेन 'अस्मि' क्रियायाः आक्षेपः।

अहम् किम् अस्मि? .... (ऋका. पुं.)

अहम् कस्य पिता? .... (इदम् षष्ठी)

अहम् अस्य कस्य पिता? .... (तका. षष्ठी)

अहम् अस्य जगतः पिता पुनः किम् अस्मि? .... (ऋका. स्त्री.)

अहम् अस्य जगतः पिता माता पुनश्च किम्? .... (ऋका. पुं.)

अहम् अस्य जगतः पिता माता धाता पुनश्च किम्? .... (अका. पुं.)

अहम् अस्य जगतः पिता माता धाता पितामहः पुनश्च किम्? .... (अका. नपुं.)

अस्य जगतः पिता माता धाता पितामहः वेद्यम् .... (अका. नपुं.)
अहं पुनश्च किम्?

अस्य जगतः पिता माता धाता पितामहः वेद्यं .... (अका. पुं.)
पवित्रम् अहं पुनः कीदृशः?

अस्य जगतः पिता माता धाता पितामहः वेद्यं .... (चका. स्त्री.)
पवित्रम् ओङ्कारः अहं पुनः कीदृशः?

अस्य जगतः पिता माता धाता पितामहः .... (नका. नपुं.)
वेद्यं पवित्रम् ओङ्कारः ऋक् अहं पुनः कीदृशः?

अस्य जगतः पिता माता धाता पितामहः वेद्यं .... (षका. नपुं.)
पवित्रम् ओङ्कारः ऋक् साम अहम् एव पुनश्च
कीदृशः अस्मि?

अन्वयः

अस्य जगतः अहम् एव पिता माता धाता पितामहः वेद्यं पवित्रम् ओङ्कारः ऋक् साम यजुः (अस्मि)।

पदार्थः

पदम्	संस्कृतम्	हिन्दी
अस्य	दृश्यमानस्य एतस्य	इस
जगतः	संसारस्य	संसार का
अहम्	अहं (भगवान् श्रीकृष्णः)	मैं
एव	एव	ही
पिता	जनकः	पिता
माता	जननी	माता
धाता	धारक (पोषकः)	धारण करने वाला
पितामहः	पितुः पिता	पितामह
वेद्यम्	ज्ञेयम्	जानने योग्य
पवित्रम्	पावनम्	पवित्र
ओङ्कारः	प्रणवः	ओंकार

ऋक्	ऋग्वेदः	ऋग्वेद
साम	सामवेदः	सामवेद
यजुः	यजुर्वेदः	यजुर्वेद
च (अस्मि)	तथा (अस्मि)	और (हूँ)

भावार्थः

संस्कृतम्–सम्पूर्णस्य विश्वस्य उपासना भगवतः उपासनेति तथ्यं स्पष्टम् अवबोधयितुमेव श्रीकृष्णः त्रिभिः श्लोकैः जगतः आत्मस्वरूपत्वं प्रतिपादयति।

हे अर्जुन! अहमेव अस्य निखिलस्य चराचरात्मकस्य विश्वस्य जनयिता पालयिता वा पिता जनयित्री माता च अस्मि। अहमेव सर्वकर्मफलानां विधाता धाता पितुः पिता पितामहः वेदितव्यं पावनं यज्ञादि प्रायश्चित्तात्मकं साधनमपि अहमेवास्मि। किञ्च प्रणवः ओंकारः ऋग्वेदः यजुर्वेदः सामवेदः चकाराद् अथर्ववेदश्चेति यत् पवित्रं वेद्यं तदपि अहमेव अस्मि।

एवञ्च सर्वस्य जगतः सम्पूर्णवस्तुनः उत्पत्तिस्थानं भगवानेव अस्ति। स एव समग्रं ज्ञेयं ज्ञानं पवित्रं ज्ञानसाधनं चास्तीति ततो भिन्नं किमपि वस्तु नास्ति। अत एवोक्तम्–सर्वदेवनमस्कारः केशवं प्रति गच्छति–इति।

हिन्दी–समस्त विश्व की उपासना भगवान् की ही उपासना है–इस बात को स्पष्ट समझाने के लिए यहाँ तीन श्लोकों में भगवान् श्रीकृष्ण ने सभी वस्तुओं को अपना स्वरूप बतलाया है।

हे अर्जुन! इस चराचर सम्पूर्ण विश्व का मैं ही माता-पिता, अर्थात् जननी-जनक उत्पादक हूँ। सभी प्राणियों के कर्म-फल को देने वाला विधाता और कारण का भी कारण महाकारण पितामह भी मैं ही हूँ। इस विश्व में एकमात्र ज्ञेय और पवित्र वस्तु भी मैं ही हूँ। ओंकार प्रणव, ऋक्, यजुः, साम और अथर्ववेद जो कि ज्ञेय और पवित्र हैं, वह भी मैं ही हूँ।

यहाँ 'च' शब्द से अथर्ववेद का ग्रहण किया गया है और 'एव' शब्द भगवान् श्रीकृष्ण से इतर का व्यावर्तन करता है। इस प्रकार सारे संसार का उत्पादक, महाकारण तथा दुनियाँ में एकमात्र ज्ञेय, ज्ञान, एवं पावन साधन श्रीकृष्ण ही हैं। उनसे भिन्न कोई वस्तु नहीं है। सभी वस्तुओं में उन्हीं का रूप प्रतिभासित हो रहा है।

अवबोधाभ्यासः

अधस्तनाः प्रश्नाः समाधेयाः–

१. इह श्लोके कस्य अभेदः वर्णितः? ....

२. अभेदबोधनाय एका का विभक्तिः इह प्रयुक्ता?

....

३. अस्मिन् श्लोके किमुद्देश्यं किं विधेयम्? ....

४. इह 'पितामह' शब्दस्य कोऽभिप्रायः? ....

५. 'वेद्यं पवित्रम्' इति पदयोः उभयत्रान्वये अर्थभेदं दर्शयतु।

....

६. इह 'अथर्ववेदः' अर्थः कथं क्रियते? ....

७. श्लोके 'एव' शब्दस्य कुत्रान्वयः? ....

व्याकरणाभ्यासः

(अ) सन्धिः

१. पिताहम् - पिता + अहम् - (दीर्घसन्धिः)

२. जगतो माता - जगतः + माता - (ओभावः)

३. ओङ्कार ऋक् - ओङ्कारः + ऋक् - (विवृतिः लोप)

४. यजुरेव - यजुः + एव - (रेफः)

अधस्तनेषु रेखाङ्कितेषु पदेषु सन्धिच्छेदं सन्धिं वा करोतु–

(i) ज्ञाताज्ञातरूपेण। ....

(ii) तस्यानुरक्तस्य मुनेर्मुकुन्दः। ....

(iii) यत्र नारायणो देवो नरश्च। ....

(iv) मित्रासुतः मुनिः। ....

(v) कर्माणि करोति लोकः न तैः सुखम्। ....

(vi) अरविन्दाक्ष आत्मनः। ....

(vii) आत्मन ऋजुतामपास्य। ....

(viii) बालः ऋषिर्लोकसुखं जिहासुः। ....

(ix) वेदाहमन्तर्मनसीप्सितं ते। ....

(x) यदाह योगेश्वर ईश्वरस्ते। ....

(xi) यद्गुणैर्नार्दितः प्रभुः। ....

(xii) प्राञ्जलिरुवाच। ....

(आ) कृत्प्रत्ययः

पिता - पाति जातमिति पा + तृच् (तृ) - पितृ

माता - माति गर्भमिति मा + तृच् - मातृ

धाता - दधाति कर्मफलमिति धा + तृच् - धातृ

वेद्यम् - वेदितुं योग्यम् विद् + यत् (य) - वेद्य

पवित्रम् - पुनाति अनेन पु + इत्र (त्र) = पवित्र

ओङ्कारः - ओं वर्णः इति ओम् + कार - ओङ्कार

अधस्तनेभ्यः धातुप्रत्ययेभ्यः निष्पन्नं प्रातिपदिकं प्रथमान्तं रूपं च लिखतु–

(i) कृ + तृच् - ....

(ii) त्रै + तृच् - ....

(iii) गम् + तृच् - ....

(iv) या + तृच् - ....

(v) धृ + तृच् - ....

(vi) जि + यत् - ....

(vii) चि + यत् - ....

(viii) नम् + यत् - ....

(ix) हू + यत् - ....

(x) लु + ष्ट्रन् - ....

(xi) धु + ष्ट्रन् - ....

(xii) ऋ + ष्ट्रन् - ....

(xiii) क + कार - ....

(xiv) च + कार - ....

(xv) ट + कार - ....

(इ) तद्धितप्रत्ययः

कौन्तेय - कुन्त्याः अपत्यं पुत्रान् इत्यर्थे (कुन्ती + ढक्) - कौन्तेय

प्रत्यययोगेन निष्पन्नं रूपं अधः लिखतु–

(i) पितामही – ....

(ii) मातामहः – ....

(iii) मातामही – ....

(iv) प्रपितामहः – ....

(v) प्रमातामहः – ....

(vi) वृद्धप्रमातामहः – ....

(vii) प्रपितामही – ....

(ई) क्रियाकारकसम्बन्धः

अहम्	–	कर्ता	पितामहः	–	कर्तृविशेषणम्
अस्मि	–	आक्षिप्तक्रिया	वेद्यम्	–	कर्तृविशेषणम्
एव	–	कर्तरि व्यवच्छेदसम्बन्धः	पवित्रम्	–	कर्तृविशेषणम्
जगतः	–	सम्बन्धी	ओङ्कारः	–	कर्तृविशेषणम्
अस्य	–	सम्बन्धिविशेषणम्	ऋक्	–	कर्तृविशेषणम्
पिता	–	कर्तृविशेषणम्	साम	–	कर्तृविशेषणम्
माता	–	कर्तृविशेषणम्	यजुः	–	कर्तृविशेषणम्
धाता	–	कर्तृविशेषणम्	च	–	समुच्चयार्थकः

(उ) उद्देश्यविधेययोः विशेष्यविशेषणयोश्च समानविभक्तिकत्वम् उभयोः भेदेऽपि अभेदं तादात्म्यं बोधयति।

(ऊ) पर्यायशब्दः

पिता – १. तातः, २. जनकः

माता – १. जननी, २. जनयित्री, ३. प्रसूः

पितामहः – १. पितृपिता, २. ब्रह्मा

पवित्रम् – १. पावनम्, २. शुद्धम् (अका. त्रिलि), ३. पूतम् (अका. त्रिलि.)

ओङ्कारः – १. ॐ कारः, २. प्रणवः, ३. ॐ (अव्ययम्), ४. ओम् (अव्ययम्)

◆◆◆

४४. श्लोकः

गतिर्भर्ता प्रभुः साक्षी निवासः शरणं सुहृत्।
प्रभवः प्रलयः स्थानं निधानं बीजमव्ययम्।। (भ. गी. ९.१८)

पदच्छेदः

गतिः, भर्ता, प्रभुः, साक्षी, निवासः, शरणम्, सुहृत्।

प्रभवः, प्रलयः, स्थानम्, निधानम्, बीजम्, अव्ययम्।।

पदच्छेदाभ्यासः

अधस्तनानि पदानि छिनत्तु–

(i) गतिर्भर्ता – ....

(ii) स्थानं निधानं – ....

(iii) बीजमव्ययम् – ....

(iv) शरणं सुहृत् – ....

पदपरिचयः

पदम्	विश्लेषणम्	पदम्	विश्लेषणम्
गतिः	गति इका. स्त्री. प्र. एक.	प्रभवः	अका. पुं. प्र. एक.
भर्ता	भर्तृ-ऋका. पुं. प्र. एक	प्रलयः	अका. पुं. प्र. एक.
प्रभुः	प्रभु-उका. पुं. प्र. एक.	स्थानम्	अका. नपुं. प्र. एक.
साक्षी	साक्षिन्-नका. पुं. प्र. एक.	निधानम्	अका. नपुं. प्र. एक.
निवासः	निवास अका. पुं. प्र. एक.	बीजम्	अका. नपुं. प्र. एक.
शरणम्	अका. नपुं. प्र. एक.	अव्ययम्	अव्यय-अका. नपुं. प्र. एक.
सुहृत्	सुहृत्-तका. पुं. प्र. एक.		

वर्गीकरणाभ्यासः

यथानिर्देशं श्लोकपदानि अधः लिखन्तु–

(i) प्रथमान्तम् (१३) ....

(ii) अकारान्तम् (८) ....

(iii) इकारान्तम् (१) ....

(iv) उकारान्तम् (१) ....

(v) ऋकारान्तम् (१) ....

(vi) तकारान्तम् (१) ....

(vii) नकारान्तम् (१) ....

(viii) पुंलिङ्गम् (७) ....

(ix) स्त्रीलिङ्गम् (१) ....

(x) नपुंसकम् (५) ....

(xi) विधेयम् (१३) ....

(xii) एतेषां विधेयानां किम् उद्देश्यम्।

आकाङ्क्षाविस्तरः

अहम् - उद्देश्यम्

अस्मि - आक्षिप्तक्रिया

अहं कीदृशः अस्मि? .... (इका. स्त्री.)

अहं गतिः पुनश्च किम्? .... (ऋका. प्र.)

अहं गतिः भर्ता पुनः किम्? .... (उका. प्र.)

गतिः भर्ता प्रभुः अहं पुनः किम्? .... (नका. प्र.)

गतिः भर्ता प्रभुः साक्षी अहं पुनः किम्? .... (अका. पुं.)

गतिः भर्ता प्रभुः साक्षी निवासः अहं पुनः कीदृशः? .... (अका. नपुं.)

गतिः भर्ता प्रभुः साक्षी निवासः शरणम् अहं पुनः कीदृशः? .... (तका. पुं.)

गतिः भर्ता प्रभुः साक्षी निवासः शरणं सुहृत् अहं पुनः कीदृशः? .... (अका. पुं.)

गतिः भर्ता प्रभुः साक्षी निवासः शरणं सुहृत् प्रभवः अहं पुनः कीदृशः? .... (अका. पुं.)

गतिः भर्ता प्रभुः साक्षी निवासः शरणं सुहृत् प्रभवः .... (अका. नपुं.)
प्रलयः अहं पुनः कीदृशः?

गतिः भर्ता प्रभुः साक्षी निवासः शरणं सुहृत् प्रभवः .... (अका. नपुं.)
स्थानम् अहं पुनः कीदृशः?

गतिः भर्ता प्रभुः साक्षी निवासः शरणं सुहृत् प्रभवः .... (अका. नपुं.)

प्रलयः स्थानं निधानम् अहं पुनः किम्?

गतिः भर्ता प्रभुः साक्षी निवासः शरणं सुहृत् प्रभवः .... (अका. नपुं.)
प्रलयः स्थानं निधानं बीजम् अहं पुनः किम्?

अन्वयः

गतिः भर्ता प्रभुः साक्षी निवासः शरणं सुहृत् प्रभवः प्रलयः स्थानं निधानं बीजम् अव्ययम् (अहमस्मि।)

पदार्थः

पदम्	संस्कृतम्	हिन्दी
गतिः	कर्मफलम्	परम गति
भर्ता	पोषणकर्ता	भरण-पोषण करने वाला
प्रभुः	स्वामी	मालिक
साक्षी	शुभाशुभद्रष्टा	शुभ-अशुभ को देखने वाला
निवासः	भोगस्थानम्	आवास
शरणम्	रक्षकः	रक्षक
सुहृत्	हितकर्ता	हितकारी
प्रभवः	स्रष्टा	सृष्टि करने वाला
प्रलयः	संहर्ता	संहारक
स्थानम्	आधारः	आश्रय
निधानम्	लयस्थानम्	भण्डार
बीजम्	कारणम्	कारण
अव्ययम्	अविनश्वरम्	अविनाशी
(अहमस्मि)	(अहं श्रीकृष्णः अस्मि)	(मैं हूँ)

भावार्थः

संस्कृतम्–अनेन श्लोकेन भगवतः तटस्थलक्षणं वर्णितम्।

भगवान् श्रीकृष्ण एव कर्मणां स्वर्गादिफलं मोक्षाख्यं परमं धाम वास्ति। स एव जगतः पालयिता नियन्ता च। भगवानेव समेषां प्राणिनां शुभाशुभं कर्म पश्यति, भगवदाश्रये एव प्राणिनः सुखादिभोगाय निवसन्ति, श्रीकृष्ण एव दुःखानि शृणोति, स एव प्रत्युपकारानपेक्षः सन् उपकारी, अतः सः साक्षी, निवासः शरणं, सुहृच्चास्ति। भगवानेव सर्वजीवानाम् उत्पादकः संहारकः पालकश्चास्ति। विश्वब्रह्माण्डस्य स एव कारणम्, बीजभाण्डागारः, तच्च बीजनिधानम् अविनश्वरम् अस्ति, न तु व्रीह्यादिबीजवन्नश्वर-मित्यर्थः।

धान्यादिबीजं तु अङ्कुरिते धान्ये नश्यति, परं श्रीकृष्णबीजं समुत्पन्नेऽपि ब्रह्माण्डे पूर्ववत् शक्तिमत् सन्तिष्ठते, अतः एवोक्तम्–'पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते' इति।

हिन्दी–इस श्लोक में भगवान् के तटस्थलक्षण का, उनके सामर्थ्य का वर्णन हुआ है–

सभी प्राणियों की परम गति, उनके कर्मों का स्वर्गादिफल किं वा मोक्ष धाम, उनका भरण-पोषण करने वाला तथा उनका नियन्ता भगवान् ही है। वह सबके शुभाशुभ कर्म को देखता है, अतः साक्षी है, उसमें सभी जीव सुखादि भोग हेतु रहते हैं, अतः वह सबका निवास, रक्षक एवं निरपेक्ष हितैषी है। वही सबको उत्पन्न करता है, संहार करता है और सहारा देता है। भगवान् में ही सभी तत्त्वों का लय होता है, अतः वह निधान है। उसी में पुनः संसार का प्ररोहण होता है, अतः वह बीज है और अविनाशी बीज है।

धान आदि का बीज अङ्कुरित होने पर नष्ट हो जाता है, किन्तु संसार के प्ररोहण के बाद भी श्रीकृष्ण-बीज तनिक भी नष्ट नहीं होता। अत एव उपनिषदों में कहा है–

'पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते' (पूर्ण का सम्पूर्ण ले लेने के बाद भी वह पूर्ण ही रहता है)।

अवबोधाभ्यासः

अधस्तनान् प्रश्नान् उत्तरयतु–

(i) अस्मिन् श्लोके भगवतः कीदृशं स्वरूपं वर्णितम्? ....

(ii) कथं भगवान् गतिरुच्यते? ....

(iii) कः साक्षी भवति? ....

(iv) सुहृत्पदस्य कोऽर्थः? ....

(v) कथं श्रीकृष्णः अव्ययं बीजम्? ....

(vi) निवासशरणयोः को भेदः? ....

(vii) स्थाननिधानयोः किमन्तरम्? ....

व्याकरणाभ्यासः

(अ) सन्धिः

१. गतिर्भर्ता - गतिः+भर्ता (रेफः)

२. शरणं सुहृत् - शरणम्+सुहृत् (अनुस्वारः)

३. स्थानं निधानम् - स्थानम्+निधानम् (अनुस्वारः)

४. निधानं बीजम् - निधानम्+बीजम् (अनुस्वारः)

अधस्तनेषु पदेषु सन्धिं सन्धिच्छेदं वा करोतु–

(i) सूरिर्भिर्देवसंसदि। ....

(ii) मुक्तिरेव बुधैः स्मृता। ....

(iii) कर्मभिः + न स लिप्यते। ....

(iv) ग्रामवासिभिः + युक्तो ययौ। ....

(v) स्थिरचित्ते कृतं भृशम्। ....

(vi) अदृढम् + च हतम् + ज्ञानम्। ....

(vii) श्रवणम् + तु कृतम् +सर्वैः। ....

(viii) यत्प्रातः संस्कृतं चान्नम्। ....

(ix) सायम् + तच्च विनश्यति। ....

(x) सशब्दं पश्यतां सताम्। ....

(आ) समासः

अधस्तनेषु रेखाङ्कितेषु विग्रहं समासं च निर्दिशतु–

यथा– अव्ययम् - न व्ययम् इति - अव्ययम् (नञ् तत्पु.)

(i) अशक्तो वंशमाविशत्। ....

(ii) अध्रुवेण शरीरेण रक्षितेन किम्? ....

(iii) अस्थिरेण स्थिरं कर्म कुतो न? ....

(iv) अभयं लोकं कर्तुं युध्यति। ....

(v) अनाचारः कुबुद्धिजः। ....

(vi) अनादिः व्यवहारोऽयम्। ....

(vii) अनापदि गृहं त्यजेत्। ....

(viii) अनन्यभावेन हरिं भजेत्। ....

(इ) कृत्प्रत्ययाः

१.	गतिः –	गम् + क्तिन्	(ति) –	गति
२.	भर्ता –	भृ + तृच्	(तृ) –	भर्तृ
३.	निवासः –	नि + वस्+घञ्	(अ) –	निवास
४.	शरणम् –	शॄ + ल्युट्	(अन) –	शरण
५.	सुहृत् –	सु + हृ + क्विप्(.)	–	सुहृत्
६.	प्रभवः –	प्र + भू + अच्	(अ) –	प्रभव
७.	प्रलयः –	प्र + ली + अच्	(अ) –	प्रलय
८.	स्थानम् –	स्था + ल्युट्	(अन) –	स्थान
९.	निधानम् –	नि + धा + ल्युट्	(अन) –	निधान

(ई) क्रियाकारकसम्बन्धः

अहम्	–	पूर्वश्लोकाद् आवृत्तः कर्ता	सुहृत्	–	कर्तृविशेषणम्
अस्मि	–	आक्षिप्तक्रिया	प्रभवः	–	कर्तृविशेषणम्
गतिः	–	कर्तृविशेषणम्	प्रलयः	–	कर्तृविशेषणम्
भर्ता	–	कर्तृविशेषणम्	स्थानम्	–	कर्तृविशेषणम्
साक्षी	–	कर्तृविशेषणम्	निधानम्	–	कर्तृविशेषणम्
निवासः	–	कर्तृविशेषणम्	बीजम्	–	कर्तृविशेषणम्
शरणम्	–	कर्तृविशेषणम्	अव्ययम्	–	कर्तृविशेषणम्

(उ) पर्यायशब्दः

गतिः – १. गमनम्, २. परमगतिः, ३. परमधाम (नका. नपुं.), ४. परिणतिः

साक्षी – १. तटस्थद्रष्टा (ऋका. त्रि.)

◆◆◆

४५. श्लोकः

तपाम्यहमहं वर्षं निगृह्णाम्युत्सृजामि च।
अमृतं चैव मृत्युश्च सदसच्चाहमर्जुन।। (भ. गी. ९.१९)

पदच्छेदः

तपामि, अहम्, अहम्, वर्षम्, निगृह्णामि, उत्सृजामि, च।

अमृतम्, च, एव, मृत्युः, च, सत्, असत्, च, अहम्, अर्जुन।।

पदच्छेदाभ्यासः

अधस्तनेषु पदेषु सन्धिच्छेदं करोतु–

(i) तपाम्यहम् – ....

(ii) निगृह्णाम्युत्सृजामि – ....

(iii) चैव – ....

(iv) मृत्युश्च – ....

(v) सदसच्चाहम् – ....

पदपरिचयः

पदम्	विश्लेषणम्	पदम्	विश्लेषणम्
तपामि	तप्+लट् उपु. एक. कर्तरि क्रिया	च	अव्ययम् २
अहम्	अस्मद्–दका. प्र. एक. सर्व. १	एव	अव्ययम् ३
अहम्	अस्मद्–दका. प्र. एक. सर्व. २	सत्	सत्–तका. नपुं. प्र. एक. विधेयम्
वर्षम्	अका. नपुं. द्विती. एक.	असत्	असत्–तका. नपुं. प्र. एक. विधेयम्
निगृह्णामि	नि+ग्रह्+लट् उपु. एक. कर्तरि क्रिया	च	अव्ययम् ५
उत्सृजामि	उत्+सृज्+लट् उपु. एक. कर्तरि क्रिया	अहम्	अस्मद्–दका. प्र. एक. सर्व. ३
च	अव्ययम् १	अर्जुन	प्र. अका. पुं. सम्बो. एक.
अमृतम्	अका. नपुं. प्र. एक. विधेयम्		

वर्गीकरणाभ्यासः

यथानिर्देशं श्लोकपदानि अधः स्वस्ववर्गे लिखन्तु–

(i) प्रथमान्तम् (७) ....

(ii) द्वितीयान्तम् (१) ....

(iii) सम्बोधनान्तम् (१) ....

(iv) अव्ययम् (५) ....

(v) सर्वनाम (३) ....

(vi) अकारान्तम् (३) ....

(vii) उकारान्तम् (१) ....

(viii) तकारान्तम् (२) ....

(ix) दकारान्तम् (१) ....

(x) पुंलिङ्गम् (२) ....

(xi) नपुंसकलिङ्गम् (४) ....

(xi) क्रियापदम् (३) ....

(xii) विधेयम् (४) ....

(xiii) विधेयानामुद्देश्यं तदाक्षिप्तक्रियां च लिखतु।

आकाङ्क्षाविस्तरः

तपामि – (तापं करोमि)।

कः तपति? अहं तपामि।

निगृह्णामि = आकर्षामि।

कः निगृह्णाति? अहं निगृह्णामि।

अहं किं निगृह्णामि? .... (अका. द्विती.)

उत्सृजामि – (विमुञ्चामि)।

कः उत्सृजति? अहम् उत्सृजामि।

अहं किम् उत्सृजामि? .... (अका. द्विती.)

किं सम्बोधनम्? .... (अका. सम्बो. प्र.)

अर्जुन! अहम्।

अहं किम् अस्मि? .... (अका. प्र.)

पुनश्च अहं किम्? .... (उका. प्र.)

पुनश्चाहं किम्? .... (तका. प्र. १)

पुनरहं किम्? .... (तका. प्र. २)

अन्वयः

अर्जुन! अहं तपामि, अहं वर्षं निगृह्णामि उत्सृजामि च। अहम् एव अमृतं मृत्युः च, सद् असद् च (अस्मि)।

पदार्थः

पदम्	संस्कृतम्	हिन्दी
अहम्	अहं श्रीकृष्णः	मैं
तपामि	तापयामि	ताप करता हूँ
वर्षम्	रसं वृष्टिं च	रस का
निगृह्णामि	शोषयामि	शोषण करता हूँ
उत्सृजामि	प्रक्षिपामि	उत्सर्जन करता हूँ
च	तथा	और
अर्जुन!	हे अर्जुन!	हे अर्जुन!
अहम्	अहं भगवान् कृष्णः	मैं
एव	अन्यव्यावर्तनम्	ही
अमृतम्	जीवनम्	अमृत
च	च	और
मृत्युः	नाशः	काल
च	च	और
सत्	स्थूलं दृश्यम्	स्थूल रूप
असत्	सूक्ष्मम्	सूक्ष्म
च (अस्मि)	तथा (अस्मि)	और (हूँ)

भावार्थः

संस्कृतम्–अस्मिन् श्लोके भगवतः श्रीकृष्णस्य लोकोपकारिस्वरूपम् असाधारणम् उपवर्णितम्।

अहं श्रीकृष्ण एव निदाघकाले सूर्यरूपेण लोकस्य तापं करोमि। तस्मिन्नेव ग्रीष्मर्तौ कैश्चित् किरणैरहं वर्षं रसं धारयामि, ततः वर्षर्तौ वर्षमुत्सृजामि च। हे अर्जुन अहमेव लोकस्य जीवनं च विनाशश्चास्मि। किञ्च अहमेव जगतः स्थूलरूपं सूक्ष्मतत्त्वं चास्मि।

हिन्दी–इस श्लोक में भगवान् श्रीकृष्ण के असाधारण लोकोपकारी स्वरूप का वर्णन हुआ है।

मैं ही ग्रीष्म ऋतु में सूर्यरूप में लोक को तपाता हूँ, रस का आकर्षण करके उसे धारण रखता हूँ और उसे समय पर वर्षा ऋतु में बरसाता हूँ। हे अर्जुन! मैं ही लोक का जीवन हूँ और मैं ही उसका विनाश भी हूँ। संसार के स्थूल और सूक्ष्म तत्त्व भी मैं हूँ। इस प्रकार विभिन्न रूपों में लोग मेरी ही उपासना करते हैं।

अवबोधाभ्यासः

अधस्तनान् प्रश्नान् उत्तरयतु–

१. अस्मिन् श्लोके किं वर्णितम्? ....

२. अहं कदा तपामि? ....

३. रसनिग्रहणस्य किं प्रयोजनम्? ....

४. अमृतमृत्युशब्दौ किं तात्पर्यम् अभिधत्तः? ....

५. सूक्ष्मं तत्त्वम् असत् कथमुक्तम्? ....

६. अनेन भगवतः कानि रूपाणि मुख्यतः प्रकटी भवन्ति?

....

व्याकरणाभ्यासः

(अ) सन्धिः

तपाम्यहम् – तपामि+अहम् (यणसन्धिः)

निगृह्णाम्युत्सृजामि – निगृह्णामि+उत्सृजामि (यणसन्धिः)

चैव – च+एव (वृद्धिसन्धिः)

मृत्युश्च – मृत्युः+च (शभावः)

सदसच्चाहम् - सदसच्च+अहम् (दीर्घसन्धिः)

सदसच्च - सदसत्+च (श्चुत्वसन्धिः)

सदसत् - सत्+असत् (जश्त्वसन्धिः)

अहं वर्षम् - अहम्+वर्षम् (अनुस्वारसन्धिः)

वर्षं निगृह्णामि - वर्षम्+निगृह्णामि (अनुस्वारसन्धिः)

अमृतं च - अमृतम्+च (अनुस्वारसन्धिः)

अधस्तनेषु रेखाङ्कितपदेषु सन्धिच्छेदं करोतु–

(i) हव्यकव्यामृतान्नानां सप्त धातवः। ....

(ii) यदङ्घ्र्यनुध्यानेन धौतं मलम्। ....

(iii) यत्परं यच्च तत्तत्त्वं वद। ....

(iv) अहं भवान् भवश्चैव। ....

(v) तपत्यन्तर्बहिः पुमान्। ....

(vi) गुरुर्यजूंष्यपाठयत्। ....

(vii) सदसदात्मकं नान्यत् किञ्चिद्द्राव्यम्। ....

(आ) समासः

यथा– अमृतम् - न मृतम् इति अमृतम् (नञ्तत्पु.)

अधस्तनेषु रेखाङ्कितपदेषु समासविग्रहं करोतु–

(i) अव्यक्तरससिन्धूनाम्। ....

(ii) अप्रमत्तः प्रमत्तेषु यः। ....

(iii) छात्रधर्मः चतुर्विधः। ....

(iv) अभवाय भजेद् भवम्। ....

(v) कामानमोघान् लभस्व। ....

(इ) क्रियाकारकसम्बन्धः

तपामि	-	कर्तरि क्रिया	अस्मि	-	आक्षिप्त क्रिया
अहम्	-	कर्ता	अमृतम्	-	कर्तृविशेषणम्
निगृह्णामि	-	कर्तरि क्रिया	मृत्युः	-	कर्तृविशेषणम्
अहम्	-	कर्ता	सत्	-	कर्तृविशेषणम्
वर्षम्	-	कर्म	असत्	-	कर्तृविशेषणम्
उत्सृजामि	-	कर्तरि क्रिया	अर्जुन	-	सम्बोधनम्
अहम्	-	कर्ता			

(ई) पर्यायशब्दः

वर्षम् - १. वृष्टिः, २. वर्षणम्, ३. वर्षाः (आका. स्त्री. नित्यबहु.)

अमृतम् - १. पीयूषम्, २. सुधा, ३. जीवनम् ४. मोक्षः

मृत्युः - १. मरणम् २. निधनम् ३. अन्तः

◆◆◆

४६. श्लोकः

अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते।
तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम्।। (भ. गी. ९.२२)

पदच्छेदः

अनन्याः, चिन्तयन्तः, माम्, ये, जनाः, पर्युपासते।
तेषाम्, नित्य-अभियुक्तानाम्, योग-क्षेमम्, वहामि, अहम्।।

पदच्छेदाभ्यासः

अधस्तनानि पदानि विच्छिनत्तु–

(i) अनन्याश्चिन्तयन्तो - ....

(ii) नित्याभियुक्तानाम् - ....

(iii) वहाम्यहम् - ....

(iv) मां ये - ....

पदपरिचयः

पदम्	विश्लेषणम्	पदम्	विश्लेषणम्
अनन्याः	अका. पुं. प्र. बहु. वि.	तेषाम्	तद्-दका. पुं.षष्ठी बहु.सर्व. विशे.
चिन्तयन्तः	चिन्तयत्-तका. पुं. प्र. बहु. शत्रन्तं वि.	नित्याभि-युक्तानाम्	अका. पुं.षष्ठी बहु.समस्तं विशे.
माम्	अस्मद्-दका. द्विती. एक. सर्व.	योगक्षेमम्	योगक्षेम-अका.नपुं.एक.समस्तम्
ये	यद्-दका. पुं. प्र. बहु. सर्व. वि.	वहामि	वह्+लट् उपु.एक.कर्तरि क्रिया
जनाः	अका. पुं. प्र. बहु. वि.	अहम्	अस्मद्-दका.प्र.एक.सर्व.
पर्युपासते	परि+उप+आस्+लट् प्रपु.बहु.आत्मनेपद.		

वर्गीकरणाभ्यासः

यथानिर्देशं श्लोकपदानि अधः निर्दिष्टवर्गे लिखतु–

(i) प्रथमान्तम् (५) ....

(ii) द्वितीयान्तम् (२) ....

(iii) षष्ठ्यन्तम् (२) ....

(iv) अकारान्तम् (४) ....

(v) तकारान्तम् (१) ....

(vi) दकारान्तं सर्वनाम (४) ....

(vii) पुंलिङ्गम् (६) ....

(viii) नपुंसकलिङ्गम् (१) ....

(ix) समस्तम् (३) ....

(x) विशेष्यम् (२) ....

(xi) विशेषणम् (४) ....

(xii) क्रियापदम् (२) ....

(xiii) विशेष्येण सह तद्विशेषणं लेखनीयम्।

आकाङ्क्षाविस्तरः

पर्युपासते - (परितः उपासनां कुर्वन्ति)।

के पर्युपासते? .... (दका. प्र. बहु.)

ये के पर्युपासते? .... (अका. प्र. बहु. विशेष्यम्)

कथम्भूताः ये जनाः पर्युपासते? .... (अका. प्र. बहु. विशेषणम्)

अनन्याः ये जनाः किं कुर्वन्तः पर्युपासते? .... (शत्रन्तम्)

अनन्याः ये जनाः कं चिन्तयन्तः पर्युपासते? .... (द्वि. एक. सर्व.)

अनन्याः ये जनाः मां चिन्तयन्तः कं पर्युपासते? .... (द्वि. एक. सर्व.)

अनन्याः चिन्तयन्तः ये जनाः मां पर्युपासते, तेषां किं भवति?

तेषां वहामि।

कथभूतानां तेषां वहामि .... (अका. ष. बहु.)

नित्याभियुक्तानां तेषां किं वहामि? .... (अका. द्वि. एक.)

नित्याभियुक्तानां तेषां योगक्षेमं कः वहति? .... (प्र. एक. सर्व.)

पदार्थः

पदम्	संस्कृतम्	हिन्दी
अनन्याः	अपृथग्भूताः	अनन्य भाव से
ये	ये केऽपि	जो
जनाः	भक्ताः	भक्त
माम्	भगवन्तं श्रीकृष्णम्	मेरा
चिन्तयन्तः	ध्यायन्तः	चिन्तन करते हुए
पर्युपासते	सेवन्ते	उपासना करते हैं
अहम्	अहं (भगवान् वासुदेवः)	मैं
नित्याभियुक्तानाम्	सतताभियोगिनाम्	सदा ध्यानमग्न
तेषाम्	तेषाम्	उन्हें
योगक्षेमं	कुशलताम्	कुशलता
वहामि	प्रापयामि	प्राप्त कराता हूँ

अन्वयः

अनन्याः ये जनाः मां चिन्तयन्तः पुर्यपासते, अहं नित्याभियुक्तानां तेषां योगक्षेमं वहामि।

भावार्थः

संस्कृतम्—कर्मपराणां साधकानां कर्मणा सिद्धिर्जायते, किन्तु भगवतो वासुदेवस्य भक्ताः भगवत्प्रसादेनैव कृतार्थाः भवन्ति, इत्यनेन श्लोकेन प्रतिपाद्यते।

ये भक्तजनाः अनन्यभावेन ऐकान्तिकभक्त्या भगवन्तं वासुदेवं मनसि चिन्तयन्तः सर्वतोभावेन तं भजन्ति, सर्वदा भगवत्परायणानां तेषां भक्तानां योगक्षेमं भगवान् स्वयमेव करोति। अलब्धस्य लाभो योगः लब्धस्य परिरक्षणं क्षेमः। भगवान् स्वयमेव भक्ताय योगक्षेमं प्रददाति। एवञ्च सदा भगवन्निष्ठः निष्कामभक्तः जीवननिर्वाहाय भगवत्कृपया धनादिकं वस्तुजातं प्राप्नोति तत्संरक्षणं च लभते। किञ्च स पर्यन्ते मोक्षमपि लभते।

हिन्दी—यज्ञादि कर्म मार्ग के साधक की इष्ट सिद्धि कर्मानुष्ठान से होती है—यह बात पिछले श्लोक में बतलायी गयी है। यहाँ यह बतला रहे हैं कि निष्काम भक्त भगवान् की कृपा से ही कृतार्थ हो जाता है। उसके सारे मनोरथ भगवत्प्रसाद से सिद्ध हो जाते हैं।

अन्य कामनाओं या देवताओं को छोड़कर जो भक्त निष्काम-भाव से केवल भगवान् का चिन्तन, मनन और ध्यान करता है और सर्वतोभाव से उन्हीं का भजन करता है, निरन्तर भगवत्सेवा में अनुरक्त उस भक्त को भगवान् स्वयं योगक्षेम प्रदान करते हैं। धनादि लाभ को योग कहते हैं और उसके पालन को क्षेम। जीवन निर्वाह के लिए आवश्यक वस्तु के साथ-साथ भगवान् अन्त में परम पुरुषार्थ मोक्ष भी प्रदान करते हैं। इस प्रकार वह भक्त भगवत्प्रसाद से ही कृतार्थ हो जाता है।

अवबोधाभ्यासः

अधस्तनाः प्रश्नाः उत्तरणीयाः–

१. अस्मिन् श्लोके किं प्रतिपादितम्? ....

२. अनन्यशब्दस्य कोऽभिप्रायः? ....

३. 'पर्युपासते' इत्यत्र 'परि-' उपसर्गः कमर्थं प्रकटयति?

....

४. योगक्षेमौ कमर्थं बोधयतः? ....

५. श्लोके 'वह्' धातुः कस्मिन्नर्थे प्रयुक्तः? ....

६. इदं योगक्षेमं भक्तैः प्रार्थितम् अप्रार्थितं वा? ....

व्याकरणाभ्यासः

(अ) सन्धिः

चिन्तयन्तो माम् – चिन्तयन्तः+माम् (ओभावः)

अनन्याश्चिन्तयन्तः – अनन्याः+चिन्तयन्तः (शभावः)

मां ये – माम्+ये (अनुस्वारसन्धिः)

नित्याभियुक्तानाम् – नित्य+अभियुक्तानाम् (दीर्घसन्धिः)

वहाम्यहम् – वहामि+अहम् (यण्सन्धिः)

अधस्तनेषु रेखाङ्कितपदेषु सन्धिच्छेदः कार्यः–

(i) दुरत्ययेऽ<u>ध्वन्यजया</u> निवेशितः। ....

(ii) स एष <u>सार्थोऽ</u>र्थपरः। ....

(iii) यात्<u>यति</u>पारमध्वनः। ....

(iv) रूढ निजाभिभानो राजास्मि। ....

(v) जनस्य गोप्तास्मि। ....

(vi) विदाम निष्ठां प्रभवं च नित्यम्। ....

(vii) व्यवहारमूलं निरूप्यताम्। ....

(viii) आविर्हिताः क्वापि तिरोहिताश्च। ....

(ix) हरेश्चरणोपासनास्त्रः। ....

(x) अमुष्मिन् भ्रमते मनो मे। ....

(आ) समासः

१. **अनन्याः** – न विद्यमानः इति अविद्यमानः, अविद्यमानः अन्यः येषां ते इति अनन्य (बहुव्रीहिः)

२. **नित्याभियुक्तानाम्** – नित्यम् अभियुक्तानाम् इति (केवल – समासः)

३. **योगक्षेमम्** – योगश्च क्षेमश्च इत्यनयोः समाहारः– योगक्षेम (समाहारद्वन्द्वः)

अधस्तनेषु रेखाङ्कितपदेषु विग्रहं समासं च निर्दिशतु–

(i) अनन्या राघवेणाहं भास्करेण यथा प्रथा। ....

(ii) अविद्यस्य सुखं नास्ति। ....

(iii) दिवानिशं कर्मण्येव व्यापृतः। ....

(iv) राज्ञः छत्रोपाहनहं विशिष्टं भवति। ....

(v) नित्यमङ्गलं दिव्यदेशमगच्छत्। ....

(vi) सततानुरक्तानां नास्ति अप्रियः। ....

(इ) कृत्प्रत्ययः

१. **चिन्तयन्तः** – चिन्ति+शतृ (अत्) – चिन्तयत्

२. **अभियुक्तानाम्** – अभि+युज्+क्त (त) – अभियुक्त

३. **योगः** – युज्+घञ् (अ) – योग

अधस्तनेभ्यः प्रकृतिप्रत्ययेभ्यः निष्पन्नं प्रातिपादिकं पदं च लिखतु–

(i) कथि + शतृ – ....

(ii) योजि + शतृ – ....

(iii) सत्यापि + शतृ – ....

(iv) अनु + मापि + शतृ – ....

(v) अनु + रञ्ज् + क्त – ....

(vi) सम् + त्यज् + क्त – ....

(vii) वि + मुच् + क्त – ....

(viii) उप + लभ् + क्त – ....

(ix) प्र + रुह् + घञ् – ....

(x) वि + मुच् + घञ् – ....

(ई) क्रियाकारकसम्बन्धः

पर्युपासते	–	कर्तरि क्रिया	वहामि	–	कर्तरि क्रिया
जनाः	–	कर्ता	अहम्	–	कर्ता
ये	–	कर्तृविशेषणम्	योगक्षेमम्	–	कर्म
चिन्तयन्तः	–	कर्तृविशेषणम्	तेषाम्	–	कर्मसम्बन्धी
अनन्या	–	कर्तृविशेषणम्	नित्याभियुक्तानाम्	–	सम्बन्धिविशेषणम्
माम्	–	कर्म			

(उ) पर्यायशब्दः

क्षेमम् – १. शिवम्, २. भद्रम्, ३. कल्याणम्, ४. मोक्षः

योगः – १. ध्यानम्, २. सङ्गतिः, ३. युक्तिः, ४. उपायः

◆◆◆

४७. श्लोकः

यत्करोषि यदश्नासि यज्जुहोषि ददासि यत्।
यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणम्।। (भ. गी. ९.२७)

पदच्छेदः

यत्, करोषि, यत्, अश्नासि, यत्, जुहोषि, ददासि यत्।
यत्, तपस्यसि, कौन्तेय, तत्, कुरुष्व, मत् + अर्पणम्।।

पदच्छेदाभ्यासः

अधस्तनानि पदानि छिनत्तु–

(i) यदश्नासि – ....

(ii) यज्जुहोषि – ....

(iii) मदर्पणम् – ....

पदपरिचयः

पदम्	विश्लेषणम्	पदम्	विश्लेषणम्
यत्	यद्–दका. नपुं.द्विती.एक.सर्व. १	यत्	यद्–दका.नपुं.द्विती.एक.सर्व. ४
करोषि	कृ+लट् मपु.एक.कर्तरि क्रिया	यत्	यद्–दका.नपुं.द्विती.एक.सर्व. ५
यत्	यद्–दका.नपुं.द्विती.एक.सर्व. २	तपस्यसि	तपस्य्+लट् मपु.एक.नामधातुः कर्तरि क्रिया
अश्नासि	अश्+लट् मपु.एक.क्र्यादि.कर्तरि क्रिया	कौन्तेय	कौन्तेय अका.पुं.सम्बो.एक.
यत्	यद्–दका.नपुं.द्विती.एक.सर्व. ३	तत्	तद्–दका.नपुं.द्विती.एक.सर्व. ६
जुहोषि	हु+लट् मपु.एक.जुहोत्यादि.कर्तरि क्रिया	कुरुष्व	कृ+लट् मपु.एक.तनादि.आत्मने.कर्तरि क्रिया
ददासि	दा+लट् मपु.एक.जुहोत्यादि.कर्तरि क्रिया	मदर्पणम्	मदर्पण अका.नपुं.द्विती.एक.समस्तं विधेयम्

वर्गीकरणाभ्यासः

अधो निर्देशानुसारं श्लोकपदानि तत्तद्वर्गे लेख्यानि–

(i) द्वितीयान्तम् (७) ....

(ii) सम्बोधनान्तम् (१) ....

(iii) अकारान्तम् (२) ....

(iv) तकारान्तम् (१) ....

(v) पुंलिङ्गम् (१) ....

(vi) नपुंसकम् (७) ....

(vii) विधेयम् (१) ....

(viii) समस्तम् (१) ....

(ix) क्रियापदम् (६) ....

(x) आत्मनेपदम (१) ....

(xi) परस्मैपदम् (५) ....

(xii) जुहोत्यादि.(२) ....

(xiii) नामधातु. (१) ....

(xiv) भ्वादि. (२) ....

(xv) क्यादि. (१) ....

(xvi) क्रियाणां कर्तारं लिखतु।

आकाङ्क्षाविस्तरः

करोषि = जीवननिर्वाहार्थं कार्यं करोषि।

कः करोति? त्वं करोषि।

त्वं किं करोषि .... (सर्व. १)

अश्नासि = शरीरपालनार्थम् अश्नासि।

कः अश्नाति? त्वम् अश्नासि।

त्वं किम् अश्नासि? .... (सर्व. २)

जुहोषि = यज्ञादौ हविः जुहोषि।

कः जुहोति? त्वं जुहोषि।

त्वं किं जुहोषि? .... (सर्व. ३)

ददासि = दरिद्रेभ्यो धनं ददासि।

कः ददाति? .... त्वं ददासि।

त्वं किं ददासि? .... (सर्व. ४)

तपस्यसि = कठोरं तपः आचरसि।

कः तपस्यति? .... त्वं तपस्यसि।

त्वं किं तपस्यसि? .... (सर्व. ५)

कौन्तेय! तत् किं कुरुष्व? .... (अ. नपुं.)

अन्वयः

कौन्तेय! (त्वम्) यत् करोषि यद् अश्नासि यद् जुहोषि यत् ददासि यत् तपस्यसि तत् मदर्पणं कुरुष्व।

पदार्थः

पदम्	संस्कृतम्	हिन्दी
कौन्तेय!	हे कुन्तीपुत्र!	हे अर्जुन!
(त्वम्)	(त्वम्)	(तुम)
यत्	यत् (कर्म)	जो काम
करोषि	आचरसि	करते हो
यत्	यत् (खाद्यम्)	जो कुछ
अश्नासि	खादसि	खाते हो
यत्	यत् (हव्यम्)	जो (सामग्री)
जुहोषि	अग्नौ प्रक्षिपसि	हवन करते हो
यत्	यत् (द्रव्यम्)	जो (वस्तु)
ददासि	यच्छति	दान करते हो
यत्	यादृशम्	जो
तपस्यसि	तपः चरसि	तप करते हो
तत्	तत् सर्वम्	वह सब
मदर्पणम्	भगवदर्पणम्	मुझे समर्पित
कुरुष्व	कुरु	करते रहो

भावार्थः

संस्कृतम्– अस्मिन् श्लोके कर्मयोगिने अर्जुनाय तत्कर्तव्यं निर्दिष्टम्।

हे अर्जुन! स्वभावतः शास्त्रतो वा यत्किमपि कर्म करोषि, स्वयं तृप्त्यर्थं शरीरपुष्ट्यर्थं वा यत्किञ्चिदपि भक्ष्यम् भुङ्क्षे, शास्त्रबलात् नित्यमग्निहोत्रादि पूजायां निर्वर्तयसि, अतिथये निर्धनेभ्यो वा यत्किञ्चिद् द्रव्यं प्रयच्छसि तथा अज्ञातप्रमादादिनिवृत्तये यत् प्रायश्चित्तं व्रतं वा आचरसि, तदेतत् सर्वं कृत्यजातं मह्यं भगवते समर्पणं कुरु।

यथा यज्ञार्थं पशुसोमादिद्रव्याणि उद्यमैः कठिनैः आपाद्य समर्पणीयानि भवन्ति, तथा नैव करणीयम्। किन्तु जीवनयात्रानिर्वाहार्थं स्वभावतः यद् वस्तु उपयुज्यते, तदेव भगवते समर्पणीयम्। अर्थात् शरीरपुष्ट्यर्थं यद् भोज्यं भुञ्जे, तेन भगवान् प्रसीदतु - इत्येवं भावना मनसि दृढं भावनीया, न तु शरीरपुष्टिभावना भवेत्। एवंरीत्या सकलं कर्म भगवत्प्रीत्यै कुर्यात् – इदमेव कर्मयोगिनां कर्तव्यम्।

हिन्दी–इस श्लोक में कर्मयोगी अर्जुन को उसके कर्तव्य का निर्देश हुआ है।

हे अर्जुन! स्वभाव से या शास्त्र से तुम जो कर्म करते हो, अपनी तृप्ति अथवा शरीर की पुष्टि के लिए जो कुछ भोज्य खाते हो, शास्त्र की प्रेरणा से प्रतिदिन सम्पादित होने वाले अग्निहोत्र या पूजा-होम में जो कुछ हवन करते हो, अतिथि अथवा निर्धन जन को जो कुछ द्रव्य दान करते हो, अज्ञान प्रमाद आदि पाप की निवृत्ति के लिए जो व्रत, प्रायश्चित्त अथवा तपस्या करते हो, उन सारे कृत्यों को मुझ भगवान् श्रीकृष्ण में समर्पित करते रहो।

वस्तुतः बड़े या छोटे यज्ञों को सम्पन्न करने के लिए पशु-सोम आदि उसकी विविध सामग्री को बड़े प्रयास से संकलित करना होता है, अतः उसके समान आयास-साध्य वस्तु या कर्म को समर्पित करने का उपदेश यहाँ नहीं हुआ है। अपितु यहाँ स्वभावतः सहज में प्राप्त वस्तु अथवा कर्म का समर्पण अभिप्रेत है। जीवन यात्रा को चलाने के लिए हमे बराबर कुछ न कुछ करना ही होता है, हमें उन्ही कर्मों का समर्पण करना है। अर्थात् हम जो भी करते हैं, वह अपने लिए नहीं अपितु भगवान् की प्रीति के लिए–बस, यही भावना सभी कर्मों में निरन्तर बनी रहे, हमारा इतना ही कर्तव्य है।

अवबोधाभ्यासः

अधस्तनाः प्रश्नाः उत्तरणीयाः–

१. अनेन श्लोकेन किं निर्दिष्टम्? ....

२. किं कर्म विनापि मनुष्यः तिष्ठति? ....

३. भोजनं किमर्थं क्रियते? ....

४. कीदृशं वस्तु भगवति अर्पणीयम्? ....

५. इह अर्पणशब्दस्य को भावः? ....

६. यज्ञे समर्पणाद् अस्य समर्पणस्य को भेदः? ....

व्याकरणाभ्यासः

(अ) सन्धिः

१. यदश्नासि – यत् + अश्नासि – (जश्त्वम्)

२. यज्जुहोषि – यत् + जुहोषि – (श्चुत्वसन्धिः)

३. मदर्पणम् – मत् + अर्पणम् – (जश्त्वसन्धिः)

अधस्तनेषु रेखाङ्कितपदेषु सन्धिं विसन्धिं च करोतु–

(i) तद्वासयं तीर्थमुशन्ति। ....

(ii) प्राक् + उदाहृतम् आश्रमं जगाम। ....

(iii) शश्वत् + जन्म मतम्। ....

(iv) स उज्जिहासुः स्वं राज्यम्। ....

(v) यत् + ज्ञानमात्मतत्त्वनिदर्शनम्। ....

(vii) यद्रूपं तद्विजानीहि। ....

(आ) समासः

मदर्पणम् – मयि अर्पणम् इति - सप्तमीतत्पुरुषः।

अधस्तनेषु रेखाङ्कितेषु पदेषु समासविग्रहौ विधेयौ–

(i) वनवासेन प्रजास्तस्य दुःखिताः। ....

(ii) करामलकवद् विश्वं विज्ञानावसितं तव। ....

(iii) शास्त्रपण्डितं समाहूय अपृच्छत्। ....

(iv) व्यवहारधूर्तान् परिचिनुयात्। ....

(v) संवादचतुरो दूतः श्लाघ्यो भवति। ....

(इ) तिङ्प्रत्ययः

तपस्यसि – तपः इच्छति इति तपस् + क्यच् (य) तपस्य + लट्

अधस्तनेषु क्रियापदेषु प्रकृतिप्रत्ययभागं विग्रहं च निर्दिशतु–

(i) आपणे धनीयति वणिक् ....

(ii) उदकीयति बालः। ....

(iii) कक्षायां पुस्तकीयति छात्रः। ....

(iv) भोजने दधिस्यति अतिथिः। ....

(v) गव्यति कृषकः ग्रामे। ....

(ई) क्रियाकारकसम्बन्धः

करोषि	–	कर्तरि क्रिया	ददासि	–	कर्तरि क्रिया
यत्	–	कर्म	यत्	–	कर्म
अश्नासि	–	कर्तरि क्रिया	तपस्यसि	–	कर्तरि क्रिया
यत्	–	कर्म	यत्	–	कर्म
जुहोषि	–	कर्तरि क्रिया	कुरुष्व	–	कर्तरि क्रिया
यत्	–	कर्म	तत्	–	कर्म
मदर्पणम्	–	कर्मविशेषणम्	कौन्तेय	–	सम्बोधनम्

(उ) पर्यायशब्दः

अर्पणम् – १. समर्पणम् (अ. नपुं.)
२. समर्पितम् (अ. नपुं.)
३. प्रदानम् (अ. नपुं.)

◆◆◆

४८. श्लोकः

समोऽहं सर्वभूतेषु न मे द्वेष्योऽस्ति न प्रियः।
ये भजन्ति तु मां भक्त्या मयि ते तेषु चाप्यहम्।। (भ. गी. ९.२९)

पदच्छेदः

समः अहम् सर्व-भूतेषु न मे द्वेष्यः अस्ति न प्रियः।
ये भजन्ति तु माम् भक्त्या मयि ते तेषु च अपि अहम्।।

पदच्छेदाभ्यासः

अधस्तनानि पदानि विच्छिनत्तु–

(i) समोऽहम् – ....

(ii) द्वेष्योऽस्ति – ....

(iii) मां भक्त्या – ....

(iv) चाप्यहम् – ....

पदपरिचयः

पदम्	विश्लेषणम्	पदम्	विश्लेषणम्
समः	सम-अ.पुं.प्र.एक.विशेषणम् १	भजन्ति	भज्+लट् प्रपु.बहु.भ्वादि कर्तरि क्रिया
अहम्	अस्मद्-द.प्र.एक.सर्व.विशेष्यम्	तु	अव्ययम् १
सर्वभूतेषु	सर्वभूत अ.पुं.स.बहु.	माम्	अस्मद्-द.द्विती.एक.सर्व.
न	अव्ययम्	भक्त्या	भक्ति-इ.स्त्री.तृ.एक.
मे	अस्मद्-द.ष.एक.सर्व.	मयि	अस्मद्-द.स.एक.सर्व.
द्वेष्यः	द्वेष्य-अ.पुं.प्र.एक विशेषणम् २	ते	तद्-द.प्र.बहु.सर्व.
अस्ति	अस्+लट् प्रपुएक.अदादि कर्तरि क्रिया	तेषु	तद्-द.स.बहु.सर्व.
न	अव्ययम् २	च	अव्ययम् ४
प्रियः	प्रिय-अ.पुं.प्र.एक.विशेषणम् ३	अपि	अव्ययम् ५
ये	यद्-द.पुं.प्र.बहु.सर्व.	अहम्	अस्मद्-द.प्र.एक.सर्व.

वर्गीकरणाभ्यासः

अधो यथानिर्देशं श्लोकपदानि तत्तद्वर्गे विभजनीयानि–

(i) प्रथमान्तम् (७) ....

(ii) द्वितीयान्तम् (१) ....

(iii) तृतीयान्तम् (१) ....

(iv) षष्ठ्यन्तम् (१) ....

(v) सप्तम्यन्तम् (३) ....

(vi) अकारान्तम् (४) ....

(vii) इकारान्तम् (१) ....

(viii) सर्वनाम् (७) ....

(ix) अव्ययम् (५) ....

(x) पुंलिङ्गम् (७) ....

(xi) स्त्रीलिङ्गम् (१) ....

(xii) विशेष्यम् (१) ....

(xiii) विशेषणम् (३) ....

(xiv) क्रियापदम् (२) ....

(xv) विशेष्येण सह तद्विशेषणं लिखतु।

आकाङ्क्षाविस्तरः

अस्मि – आक्षिप्तक्रिया।

अहम् अस्मि।

अहं कुत्रास्मि? .... (अ. स. बहु.)

सर्वभूतेषु अहं कीदृशः अस्मि? .... (अ. विशेषणम् १)

नास्ति।

कः नास्ति? .... (अ. विशेषणम् २)

कस्य द्वेष्यः नास्ति? .... (सर्व. ष.)

नास्ति।

कः नास्ति? .... (अ. विशेषणम् ३)

प्रियः कस्य नास्ति? .... (ष. सर्व.)

भजन्ति।

के भजन्ति? .... (यद् प्र. बहु.)

ये तु कं भजन्ति? .... (अस्मद् - द्विती. पक सर्व.)

ये तु मां कया भजन्ति? .... (इका. तृ. पक)

ये तु मां भक्त्या भजन्ति ते किं भवन्ति? ते सन्ति।

ते कुत्र सन्ति .... (स. एक. सर्व.)

अपि च अहम् अस्मि।

अहमपि कुत्रास्मि? .... (स. बहु. सर्व.)

पदार्थः

पदम्	संस्कृतम्	हिन्दी
अहम्	अहं (परमात्मा)	मैं (परमात्मा)
सर्वभूतेषु	सकलप्राणिषु	सभी जीवों में
समः (अस्मि)	समानः (अस्मि)	एक समान (हूँ)
(यतः) मे	मम	मेरे
द्वेष्यः	द्वेषविषयः कश्चित्	द्वेष का पात्र (कोई)
नास्ति	न भवति	नहीं होता है
प्रियः	रागविषयः च कश्चित्	प्रीति का पात्र (भी) कोई
न (भवति)	न (भवति)	नहीं (होता है)
तु	किन्तु	लेकिन
ये	ये (जनाः)	जो (लोग)
माम्	मां (परमात्मानम्)	मुझ (परमात्मा का)
भक्त्या	समर्पणभावेन	भक्ति से

भजन्ति	पर्युपासते	भजन करते हैं
ते	ते (भक्ताः)	वे (भक्त)
मयि	मयि (परमात्मनि)	मुझ (परमात्मा) में
(वर्तन्ते)	(निवसन्ति)	निवास करते हैं
अहम्	अहम् (परमात्मा)	मैं (परमात्मा)
अपि	तथा	और
तेषु	तेषु (भक्तेषु)	उन (भक्तों) में
च	वर्ते	निवास करता हूँ।

भावार्थः

संस्कृतम्– ननु भगवान् भक्तेभ्य एव मोक्षादिफलं प्रयच्छति, नाभक्तेभ्यः, एवञ्च भगवतोऽपि रागद्वेषादिकृतं वैषम्यं स्यादित्यादिशङ्कानिवारणाय अयं श्लोकः।

अहं परमात्मा सर्वेषु प्राणिषु अन्तर्यामित्वेन तुल्योऽस्मि। अतो जनः कश्चिद् मम द्वेष्यः नास्ति प्रियोऽपि नास्ति। अहं कस्मैचिद् जनाय नैव द्वेष्मि, नैव कस्मिंश्चिद् जने रज्यामि। तर्हि कथं भक्ताभक्तयोः फलवैषम्यं तत्राह – ये जनाः तु सर्वकर्मसमर्पणरूपया भक्त्या मां सेवन्ते, निष्कामकर्मभिः शोधितान्तकरणाः ते भक्ताः मदाकारां वृत्तिम् उत्पादयन्तः मयि वर्तन्ते। अहमपि अतिस्वच्छायां तदीयचित्तवृत्तौ प्रतिबिम्बितः तेषु वर्ते।

अयम्भावः– यो जनः अग्नेः समीपं गत्वा तं सेवते, तस्यैव जनस्य शीतादि दुःखम् अपसारयति अग्निः, न दूरस्थस्य ज़नस्य। एवं कुर्वतोऽग्नेः यथा वैषम्यं नास्ति, तथा भगवतोऽपि ज्ञेयम्। यथा वा दीपकस्य कल्पवृक्षस्य वा वैषम्यं नास्ति, तथैव भक्तपक्षपातिनो भगवतोऽपि न वैषम्यम्, किन्तु भगवद्भक्तेः एवं महिमा।

हिन्दी– भगवान् भक्तों को ही मोक्षादि फल प्रदान करते हैं, अभक्तों को नहीं। इस प्रकार भगवान् में किसी के प्रति राग और किसी के प्रति द्वेष भाव होने से विषमता दोष प्रतीत हो रहा है जो उचित नहीं है। इस शंका का निवारण करते हुए भगवान् कहते हैं–

मैं परमात्मा अन्तर्यामी रूप से सभी प्राणियों में एक समान अवस्थित हूँ। अतः न कोई मेरा प्रिय है और न ही कोई वैरी है। भगवान् प्राणिमात्र से प्रेम करते हैं, किसी से राग या किसी से द्वेष नहीं रखते, अतः उनमें विषम-दृष्टि नहीं है। किन्तु जो सर्व कर्म समर्पण द्वारा भक्ति भाव से उनको भजता है, उनके पास जाता है। निष्काम कर्म के द्वारा उसका अन्तःकरण निर्मल हो जाता है और उसकी निरन्तर भगवदाकारा चित्तवृत्ति होती है। इस प्रकार वह नित्य परमात्मा में ही निवास करता है और परमात्मा भी सदा उसके निर्मल अन्तःकरण-दर्पण में प्रतिबिम्बित होते रहते हैं। अर्थात् निष्काम भक्त भगवान् में और भगवान् उस भक्त में नित्य निवास करते हैं।

अग्नि से गर्मी या दीपक से प्रकाश अथवा कल्पवृक्ष से मनोरथ तभी प्राप्त होता है, जब हम उनके पास जाते हैं, उनका सेवन करते हैं। जो उनका सेवन नहीं करते हैं, उनके पास नहीं जाते हैं, उन्हें उनका लाभ नहीं मिलता है। इससे हम अग्नि को पक्षपाती या विषम दृष्टि नहीं कहते, उसी प्रकार परमात्मा में भी विषम दृष्टि नहीं है। अपितु उसका लाभ उसी को मिलेगा जो उसके पास जायेगा। यही तो भगवद्भक्ति की महिमा है।

अवबोधाभ्यासः

अधस्तनान् प्रश्नान् उत्तरयतु–

१. अस्मिन् श्लोके कस्याः शङ्कायाः समाधानम्? ....

२. शङ्कायाः किं समाधानम्? ....

३. ईश्वरः सर्वभूतेषु कथं समानः? ....

४. भक्तेः किं स्वरूपमुक्तम्? ....

५. अग्नेः वैषम्यं कथन्न? ....

६. भक्ताः भगवति कथं वर्तन्ते? ....

७. भगवान् भक्तेषु कथं वर्तते? ....

व्याकरणाभ्यासः

(अ) सन्धिः

१. समोऽहम् – समः + अहम् – (ओभावः पूर्वरूपं च)

२. द्वेष्योऽस्ति – द्वेष्यः + अस्ति – (ओभावः पूर्वरूपं च)

३. चाप्यहम् – च + अपि+अहम् – (दीर्घसन्धिः यणसन्धिः च)

४. मां भक्त्या – माम् + भक्त्या – (अनुस्वारसन्धिः)

अधस्तनेषु रेखाङ्कितपदेषु सन्धिं विसन्धिं च करोतु–

(i) योऽन्तर्हितो हृदि गतोऽपि। ....

(ii) सः + अद्यैव नो नयनमूलम् + राद्धः। ....

(iii) त्रय इमे रिपवः + अस्य पत्र। ....

(iv) कर्तुम् + प्रकृष्टमिह धीमहि। ....

(v) सुरहेलनमप्यशेषम्। ....

(vi) इह तु नो व्रजतोरधोऽधः। ....

(vii) ध्यानास्पदं बहु मतं नयनाभिरामम्। ....

(viii) किन्तु + अन्यद् अर्पितभयम्। ....

(ix) विगणयन्त्यपि तस्य कोपम्। ....

(x) नाहं तथाद्मि यजमानहविर्वितानै। ....

(आ) समासः

सर्वभूतेषु- सर्वेषु च तेषु भूतेषु इति (कर्मधारयः)

अधस्तनेषु रेखाङ्कितपदेषु समासविग्रहौ कार्यौ–

(i) पुराणपुरुषं त्वाद्यं नमामि। ....

(ii) समुद्रस्य भीमनिःस्वनमाकर्ण्य भीतः। ....

(iii) प्रचण्डमन्युं कृतवान्। ....

(iv) आजगाम महातेजाः। ....

(v) मृत्युपाशैः प्रतिमुक्तस्य तव विकत्थनम्। ....

(इ) कृत्प्रत्ययः

१.	भूतेषु	–	भू + क्त	=	भूत
२.	द्वेष्यः	–	द्विष् + यत्	=	द्वेष्य
३.	प्रियः	–	प्री + क (अ)	=	प्रिय
४.	भक्त्या	–	भज्+क्तिन् (ति)	=	भक्ति

अधस्तनेभ्यः प्रकृतिप्रत्ययेभ्यः निष्पन्नं पदं निर्दिशतु–

घ्रा + क्त	=	....	पूज् + यत्	=	....
श्रु + क्तिन्	=	....	पुष् + क्तिन्	=	....
नुद् + यत्	=	....	मुच् + क्त	=	....
मुद् + क	=	....	षु + क	=	....

(ई) क्रियाकारकसम्बन्धः

अस्मि	–	आक्षिप्तक्रिया	भजन्ति	–	क्रिया
अहम्	–	कर्ता	ये	–	कर्ता
समः	–	कर्तृविशेषणम्	माम्	–	कर्म
सर्वभूतेषु	–	अधिकरणम्	भक्त्या	–	करणम्
अस्ति	–	क्रिया	ते	–	कर्ता
न	–	क्रियाविशेषणम्	वर्तन्ते	–	आक्षिप्तक्रिया
द्वेष्यः	–	कर्ता	मयि	–	अधिकरणम्
न	–	क्रियाविशेषणम्	अहम्	–	कर्ता
प्रियः	–	कर्ता	वर्ते	–	आक्षिप्तक्रिया
मे	–	सम्बन्धी	तेषु	–	अधिकरणम्

◆◆◆

४९. श्लोकः

अपि चेत्सुदुराचारो भजते मामनन्यभाक्।
साधुरेव स मन्तव्यः सम्यग्व्यवसितो हि सः।। (भ. गी. ९.३०)

पदच्छेदः

अपि, चेत्, सुदुराचारः, भजते, माम्, अनन्य-भाक्।
साधुः, एव, सः, मन्तव्यः, सम्यक्, व्यवसितः, हि, सः।।

पदच्छेदाभ्यासः

अधस्तनेषु पदेषु विच्छेदं करोतु–

(i) दुराचारः – ....

(ii) साधुरेव – ....

(iii) स मन्तव्यः – ....

(iv) सम्यग्व्यवसितः – ....

(v) व्यवसितो हि – ....

पदपरिचयः

पदम्	विश्लेषणम्	पदम्	विश्लेषणम्
अपि	अव्ययम् १	एव	अव्ययम् ३
चेत्	अव्ययम् २	सः	तद्-द.पुं.प्र.एक.सर्व.विशेषणम्
सुदुराचारः	सुदुराचार-अ.पुं.प्र.एक.समस्तं विशेषणम्	मन्तव्यः	मन्तव्य-अ.पुं.प्र.एक.विशेषणम्
भजते	भज्+लट् प्रपु.एक.भ्वादि आत्मने.कर्तरि क्रिया	सम्यक्	अव्ययम् ४
माम्	अस्मद्-द. द्विती.एक.सर्व.	व्यवसितः	व्यवसित-अ.पुं.प्र.एक.समस्तं विशेषणम्
अनन्यभाक्	अनन्यभाज्-जका.पुं.प्र.एक.समस्तं विशेषणम्	हि	अव्ययम् ५
साधुः	साधु-उ.पुं.प्र.एक.विशेषणम्	सः	तद्-द.पुं.प्र.एक.सर्व.विशेष्यम्

वर्गीकरणाभ्यासः

यथानिर्देशमधः श्लोकपदानि लिखन्तु--

(i) प्रथमान्तम् (७) ....

(ii) द्वितीयान्तम् (१) ....

(iii) अकारान्तम् (३) ....

(iv) उकारान्तम् (१) ....

(v) जकारान्तम् (१) ....

(vi) सर्वनाम् (३) ....

(vii) समस्तम् (३) ....

(viii) पुंलिङ्गम् (७) ....

(ix) अव्ययम् (५) ....

(x) विशेषणम् (५) ....

(xi) विशेष्यम् (२) ....

(xii) क्रियापदम् (१) ....

आकाङ्क्षाविस्तरः

भजते = सेवते।

कः भजते? .... (अ. विशेषणम्.)

किं सुदुराचारः भजते? सुदुराचारोऽपि भजते चेत्।

सुदुराचारः कथं भजते? .... (ज. विशेषणम्)

सुदुराचारोऽपि अनन्यभाक् कं भजते? .... (द्विती. सर्व.)

सुदुराचारोऽपि अनन्यभाक् मां भजते चेत्, तेन् किम्? तेन मन्तव्यः।

कः मन्तव्यः? .... (प्र. एक. सर्व.)

सः किं मन्तव्यः? .... (उ. प्र.)

स साधुरेव कथं मन्तव्यः? यतो हि सः सम्यग्व्यवसितः।

पदार्थ:

पदम्	संस्कृतम्	हिन्दी
सुदुराचार:	अत्यन्तपापिष्ठ:	अत्यन्त दुराचारी
अपि	अपि	भी
अनन्यभाक्	अनन्यभक्ति:	अनन्य भक्ति भाव से
माम्	मां (परमात्मन्)	मुझ (वासुदेव) को
भजते	सेवते	भजता है
चेत् (तर्हि)	यदि (तदा)	यदि (तो)
स:	स: (दुराचार)	उसे
साधु:	सज्जनभक्त:	साधु
एव	एव	ही
मन्तव्य:	स्वीकर्तव्य:	मानना चाहिए
हि	यतोहि	क्योंकि
स:	तादृश: (दुराचारभक्त:)	उसने
सम्यग्व्यवसित:	साधुनिश्चय:	उत्तम निश्चय कर लिया है।

भावार्थ:

संस्कृतम्—भगवद्भक्ते: अतर्कितं प्रभावं दर्शयति यत् पापिष्ठोऽपि शाश्वतीं शान्तिमाप्नोति - इति।

अत्यन्तदुष्टाचरणोऽपि जन: यदि केनचित् सत्संगेन सदुपदेशेन वा पूर्वार्जितपुण्योदयात् भगवन्तं वासुदेवम् अपृथग्भावेन अनन्यभक्तिभावेन निरन्तरं भजति तदा स दुराचारोऽपि साधु: भक्त एव माननीयो भवति। यतो हि स पापी भक्त: स्वं पापाचारं सर्वथा विहाय दृढं शोभनं निश्चयं कृतवान् यत् परमेश्वरभजनेनैव कृतार्थो भविष्यामीति। स हि वासुदेवात् भिन्नम् अन्यं देवं काम्यं वा न भजते, अत: स: अनन्यभाक् सम्यग्दर्शनश्च संवृत्त:। एवञ्च भक्ते: महिम्ना तस्य शाश्वतिकी शान्ति: सुनिश्चिता। अत्रोदाहरणम् अजामिलादिवृत्तम् ज्ञेयम्।

हिन्दी—भगवद्-भक्ति का बड़ा विलक्षण प्रभाव होता है, जिससे अजामिल आदि की भाँति पापी-से-पापी भी शाश्वत शान्ति प्राप्त कर लेता है—

अत्यन्त दुराचारी मनुष्य भी यदि सत्संग, सदुपदेश अथवा किसी कारण से पूर्वजन्म का पुण्योदय हो जाने पर परमेश्वर का अनन्यचित्त होकर भजन करने लगता है तो उसे साधु भक्त ही

समझना चाहिए। क्योंकि उसने बहुत सुन्दर निर्णय ले लिया है– अब मैं भगवान् के भजन से ही कृतार्थ होऊँगा– ऐसा दृढ़ निश्चय होने पर ही अनन्यभाव से निष्काम भक्ति में प्रवृत्त होता है। उसके लिए वासुदेव से भिन्न कोई देवता या कामना शेष नहीं रह जाती है। अत: वह एकमात्र वासुदेव को ही निरन्तर ध्यान में रखकर भजन करता है, कर्म करता है। उसके सारे कर्म भगवद् भजन हो जाते हैं। इस प्रकार भक्ति के प्रभाव से वह शाश्वत सुख प्राप्त कर लेता है।

अवबोधाभ्यास:

अधस्तनान् प्रश्नान् उत्तरयतु–

१. इह श्लोके किं प्रतिपादितम्? ....

२. सुदुराचार: केन भावेन भजते? ....

३. सुदुराचार पदे 'सु'पसर्ग: कमर्थं बोधयति? ....

४. सुदुराचारस्य भक्तौ कथं प्रवृत्ति:? ....

५. सुदुराचारस्य साधुत्वेऽत्र को हेतु: प्रदर्शित:? ....

६. सुदुराचारस्य साधुत्वे प्राचीनमुदाहरणं लिखतु? ....

७. सुदुराचार: भक्त्या किं लभते? ....

व्याकरणाभ्यास:

(अ) सन्धि:

१. साधुरेव – साधु: + एव – (रेफ: विसर्गसन्धि:)

२. स मन्तव्य: – स: + मन्तव्य: – (विसर्गसन्धि:)

३. व्यवसितो हि – व्यवसित: + हि – (पूर्वरूपसन्धि:)

४. सम्यग्व्यवसित: – सम्यक् + व्यवसित: – (जश्त्वसन्धि:)

अधस्तनेषु रेखाङ्कितपदेषु सन्धिच्छेदं सन्धिं च करोतु–

(i) तदा दुन्दुभयो नेदुर्मृदङ्गपणवादय:। ....

(ii) दर्शयामासतु: + देवीं पुर: + यानेन गच्छन्तीम्। ....

(iii) दिनै: + अल्पै: प्रसाद्य अधीतवान्। ....

(iv) षट्पञ्चवर्षः + बालः + गुरुम् अगच्छत्। ....

(v) स जन्मनोपशान्तात्मा। ....

(vi) एषः + ग्रामं परित्यक्तवान्। ....

(vii) सः + नावधीत् + यक्षान्। ....

(viii) स सम्यगधीतवान्। ....

(आ) समासः

१. सुदुराचारः - सु-अत्यन्तं दुर् = दुष्टम् आचारः यस्य सः इति सुदुराचारः (बहुव्रीहिः)

२. अनन्यभाक् - न अन्यभाक् इति (नञ्तत्पुरुषः)

३. सम्यग्व्यवसितः - सम्यक् व्यवसितः इति (केवलसमासः)

अधस्तनेषु रेखाङ्कितेषु समासविग्रहौ निर्दिशतु–

(i) क्रतुभिर्भूरिदक्षिणैः। ....

(ii) सुवाससौ गदामवष्टभ्य स्थितौ। ....

(iii) सुदुरवापं ग्रन्थं प्राप्तवान् ....

(iv) प्रश्रयनम्रकन्धरं तमब्रवीत्। ....

(v) धिङ् माम् अनार्याम् असतीम्। ....

(vi) पौर्णमासीमिव निशाम्। ....

(vii) पद्मिनीमिव विध्वस्ताम्। ....

(इ) कृत्प्रत्ययः

१. अनन्यभाक् - अन्यं भजते इति = अन्य + भज् + ण्वि (.) = अन्यभाज्। न अन्यभाक् इति अनन्यभाक्।

२. आचारः - आचर्यते इति – (आ + चर् + घञ् = आचार)

३. मन्तव्यः - मन्तुं योग्यः इति (मन् + तव्यत् = मन्तव्य)

४. व्यवसितः - वि + अव + सि + क्त = व्यवसित

अधस्तनेभ्यः प्रकृतिप्रत्ययेभ्यः निष्पन्नं पदं लिखतु–

(i) ज्ञान + भज् + ण्वि = ...
(ii) शब्द + भज् + ण्वि = ...
(iii) आ + रम् + घञ् = ...
(iv) वि + कृ + घञ् = ...
(v) आ + धृ + घञ् = ...
(vi) लिख् + तव्यत् = ...
(vii) खेल् + तव्यत् = ...
(viii) शी + तव्यत् = ...
(ix) स्वप् + तव्यत् = ...
(x) याच् + क्त = ...
(xi) दण्ड् + क्त = ...
(xii) मथ् + क्त = ...
(xiii) कृष् + क्त = ...

(ई) क्रियाकारकसम्बन्धः

भजते	–	कर्तरि क्रिया	सः	–	कर्म
सुदुराचारः	–	कर्ता	साधुः	–	कर्मविशेषणम्
अनन्यभाक्	–	कर्तृविशेषणम्	एव	–	निर्धारणे
माम्	–	कर्म	सम्यग्व्यवसितः	–	क्रियाबोधकं क्तान्तं कर्मवाच्यं विशेषणम्
चेत्	–	सम्भावनार्थकम्	सः	–	कर्म
अपि	–	समुच्चयार्थकम्	हि	–	हेत्वर्थकम्
मन्तव्यः	–	क्रियाबोधकं विशेषणं कर्मवाच्यम्			

(उ) पर्यायशब्दः

सुदुराचारः – १. पापिष्ठः (अ. त्रि. लि.), २. दुराचारी (दुराचारिन् त्रिलि.) ३. कदाचारः (अ. त्रि. लि.)

अनन्यभाक् - १. अपृथग्भूतः (अ. त्रिलि.) २. अविनाभूतः (अ. त्रिलि.) ३. अनितरचित्तः (अका. त्रिलि.)

साधुः - १. सज्जनः (अका. पुं.)
२. सदाचारः (अका. त्रिलि.)
३. आर्यः (अका. पुं.)

व्यवसितः - १. निश्चितः (अका. त्रिलि.)
२. निर्णीतः (अका. त्रिलि.)
३. अध्यवसितः (अका. त्रिलि.)

◆◆◆

५०. श्लोकः

क्षिप्रं भवति धर्मात्मा शश्वच्छान्तिं निगच्छति।
कौन्तेय! प्रतिजानीहि न मे भक्तः प्रणश्यति।। (भ. गी. ९.३१)

पदच्छेदः

क्षिप्रम्, भवति, धर्म+आत्मा, शश्वत्-शान्तिम्, निगच्छति।

कौन्तेय, प्रतिजानीहि, न, मे, भक्तः, प्रणश्यति।।

पदच्छेदाभ्यासः

अधस्तनानि पदानि विच्छिनत्तु-

(i) क्षिप्रं भवति - ....

(ii) धर्मात्मा - ....

(iii) शश्वच्छान्तिम् - ....

(iv) शान्तिं निगच्छति - ....

पदपरिचयः

पदम्	विश्लेषणम्	पदम्	विश्लेषणम्
क्षिप्रम्	क्षिप्र-अका.नपुं.द्विती.एक.क्रियाविशेषणम्	कौन्तेय	कौन्तेय अका.पुं.सम्बो.प्र.एक.
भवति	भू+लट् प्रपु.एक.भ्वादि कर्तरि क्रिया	प्रतिजानीहि	प्रति+ज्ञा+लोट् मपुएक.त्र-यादि परस्मैकर्तरि क्रिया
धर्मात्मा	धर्मात्मन्-न.पुं.प्र.एक.समस्तम् विशेषणम्	न	अव्ययम् क्रियाविशेषणम्
शश्वत्	अव्ययम् १	मे	अस्मद्-दका.षष्ठी.एक. सर्व.
शान्तिम्	इका.स्त्री.द्विती.एक.समस्तम्	भक्तः	भक्त-अका.पुं.प्र.एक.
निगच्छति	नि+गम्+लट् प्रपु.एक.भ्वादि परस्मै.कर्तरि क्रिया	प्रणश्यति	प्र+नश्+लट् प्रपु.एक.दिवादि परस्मै.कर्तरि क्रिया

वर्गीकरणाभ्यासः

यथानिर्देशं श्लोकपदानि तत्तद्वर्गे लेख्यानि-

(i) प्रथमान्तम् (२) ....

(ii) द्वितीयान्तम् (२) ....

(iii) षष्ठ्यन्तम् (१) ....

(iv) सम्बोधनान्तम् (१) ....

(v) अकारान्तम् (३) ....

(vi) इकारान्तम् (१) ....

(vii) नकारान्तम् (१) ....

(viii) पुंलिङ्गम् (३) ....

(ix) स्त्रीलिङ्गम् (१) ....

(x) नपुंसकम् (१) ....

(xi) समस्तम् (२) ....

(xii) सर्वनाम (१) ....

(xiii) अव्ययम् (२) ....

(xiv) क्रियाविशेषणम् (२) ....

(xv) क्रियापदम् (४) ....

(xvi) उपसर्गः (३) ....

(xvii) विशेषणम् (१) ....

आकाङ्क्षाविस्तरः

भवति = जायते।

कः भवति? सुदुराचारो भवति।

सुदुराचारः किं भवति? ....(नका. प्र.)

सुदुराचारः कदा धर्मात्मा भवति? ....(अका. द्विती.)

निगच्छति = नितरां प्राप्नोति।

कः निगच्छति? सुदुराचारो निगच्छति।

स किं निगच्छति? ....(इका. द्विती.)

स धर्मात्मा कीदृशीं शान्तिं निगच्छति? ....(अव्ययम् १)

सम्बोधनं किम्? ....(सम्बो. प्र.)

कौन्तेय! त्वं किं कुरु? ....(लोट् मपु. क्रिया)

कौन्तेय! त्वं किं प्रतिजानीहि = (प्रतिज्ञानं कुरु)? .... 'न प्रणश्यति इति।

कः न प्रणश्यति? ....(अका. प्र.)

कस्य भक्तो न प्रणश्यति? ....(ष. सर्व.)

पदार्थः

पदम्	संस्कृतम्	हिन्दी
(सुदुराचारः)	(सुदुराचारः)	(पूर्वोक्त दुराचारी)
क्षिप्रम्	शीघ्रम्	शीघ्र
धर्मात्मा	धर्मचित्तः	धार्मिक
भवति	जायते	हो जाता है
	(तथा सः)	(और वह)
शश्वत्	शाश्वतीम्	नित्य
शान्तिम्	उपशमम्	शान्ति को
निगच्छति	नितरां प्राप्नोति	अवश्य पा लेता है।
कौन्तेय!	हे कुन्तीपुत्र!	हे अर्जुन!
प्रतिजानीहि	प्रतिज्ञानं कुरु	(दूसरों को) प्रतिज्ञापूर्वक बता सकते हो (कि)
मे	मम (भगवतः)	मेरा
भक्तः	समर्पितान्तरात्मा भक्तः	भक्त
न प्रणश्यति	भवबन्धं नाप्नोति	नष्ट नहीं होता है।

भावार्थः

संस्कृतम्–'सुदुराचारोऽपि शोभननिश्चयेन साधुः मन्तव्यः' इति पूर्वस्मिन् श्लोके वर्णितम्। तत्र शङ्कते, कथं समीचीनाध्यवसायमात्रेण दुराचरणम् अपगच्छेत्, येन स साधुः स्यात्? तदेतां शङ्कामनेन श्लोकेन समाधत्ते–

हे अर्जुन! दुराचारोऽपि स सम्यग्व्यवसायात् मां भजन् शीघ्रं धर्मानुगतचित्तो भवति। दुराचारत्वं झटित्येव विहाय सदाचारो भवतीत्यर्थः। किं च स विषयभोगेषु स्पृहानिवृत्तिरूपां शश्वच्छान्तिं नित्योपशमं प्राप्नोति, दृढवैराग्यात्। शङ्काव्याकुलितचित्तम् अर्जुनं प्रोत्साहयन् भगवान् श्रीकृष्ण आह। हे अर्जुन! नैतदाश्चर्यं मन्वीथाः, अतो विप्रतिपन्नानां पुरस्ताद् अपि त्वं प्रतिजानीहि सगर्वं प्रतिज्ञां कुरु–वासुदेवस्य मम भक्तः अति दुराचारोऽपि न प्रणश्यति, अपितु कृतार्थ एव भवति–इति। तदुक्तम्–'न

वासुदेवभक्तानाम् अशुभं विद्यते क्वचित्'–इति। एवञ्च विलक्षणं माहात्म्यं भगवद्भक्तेः।

हिन्दी–'घोर पापी भी सुन्दर निश्चय कर लेने के कारण साधु हो जाता है'–यह बात पूर्व श्लोक में बताई गयी, किन्तु उसमें शंका होती है कि–सुन्दर निश्चय मात्र से पापाचार कैसे समाप्त होगा और वह कैसे महात्मा बन जायेगा? इस शंका का समाधान करने के लिए भगवान् कहते हैं–

हे अर्जुन! अत्यन्त दुराचारी भी सुन्दर निश्चय होने पर मेरी भक्ति में प्रवृत्त हो जाता है और भक्ति के प्रभाव से वह शीघ्र ही धर्मात्मा बन जाता है। अर्थात् अपने दुरात्मापन को तत्काल छोड़कर धार्मिक महात्मा हो जाता है। अब उसमें सांसारिक विषय भोग की वासना नहीं रह जाती तथा वैराग्य के कारण भोग की लालसा नहीं होने से वह शाश्वत शान्ति को प्राप्त कर लेता है।

शंकाकुल अर्जुन में दृढ़ता जगाने के लिए भगवान् उसे अपने सम्बन्धों का स्मरण कराते हुए कहते हैं–मेरी बुआ के पुत्र हे अर्जुन! भक्ति के प्रभाव के विषय में तुम्हें आश्चर्य नहीं होना चाहिए तुम विरोधियों के सामने यह शपथपूर्वक कर सकते हो–भगवान् वासुदेव का भक्त कभी नष्ट नहीं हो सकता, पथभ्रष्ट नहीं हो सकता, वह अवश्य कृतार्थ होता है। शास्त्रों ने कहा है–'न वासुदेवभक्तानाम् अशुभं विद्यते क्वचित्' – इति। एवञ्च भक्ति का अद्भुत माहात्म्य है। उसके प्रभाव से दुरात्मा धर्मात्मा हो जाता है।

अवबोधाभ्यासः

अधस्तनान् प्रश्नान् उत्तरयतु–

१. कां शङ्कां समाधातुं श्लोकोऽयम्? ....

२. तस्याः शङ्कायाः किं समाधानम् दत्तम्? ....

३. शान्तिलाभस्य किं तात्पर्यम्? ....

४. प्रतिजानीहि पदं किमर्थं प्रयुक्तम्? ....

५. सुदुराचारः धर्मात्मा कथं भवति? ....

६. प्रणाशस्य कोऽभिप्रायः? ....

७. अस्मिन् श्लोके कस्याः प्रभावः परिकीर्तितः? ....

व्याकरणाभ्यासः

(अ) सन्धिः

१. धर्मात्मा – धर्म + आत्मा – (दीर्घसन्धिः)

२. शश्वच्छान्तिम् – शश्वत् + शान्तिम् – (छत्वसन्धिः)

३. क्षिप्रं भवति – क्षिप्रम् + भवति – (अनुस्वारसन्धिः)

अधस्तनेषु रेखाङ्कितपदेषु सन्धिं विसन्धिं च करोतु–

(i) तवादर्शनशोकेन राघवः परितप्यते।

(ii) स त्वां मनुजशार्दूलः क्षिप्रम् प्राप्स्यति राघवः।

(iii) वीराभ्यां सह स हरीश्वरः।

(iv) इवाह यदि तिष्ठामि स्वेन रूपेण संवृतः।

(v) लङ्कामभिपतिष्यामि राघवस्यार्थसिद्धये।

(vi) रामस्य + अभ्युदये रतः।

(vii) प्राप्तकालम् + कृतम् + साधयेत्।

(viii) पुनश्च काश्चित् + शशलक्ष्मवर्णाः।

(ix) किंचिच्छीतलं जलम्।

(x) अवदत् + श्रीमहेश्वरः।

(आ) समासः

१. धर्मात्मा – धर्मे आत्मा यस्य सः – बहुव्रीहिः

२. शश्वच्छान्तिम् – शश्वत् शान्तिम् – केवलसमासः

अधस्तनेषु रेखाङ्कितपदेषु समासविग्रहं च लिखतु–

(i) तद् उन्नसं पाण्डुरदन्तमव्रणं वदनमपश्यत्। ....

(ii) शूलहस्तं तमालोक्य तस्कराः पलायिताः। ....

(iii) भृशतप्तदेहः छायामाश्रितवान्। ....

(iv) नित्योत्साहितः लक्ष्यं लभते। ....

(v) उत्पतिष्यन् विविक्षेप पक्षिराज इवोरगम्। ....

(vi) खद्योतैरिव पर्वतः। ....

(इ) कृत्प्रत्ययः

१.	क्षिप्रम् –	क्षिप् + र	=	क्षिप्र
२.	शान्तिम् –	शम् + क्ति	=	शान्ति
३.	भक्तः –	भज् + क्त	=	भक्त

अधस्तनेभ्यः प्रकृतिप्रत्ययेभ्यः निष्पन्नं पदं निर्दिशतु–

(i) कम् + र = ...

(ii) नम् + र = ...

(iii) दीप् + र = ...

(iv) दम् + क्ति = ...

(v) कम् + क्ति = ...

(vi) भुज् + क्त = ...

(ई) क्रियाकारकसम्बन्धः

भवति	–	कर्तरि क्रिया	कौन्तेय	–	सम्बोधनम्
सुदुराचारः	–	आक्षिप्तः कर्ता	प्रतिजानीहि	–	कर्तरि क्रिया
धर्मात्मा	–	कर्तृविशेषणम्	त्वम्	–	आक्षिप्तः कर्ता
क्षिप्रम्	–	क्रियाविशेषणम्	प्रणश्यति	–	कर्तरि क्रिया
निगच्छति	–	कर्तरि क्रिया	भक्तः	–	कर्ता
सुदुराचारः	–	आक्षिप्तः कर्ता	न	–	क्रियाविशेषणम्
शश्वच्छान्तिम्	–	कर्म	मे	–	सम्बन्धी

(उ) पर्यायशब्दः

क्षिप्रम् – १. त्वरितम् (अका. नपुं.) २. तूर्णम् (अका. नपुं.) ३. शीघ्रम् (अका. नपुं.)

शश्वत् – १. सदा (अव्ययम्) २. पुनः (अव्ययम्) ३. सह (अव्ययम्)

◆◆◆

५१. श्लोकः

मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु।
मामेवैष्यसि युक्त्वैवमात्मानं मत्परायणः।।(भ. गी. ९.३४)

पदच्छेदः

मत्+मनाः, भव, मत्+भक्तः, मत्+याजी, माम्, नमस्-कुरु।

माम्, एव, एष्यसि, युक्त्वा, एवम्, आत्मानम्, मत्–परायणः।।

पदच्छेदाभ्यासः

अधस्तनानि पदानि विच्छिनत्तु–

(i) मन्मनाः – ....

(ii) मद्याजी – ....

(iii) मां नमस्कुरु – ....

(iv) एवैष्यसि – ....

(v) युक्त्वैवम् – ....

पदपरिचयः

पदम्	विश्लेषणम्	पदम्	विश्लेषणम्
मन्मनाः	मन्मनस्–सका.पुं.प्र.एक.समस्तं विधेयम्	एव	अव्ययम्
भव	भू+लोट् मपु.एक.भ्वादि कर्तरि क्रिया	एष्यसि	इ+लट् मपु.एक.अदादि कर्तरि क्रिया
मद्भक्तः	मद्भक्त–अका.पुं.प्र.एक. समस्तम् विधेयम्	युक्त्वा	क्त्वान्तम् अव्ययम्
मद्याजी	मद्याजिन्–नका.पुं.प्र.एक.समस्तं विधेयम्	एवम्	अव्ययम्
माम्	अस्मद्–दका.द्विती.एक.सर्व.	आत्मानम्	आत्मन् नका.पुं.द्विती.एक.
नमस्कुरु	नमस्+कृ+लोट् मपु.एक.भ्वादि कर्तरि क्रिया	मत्परायणः	मत्परायण–अका.पुं.प्र.एक.समस्तं विधेयम्
माम्	अस्मद्–दका.द्विती.एक.सर्व.		

वर्गीकरणाभ्यासः

यथानिर्देशं श्लोकपदानि तत्तद्वर्गे लेख्यानि–

(i) प्रथमान्तम् (४) ....

(ii) द्वितीयान्तम् (३) ....

(iii) अकारान्तम् (२) ....

(iv) नकारान्तम् (२) ....

(v) सकारान्तम् (१) ....

(vi) पुंलिङ्गम् (५) ....

(vii) सर्वनाम् (२) ....

(viii) अव्ययम् (३) ....

(ix) विधेयम् (४) ....

(x) क्रियापदम् (३) ....

आकाङ्क्षाविस्तरः

भव।

कः भवति?	**त्वं भव।**	
त्वं किं भव?	....	(सका. प्र.)
अथ च किं भव?	....	(अका. प्र.)
अथ च किं भव?	....	(नका. प्र.)
पुनश्च किं कुरु?	....	(नमस् + कृ)
कं नमस्कुरु?	....	(सर्व. द्वितीया)
तेन किम्?	**तेन त्वम् एष्यसि।**	
कीदृशः त्वम् एष्यसि?	....	(अका. प्र.)
किं कृत्वा मत्परायणः?	....	(क्त्वान्तम्)
कं युक्त्वा मत्परायणः?	....	(नका. द्विती.)
आत्मानं कथं युक्त्वा मत्परायणः?	....	(अव्ययम्)
एवम् आत्मानं युक्त्वा मत्परायणः त्वं कम् एष्यसि?	....	(द्विती. सर्व.)

पदार्थ

पदम्	संस्कृतम्	हिन्दी
मन्मनाः	(त्वम्) मच्चित्तः	मेरे में मन वाले
मद्भक्तः	मम (भगवतः) भक्तः	मेरा भक्त
मद्याजी	मम यजनशीलः	मेरा पूजन करने वाला
भव	भव	हो
माम्	माम् (वासुदेवम्)	मेरा
नमस्कुरु	प्रणम	नमन करो
आत्मानम्	मनः	मन को
एवम्	इत्थम्	इस प्रकार
युक्त्वा	समाधाय	जोड़कर
मत्परायणः	मदेकशरणः	केवल मेरी शरण में होने से
माम्	माम् (वासुदेवम्)	मुझ (वासुदेव) को
एव	एव	ही
एष्यसि	प्राप्स्यसि	प्राप्त हो जाओगे।

भावार्थः

संस्कृतम्– अनेन श्लोकेन भगवान् भजनप्रकारं भगवच्छरणागतेः उपायं दर्शयन् अध्यायमुपसंहरति।

हे अर्जुन! त्वम् आत्मनः चित्ते ममैव भगवतः चिन्तनं कुरु, न तु पुत्रादीनाम्, धनाद्यर्थं राजादीनाम् वा। मनसि भगवदनुध्यानवान् भवेत्यर्थः। एवमेव त्वं ममैव भगवतो भक्तः भव, न देवान्तरसेवकः। मम वासुदेवस्यैव यजनं - (पूजनं) कुरु, न तु स्वर्गादिकामनया यजस्व। तथा च मनोवाक्कायैः माम् वासुदेवमेव साष्टाङ्गादिविधिना प्रणम। एवञ्च एभिः प्रकारैः आत्मानं चित्तं सर्वेन्द्रियाणि च मयि भगवत्येव नियोज्य मदेकशरणः सन् मां भगवन्तं प्राप्स्यसि। मम शरणागतिं नूनं लप्स्यसे। परमानन्दप्राप्तेरयमेव सरलः पन्थाः।

हिन्दी– इस श्लोक में भगवान् ने अपने भजन का प्रकार, भगवान् की शरणागति पाने का उपाय बताते हुए अध्याय का उपसंहार किया है।

हे अर्जुन! तुम अपने मन को मेरे में ही लगा दो, पुत्रकलत्रादि में मन मत लगाओ। तुम मेरा ही सेवक बनो, लोभवशात् अन्य किसी का नहीं। तुम केवल मेरा ही निष्काम पूजन करो स्वर्गादि कामना से यागादि में प्रवृत्त न हो। मन, वाणी एवं शरीर से तुम मेरा ही प्रणाम करो। इस

प्रकार अपनी समस्त इन्द्रियों तथा चित्त को मेरे में समाहित करके मेरे शरणागत हो जाओ। ऐसा करने से तुम अवश्य मुझे ही प्राप्त करोगे। अर्थात् तुम्हें मेरी शरणागति मिल जायेगी। इस प्रकार भक्तिमार्ग ही परमानन्द प्राप्ति का सरल उपाय है।

अवबोधाभ्यासः

अधस्तनान् प्रश्नान् उत्तरयतु–

१. अनेन श्लोकेन किं दर्शितम्? ....

२. 'मन्मनाः' इत्यस्य किं तात्पर्यम्? ....

३. 'मद्याजी' इत्यस्य कोऽभिप्रायः? ....

४. 'मां नमस्कुरु' इत्यनेन किम् अन्यस्य नमस्कारनिषेधः क्रियते? ....

५. नो चेत् विरोधपरिहारः कथम्? ....

६. 'आत्मानम्' इत्यनेन केषां बोधः? ....

७. शरणागतेः कः सरलः उपायः? ....

व्याकरणाभ्यासः

(अ) सन्धिः

१. मन्मनाः – मत् + मनाः – (अनुनासिकसन्धिः)

२. मद्भक्तः – मत् + भक्तः – (जश्त्वसन्धिः)

३. मद्याजी – मत् + याजी – (जश्त्वसन्धिः)

४. एवैष्यसि – एव + एष्यसि – (वृद्धिसन्धिः)

५. युक्त्वैवम् – युक्त्वा + एवम् – (वृद्धिसन्धिः)

६. मन्मना भव – मन्मनाः + भव – (विसर्गसन्धिः) (लोपः)

७. मां नमस्कुरु – माम् + नमस्कुरु – (अनुस्वारसन्धिः)

८. आत्मानं मत्परायणः – आत्मनम् + मत्परायणः – (अनुस्वारसन्धिः)

९. मद्भक्तो मद्याजी – मद्भक्तः + मद्याजी – (विसर्गसन्धिः) (ओभावः)

अधस्तनेषु रेखाङ्कितपदेषु सन्धिं विसन्धिं च करोतु–

(i) उन्मूलयन् नगपतीन् वात्यानीको रजोध्वजः। ....

(ii) सिंहो व्यनदन्मुहुः। ....

(iii) श्वासात् + मन्युप्रचलितेन्द्रियः। ....

(iv) निर्व्यलीकामृतम् + वचः + अवधारितवान्। ....

(v) ततः सपत्नम् + जघान। ....

(vi) न + ऐच्छत् + गदां दीयमानाम्। ....

(vii) स्रजा हतः + इव द्विपः। ....

(viii) ज्वलितास्या इवोरगा इषवो निपतिष्यन्ति। ....

(ix) त्वामुपैष्यति विजयः। ....

(x) प्रियसख्या यदुक्तं वै तदेव मम रोचते। ....

(आ) समासः

१. मन्मनाः – मयि मनो यस्य सः – बहुव्रीहिः

२. मत्परायणः – १. अहमेव परम् अयनं यस्य सः – बहुव्रीहिः

२. मम परायणः – षष्ठीतत्पुरुषः)

३. मद्भक्तः – मम भक्तः – षष्ठीतत्पुरुषः

अधस्तनेषु रेखाङ्कितपदेषु समासविग्रहौ दर्शयतु–

(i) धर्मबुद्धिः जनः प्रसीदति। ....

(ii) शुचिस्मितम् आननं जनान् मोहयति। ....

(iii) नित्यसुखं लोकं सेवस्व। ....

(iv) शिक्षार्जनं न जातुचित् मृषैव स्यात्। ....

(v) न मत्कृते विनश्येयुः सर्वे ते नरवानराः। ....

(vi) काव्यशोभां वर्धयन्ति ये तेऽलङ्काराः। ....

(vii) पीतं तद्वसनं शुभम्। ....

(viii) भूषणानि च मुख्यानि दृष्टानि धरणीतले। ....

(इ) कृत्प्रत्ययः

१. मद्याजी – यष्टुं शीलमस्य – अस्मद् + यज् + णिनि (इन्) – मद्याजिन्

२. युक्त्वा – युज् + क्त्वा = युक्त्वा

३. मत्परायणः – अहमेव परम् अयनम् – अस्मद् (मत्) + पर + इ + ल्युट् – मत्परायण

अधस्तनेभ्यः प्रकृतिप्रत्ययेभ्यः निष्पन्नं पदं लिखतु–

(i) शीघ्र + गम् + णिनि = ...

(ii) शून्य + वद् + णिनि = ...

(iii) मृदु + भाष् + णिनि = ...

(iv) युष्मद् (त्वत्) + पर + इ + ल्युट् = ...

(v) मुच् + क्त्वा = ...

(vi) वच् + क्त्वा = ...

(vii) स्था + क्त्वा = ...

(vii) या + क्त्वा = ...

(ई) उपपदम्

नमस्कुरु – नमस् + कुरु = नमस्कारं कुरु।

धातोः पूर्वं प्रयुज्यमानम् उपसर्गाद् भिन्नं पदम् 'उपपदम्' इति प्रोच्यते। यथा–उपर्युक्तवाक्ये कृ – धातोः पूर्वं प्रयुक्तं –नमस्– इति। उपपदेन धात्वर्थो विशिष्यते।

अधस्तनेषु रेखाङ्कितपदेषु उपपदं क्रियार्थं च निर्दिशतु–

(i) वर्षर्तौ वनस्पतयः प्रादुर्भवन्ति। ....

(ii) पुनर्भवति इति पुनर्भूः पुनर्भ्वः। ....

(iii) वर्षासु भवति इति वर्षाभूः। ....

(iv) वैज्ञानिकाः उपकरणानि आविष्कुर्वन्ति। ....

(उ) क्रियाकारकसम्बन्धः

भव	–	कर्तरि क्रिया	माम्	–	कर्म
त्वम्	–	आक्षिप्तकर्ता	एष्यति	–	कर्तरि क्रिया

मन्मनाः	-	कर्तृविशेषणम्	त्वम्	-	आक्षिप्तकर्ता
मद्भक्तः	-	कर्तृविशेषणम्	मत्परायणः	-	कर्तृविशेषणम्
मद्याजी	-	कर्तृविशेषणम्	माम्	-	कर्म
नमस्कुरु	-	कर्तरि क्रिया	युक्त्वा	-	पूर्वकालिकी गौणक्रिया
त्वम्	-	आक्षिप्तकर्ता	आत्मानम्	-	गौणक्रियायाः कर्म

(ऊ) पर्यायशब्दः

परायणम्- १. आश्रयः (अका. पुं.) २. तत्परम् (अका. नपुं.) ३. अभीष्टम् (अका. नपुं.)

आत्मा - १. ब्रह्म (नका. नपुं.) २. स्वभावः (अका. पुं.) ३. शरीरम् (अका. नपुं.) ४. बुद्धिः (इका. स्त्री.) ५. यत्नः (अका. पुं.)

◆◆◆

अथ दशमोऽध्याय:

५२. श्लोक:

श्री भगवानुवाच

अहमात्मा गुडाकेश! सर्वभूताशयस्थित:।
अहमादिश्च मध्यं च भूतानामन्त एव च।।(भ. गी. १०.२०)

पदच्छेद:

अहम्, आत्मा, गुडाका+ईश, सर्व-भूत+आशय-स्थित:।
अहम्, आदि:, च, मध्यम्, च, भूतानाम्, अन्त:, एव, च।।

पदच्छेदाभ्यास:

अधस्तनेषु पदेषु विच्छेदं करोतु–

(i) सर्वभूताशयस्थित: – ....
(ii) आदिश्च – ....
(iii) मध्यं च – ....
(iv) अन्त एव – ....
(v) गुडाकेश – ....

पदपरिचय:

पदम्	विश्लेषणम्	पदम्	विश्लेषणम्
अहम्	अस्मद्-दका.प्र.एक.सर्व.	मध्यम्	मध्य-अका.नपुं.प्र.एक.विधेयम्
आत्मा	आत्मन्-नका.पुं.प्र.एक.विधेयम्	च	अव्ययम् २
गुडाकेश	गुडाकेश-अका.पुं.सम्बो.प्र.एक.समस्तम्	भूतानाम्	भूत-अका.नपुं.ष.बहु.
सर्वभूताशयस्थित:	अका. पुं. प्र. एक. समस्तं विशेषणम्	अन्त:	अन्त-अका.पुं.प्र.एक.विधेयम्

अहम्	अस्मद्-दका.प्र.एक.सर्व.	एव	अव्ययम् ३
आदिः	आदि-इका.पुं.प्र.एक.विधेयम्	च	अव्ययम् ४
च	अव्ययम् १		

वर्गीकरणाभ्यासः

यथानिर्देशमधः श्लोकपदानि लिखन्तु–

(i) प्रथमान्तम् (७) ....
(ii) सम्बोधनान्तम् (१) ....
(iii) षष्ठ्यन्तम् (१) ....
(iv) अकारान्तम् (५) ....
(v) इकारान्तम् (१) ....
(vi) नकारान्तम् (१) ....
(vii) पुंलिङ्गम् (५) ....
(viii) नपुंसकम् (२) ....
(ix) विशेषणम् (१) ....
(x) विधेयम् (४) ....
(xi) सर्वनाम (२) ....
(xii) अव्ययम् (४) ....
(xiii) समस्तम् (२) ....

आकाङ्क्षाविस्तरः

(अस्मि) - (आक्षिप्ता क्रिया)।

कः अस्ति? — अहम् अस्मि।
अहं कः अस्मि? — .... (नका. प्र.)
अहं कीदृशः आत्मा? — .... (प्र. समस्तम्)
पुनश्च अहं कः? — .... (इका. प्र.)
किमन्योऽपि कश्चिद् आदिः? — नैव, अहमेव आदिः।
अहमेव केषामादिः? — .... (अका. ष.)

अहं पुनश्च किम्? .... (नपुं. प्र.)

अहमेव भूतानाम् आदिः च मध्यं च पुनश्च किम्? .... (प्रं॰ प्र॰)

कः सम्बोध्यः? .... (अका. सम्बो.)

पदार्थः

पदम्	संस्कृतम्	हिन्दी
गुडाकेश	हे जितनिद्र!	निद्राजयी हे अर्जुन!
अहम्	अहं (वासुदेवः)	मैं (भगवान् श्रीकृष्ण)
सर्वभूताशयस्थितः	सर्वजीवान्तःकरणस्थितः	सभी जीवों के चित्त में स्थित
आत्मा	परमात्मा (प्रत्यक् चैतन्यम्) परमात्मा	
अहम्	अहम् (वासुदेवः)	मैं (वासुदेव)
एव	एव	ही
भूतानाम्	चराचरभूतानाम्	सभी चराचर की
आदिः	जन्महेतुः	उत्पत्ति कारण
च	तथा	और
मध्यम्	स्थितिहेतुः	स्थिति का कारण
च	तथा	और
अन्तः	संहारहेतुः	संहार कारण
च	एवम्	और
(अस्मि)	(अस्मि)	(हूँ)

भावार्थः

संस्कृतम्–अस्मिन् अध्याये भगवतो विभूतीनां वर्णनमस्ति। अतः अस्याध्यायस्य 'विभूतियोगाध्यायः' इति नाम सुप्रथते। अर्जुनः भगवतः श्रीकृष्णस्य स्तुतिं विधाय तं स्वविभूतिं वर्णयितुं प्रार्थयते। ततः श्रीकृष्णः तस्य प्रार्थनां स्वीकृत्य अस्माद् विंशश्लोकाद् आचत्वारिंशम् आत्मनः प्रधानविभूतीः वर्णयति।

हे अर्जुन! एतावता ममोपदेशेन तव अज्ञाननिद्रा दूरंगता, अतस्त्वं (गुडाकेशः गुडाकायाः = निद्रायाः ईशः स्वामी, नियन्ता) संजातः। अतः ममोपदेशं धारयितुं त्वं समर्थोऽसि। अहं अन्तर्यामिरूपेण च विद्यमानः तेषाम् आत्मा अस्मि। अर्थात् जीवात्मा चैतन्यानन्दघनः परमात्मा च अहमेवास्मि। अहमेव सर्वेषां देहधारिणां जीवानाम् आदिश्च उत्पत्तिकारणम्, मध्यं च स्थितिकारणम्, अन्तश्च संहारकारणम् अस्मि। एवञ्च सर्वशरीरिणां जन्मादिहेतुः अहमेवास्मीत्यर्थः।

हिन्दी–इस अध्याय में भगवान् की विभूतियों का वर्णन है, इसलिए इस अध्याय को 'विभूतियोगाध्याय' कहते हैं। अर्जुन ने भगवान् श्रीकृष्ण की स्तुति करके उनसे अपनी विभूतियों के वर्णन की प्रार्थना की थी। अतः भगवान् श्रीकृष्ण ने अर्जुन की प्रार्थना को स्वीकार करते हुए इस अध्याय के बीसवें श्लोक से चालीसवें श्लोक तक अपनी प्रधान-प्रधान विभूतियों का वर्णन किया है।

यहाँ भगवान् ने अर्जुन को 'गुडाकेश' शब्द से सम्बोधित किया है। गुडाका अज्ञान निद्रा को कहते हैं, उसे नियन्त्रित कर लेने के कारण अर्जुन गुडाका के ईश नियन्ता स्वामी हो गये हैं। एवञ्च इस सम्बोधन से अर्जुन में ज्ञानोपदेश धारण का सामर्थ्य बोधित हुआ है।

श्रीभगवान् ने कहा हे गुडाकेश अर्जुन! चराचर सभी जीवों के अन्तःकरण में चेतन तथा अन्तर्यामी रूप से विद्यमान उनकी आत्मा और चैतन्य मैं ही हूँ। इन सभी शरीरधारी जीवों की उत्पत्ति, स्थिति और उनके संहार का हेतु भी मैं ही हूँ।

अवबोधाभ्यासः

अधस्तनानां प्रश्नानामुत्तरं ददातु–

१. गीताया दशमाध्यायस्य किं नाम, तत्र को हेतुः?

२. गुडाकेशसम्बोधने किं रहस्यम्?

३. अन्तःकरणे आत्मनः केन रूपेण स्थितिः?

४. आदिमध्यान्तशब्दानामिह कोऽर्थः?

५. अचरजीवाः के सन्ति?

व्याकरणाभ्यासः

(अ) सन्धिः

१. गुडाकेश	-	गुडाका + ईश	- (गुणसन्धिः)
२. भूताशय	-	भूत + आशय	- (दीर्घसन्धिः)
३. आदिश्च	-	आदिः + च	- (शभावश्चुत्वसन्धिः)
४. अन्त एव	-	मध्यम् + च	- (अनुस्वारसन्धिः)

अधस्तनेषु रेखाङ्कितपदेषु सन्धिच्छेदं करोतु–

(i) तीव्रेणात्मसमाधिना। ....

(ii) नोदतिष्ठत्तदा विराट्। ....

(iii) स्वधर्माचरणं शक्त्या। ....

(iv) आत्मविच्चरणार्चनम्। ....

(v) ग्राम्यधर्मनिवृत्तिश्च। ....

(vi) अकल्पः स्वाङ्गचेष्टायां शकुन्त इव पञ्जरे। ....

(vii) जन्मशतोद्भवं कर्म स्मरति। ....

(viii) येनोदरेऽर्पितः तं स्तुवीत। ....

(ix) य ईदृशीं गतिमदात्। ....

(x) वाचश्च नस्तुलाधृताः
तेऽङ्घ्रिशोभाः पूर्येत। ....

(आ) समासः

१. गुडाकेश – गुडाकायाः ईशः – षष्ठीतत्पुरुषः

२. सर्वभूताशयस्थितः – सर्वे च ते भूताः = सर्वभूताः – कर्मधारयः

सर्वभूतानाम् आशयाः = सर्वभूताशयाः – षष्ठीतत्पुरुषः

सर्वभताशयेषु स्थितः – सर्वभूताशयस्थितः – सप्तमीतत्पुरुषः

अधोऽङ्कितेषु विग्रहेषु निष्पन्नं पदं समासं च लिखतु–

(i) यज्ञस्य सम्भारान् – ....

(ii) पुरुषस्य अवयवात् – ....

(iii) सर्वासां देवतानाम् अनुक्रमः – ....

(iv) खगानां लोकस्य पालाः – ....

(v) पर्वतगुहासु निवासः – ....

(vi) सत्ये आग्रहः – ....

(vii) स्तनयोः कालस्य कूटम् – ....

(viii) सत्यस्य मार्गे अभिनिवेशः – ....

(इ) क्रियाकारकसम्बन्धः

अहम्	-	कर्ता	आदिः	-	कर्तृविशेषणम्
अस्मि	-	आक्षिप्तक्रिया	मध्यम्	-	कर्तृविशेषणम्
आत्मा	-	कर्तृविशेषणम्	अन्तः	-	कर्तृविशेषणम्
सर्वभूताशयस्थितः	-	कर्तृविशेषणम्	एव	-	ईश्वरेतरव्यवच्छेदे
गुडाकेश	-	सम्बोधनम्	भूतानाम्	-	सम्बन्धी
अहम्	-	कर्ता	च	-	समुच्चये
अस्मि	-	आक्षिप्त क्रिया			

(ई) पर्यायशब्दः

आदिः - १. हेतुः, २. कारणम्, ३. जन्म, ४. उत्पत्तिः,

मध्यम् - १. मध्यम्, २. अवलग्नम्, ३. अन्तरम्, ४. न्याय्यम्, ५. अधमम्

अन्तः - १. नाशः, २. मरणम्, ३. निधनम्, ४. मृत्युः, ५. प्रलयः

आशयः - १. अन्तःकरणम्, २. चित्तम्, ३. हृदयम्, ४. भावः, ५. तात्पर्यम्,

गुडाकेशः - १. जितेन्द्रियः, २. जितनिद्रः ३. निद्राजयी

◆◆◆

५३. श्लोकः

आदित्यानामहं विष्णुर्ज्योतिषां रविरंशुमान्।
मरीचिर्मरुतामस्मि नक्षत्राणामहं शशी।।(भ. गी. १०.२१)

पदच्छेदः

आदित्यानाम्, अहम्, विष्णुः, ज्योतिषाम्, रविः, अंशुमान्।
मरीचिः, मरुताम्, अस्मि, नक्षत्राणाम्, अहम्, शशी।।

पदच्छेदाभ्यासः

अधस्तनेषु पदेषु विच्छेदं करोतु–

(i) विष्णुर्ज्योतिषाम् – ....

(ii) रविरंशुमान् – ....

(iii) मरीचिर्मरुताम् – ....

(iv) अहं विष्णुः – ....

(v) अहं शशी – ....

पदपरिचयः

पदम्	विश्लेषणम्	पदम्	विश्लेषणम्
आदित्यानाम्	आदित्य–अका.पुं.ष.बहु. १	मरीचिः	मरीचि–इका.पुं./स्त्री.प्र.एक.विधेयम्
अहम्	अस्मद्–दका.प्र.एक.सर्व.	मरुताम्	मरुत्–तका.पुं.ष.बहु.
विष्णुः	विष्णु–उका.पुं.प्र.एक.विधेयम्	अस्मि	अस्+लट् उपु.एक.अदादि कर्तरि क्रिया
ज्योतिषाम्	ज्योतिष्–षका.नपुं.ष.बहु.	नक्षत्राणाम्	नक्षत्र–अका.नपुं.ष.बहु. २
रविः	रवि–इका.पुं.प्र.एक.विधेयम्	अहम्	अस्मद्–दका.प्र.एक.सर्व.
अंशुमान्	अंशुमत्–तका.पुं.प्र.एक.मतुबन्तं विशेषणम्	शशी	शशिन्–नका.पुं.प्र.एक.विधेयम्

वर्गीकरणाभ्यासः

अधस्तनेषु वर्गेषु श्लोकपदानि लिखन्तु–

(i) प्रथमान्तम् (७) ....

(ii) षष्ठ्यन्तम् (४) ....

(iii) अकारान्तम् (२) ....

(iv) इकारान्तम् (२) ....

(v) उकारान्तम् (१) ....

(vi) तकारान्तम् (२) ....

(vii) नकारान्तम् (१) ....

(viii) षकारान्तम् (१) ....

(ix) पुंलिङ्गम् (७) ....

(x) नपुंसकम् (२) ....

(xi) क्रियापदम् (१) ....

(xii) विधेयम् (४) ....

(xiii) विशेषणम् (१) ....

(xiv) सर्वनाम (२) ....

(xv) विधेयानाम् उद्देश्यं निर्दिशतु।

आकाङ्क्षाविस्तरः

अस्मि = (वर्ते)।

क: अस्ति? .... (प्र. सर्व.)

अहं क: अस्मि? .... (उका. प्र.)

अहं केषां विष्णु: अस्मि? .... (अका. ष. १)

अहं पुनश्च क: अस्मि? .... (इका. प्र.)

अहं कीदृश: रवि: अस्मि? .... (तका. प्र.)

अहं केषाम् अंशुमान् रवि: अस्मि? .... (षका. ष.)

अहं पुनश्च क: अस्मि? .... (इका. प्र.)

अहं केषां मरीचि: अस्मि? .... (तका. ष.)

अहं पुनश्च क: अस्मि? .... (नका. प्र.)

अहं केषां शशी अस्मि? .... (अका. ष.)

पदार्थः

पदम्	संस्कृतम्	हिन्दी
अहम्	अहं (श्रीकृष्णः)	मैं (वासुदेव)
आदित्यानाम्	अदितिपुत्राणां मध्ये	अदिति के पुत्रों में
विष्णुः	कनिष्ठः वामनः	विष्णु वामन
ज्योतिषाम्	प्रकाशानां मध्ये	प्रकाशों में
अंशुमान्	व्यापकरश्मिमान्	विश्वव्यापक किरणों वाला
रविः	सूर्यः	सूर्य
मरुताम्	मरुद्देवगणानां मध्ये	ऊनचास मरुतों में
मरीचिः	मरीचिर्नामा तेजोविशेषः	मरीचि/तेजःपुंज
अहम्	अहं (तथा)	(और) मैं
नक्षत्राणाम्	अश्विन्यादि - ताराणां मध्ये	अश्विनी आदि नक्षत्रों में
शशी	चन्द्रः	अधिपति चन्द्रमा
अस्मि	भवामि	हूँ।

भावार्थः

संस्कृतम्—सर्वव्यापी परमेश्वरः स्वविभूतीः विशिष्टतेजोंऽशान् कथयति—

अदितेः द्वादशपुत्राः, ते च—धाता, मित्रः, अर्यमा, शक्रः, वरुणः, अंशः, भगः, विवस्वान्, पूषा, सविता, त्वष्टा, विष्णुः इति नाम्ना प्रथिताः सन्ति। तेषु द्वादशसु आदित्येषु अन्तिमो विष्णुः ममैव विभूतिः। अहमेव विष्णुरस्मि। वह्निचन्द्रसूर्यादिप्रकाशेषु अहं विश्वव्यापकरश्मियुक्तः सूर्यः अस्मि। सप्तसप्तकाः मरुतः वायवः परिकीर्तिताः। ते च ऊनपञ्चाशद् मरुद्गणाः आवह प्रभृतयः मरुद्देवताः कथ्यन्ते। तेषु 'मरीचि' - नाम्ना प्रसिद्धः तेजःपुञ्जः अहम् अस्मि। एवमेव अश्विन्यादि - तारासु तासामधिपतिः चन्द्रमाः ममैव विभूतिः। चन्द्रः मम परमेश्वरस्यैव रूपमित्यर्थः।

हिन्दी—सर्वत्र परिव्याप्त परमेश्वर अपनी विभूति अर्थात् अपने विशेष तेजस्वी अंश को बता रहे हैं।

धाता-मित्र आदि नामों से महर्षि कश्यप की पत्नी माता अदिति के बारह पुत्र प्रसिद्ध हैं। उनमें कनिष्ठ विष्णु, भगवान् के ही स्वरूप हैं। सूर्य, चन्द्र, अग्नि, बिजली आदि प्रकाशमान द्रव्यों में भगवान् की विभूति सूर्य हैं। इन्द्र ने माता दिति के गर्भ के सात टुकड़े कर दिये, फिर भी उन्हें जीवित देखकर पुनः सातों खण्डों के सात-सात भाग कर दिये। इस प्रकार विखण्डन से तेज में वृद्धि होती गयी। वही ७ x ७ = ४९ मरुद्गण देवता कहे जाते हैं, इन्हें वायु भी कहते हैं। भगवान्

कहते हैं कि इन मरुतों में तेजःपुञ्ज मरीचि मैं ही हूँ, जो विखण्डन से बढ़ते ही रहता हूँ। इसी प्रकार अश्विनी आदि नक्षत्रों में उनका अधिपति चन्द्रमा मेरी ही विभूति है, वह मैं ही हूँ।

अवबोधाभ्यासः

अधस्तनान् प्रश्नान् उत्तरयतु–

१. इह श्लोके किं वर्णितम्? ....

२. आदित्याः कति, के च ते? ....

३. 'अंशुमान्' विशेषणस्य किं तात्पर्यम्? ....

४. मरीचिशब्दः कमर्थम् अभिधत्ते? ....

५. मरुतः कति सन्ति? ....

६. मरुतः कस्याः अपत्यानि? ....

७. शशी कस्याधिपतिः? ....

८. 'विखण्डनेन शक्तिः समेधते' इति कथमुक्तम्? ....

व्याकरणाभ्यासः

(अ) सन्धिः

१. विष्णुर्ज्योतिषाम्– विष्णुः + ज्योतिषाम् – विसर्गसन्धिः (रेफः)

२. रविरंशुमान् – रविः + अंशुमान् – विसर्गसन्धिः (रेफः)

३. मरीचिर्मरुताम् – मरीचिः + मरुताम् – विसर्गसन्धिः रेफः

४. अहं शशी – अहम् + शशी – अनुस्वारसन्धिः

५. अहं विष्णुः – अहम् + विष्णुः – अनुस्वारसन्धिः

६. ज्योतिषां रविः– ज्योतिषाम् + रविः – अनुस्वारसन्धिः

अधस्तनेषु रेखाङ्कितपदेषु सन्धिच्छेदं सन्धिं वा करोतु–

(i) मनोस्तु शतरूपायां तिस्रः कन्याश्च जज्ञिरे। ....

(ii) आकूतिर्देवहूतिश्च प्रसूतिरिति विश्रुताः। ....

(iii) साक्षाद् विष्णुर्यज्ञस्वरूपधृक्। ....

(iv) सा भूतेः + अंशानपायिनी। ....

(v) आनिन्ये स्वगृहं पुत्र्याः पुत्रम्। ....

(vi) स्वायम्भुवो रुचिः + जग्राह दक्षिणाम्। ....

(vii) ताम् + कामयमानाम् + भगवान् उवाह। ....

(viii) यजुषाम् + पतिः तोषम् आपन्नः। ....

(ix) तत्पुत्रपौत्रनप्तॄणाम् अनुवृत्तं तदन्तरम्। ....

(आ) तद्धितप्रत्ययः

१. आदित्यः – अदितेः अपत्यम् = अदिति + ण्य (य) = आदित्य

२. अंशुमान् – अंशवः अस्य सन्ति = अंशु + मतुप् (मत्) = अंशुमत्

३. शशी – शशः अस्य नित्यम् अस्ति = शश + इनि (इन्) = शशिन्

अधस्तनेभ्यः प्रकृतिप्रत्ययेभ्यः निष्पन्नं पदं विग्रहं च लिखतु–

(i) दिति + ण्य – ....

(ii) गणपति + ण्य – ....

(iii) भूपति + ण्य – ....

(iv) स्वयम्भू + अण् – ....

(v) गति + मतुप् – ....

(vi) कीर्ति + मतुप् – ....

(vii) मति + मतुप् – ....

(viii) रश्मि + मतुप् – ....

(ix) गृह + इनि – ....

(x) कुटुम्ब + इनि – ....

(xi) शस्त्र + इनि – ....

(xii) पुस्तक + इनि – ....

(इ) विभक्तिविधानम्

निर्धारणे षष्ठी सप्तमी वा विभक्तिः प्रयुज्यते।

यथा– (i) आदित्यानाम् अहं विष्णुः।

(ii) ज्योतिषाम् अहं रविः।

(iii) मरुताम् अहं मरीचिः।

(iv) नक्षत्राणाम् अहं शशी।

(v) नगरीषु वाराणसी प्राचीनतमा।

(vi) क्षेत्रेषु पुष्करं महनीयम्।

(vii) नदीषु गङ्गा विशाला।

(viii) विद्यापीठेषु जम्मूविद्यापीठं प्राचीनम्।

(ई) क्रियाकारकसम्बन्धः

अस्मि	-	कर्तरि क्रिया	शशी	-	कर्तृविशेषणम्
अहम्	-	कर्ता	आदित्यानाम्	-	निर्धारणसमुदायः
विष्णुः	-	कर्तृविशेषणम्	ज्योतिषाम्	-	निर्धारणसमुदायः
रविः	-	कर्तृविशेषणम्	मरुताम्	-	निर्धारणसमुदायः
अंशुमान्	-	कर्तृविशेषणम्	नक्षत्राणाम्	-	निर्धारणसमुदायः
मरीचिः	-	कर्तृविशेषणम्			

(उ) पर्यायशब्दः

आदित्यः - १. अमरः (अका. पुं.) २. निर्जरः (अका. पुं.) ३. देवः (अका. पुं.)

रविः - १. सूरः (अका. पुं.) २. सूर्यः (अका. पुं.) ३. दिवाकरः (अका. पुं.) ४. भास्करः (अका. पुं.)

विष्णुः - १. वामनः (अका. पुं.) २. नारायणः (अका. पुं.) ३. कृष्णः (अका. पुं.) ४. केशवः (अका. पुं.)

शशी - १. चन्द्रः (अका. पुं.) २. चन्द्रमाः (सका. पुं.) ३. मृगलाञ्छनः (अका. पुं.)

◆◆◆

५४. श्लोकः

वेदानां सामवेदोऽस्मि देवानामस्मि वासवः।
इन्द्रियाणां मनश्चास्मि भूतानामस्मि चेतना।। (भ. गी. १०.२२)

पदच्छेदः

वेदानाम्, साम-वेदः, अस्मि, देवानाम्, अस्मि, वासवः।
इन्द्रियाणाम्, मनः, च, अस्मि, भूतानाम्, अस्मि, चेतना।।

पदच्छेदाभ्यासः

अधस्तनानि पदानि छिनत्तु–

(i) सामवेदोऽस्मि – ....

(ii) सामवेदः – ....

(iii) वेदानां सामवेदः – ....

(iv) चास्मि – ....

(v) मनश्च – ....

(vi) इन्द्रियाणां मनः – ....

पदपरिचयः

पदम्	विश्लेषणम्	पदम्	विश्लेषणम्
वेदानाम्	वेद-अका.पुं.ष.बहु.	मनः	मनस्-सका.नपुं.प्र.एक.विधेयम्
सामवेदः	सामवेद-अका.पुं.प्र.एक.विधेयम् समस्तम्	च	अव्ययम्
अस्मि	अस्+लट् उपु.एक.अदादि कर्तरि परस्मैपदम्	अस्मि	अस्+लट् उपु.एक.अदादि कर्तरि परस्मैपदम्
देवानाम्	देव-अका.पुं.ष.बहु.	भूतानाम्	भूत-अका.पुं.ष.बहु.
अस्मि	अस्+लट् उपु.एक.अदादि कर्तरि परस्मैपदम्	अस्मि	अस्+लट् उपु.एक.अदादि कर्तरि परस्मैपदम्
वासवः	वासव-अका.पुं.प्र.एक.विधेयम्	चेतना	चेतना-आका.स्त्री.प्र.एक.विधेयम्
इन्द्रियाणाम्	इन्द्रिय-अका.नपुं.ष.बहु.		

वर्गीकरणाभ्यासः

अधस्तनेषु वर्गेषु श्लोकपदानि विभजतु–

(i) प्रथमान्तम् (४) ....

(ii) षष्ठ्यन्तम् (४) ....

(iii) अकारान्तम् (६) ....

(iv) आकारान्तम् (१) ....

(v) सकारान्तम् (१) ....

(vi) पुंलिङ्गम् (५) ....

(vii) स्त्रीलिङ्गम् (१) ....

(viii) नपुंसकम् (२) ....

(ix) अव्ययम् (१) ....

(x) क्रियापदम् (४) ....

(xi) विधेयम् (४) ....

(xii) विधेयानाम् उद्देश्यं लिखतु।

आकाङ्क्षाविस्तरः

अस्मि = विद्ये।

कः अस्ति? **अहम् अस्मि।**

अहं कः अस्मि? .... (समस्तं विधेयम्)

केषां मध्ये सामवेदः अस्मि? .... (अका. ष.)

पुनः अहं कः अस्मि? .... (अका. प्र.)

केषां मध्ये वासवः अस्मि? .... (अका. ष.)

पुनश्च अहं किम् अस्मि? .... (सका. प्र.)

केषां मध्ये मनः अस्मि? .... (अक. ष.)

पुनश्च अहं का अस्मि? .... (आका. प्र.)

केषां चेतना अस्मि? .... (अका. ष.)

पदार्थः

पदम्	संस्कृतम्	हिन्दी
वेदानाम्	चतसृणां श्रुतीनां मध्ये	चारों वेदों में
सामवेदः	गीतप्रधानः सामवेदः	सामवेद
अस्मि	अहम् अस्मि	मैं हूँ
देवानाम्	देवतानां मध्ये	देवताओं में
वासवः	इन्द्रः	देवेन्द्र
अस्मि	अहं वर्ते	मैं हूँ।
इन्द्रियाणाम्	चक्षुरादिकरणानां मध्ये	इन्द्रियों में
मनः	मानसम्	मन
अस्मि	अहं विद्ये	मैं हूँ
भूतानाम्	सर्वप्राणिनाम्	सभी जीवों को
च	तथा	और
चेतना	बुद्धिवृत्तिः	ज्ञानशक्ति
अस्मि	अहं भवामि	मैं हूँ।

भावार्थः

संस्कृतम्–वेदादिसमुदायेषु भगवान् स्वविशेषांशेन संयुक्तं प्रधानं निर्दिशति–

हे अर्जुन! ऋग्यजुःसामाथर्वणां चतुर्णां वेदानां मध्ये गानमाधुर्येण अतिरमणीयः सामवेदः अहमस्मि। रुद्रादित्यानां सर्वेषां सुराणां मध्ये देवराजत्वात् इन्द्रः अहम् अस्मि। स एव त्रिदिवौकसां रक्षकः प्रधानः। पञ्चज्ञानेन्द्रियाणि, पञ्चकर्मेन्द्रियाणि, एकादशं मनः, एतेषु एकादशसु ज्ञानकर्मसाधनेषु इन्द्रियेषु मध्ये सर्वेषां दशानाम् इन्द्रियाणां प्रवर्तकं मनः प्रधानमिन्द्रियम्, तद् अहमेवास्मि। अथ च सर्वेषां जीवानां चिदभिव्यञ्जिका ज्ञानशक्तिः अहमेवास्मि। तदभावे जीवोऽचेतनः इत्युच्यते, अतस्तदेव जीवसम्बन्धिषु परिणामेषु स्थूलसूक्ष्मरूपेषु प्रधानं तत्त्वम् अभ्युपेयम्।

हिन्दी–वेदादि समुदायों में भगवान् के विशेषांश से संयुक्त जो प्रधान तत्त्व है, यहाँ उसका निर्देश किया जा रहा है–

हे अर्जुन! ऋग्, यजुः, साम और अथर्व–इन चारों वेदों में सामवेद मधुर संगीतमय रमणीय स्तुतियों से युक्त है, अतः वेदों में वह प्रधान है, वह मेरा ही स्वरूप हैं। अग्नि, वायु, रुद्र, आदित्य

आदि सभी देवताओं का शासक राजा होने से इन्द्र सबमें प्रधान, हैं, अतः वह मैं ही हूँ। चक्षुः आदि पाँच ज्ञानेन्द्रियाँ हैं, वाणी, हाथ-पैर आदि पाँच कर्मेन्द्रियाँ हैं और इन दसों इन्द्रियों का प्रेरक तथा उनके साथ रहने के कारण मन इन्द्रिय इन सबमें प्रधान है, अतः वह भगवत्स्वरूप है। समस्त प्राणियों की जो ज्ञानशक्ति है, जिसके द्वारा सुख-दुःखादि सभी पदार्थों का अनुभव होता है, वह चेतना जीव की जीवनी शक्ति है, अतः वह मैं ही हूँ। उसमें भगवान् का विशेषांश होने से वह भगवान् का स्वरूप है।

अवबोधाभ्यासः

अधस्तनान् प्रश्नान् उत्तरयतु–

१. कति वेदाः, के च ते? ....

२. सामवेदस्य प्राधान्ये किं कारणम्? ....

३. अमरेषु मघवा कथं प्रधानम्? ....

४. कति करणानि, कानि च तानि? ....

५. मनसः प्राधान्ये को हेतुः? ....

६. चेतना केषु भवति? ....

७. सुखादीनामनुभवः कया भवति? ....

८. चेतना कथं जीवनी शक्तिः? ....

व्याकरणाभ्यासः

(अ) सन्धिः

१. सामवेदोऽस्मि – सामवेदः + अस्मि – पूर्वरूपसन्धिः (ओभावः)

२. चास्मि – च + अस्मि – (दीर्घसन्धिः)

३. मनश्च – मनः + च – (श्चुत्वसन्धिः)

४. इन्द्रियाणां मनः – इन्द्रियाणाम् + मनः – (अनुस्वारसन्धिः)

५. वेदानां सामवेदः – वेदानाम् + सामवेदः – (अनुस्वारसन्धिः)

अधस्तनेषु रेखाङ्कितपदेषु सन्धिं विसन्धिं च करोतु–

(i) मनोऽस्ति प्रधानमिन्द्रियम्। ....

(ii) निर्द्वन्द्वः + अनिलभोजनः + आतिष्ठद् एकपादेन। ....

(iii) नृपोऽदात् रुचये आकूतिं कन्याम्। ....

(iv) कश्चिद् बुद्धिमान् नृपासनम् अलङ्करोति। ....

(v) अरुणाचलेऽपि संस्कृतं प्रचरति। ....

(vi) शतरूपायां तिस्रः कन्याश्च जज्ञिरे। ....

(vii) आकूतिर्देवहूतिश्च प्रसूतिरिति विश्रुताः। ....

(viii) पृथुः+चकार भूमण्डलं समतलम्। ....

(ix) कुलाद्रिम् + तपसि स्थितः। ....

(आ) समासः

१. सामवेदः – साम च तद् वेदश्च – कर्मधारयसमासः

अधस्तनानां पदानां विग्रहं समासं च निर्दिशतु–

(i) गहनवनम् – ....

(ii) यजुर्वेदः – ....

(iii) पवित्रवातावरणम् – ....

(iv) प्राचीनपुस्तकम् – ....

(v) नवीनभवनम् – ....

(vi) विशालपुस्तकालयः – ....

(vii) अमृतभोजनम् – ....

(इ) तद्धितप्रत्ययः

१. वासवः – वसवः = देवाः रत्नानि वा अस्य सन्ति – वसु + अण् (अ) = वासव।

२. इन्द्रियम् – इन्द्रस्य = आत्मनः लिङ्गम् – इन्द्र + घच् (इय) = इन्द्रिय

अधस्तनेभ्यः प्रकृतिप्रत्ययेभ्यः निष्पन्नं रूपं तद्विग्रहं च लिखतु–

(i) तपस् + अण् – ....

(ii) सहस्र + अण् – ....

(iii) ज्योत्स्ना + अण् – ....

(iv) राष्ट्र + घ – ....

(v) यज्ञ + घ – ....

(vi) पात्र + घ – ....

(ई) कृत्यप्रत्ययः

१. भूतानाम् – भू + क्त = भूत

२. चेतना – चित् + णिच् + युच् = चेतन + टाप् = चेतना

अधस्तनेभ्यः प्रकृतिप्रत्ययेभ्यः निष्पन्नं रूपं वाक्येव्यवहरतु–

(i) कृ + णिच् + युच् = ...

(ii) हृ + णिच् + युच् = ...

(iii) आलोच् + णिच् + युच् = ...

(iv) कारि + क्त = ...

(v) हारि + क्त = ...

(vi) आलोचि + क्त = ...

(vii) अवमन् + णिच् + युच् = ...

(viii) अवमानि + क्त = ...

(उ) क्रियाकारकसम्बन्धः

अस्मि	–	कर्तरि क्रिया	अस्मि	–	कर्तरि क्रिया
अहम्	–	आक्षिप्तः कर्ता	अहम्	–	आक्षिप्तः कर्ता
सामवेदः	–	कर्तृविशेषणम्	मनः	–	कर्तृविशेषणम्
वेदानाम्	–	निर्धारणसमुदायः	इन्द्रियाणाम्	–	निर्धारणसमुदायः
अस्मि	–	कर्तरि क्रिया	अस्मि	–	कर्तरि क्रिया
अहम्	–	आक्षिप्तः कर्ता	अहम्	–	आक्षिप्तः कर्ता
वासवः	–	कर्तृविशेषणम्	चेतना	–	कर्तृविशेषणम्
देवानाम्	–	निर्धारणसमुदायः	भूतानाम्	–	सम्बन्धषष्ठ्यन्तम्
च	–	समुच्चये			

(ऊ) पर्यायशब्दः

इन्द्रियम् - १. हृषीकम् (अका. नपुं.), २. विषयि (विषयिन् नका. नपुं.), ३. करणम् (अका. नपुं.),

मनः - १. मानसम् (अका. नपुं.), २. चेतः (चेतस् सका. नपुं.), ३. चित्तम् (अका. नपुं.), ४. स्वान्तम् (अका. नपुं.), ५. हृदयम् (अका. नपुं.), ६. हृत् (दका. नपुं.)

चेतना - १. बुद्धिः (इका. स्त्री.), २. चित् (दका. स्त्री.), ३. धीः (ईका. स्त्री.), ४. मनीषा (आका. स्त्री.)

◆◆◆

५५. श्लोकः

रुद्राणां शङ्करश्चास्मि वित्तेशो यक्षरक्षसाम्।
वसूनां पावकश्चास्मि मेरुः शिखरिणामहम्।।(भ. गी. १०.२३)

पदच्छेदः

रुद्राणाम्, शङ्करः, च, अस्मि, वित्त+ईशः, यक्ष-रक्षसाम्।
वसूनाम्, पावकः, च, अस्मि, मेरुः, शिखरिणाम्, अहम्।।

पदच्छेदाभ्यासः

अधस्तनानि पदानि च्छिनत्तु-

(i) चास्मि - ....

(ii) वित्तेशः - ....

(iii) रुद्राणां शङ्करः - ....

(iv) पावकश्चास्मि - ....

(v) शङ्करश्चास्मि - ....

पदपरिचयः

पदम्	विश्लेषणम्
रुद्राणाम्	रुद्र-अका.पुं.ष.बहु.
शङ्करः	शङ्कर अका.पुं.प्र.एक.विधेयम्
च	अव्ययम्
अस्मि	अस्+लट् उपु.एक.अदादि कर्तरि परस्मैपदम्
वित्तेशः	वित्तेश-अका.पुं.प्र.एक.विधेयं समस्तम्
यक्षरक्षसाम्	यक्षरक्षस्-सका.पुं.ष.बहु.
वसूनाम्	वसु-उका.पुं.ष.बहु.

पदम्	विश्लेषणम्
पावकः	पावक-अका.पुं.प्र.एक.विधेयम्
च	अव्ययम्
अस्मि	अस्+लट् उपु.एक.अदादि कर्तरि परस्मैपदम्
मेरुः	मेरु-उका.पुं.प्र.एक.विधेयम्
शिखरिणाम्	शिखरिन्-नका.पुं.ष.बहु.इन्नन्तम्
अहम्	अस्मद्-प्र.एक.सर्व.उद्देश्यम्

वर्गीकरणाभ्यासः

अधस्तनेषु वर्गेषु श्लोकपदानि विभाज्यानि–

(i) प्रथमान्तम् (५) ....

(ii) षष्ठ्यन्तम् (४) ....

(iii) सर्वनाम (१) ....

(iv) अव्ययम् (२) ....

(v) अकारान्तम् (४) ....

(vi) उकारान्तम् (२) ....

(vii) नकारान्तम् (१) ....

(viii) सकारान्तम् (१) ....

(ix) पुंलिङ्गम् (८) ....

(x) क्रियापदम् (२) ....

(xi) उद्देश्यम् (१) ....

(xii) विधेयम् (४) ....

(xiii) उद्देश्येन सह विधेयं योजयतु।

आकाङ्क्षाविस्तरः

अस्मि।

कः अस्ति? **अहम् अस्मि।**

अहं कः अस्मि? .... (अका. प्र. विधेयम्)

केषां मध्येऽहं शङ्करः अस्मि? .... (अका. ष.)

पुनश्च कः अहम् अस्मि? .... (अका. समस्तं विधेयम्)

केषां मध्येऽहं वित्तेशः अस्मि? .... (सका. ष.)

पुनश्चाहं कः अस्मि? .... (अका. प्र. विधेयम्)

केषां मध्येऽहं पावकः अस्मि? .... (उका. ष.)

पुनश्चाहं किमस्मि? .... (उका. प्र.)

केषां मध्येऽहं वसुः अस्मि? .... (नका. ष.)

पदार्थः

पदम्	संस्कृतम्	हिन्दी
अहम्	अहम् भगवान् (श्रीकृष्णः)	मैं
रुद्राणाम्	एकादशानां रुद्राणां मध्ये	ग्यारह रुद्रों में
शङ्करः	शम्भुः	शंकर
अस्मि	विद्ये	हूँ
यक्षरक्षसाम्	यक्षाणां राक्षसानां च मध्ये	यक्षों और राक्षसों में
च	तथा	और
वित्तेशः	कुबेरः (अस्मि)	कुबेर (हूँ)
अहम्	अहं (श्रीकृष्णः)	मैं (श्रीकृष्ण)
वसूनाम्	वसुसंज्ञकानामष्टानां देवानाम् मध्ये	वसु नाम के आठ देवताओं में
पावकः	अग्निः	अग्नि
शिखरिणाम्	शिखरवतां पर्वतानाम्	शिखर वाले पर्वतों में
मेरुः	सुमेरुः	सुमेरु पर्वत
च	तथा	और
अस्मि	भवामि	हूँ।

भावार्थः

संस्कृतम्–रुद्रादिषु प्रधानं देवं निर्दिश्य तेषां स्वस्मिन् परमेश्वरे अभेदं दर्शयति–

हे अर्जुन! एकादशसु हर-बहुरूप-त्र्यम्बक-अपराजित-वृषाकपि-शम्भु-कपर्दिन्-रैवत-मृगव्याध-शर्व- कपालिसंज्ञकेषु रुद्रेषु प्रधानत्वात् सर्वेषां शङ्करत्वात् कल्याणप्रदत्वात् शम्भुः = शङ्करः अहमस्मि। मम शङ्करस्य च अभेदोऽस्तीति भावः। धनाध्यक्षत्वात् वित्तेशः कुबेरः यक्षाणां राक्षसानां च राजा परिकीर्तितः। स च कुबेरः मम वासुदेवस्य स्वरूपमित्यर्थः। अष्टौ वसवः ध्रुव-अध्वर-आप-सोम-अनल-अनिल-प्रत्यूष- प्रभास नामानः पुराणेषु प्रथिताः सन्ति। तेषां मध्ये अनलः = अग्निः मम श्रीकृष्णस्य स्वरूपमस्ति। एवमेव शिखरयुक्तानां पर्वतानामुन्नतानां मध्येऽहं सुमेरुपर्वतः सुवर्णमयः अस्मि। भगवतः तेजोविशेषांशः मेरुपर्वते निहितः, अतः पर्वतेषु स एव प्रधानम्।

हिन्दी–रुद्रादि देवताओं में जो प्रधान हैं, उनमें भगवान् का विशेष तेजो अंश होने से वे भगवत्स्वरूप हैं–

हे अर्जुन! हर बहुरूप त्र्यम्बक आदि ग्यारह रुद्रों में मैं शंकर हूँ, क्योंकि शङ्कर प्राणिमात्र का कल्याण करने वाले शम्भु हैं। अतः उनका वासुदेव श्रीकृष्ण से अभेद समझना चाहिए। वित्तेश=कुबेर को धन का स्वामी कहा गया है और वे यक्षों और राक्षसों में प्रधान कहे गये हैं। अतः वे भी भगवान् श्रीकृष्ण के स्वरूप हैं। ध्रुव-अध्वर आदि आठ वसु नामक देवता कहलाते हैं। भगवान् ने उनमें अग्नि को अपना स्वरूप बताया है। इसी प्रकार शिखर वाले उन्नत पर्वतों में भगवान् का स्वरूप सुमेरु पर्वत है, जिसे सुवर्णमय माना गया है।

अवबोधाभ्यासः

अधस्तनान् प्रश्नान् उत्तरयतु–

१. अस्मिन् श्लोके भगवान् कं कं स्वस्वरूपमुक्तवान्? ....

२. कति रुद्राः, के च ते? ....

३. वसवः कति, के च ते सन्ति? ....

४. कुबेरः केषां राजा? ....

५. सुमेरुः कथं प्रधानम्? ....

६. भगवत्स्वरूपकथनस्य कोऽभिप्रायः? ....

व्याकरणाभ्यासः

(अ) सन्धिः

१. चास्मि	-	च + अस्मि	-	दीर्घसन्धिः
२. वित्तेशः	-	वित्त + ईशः	-	गुणसन्धिः
३. शंकरश्च	-	शंकरः + च	-	श्चुत्वसन्धिः
४. पावकश्च	-	पावकः + च	-	श्चुत्वसन्धिः
५. वित्तेशो यक्ष	-	वित्तेशः + यक्ष	-	विसर्गसन्धिः (ओभावः)
६. रुद्राणां शङ्करः	-	रुद्राणाम्+शङ्करः	-	अनुस्वारसन्धिः
७. वसूनां पावकः	-	वसूनाम्+पावकः	-	अनुस्वारः

अधस्तनेषु रेखाङ्कितपदेषु सन्धिं विसन्धिं च करोतु–

(i) संपत्सु विपत्सु सूरयो न विक्रियन्ते। ....

(ii) स्वयंज्योतिर्गुणाश्रयः। ....

(iii) कः कुर्यान्ममतां बुधः। ....

(iv) मा + अस्मिन् महाराज! चिन्ताम् + कृथाः। ....

(v) लोकगुरुणा समादिष्टः + विशाम्पतिः। ....

(vi) पृथुना + उपहृतार्हणः। ....

(vii) यथासुखम् + वसन्ति स्म तत्र तत्र + अकुतोभयाः। ....

(viii) सिंहः + चरति निर्भयम्। ....

(ix) वीरश्चाश्वम् उपादत्ते। ....

(x) लोकेशः + लोकपालकः। ....

(xi) नमो नमस्ते वरदेश्वराय। ....

(xii) कृतोचितः आसनम् उपाविशत्। ....

(आ) समासः

१. वित्तेशः – वित्तस्य ईशः – षष्ठीतत्पुरुषः

२. यक्षरक्षसाम् – यक्षाश्च रक्षांसि च यक्षरक्षांसि तेषाम् – द्वन्द्वः

अधस्तनेषु रेखाङ्कितेषु विग्रहं समासं च लिखतु–

(i) गङ्गायमुनयोः नद्योरन्तराक्षेत्रम् आवसन्। ....

(ii) अशान्तिः साधुकुलादन्यत्र। ....

(iii) अवनिमण्डलं साधु शास्ति। ....

(iv) शङ्खदुन्दुभिघोषेण भवनं विशति। ....

(v) पुष्पाक्षतफलैः वीरान् अर्चयति। ....

(vi) स्वर्णतोरणैर्मण्डितं तस्य द्वारम्। ....

(vii) चरेद् बालहितं पिता स्वयम्। ....

(इ) तद्धितप्रत्ययः

शिखरिणाम् - शिखराणि येषां सन्ति - शिखर + इनि (इन्) = शिखरिन्

अधस्तनेभ्यः अकारान्तप्रातिपदिकेभ्यः प्रत्यययोगेन निष्पन्नं रूपं विग्रहं च लिखतु–

(i) क्रोध + इनि - ....

(ii) काम + इनि - ....

(iii) लोभ + इनि - ....

(iv) मोह + इनि - ....

(v) अभिमान + इनि - ....

(vi) अहंकार + इनि - ....

(vii) अर्थ + इनि - ....

(viii) दण्ड + इनि - ....

(ई) कृत्प्रत्ययः

शङ्करः - शं करोति - शं + कृ + अच् (अ) = शङ्कर

पावकः - पुनाति इति - पू + ण्वुल् (अक) = पावक

अधस्तनेभ्यः प्रकृतिप्रत्ययेभ्यः निष्पन्नं पदं वाक्ये प्रयुङ्क्ताम्–

(i) धाव् + ण्वुल् - ....

(ii) वाद् + ण्वुल् - ....

(iii) नृत् + ण्वुल् - ....

(iv) गै + ण्वुल् - ....

(v) सम् + भू+अच् - ....

(vi) वि + नी + अच् - ....

(vii) सम् + स्तु+अच् - ....

(उ) क्रियाकारकसम्बन्धः

अस्मि	-	कर्तरि क्रिया	पावकः	-	कर्तृविशेषणम्
अहम्	-	कर्ता	वसूनाम्	-	निर्धारणषष्ठी

शङ्कर	-	कर्तृविशेषणम्	मेरुः	-	कर्तृविशेषणम्
रुद्राणाम्	-	समुदायनिर्धारणषष्ठी	शिखरिणाम्	-	निर्धारणषष्ठी
वित्तेशः	-	कर्तृविशेषणम्	च	-	समुच्चयार्थे
यक्षरक्षसाम्	-	निर्धारणषष्ठी			

(ऊ) पर्यायशब्दः

शङ्करः - १. शम्भुः (उका. पुं.), २. शिवः (अका. पुं.), ३. ईशः (अका. पुं.), ४. पशुपतिः (इका. पुं.), ५. धूर्जटिः (इका. पुं.)

पावकः - १. अग्निः (इका. पुं.), २. वह्निः (इका. पुं.), ३. वैश्वानरः (अका. पुं.), ४. अनलः (अका. पुं.), ५. धनञ्जयः (अका. पुं.)

वित्तेशः - १. कुबेरः (अका. पुं.), २. धनदः (अका. पुं.), ३. राजराजः (अका. पुं.), ४. किन्नरेशः (अका. पुं.), ५. वैश्रवणः (अका. पुं.)

मेरुः - १. सुमेरुः (उका. पु.), २. हेमाद्रिः (इका. पुं.), ३. रत्नसानुः (उका. पुं.), ४. सुरालयः (अका. पुं.)

◆◆◆

५६. श्लोकः

पुरोधसां च मुख्यं मां विद्धि पार्थ! बृहस्पतिम्।
सेनानीनामहं स्कन्दः सरसामस्मि सागरः।। (भ. गी. १०.२४)

पदच्छेदः

पुरोधसाम्, च, मुख्यम्, माम्, विद्धि, पार्थ, बृहस्पतिम्।
सेनानीनाम्, अहम्, स्कन्दः, सरसाम्, अस्मि, सागरः।।

पदच्छेदाभ्यासः

अधस्तनानि पदानि विच्छिनत्तु–

(i) पुरोधसां च – ....

(ii) मुख्यं माम् – ....

(iii) मां विद्धि – ....

(iv) अहं स्कन्दः – ....

पदपरिचयः

पदम्	विश्लेषणम्	पदम्	विश्लेषणम्
पुरोधसाम्	पुरोधस्–सका.पुं.ष.बहु.	सेनानीनाम्	सेनानी–ईका.पुं.ष.बहु.
च	अव्ययम्	अहम्	अस्मद्–दका.प्र.एक.सर्व.उद्देश्यम्
मुख्यम्	मुख्य–अका.पुं.द्विती.एक.विशेषणम्	स्कन्दः	स्कन्द–अका.पुं.प्र.एक.विधेयम्
माम्	अस्मद् दका.द्विती.एक.सर्व.उद्देश्यं विशेष्यम्	सरसाम्	सरस्–सका.नपुं.ष.बहु.
विद्धि	विद्+लोट् मपु.एक.अदादि कर्तरि परस्मैपदम्	अस्मि	अस्+लट् उपु.एक.अदादि.कर्तरि परस्मैपदम्
पार्थ!	पार्थ–अका.पुं.सम्बो.प्र.एक.	सागरः	सागर–अका.पुं.प्र.एक.विधेयम्
बृहस्पतिम्	बृहस्पति–इका.पुं.द्विती.एक.समस्तं विधेयम्		

वर्गीकरणाभ्यासः

अधस्तनेषु वर्गेषु श्लोकपदानि लिखतु–

(i) प्रथमान्तम् (३) ....

(ii) द्वितीयान्तम् (३) ....

(iii) षष्ठ्यन्तम् (३) ....

(iv) सम्बोधनान्तम् (१) ....

(v) अकारान्तम् (४) ....

(vi) इकारान्तम् (१) ....

(vii) ईकारान्तम् (१) ....

(viii) सकारान्तम् (२) ....

(ix) पुंलिङ्गम् (७) ....

(x) नपुंसकम् (१) ....

(xi) सर्वनाम (२) ....

(xii) अव्ययम् (१) ....

(xiii) क्रियापदम् (२) ....

(xiv) विशेषणम् (१) ....

(xv) विधेयम् (३) ....

(xvi) उद्देश्यम् (२) ....

(xvii) उद्देश्येन सह विधेयं विशेष्येण सह विशेषणं च लिखतु।

आकाङ्क्षाविस्तरः

विद्धि (= जानीहि)।

कः **वेत्तु?** **हे पार्थ! त्वं विद्धि।**

पार्थ! त्वं कं विद्धि? .... (द्विती. सर्व.)

मां कं विद्धि? .... (इका. द्विती.)

मां कीदृशं बृहस्पतिं विद्धि? .... (अका. द्वि.)

केषां मध्ये मुख्यं बृहस्पतिं मां विद्धि? .... (सका. ष. पुं.)

हे पार्थ! मां पुरोधसां मुख्यं बृहस्पतिं विद्धि।

अस्मि (= विद्ये)।

कः अस्ति? अहम् अस्मि।

अहं कः अस्मि? .... (अका. प्र.)

अहं केषां मध्ये स्कन्दः अस्मि? .... (ईका. ष.)

पुनश्च अहं किमस्मि? .... (अका. प्र.)

अहं केषां मध्ये सागरः अस्मि? .... (सका. ष. नपुं.)

पदार्थः

पदम्	संस्कृतम्	हिन्दी
पार्थ!	हे पृथापुत्र! (त्वम्)	हे अर्जुन (तुम)
माम्	मां श्रीकृष्णम्	मुझ (वासुदेव) को
पुरोधसाम्	पुरोहितानां मध्ये	पुरोहितों में
मुख्यम्	प्रधानम्	श्रेष्ठ
बृहस्पतिम्	बृहस्पतिनामानम्	बृहस्पति
विद्धि	अवगच्छ	जानो
अहम्	अहं (परमेश्वरः)	मैं
च	तथा	और
सेनानीनाम्	सेनापतीनां मध्ये	सेनापतियों में
स्कन्दः	कार्तिकेयः	षडानन
सरसाम्	स्थिरजलाशयानां मध्ये	स्थायी तालाबों में
सागरः	समुद्रः	समुद्र
अस्मि	भवामि	हूँ।

भावार्थः

संस्कृतम्—अनेन श्लोकेन भगवान् पुरोहितादिषु स्वं विशिष्टं रूपं निर्दिशति—

महर्षेः अङ्गिरसः पुत्रः बृहस्पतिः देवराजस्य इन्द्रस्य राजपुरोहितः, अत एव राजपुरोहितानां मध्ये स मुख्यः पुरोधाः। भगवान् श्रीकृष्णः तं बृहस्पतिं स्वस्वरूपं निर्दिशति। एवमेव सेनापतीनां मध्ये देवसेनापतिः स्कन्दः तथा देवखातानां प्राकृतिकजलाशयानां मध्ये सगरपुत्रैः खातः सागरः भगवतो वासुदेवस्य स्वरूपं स्तः। एते बृहस्पतिः स्कन्दः सागरश्च परमात्मनो विशिष्टाः विभूतयः सन्ति। ते च स्व-स्वसमुदायेषु मुख्याः श्रेष्ठाः मन्यन्ते।

हिन्दी—इस श्लोक से भगवान् ने पुरोहितादि में अपने स्वरूप का निर्देश किया है—

हे अर्जुन! तुम मुझे पुरोहितों में श्रेष्ठ बृहस्पति समझो। बृहस्पति महर्षि अंगिरा के पुत्र हैं और

वे देवराज इन्द्र के राजपुरोहित होने से मुख्य हैं। स्वारोचिष मन्वन्तर में बृहस्पति सप्तर्षियों में प्रधान थे और वामन भगवान् ने उन्हीं से सांगोपांग वेद एवं षट्शास्त्र का अध्ययन किया था। हे पार्थ! सेनापतियों में मैं देव सेनापति कार्तिकेय हूँ और प्राकृतिक जलाशयों में समुद्र हूँ। कार्तिकेय को पुराणों में शिव का पुत्र तथा महाभारत में अग्नि और स्वाहा से उत्पन्न माना गया है। इनके छह मुख और बारह भुजायें बताई गयी हैं, अतः इन्हें षडानन कहते हैं और ये देवताओं के सेनापति होने से प्रधान हैं। समुद्र को राजा सगर के पुत्रों ने खोदा था, अतः उसे सागर कहते हैं। भगवान् ने इन दोनों को अपना स्वरूप बताया है।

अवबोधाभ्यासः

अधस्तनान् प्रश्नान् उत्तरयतु–

१. अस्मिन् श्लोके भगवत्स्वरूपेण के निर्दिष्टाः सन्ति? ....

२. बृहस्पतिः कथं श्रेष्ठः? ....

३. स्कन्दस्य किं वैशिष्ट्यम्? ....

४. सागरः केन निर्मितः? ....

५. बृहस्पतिः कस्य पुत्रः? ....

६. स्कन्दस्य कौ पितरौ? ....

व्याकरणाभ्यासः

(अ) सन्धिः

१. पुरोधसां च – पुरोधसाम् + च – अनुस्वारसन्धिः

२. मुख्यं माम् – मुख्यम् + माम् – अनुस्वारसन्धिः

३. मां विद्धि – माम् + विद्धि – अनुस्वारसन्धिः

४. अहं स्कन्दः – अहम् + स्कन्दः – अनुस्वारसन्धिः

अधस्तनेषु रेखाङ्कितपदेषु सन्धिं विसन्धिं च करोतु–

(i) चक्रे दिव्यं वर्षशतं तपः।

(ii) अस्तु भद्रम् + ते।

(iii) य एतन्मे पुमान्नित्यम् + स्तुत्वा स्तोत्रेण माम् + भजेत्।

(iv) द्रष्टासि मां ततं ब्रह्मन्।

(v) व्यवधूय भयं तीव्रं योजनानां शतं प्लुतः।

(आ) समासः

बृहस्पतिः - बृहतां पतिः - षष्ठीतत्पुरुषः

अधस्तनेषु पदेषु विग्रहं समासं च निर्दिशतु–

(i) वाचस्पतिः - ....

(ii) वनस्पतिः - ....

(iii) दिवस्पतिः - ....

(iv) अहस्पतिः - ....

(v) गीष्पतिः - ....

(vi) गोष्पदम् - ....

(इ) तद्धितप्रत्ययः

मुख्यम् - मुखे भवम् - मुख + यत् (य) = मुख्यम्

सागरः - सगरैः जातः - सगर + अण् (अ) = सागर

अधस्तनेभ्यः प्रकृतिप्रत्ययेभ्यः पदं विग्रहं च लिखतु–

(i) दण्ड + यत् - ....

(ii) वध + यत् - ....

(iii) दक्षिणा + यत् - ....

(iv) मृत्तिका + अण् - ....

(v) पलाश + अण् - ....

(vi) बिल्व + अण् - ....

(vii) भस्मन् + अण् - ....

(ई) कृत्प्रत्ययः

पुरोधसाम् - पुरो धीयतेऽनेन - पुरस् + धा + अस् = पुरोधस् तेषां पुरोधासाम्

सेनानीनाम् - सेनां नयति - सेना + नी + क्विप् (.) = सेनानी तेषां सेनानीनाम्

अधस्तनेषु पदेषु प्रकृति-प्रत्ययविभागं करोतु–

(i) ग्रामणीः - ....

(ii) अग्रणी - ....

(iii) पुरुजित् – ....

(iv) सुखकृत् – ....

(v) पुरोगाः – ....

(vi) दुर्वासाः – ....

(vii) सुवासाः – ....

(उ) क्रियाकारकसम्बन्धः

विद्धि	–	कर्तरि क्रिया	बृहस्पतिम्	–	कर्मविशेषणम्
त्वम्	–	आक्षिप्तः कर्ता	मुख्यम्	–	कर्मविशेषणम्
माम्	–	कर्म	पार्थ!	–	सम्बोधनम्
पुरोधसाम्	–	निर्धारणषष्ठी	सेनानीनाम्	–	निर्धारणषष्ठी
अस्मि	–	कर्तरि क्रिया	सागरः	–	कर्तृविशेषणम्
अहम्	–	कर्ता	सरसाम्	–	निर्धारणषष्ठी
स्कन्दः	–	कर्तृविशेषणम्			

(ऊ) पर्यायशब्दः

पुरोधाः – १. पुरोहितः (अका. पुं.), २. याज्ञिकः (अका. पुं.), ३. पण्डितः (अका. पुं.)

बृहस्पतिः – १. वाचस्पतिः (इका. पुं.), २. देवगुरुः (उका. पुं.), ३. जीवः (अका. पुं.)

सेनानीः – १. सेनापतिः (इका. पुं.), २. चमूपतिः (इका. पुं.), ३. वाहिनीपतिः (इका. पुं.)

सेनाः – १. ध्वजिनी (ईका. स्त्री.), २. वाहिनी (ईका. स्त्री.), ३. वरूथिनी (ईका. स्त्री.), ४. चमूः (ऊका. स्त्री.), ५. पृतना (आका. स्त्री.)

स्कन्दः – १. गुहः (अका. पुं.), २. कुमारः (अका. पुं.), ३. षाण्मातुरः (अका. पुं.), ४. कार्तिकेयः (अका. पुं.)

सरः – १. कासारः (अका. पुं.), २. सरसी (ईका. स्त्री.), ३. जलाशयः (अका. पुं.)

सागरः – १. समुद्रः (अका. पुं.), २. उदधिः (इका. पुं.), ३. पाथोधिः (इका. पुं.)

◆◆◆

५७. श्लोकः

महर्षीणां भृगुरहं गिरामस्म्येकमक्षरम्।
यज्ञानां जपयज्ञोऽस्मि स्थावराणां हिमालयः।। (भ. गी. १०.२५)

पदच्छेदः

महर्षीणाम्, भृगुः, अहम्, गिराम्, अस्मि, एकम्, अक्षरम्।

यज्ञानाम्, जप-यज्ञः, अस्मि, स्थावराणाम्, हिम + आलयः।।

पदच्छेदाभ्यासः

अधस्तनानि पदानि विच्छिनत्तु–

(i) भृगुरहम् – ....

(ii) अस्म्येकम् – ....

(iii) जपयज्ञोऽस्मि – ....

(iv) महर्षीणां भृगुः – ....

(v) अहं गिराम् – ....

(vi) यज्ञानां जप – ....

पदपरिचयः

पदम्	विश्लेषणम्	पदम्	विश्लेषणम्
महर्षीणाम्	महर्षि–इका.पुं.ष.बहु.समस्तम्	अक्षरम्	अक्षर–अका.नपुं.प्र.एक.विशेष्यं विधेयम्
भृगुः	भृगु–उका.पुं.प्र.एक.विधेयम्	यज्ञानाम्	यज्ञ–अका.पुं.ष.बहु.
अहम्	अस्मद्–दका.प्र.एक.सर्व.उद्देश्यम्	जपयज्ञः	जपयज्ञ–अका.पुं.प्र.एक.समस्तं विधेयम्
गिराम्	गिर्–रका.स्त्री.ष.बहु.	अस्मि	अस्+लट् उपु.एक.अदादि कर्तरि परस्मैपदम्
अस्मि	अस्+लट् उपु.एक.अदादि कर्तरि परस्मैपदम्	स्थावराणाम्	स्थावर–अका.नपुं.ष.बहु.
एकम्	एक–अका.नपुं.प्र.एक.विशेषणम्	हिमालयः	हिमालय अका.पुं.प्र.एक.समस्तं विधेयम्

वर्गीकरणाभ्यासः

अधस्तनेषु वर्गेषु श्लोकपदानि लिखतु–

(i) प्रथमान्तम् (६) ....

(ii) षष्ठ्यन्तम् (४) ....

(iii) अकारान्तम् (६) ....

(iv) इकारान्तम् (१) ....

(v) उकारान्तम् (१) ....

(vi) रेकान्तम् (१) ....

(vii) पुंलिङ्गम् (५) ....

(viii) स्त्रीलिङ्गम् (१) ....

(ix) नपुंसकम् (३) ....

(x) सर्वनाम (२) ....

(xi) क्रियापदम् (२) ....

(xii) उद्देश्यम् (१) ....

(xiii) विधेयम् (४) ....

(xiv) विशेष्यम् (१) ....

(xv) विशेष्यम् (१) ....

(xvi) उद्देश्यविधेये विशेष्यविशेषणे सहैव लिखतु।

आकाङ्क्षाविस्तरः

अस्मि (= भवामि)।

कः अस्ति?	**अहम् अस्मि।**	
अहं कः अस्मि?	....	(उका. प्र.)
अहं केषां मध्ये भृगुः अस्मि?	....	(इका. ष.)
पुनश्चाहं किम् अस्मि?	....	(अका. नपुं. प्र.)
अहं किम् अक्षरम् अस्मि?	....	(अका. नपुं. सर्व.)
केषां मध्ये एकम् अक्षरम् अस्मि?	....	(रका. ष.)
पुनश्चाहं कः अस्मि?	....	(अका. पुं. प्र.)
अहं केषां मध्ये जपयज्ञः अस्मि?	....	(अका. ष.)

पुनश्चाहं क: अस्मि? .... (अका. पुं. प्र.)

अहं केषां मध्ये हिमालय: अस्मि? .... (अका. नपुं. ष.)

पदार्थ:

पदम्	संस्कृतम्	हिन्दी
अहम्	अहम् (उत्तमपुरुष: श्रीकृष्ण:)	मैं (वासुदेव)
महर्षीणाम्	महामुनीनाम्	महर्षियों में
भृगु:	भृगुनामा	भृगु ऋषि
गिराम्	पदलक्षणानां वाचां मध्ये	वाणी के शब्दों में
एकम्	अद्वितीयम् ॐकार:	एक (ओङ्कार)
अक्षरम्	वर्ण: पदं वा	अक्षर
अस्मि	वर्ते	हूँ
यज्ञानाम्	श्रौतस्मार्तानां	सभी यज्ञों में
जपयज्ञ:	जपरूप: यज्ञ:	जप-यज्ञ
स्थावराणाम्	स्थितिशीलानां मध्ये	स्थायी पदार्थों में
हिमालय:	हिमवान् पर्वत:	हिमालय
अस्मि	विद्ये	हूँ।

भावार्थ:

संस्कृतम्–अनेन श्लोकेन महर्षि-प्रभृतिषु भगवत्तेजोविशेषयुक्तं प्रधानं परिगणयति–

अहं परमात्मा वासुदेव: महर्षीणां ब्रह्मण: मानसपुत्राणां दशानां मध्ये अतितेजस्वित्वाद् भृगुनामा ऋषिरस्मि। असौ भृगु: स्वायम्भुवे चाक्षुषे च मन्वन्तरे सप्तर्षिषु अन्यतम: प्रधानम्। अस्य वंश्या: गोत्रप्रवर्तका मन्त्रद्रष्टारश्च बभूवु:। अस्य पदचिह्नं विष्णु: स्ववक्षसि धारयति। वर्णपदवाक्यरूपाणां गिरां मध्येऽहं श्रीकृष्ण: ओङ्कार: प्रणव: स्फोटरूप: अक्षरम् अस्मि। 'ॐ' इत्येकं प्रधानम् अक्षरम्, यतोहि अस्मादेव सर्वे वर्णा: उत्पेदिरे। अत एव न क्षरतीति अक्षरं स्फोट: इत्युच्यते। श्रुतिषु प्रतिपादिता: केचन राजसूयवाजपेयादय: श्रौतयज्ञा:, स्मृतिषु प्रोक्ता: दर्शपौर्णमासादयो बहव: स्मार्तयज्ञा: सन्ति। तेषु सर्वेषु यागेषु अहं परमात्मा हिंसाशून्यत्वात् जपयज्ञोऽस्मि। अथ च स्थिरपदार्थ: एव स्थावर: पर्वतादि:, अचलत्वात्। तेषु स्थावरेषु हिमालय: परमात्मविभूति:, यतोहि पर्वतेषु उन्नत:, ऋषीणां मुनीनां किं च नरनारायणस्य तप:स्थली च। अत: अहं परमेश्वर: हिमालय: अस्मि-इत्युक्तम्।

हिन्दी–इस श्लोक में भगवान् ने महर्षि आदि में अपने विशेष तेजस् का उल्लेख किया है–

ब्रह्मा जी के दस मानस पुत्रों को महर्षि कहते हैं। उनमें मैं (परमात्मा) अतितेजस्वी होने के कारण भृगु ऋषि हूँ। ब्रह्माजी के दस मानस पुत्र–भृगु, मरीचि, अत्रि, अङ्गिरा, पुलह, क्रतु, मनु, दक्ष, वसिष्ठ और पुलस्त्य। इनमें भृगु प्रधान हैं। वे सप्तर्षियों में भी गिने जाते हैं। इनके वंशज गोत्र प्रवर्तक एवं मन्त्रद्रष्टा रहे हैं। इन्होंने सत्त्व की परीक्षा के लिए विष्णु के वक्षःस्थल पर लात मारी थी, जिस चिह्न को भगवान् विष्णु धारण किये रहते हैं।

वर्ण, पद एवं वाक्य रूप वाणी में परमात्मा एक ओङ्कार अक्षर है। उस प्रणव अक्षर से 'ॐ' का बोध होता है। वह सभी वर्णों का उत्पादक होने से प्रधान है और अविनाशी होने से स्फोट रूप अक्षर है।

वेदों में अनेक प्रकार के राजसूय-वाजपेय आदि यज्ञ प्रतिपादित हैं और स्मृतियों में भी पर्व-पर्व पर अनुष्ठेय दर्शपौर्णमासादि यज्ञ निर्दिष्ट हैं। वे सभी बहुत जटिल और अविशुद्धि युक्त हैं, अतः भगवान् ने सरलतम जपयज्ञ को अपना स्वरूप बतलाया है। मन्त्र-जप या नाम-जप की महिमा पुराणों में वर्णित है।

स्थिर पदार्थों को स्थावर कहते हैं। उनमें प्रधनतया पर्वत आते हैं। पर्वतों में भगवान् ने हिमालय पर्वत को अपना स्वरूप बताया है, क्योंकि वह सबसे ऊँचा परम पवित्र तपःस्थली है।

अवबोधाभ्यासः

अधस्तनान् प्रश्नान् उत्तरयतु–

१. इह श्लोके केषु-केषु भगवतो विशिष्टं तेजः निर्दिष्टम्? ....

२. के महर्षयः कति च ते? ....

३. भृगु कस्य वक्षसि किं ज्ञातुं लत्तया अहनत्? ....

४. गिरां स्वरूपं किम्? ....

५. ॐकारः कथं प्रधानम्? ....

६. जपयज्ञः कथं प्रधानम्? ....

७. जपयज्ञः श्रौतः स्मार्तः पौराणिको वा? ....

८. हिमालयस्य प्राधान्ये किं कारणम्? ....

व्याकरणाभ्यासः

(अ) सन्धिः

१. महर्षीणाम् – महा + ऋषीणाम् – गुणसन्धिः
२. अस्म्येकम् – अस्मि + एकम् – यण्सन्धिः
३. हिमालयः – हिम + आलयः – दीर्घसन्धिः
४. यज्ञोऽस्मि – यज्ञः + अस्मि – विसर्गसन्धिः पूर्वरूपश्च
५. भृगुरहम् – भृगुः + अहम् – विसर्गसन्धिः
६. महर्षीणां भृगुः – महर्षीणाम् + भृगुः – अनुस्वारसन्धिः
७. अहं गिराम् – अहम् + गिराम् – अनुस्वारसन्धिः
८. यज्ञानां जप – यज्ञानाम् + जप – अनुस्वारसन्धिः
९. स्थावराणां हिमालयः– स्थावराणाम् + हिमालयः – अनुस्वारसन्धिः

अधस्तनेषु रेखाङ्कितपदेषु सन्धिच्छेदं करोतु–

(i) सुस्थिरासनमासादयेत्। ....
(ii) सर्वतौ पुष्टयति लता कानने। ....
(iii) न मय्यनाशिते भुङ्क्ते। ....
(iv) नास्नाते स्नाति मत्परा। ....
(v) शीतोष्णवातवर्षाणि क्षुत्पिपासे प्रियाप्रिये। ....
(vi) वैदर्भी मदिरेक्षणा। ....
(vii) अहं च त्वं च सखायौ मानसायनौ। ....
(viii) आस्ते स्थाणुरिव स्थिरः। ....
(ix) यतः क्षेमो नृणामिह। ....
(x) प्रचेतोभिरभिष्टुतो हरिः। ....
(xi) आविष्कृतोऽभिनवो ज्ञानमार्गः। ....

(आ) समासः

१. महर्षीणाम् – महान्तश्चामी ऋषयश्च = महर्षयः, तेषाम् – कर्मधारयः
२. जपयज्ञः – जपः एव यज्ञः – कर्मधारयः

३. हिमालयः – हिमस्य आलयः – षष्ठीतत्पुरुषः

४. अक्षरम् – न क्षरम् – नञ्न्तत्पुरुषः

अधस्तनेषु रेखाङ्कितपदेषु विग्रहं समासं च करोतु–

(i) कर्मबन्धः पराभवः।

(ii) उत्तमश्लोकपादयोः पुंसाम् अभिनिवेशः।

(iii) असंशयं शत्रुरयं प्रवृद्धः।

(iv) कृतमनेन आप्रियम् अप्रमेयम्।

(v) असह्यं खलु कृत्यमिदम्।

(vi) प्रियव्रतः परमभागवतः।

(vii) अल्पगुणोदयोऽपि तत्प्रसादायालम्।

(इ) क्रियाकारकसम्बन्धः

अस्मि	–	कर्तरि क्रिया	अस्मि	–	कर्तरि क्रिया
अहम्	–	कर्ता	अहम्	–	आक्षिप्तः कर्ता
भृगुः	–	कर्तृविशेषणम्	जपयज्ञः	–	कर्तृविशेषणम्
महर्षीणाम्	–	निर्धारणषष्ठी	यज्ञानाम्	–	निर्धारणषष्ठी
अक्षरम्	–	कर्तृविशेषणम्	हिमालयः	–	कर्तृविशेषणम्
एकम्	–	कर्तृविशेषणम्	स्थावराणाम्	–	निर्धारणषष्ठी
गिराम्	–	निर्धारणषष्ठी			

(ई) पर्यायशब्दः

हिमालयः – १. हिमवान् (हिमवत्, तका. पुं.), २. नगाधिराजः (अका. पुं.), ३. हिमाद्रिः (इका. पुं.)

स्थावरः – १. जङ्गमेतरः (अका. त्रिलि.), २. अचरः (अका. त्रिलि.), ३. अचलः (अका. त्रिलि.), ४. स्थास्नुः (उका. त्रिलि.)

गीः – १. वाक् (वाच्, चका. स्त्री.), २. वाणी (ईका. स्त्री.), ३. भाषा (आका. स्त्री.)

◆◆◆

५८. श्लोकः

अश्वत्थः सर्ववृक्षाणां देवर्षीणां च नारदः।
गन्धर्वाणां चित्ररथः सिद्धानां कपिलो मुनिः।।(भ. गी. १०.२६)

पदच्छेदः

अश्वत्थः, सर्व-वृक्षाणाम्, देव+ऋषीणाम्, च, नारदः।
गन्धर्वाणाम्, चित्र-रथः, सिद्धानाम्, कपिलः, मुनिः।।

पदच्छेदाभ्यासः

अधस्तनेषु पदेषु सन्धिच्छेदं करोतु–

(i) देवर्षीणाम् – ....

(ii) कपिलो मुनिः – ....

(iii) देवर्षीणां च – ....

(iv) सिद्धानां कपिलः – ....

पदपरिचयः

पदम्	विश्लेषणम्	पदम्	विश्लेषणम्
अश्वत्थः	अश्वत्थ–अका.पुं.प्र.एक.विधेयम्	गन्धर्वाणाम्	गन्धर्व–अका.पुं.ष.बहु.
सर्ववृक्षाणाम्	सर्ववृक्ष–अका.पुं.ष.बहु.समस्तम्	चित्ररथः	चित्ररथ–अका.पुं.प्र.एक.समस्तं विधेयम्
देवर्षीणाम्	देवर्षि–इका.पुं.ष.बहु.समस्तम्	सिद्धानाम्	सिद्ध–अका.पुं.ष.बहु.
च	अव्ययम्	कपिलः	कपिल–अका.पुं.प्र.एक.विधेयम्
नारदः	नारद–अका.पुं.प्र.एक.विधेयम्	मुनिः	मुनि–इका.पुं.प्र.एक.विशेषणम्

वर्गीकरणाभ्यासः

अधस्तनेषु वर्गेषु श्लोकपदानि विभजतु–

(i) प्रथमान्तम् (५) ....

(ii) षष्ठ्यन्तम् (४) ....

(iii) अकारान्तम् (७) ....

(iv) इकारान्तम् (२) ....

(v) पुंलिङ्गम् (९) ....

(vi) अव्ययम् (१) ....

(vii) समस्तम् (३) ....

(viii) विधेयम् (४) ....

(ix) विशेषणम् (१) ....

आकाङ्क्षाविस्तरः

अहम् अस्मि।

अहं कः अस्मि? .... (अका. प्र.)

अहं केषां मध्ये अश्वत्थः अस्मि? .... (अका. ष.)

पुनश्चाहं कः अस्मि? .... (अका. प्र.)

अहं केषां मध्ये नारदः अस्मि? .... (इका. ष.)

पुनश्चाहं कः अस्मि? .... (अका. प्र.)

अहं केषां मध्ये चित्ररथः अस्मि? .... (अका. ष.)

अहं पुनश्च कः अस्मि? .... (अका. प्र.)

अहं कः कपिलः अस्मि? .... (इका. प्र.)

अहं केषां मध्ये मुनिः कपिलः अस्मि? .... (अका. ष.)

अहं सिद्धानां कपिलः मुनिः अस्मि।

पदार्थः

पदम्	संस्कृतम्	हिन्दी
(अहम्)	(अहम्)	(मैं)
सर्ववृक्षाणाम्	सर्वेषां तरूणां मध्ये	सभी वृक्षों में
अश्वत्थः	पिप्पलः	पीपल
देवर्षीणाम्	देवेषु मन्त्रद्रष्टृणाम्	देवर्षियों में ऋषीणां मध्ये

नारदः	नारदो नाम	नारद
गन्धर्वाणाम्	देवगायकानां मध्ये	गन्धर्वों में
चित्ररथः	चित्ररथ नामा	चित्ररथ
सिद्धानाम्	जन्मतः प्राप्तसिद्धीनां मध्ये	सिद्धपुरुषों में
च	तथा	और
कपिलः	कपिलाख्यः	कपिल
मुनिः	ज्ञानी	मुनि
(अस्मि)	(विधे)	(हूँ)

भावार्थः

संस्कृतम्–भगवान् अनेन श्लोकेन वृक्षादिषु प्रधानं स्वस्वरूपं निर्दिशति–

सर्वेषां लतागुल्मौषधीनां मध्ये अश्वत्थः (=पिप्पलवृक्षः) प्रधानम्। तस्य प्रत्येकस्मिन् अवयवे भगवतो निवासः। तस्य प्रतिभागं फलपत्रत्वगादिकं रोगहरमिति आयुर्वेदे। अत एव स भगवत्स्वरूपः उक्तः।

देवाः सन्तः ये मन्त्रद्रष्टारः, ते देवर्षयः सर्वलोकगामिनः अव्याहतगतयो भवन्ति। तेषु केषाञ्चन नामानि धर्मपुत्रौ नरनारायणौ, क्रतुपुत्राः षष्टि सहस्राणि बालखिल्याः कर्दमः, पर्वतः, नारदः, असितः, देवलः, व्यासः इत्यादीनि। एतेषां देवर्षीणां मध्ये 'नारदः' भगवत्स्वरूपः, लोककल्याणे निरतत्वात्।

गन्धर्वः देवयोनिविशेषः। गान-वाद्य-नाट्याभिनयेषु निपुणाः एते गन्धर्वाः गुह्यक-विद्याधरलोकयोर्मध्ये गन्धर्वलोके निवसन्ति। तेषु हाहाः, हूहूः, विश्वावसुः, तुम्बुरुः, चित्ररथनामानो मुख्याः सन्ति। तेषाम् अधिपतिः चित्ररथः भगवत्स्वरूपः, अत एव भगवान् एनं स्वस्वरूपं दर्शयामास। महाभारतस्य आदिपर्वणि पुराणेषु च अस्य चरितं वर्णितम्।

जन्मतः एव अणिमादिसिद्धियुक्ताः सहस्रशः सिद्धाः पुरुषाः जगति प्रसिद्धाः, पुराणादिषु परिकीर्तिताश्च सन्ति। तेषु कपिलमुनिः साक्षाद् ईश्वरस्यावतारः भगवत्स्वरूपो बभूव। स हि कर्दमभार्यायां देवहूत्यां जन्म गृहीत्वा मातरं सांख्यशास्त्रज्ञानम् उपदिदेश।

हिन्दी–भगवान् ने इस श्लोक से वृक्षादि में प्रधान को अपना स्वरूप बताया है–

सभी प्रकार की वनस्पति, लता, वृक्ष आदि में पीपल वृक्ष प्रधान है, क्योंकि उसकी जड़, तना, शाखा, पत्ते आदि सभी अंगों में भगवान् का निवास है (स्कन्द पुराण)। उसका पत्ता, फल एवं छाल अनेक रोगों को दूर करते हैं। अतः उसे यहाँ भगवान् ने अपना स्वरूप बताया है।

जो देवता होकर भी वेद-मन्त्रों के द्रष्टा हैं, उन्हें देवर्षि कहते हैं। नर, नारायण, साठ हजार बालखिल्य ऋषि, कर्दम, पर्वत, नारद, असित, देवल, व्यास आदि देवर्षि कहे गये हैं। भगवान् ने इनमें नारद को अपना स्वरूप कहा है। वे सदा लोक कल्याण में तत्पर रहते हैं, अतः इनमें प्रधान हैं।

गुह्यकलोक और विद्याधरलोक के मध्य गन्धर्वलोक है, जिसमें गान, वाद्य एवं नाट्य में निपुण गन्धर्व निवास करते हैं। उनमें हाहा, हूहू, विश्वावसु, तुम्बुरु, चित्ररथ आदि प्रधान हैं। गन्धर्वलोक के राजा चित्ररथ हैं। भगवान् ने उन्हें अपना स्वरूप माना है और उन्हें दर्शन भी दिया है।

अणिमा आदि आठों सिद्धियाँ तथा नवों निधियाँ जिन्हें जन्म से ही प्राप्त होती हैं, उन्हें सिद्ध कहते हैं। संसार में हजारों सिद्ध हुए हैं, उनमें कपिल मुनि भगवान् के साक्षात् स्वरूप और अवतार हैं। भगवान् ने स्वयं कर्दम मुनि की भार्या देवहूति के गर्भ से कपिल के रूप में अवतार लिया और अपनी माता को सांख्यशास्त्र के ज्ञान का उपदेश दिया था।

अवबोधाभ्यासः

अधस्तनान् प्रश्नान् उत्तरयतु-

१. अस्मिन् श्लोके के भगवत्स्वरूपाः कथिताः? ....

२. अश्वत्थः कथं प्रधानम्? ....

३. के देवर्षयो भवन्ति? ....

४. केषाञ्चन देवर्षीणां नामानि लिखतु। ....

५. गन्धर्वाणां निवासः कुत्र? ....

६. गन्धर्वाः कुत्र निपुणा भवन्ति? ....

७. केषाञ्चिद् गन्धर्वाणां नामानि लिखतु? ....

८. के सिद्धा उच्यन्ते? ....

९. कपिलस्य मातुः किं नाम? ....

१०. कपिलः मातरं किम् उपदिष्टवान्? ....

व्याकरणाभ्यासः

(अ) सन्धिः

१. देवर्षीणाम् - देव + ऋषीणाम् - गुणसन्धिः

२. कपिलो मुनिः - कपिलः + मुनिः - विसर्गसन्धिः

३. सिद्धानां कपिलः - सिद्धानाम् + कपिलः - अनुस्वारसन्धिः

४. गन्धर्वाणां चित्ररथः - गन्धर्वाणाम् + चित्ररथः - अनुस्वारसन्धिः

५. देवर्षीणां च - देवर्षीणाम् + च - अनुस्वारसन्धिः

६. वृक्षाणां देव - वृक्षाणाम् + देव - अनुस्वारसन्धिः

अधस्तनेषु रेखाङ्कितपदेषु सन्धिं करोतु–

(i) देव+ऋणम् अर्पयति। ....

(ii) विप्र + ऋषे! गीताम् + पाठ्य। ....

(iii) सागरः + येन निर्मितः। ....

(iv) यतः + यस्याखण्डाकार व्याप्तिः। ....

(v) गर्हितकर्मणा अधः + याति। ....

(vi) ताम् + शिंशपाम् + समावृता। ....

(vii) दुर्लभम् + खलु जीवनम्। ....

(आ) समासः

१. सर्ववृक्षाणाम् - सर्वे च ते वृक्षाः = सर्ववृक्षाः, तेषाम् - कर्मधारयः

२. देवर्षीणाम् - देवाश्च ते ऋषयश्च = देवर्षयः, तेषाम् - कर्मधारयः

३. चित्ररथः - चित्रः रथः यस्य सः - बहुव्रीहिः

अधस्तनेषु रेखाङ्कितपदेषु समासं विग्रहं च करोतु–

(i) निर्जितसपत्नो वीरः गृहमुपजगाम।

(ii) आत्मनि कृतपरिचयाः मुनयः उपदिशन्ति।

(iii) सुललितशब्देन को न तृप्यति।

(iv) तिग्मदन्तैः कुक्कुरी प्रहरति।

(v) महर्षयो नित्यमङ्गलं वितन्वते।

(vi) व्यासस्य वचनामृतं पिबन्ति।

(vii) आमीलितनयनो गुरुरवोचत्।

(इ) कृत्प्रत्ययः

१. नारदः - नारं (= ज्ञानं) ददाति - नार + दा + क (अ) = नारद

२. देवर्षिः - देवम् ऋषति - देव + ऋष् + इ = देवर्षि

३. मुनिः - मननात् मुनिः - मन् + इ = मुनि

अधस्तनेभ्यः प्रकृतिप्रत्ययेभ्यः निष्पन्नं पदं वाक्ये प्रयुङ्क्ताम्–

(i) ज्ञान + दा + क - ....

(ii) मोक्ष + दा + क - ....

(iii) पर्वत + स्था + क - ....

(iv) पाणि + स्था + क - ....

(v) फल + दा + क - ....

(ई) क्रियाकारकसम्बन्धः

अस्मि	-	आक्षिप्ता क्रिया	चित्ररथः	-	कर्तृविशेषणम्
अहम्	-	आक्षिप्तः कर्ता	गन्धर्वाणाम्	-	निर्धारणषष्ठी
अश्वत्थः	-	कर्तृविशेषणम्	कपिलः	-	कर्तृविशेषणम्
सर्ववृक्षाणाम्	-	निर्धारणषष्ठी	मुनिः	-	कर्तृविशेषणविशेषणम्
नारदः	-	कर्तृविशेषणम्	सिद्धानाम्	-	निर्धारणषष्ठी
देवर्षीणाम्	-	निर्धारणषष्ठी	च	-	समुच्चयार्थे

(उ) पर्यायशब्दः

१. अश्वत्थः - १. बोधिद्रुमः (अका. पुं.), २. चलदलः (अका. पुं.), ३. पिप्पलः (अका. पुं.), ४. कुञ्जराशनः (अका. पुं.)

२. वृक्षः - १. महीरुहः (अका. पुं), २. शाखी (शाखिन् नका. पुं), ३. पादपः (अका. पुं), ४. तरुः (अका. पुं), ५. द्रुमः (अका. पुं), ६. विटपी (विटपिन्, नका. पुं)

३. गन्धर्वः - १. देवगायकः (अका. पुं.), २. देवगायनः (अका. पुं.), ३. गान्धर्वः (अका. पुं.), ४. दिव्यगातुः (उका. पुं.)

४. मुनिः - १. वाचंयमः (अका. पुं), २. तापसः (अका. पुं), ३. तपस्वी (तपस्विन् नका. पुं)

◆◆◆

५९. श्लोकः

उच्चैःश्रवसमश्वानां विद्धि माममृतोद्भवम्।
ऐरावतं गजेन्द्राणां नराणां च नराधिपम्।।(भ. गी. १०.२७)

पदच्छेदः

उच्चैः-श्रवसम्, अश्वानाम्, विद्धि, माम्, अमृत+उद्भवम्।
ऐरावतम्, गज+इन्द्राणाम्, नराणाम्, च, नर+अधिपम्।।

पदच्छेदाभ्यासः

अधस्तनेषु पदेषु सन्धिच्छेदं करोतु–

(i) अश्वानां विद्धि – ....

(ii) अमृतोद्भवम् – ....

(iii) गजेन्द्राणाम् – ....

(iv) नराणां च – ....

(v) नराधिपम् – ....

पदपरिचयः

पदम्	विश्लेषणम्	पदम्	विश्लेषणम्
उच्चैःश्रवसम्	उच्चैःश्रवस्-सका.पुं.द्वि.एक. समस्तं विधेयं विशेष्यम्	ऐरावतम्	ऐरावत-अका.पुं.द्विती.एक.विधेयं विशेष्यम्
अश्वानाम्	अश्व-अका.पुं.ष.बहु.	गजेन्द्राणाम्	गजेन्द्र-अका.पुं.ष.बहु.समस्तम्
विद्धि	विद्+लोट् मपु.एक.अदादि कर्तरि परस्मैपदम्	नराणाम्	नर-अका.पुं.ष.बहु.
माम्	अस्मद्-दका.द्विती.एक.सर्व.उद्देश्यम्	च	अव्ययम्
अमृतोद्भवम्	अमृतोद्भव-अका.पुं.द्विती.एक. समस्तं विशेषणम्	नराधिपम्	नराधिप-अका.पुं.द्विती.एक.समस्तं विधेयम्

वर्गीकरणाभ्यासः

अधस्तनेषु वर्गेषु श्लोकपदानि लिखतु–

(i) प्रथमान्तम् (५) ....

(ii) षष्ठ्यन्तम् (३) ....

(iii) अकारान्तम् (६) ....

(iv) सकारान्तम् (१) ....

(v) पुंलिङ्गम् (७) ....

(vi) अव्ययम् (१) ....

(vii) सर्वनाम (१) ....

(viii) क्रियापदम् (१) ....

(ix) उद्देश्यम् (१) ....

(x) विधेयम् (३) ....

(xi) विशेषणम् (१) ....

(xii) विशेष्यम् (२) ....

(xiii) विधेयानाम् उद्देश्यं विशेषणस्य विशेष्यद्वयं च लिखतु।

आकाङ्क्षाविस्तरः

विद्धि (= जानीहि)।

हे पार्थ! त्वं विद्धि।

त्वं कं विद्धि? .... (सर्व. द्विती.)

मां कीदृशं विद्धि? .... (सका. द्विती.)

मां कीदृशम् उच्चैःश्रवसं विद्धि? .... (अका. द्विती. समस्तम्)

मां केषां मध्ये अमृतोद्भवम् उच्चैःश्रवसं विद्धि? .... (अका. ष.)

पुनश्च मां कीदृशं विद्धि? .... (अका. द्विती.)

मां कीदृशम् ऐरावतं विद्धि? .... (अका. द्विती. समस्तम्)

मां केषां मध्ये अमृतोद्भवम् ऐरावतं विद्धि? .... (अका. ष. समस्तम्)

पुनश्च मां कीदृशं विद्धि? .... (अका. द्विती. समस्तम्)

मां केषां मध्ये नराधिपं विद्धि? .... (अका. ष.)

नराणां नराधिपं च विद्धि।

पदार्थः

पदम्	संस्कृतम्	हिन्दी
माम्	(हे पार्थ! त्वम्) माम् (श्रीकृष्णम्)	(हे अर्जुन! तुम) मुझ (वासुदेव श्रीकृष्ण) को
अश्वानाम्	घोटकानां मध्ये	घोड़ों में
अमृतोद्भवम्	अमृतार्थं समुद्र-मथनाद् उद्भूतम्	अमृत के लिए समुद्र-मन्थन से उत्पन्न
उच्चैःश्रवसम्	उच्चैःश्रवसाख्यम् अश्वम्	उच्चैःश्रवा नामक घोड़ा
गजेन्द्राणाम्	गजराजानां मध्ये (अमृतोद्भवम्)	(गजराजों में (अमृतमन्थन के समय उत्पन्न)
ऐरावतम्	ऐरावतनामकं गजराजम्	ऐरावत नामक गजराज
नराणाम्	मनुष्याणां मध्ये	मनुष्यों में
च	तथा	और
नराधिपम्	राजानम्	राजा
विद्धि	अवगच्छ	जानो।

भावार्थः

संस्कृतम्—श्लोकेऽस्मिन् भगवान् श्रीकृष्णः अश्वादिषु स्वविशिष्टं प्रधानं निर्दिशति—

यदा देवासुराः अमृतप्राप्तये मिलित्वा समुद्रम् अमथ्नन् तदा विषनिर्गमनात् परम् अमृताच्च पूर्वम् उच्चैःश्रवा नामाश्वः, ऐरावतनामको गजराजश्च उदपद्येताम्। तयोः अश्वम् असुराधिपः बलिः ऐरावतं च देवाधिपः इन्द्रः प्राप्नुताम्। उभावपि तौ भगवतो विशिष्टांशौ स्व-स्ववर्गे प्रमुखौ भगवद्विभूती स्तः। एवमेव हे पार्थ! त्वं मां वासुदेवं लोकानां जनानां मध्ये राजानं मन्यस्व। राजा स्वधर्मम् अनुपालयन् स्वप्रजाः पापान्निवारयति, धर्मे प्रवर्तयति, सर्वथा परिपालयति च। तस्माद् मनुष्येषु श्रेष्ठः स भगवद्विभूतिः एव मन्तव्यः इति भावः।

हिन्दी—इस श्लोक में भगवान् श्रीकृष्ण ने अश्वादि समुदाय में अपने विशिष्टांश से युक्त प्रधान का निर्देश किया है।

जब देव और असुर अमृत-प्राप्ति के लिए एक-साथ मिलकर समुद्र-मन्थन कर रहे थे तब सबसे पहले विष निकला। उसके बाद अमृत निकलने से पूर्व उच्चैःश्रवा नामक घोड़ा और ऐरावत हाथी निकला था। उनमें घोड़े को असुरों के राजा बलि ने तथा हाथी को देवों के राजा इन्द्र ने प्राप्त

किया था। वे दोनों विशिष्ट तेजस् से युक्त भगवद्-विभूति हैं, अतः यहाँ श्रीकृष्ण ने उन्हें अपना स्वरूप बताया है। उनमें उच्चैःश्रवा अश्वों में तथा ऐरावत गजराजों में प्रधान है। यहाँ भगवान् ने मनुष्यों में राजा को अपना स्वरूप कहा है, क्योंकि वह राजधर्म का पालन करते हुए अपनी प्रजा को पाप से दण्डादि विधान करके दूर करता है, सन्मार्ग में प्रवृत्त करता है और सब प्रकार से उनका पालन करता है। अतः वह राजा सब प्रकार से उनका पालन करता है। अतः वह राजा मनुष्यों में श्रेष्ठ भगवद्-विभूति है।

अवबोधाभ्यासः

अधस्तनान् प्रश्नान् उत्तरयतु–

१. इह श्लोके केषां प्राधान्यमुक्तम्? ....

२. उच्चैःश्रवाः कुतः प्रादुर्भूतः? ....

३. उच्चैःश्रवसं कः प्राप्नोत्? ....

४. ऐरावतः कस्मान्निर्गतः? ....

५. ऐरावतं को लेभे? ....

६. राज्ञः प्राधान्यस्य किं कारणम्? ....

व्याकरणाभ्यासः

(अ) सन्धिः

१. अमृतोद्भवम् – अमृत + उद्भवम् – गुणसन्धिः

२. गजेन्द्राणाम् – गज + इन्द्राणाम् – गुणसन्धिः

३. नराधिपम् – नर + अधिपम् – दीर्घसन्धिः

४. अश्वानां विद्धि – अश्वानाम् + विद्धि – अनुस्वारसन्धिः

५. ऐरावतं गजेन्द्राणाम् – ऐरावतम् + गजेन्द्राणाम् – अनुस्वारसन्धिः

६. गजेन्द्राणां नराणाम् – गजेन्द्राणाम् + नराणाम् – अनुस्वारसन्धिः

७. नराणां च – नराणाम् + च – अनुस्वारसन्धिः

अधस्तनेषु रेखाङ्कितपदेषु सन्धिं विसन्धिं वा करोतु–

(i) तत्रांशेनावतीर्णस्य विष्णोः वीर्याणि शंस नः। ....

(ii) अस्त्रविप्लुष्टम् + मदङ्गम् + समुपाचरत्। ....

(iii) त्यक्त + उदमपि क्षुत् माम् + न बाधते। ....

(iv) स ईश्वरेश्वरः उर्व्याः भरं क्षपयेत्। ....

(v) एषा बाला तव पुत्रिका + उपमा। ....

(vi) यावद्बुद्धिबलोदयं मृत्युः अपोह्यः। ....

(vii) वसुदेवोऽपि तम् + प्रशस्य गृहम् + प्राविशत्। ....

(आ) समासः

१. उच्चैःश्रवसम् - उच्चैः श्रवसी यस्य तम् - बहुव्रीहिः

२. अमृतोद्भवम् - अमृतमेव उद्भवः यस्य तम् - बहुव्रीहिः

३. गजेन्द्राणाम् - गजानाम् इन्द्राः गजेन्द्राः, तेषाम् - षष्ठीतत्पुरुषः

४. नराधिपम् - नराणाम् अधिपः, तम् - षष्ठीतत्पुरुषः

अधस्तनेषु रेखाङ्कितपदेषु समासं विग्रहं च लिखतु–

(i) तस्मिन् बलिः स्पृहां चक्रे नेन्द्रः ईश्वरशिक्षया। ....

(ii) तत उच्चैःश्रवा नाम हयोऽभूत् चन्द्रपाण्डुरः। ....

(iii) तत ऐरावतो नाम वारणेन्द्रो विनिर्गतः। ....

(iv) श्वेताद्रेः भगवतो महिम् अहरत्। ....

(v) ततोऽभवत् पारिजातः सुरलोकविभूषणम्। ....

(vi) ततश्चाप्सरसो जाता निष्ककण्ठ्यः सुवाससः। ....

(vii) हेमकुम्भैः जलमानीतवान्। ....

(इ) तद्धितप्रत्ययः

ऐरावतम् - इरावत्याः अपत्यं पुमान् - इरावती + अण् = ऐरावतः

अधस्तनेभ्यः प्रकृतिप्रत्ययेभ्यः निष्पन्नं रूपं वाक्ये व्यवहरतु–

(i) इक्षुमती + अण् - ....

(ii) सावित्री + अण् - ....

(iii) गायत्री + अण् - ....

(iv) चित्रगु + अण् - ....

(v) तर्कु + अण् - ....

(vi) कलिङ्ग + अण् - ....

(vii) मगध + अण् - ....

(ई) कृत्प्रत्ययः

अमृतम् - मृ + क्त = मृतम्, नमृतम् = अमृतम्

अधस्तनेभ्यः प्रकृतिप्रत्ययेभ्यः निष्पन्नं रूपं वाक्ये व्यवहरतु–

(i) अर्च् + क्त - ....

(ii) अञ्च् + क्त - ....

(iii) अर्ज् + क्त - ....

(iv) अद्+ क्त - ....

(v) अर्ह् + क्त - ....

(vi) अश् + क्त - ....

(vii) अञ्ज् + क्त - ....

(उ) क्रियाकारकसम्बन्धः

विद्धि	- कर्तरि क्रिया	ऐरावतम्	- कर्मविशेषणम्
त्वम्	- आक्षिप्तः कर्ता	गजेन्द्राणाम्	- निर्धारणषष्ठी
माम्	- कर्म	नराधिपम्	- कर्मविशेषणम्
उच्चैःश्रवसम्	- कर्मविशेषणम्	नराणाम्	- निर्धारणषष्ठी
अमृतोद्भवम्	- कर्मविशेषणविशेषणम्	च	- समुच्चयार्थे
अश्वानाम्	- निर्धारणषष्ठी		

(ऊ) पर्यायशब्दः

१. **अश्वः** - १. घोटकः (अका. पुं.) २. तुरगः (अका. पुं.), ३. तुरङ्गः (अका. पुं.), ४. तुरङ्गमः (अका. पुं.), ५. वाजी (वाजिन् नका. पुं.), ६. अर्वा (अर्वन् नका. पुं.), ७. हयः (अका. पुं.)

२. उद्भवः - १. उत्पत्तिः (इका. स्त्री.), २. जनिः (इका. स्त्री.), ३. जननम् (अका. नपुं.), ४. जनुः (जनुस् - सका. नपुं.), ५. जन्म (जन्मन् - नका. नपुं.)

३. गजः- १. हस्ती (हस्तिन् - नका. पुं.), २. दन्ती (दन्तिन् - नका. पुं.), ३. करी (करिन् - नका. पुं.), ४. द्विपः (अका. पुं.), ५. मतङ्गजः (अका. पुं.),

४. नरः - १. मनुष्यः (अका. पुं.), २. मानुषः (अका. पुं.), ३. मर्त्यः (अका. पुं.), ४. मानवः (अका. पुं.)

५. नराधिपः - १. राजा (राजन् - नका. पुं.), २. पार्थिवः (अका. पुं.), ३. नृपः (अका. पुं.), ४. भूपः (अका. पुं.)

◆◆◆

६०. श्लोकः

आयुधानामहं वज्रं धेनूनामस्मि कामधुक्।
प्रजनश्चास्मि कन्दर्पः सर्पाणामस्मि वासुकिः।।(भ. गी. १०.२८)

पदच्छेदः

आयुधानाम्, अहम्, वज्रम्, धेनूनाम्, अस्मि, कामधुक्।
प्रजनः, च, अस्मि, कन्दर्पः, सर्पाणाम्, अस्मि, वासुकिः।।

पदच्छेदाभ्यासः

अधस्तनेषु पदेषु विच्छेदं करोतु–

(i) चास्मि – ....

(ii) प्रजनश्च – ....

(iii) वज्रं धेनूनाम् – ....

(iv) अहं वज्रम् – ....

पदपरिचयः

पदम्	विश्लेषणम्	पदम्	विश्लेषणम्
आयुधानाम्	आयुध–अका.नपुं.ष.बहु.	प्रजनः	प्रजन–अका.पुं.प्र.एक.विशेषणम्
अहम्	अस्मद्–दका.प्र.एक.सर्व उद्देश्यम्	च	अव्ययम्
वज्रम्	वज्र–अका.नपुं.प्र.एक.विधेयम्	अस्मि	अस्+लट् उपु.एक.अदादि कर्तरि परस्मैपदम्
धेनूनाम्	धेनु–उका.स्त्री.ष.बहु.	सर्पाणाम्	सर्प अका.पुं.ष.बहु.
अस्मि	अस्+लट् उपु.एक.अदादि कर्तरि परस्मैपदम्	अस्मि	अस्+लट् उपु.एक.अदादि कर्तरि परस्मैपदम्
कामधुक्	कामदुह्–हका.स्त्री.प्र.एक.समस्तं विधेयम्	वासुकिः	वासुकि–इका.पुं.प्र.एक.विधेयम्

वर्गीकरणाभ्यासः

यथानिर्देशमधः श्लोकपदानि लिखन्तु–

(i) प्रथमान्तम् (६) ....

(ii) षष्ठ्यन्तम् (३) ....

(iii) अकारान्तम् (५) ....

(iv) इकारान्तम् (१) ....

(v) उकारान्तम् (१) ....

(vi) हकारान्तम् (१) ....

(vii) पुंलिङ्गम् (४) ....

(viii) स्त्रीलिङ्गम् (२) ....

(ix) नपुंसकम् (२) ....

(x) सर्वनाम (१) ....

(xi) अव्ययम् (१) ....

(xii) क्रियापदम् (३) ....

(xiii) विधेयम् (४) ....

(xiv) उद्देश्यम् (१) ....

(xvi) विशेष्यम् (१) ....

(xvii) उद्देश्यविधेये विशेष्य- ....
विशेषणे च सहैव लिखतु। ....

आकाङ्क्षाविस्तरः

अस्मि (= भवामि)।

कः अस्ति?	**अहम् अस्मि।**	
अहं किम् अस्मि?	....	(नपुं. प्र.)
अहं केषां मध्ये वज्रम् अस्मि?	....	(नपुं. ष.)
अहं पुनश्च का अस्मि?	....	(स्त्री. प्र.)
अहं कासां मध्ये कामधुक् अस्मि?	....	(स्त्री. ष.)
पुनश्चाहं कः अस्मि?	....	(पुं. प्र.)
अहं कीदृशः कन्दर्पः अस्मि?	....	(अका. पुं. प्र.)
पुनश्चाहं कः अस्मि?	....	(इका. प्र.)
अहं केषां मध्ये वासुकिः अस्मि?	....	(पुं. ष.)

पदार्थः

पदम्	संस्कृतम्	हिन्दी
अहम्	अहं (परमात्मा श्रीकृष्णः)	मैं (भगवान् श्रीकृष्ण)
आयुधानाम्	अस्त्राणां मध्ये	हथियारों में
वज्रम्	दधीच्यस्थिसम्भवं वज्रम्	वज्र
धेनूनाम्	दोग्ध्रीणां गवां मध्ये	दूध देने वाली गायों में
कामधुक्	कामधेनुः	कामधेनु
अस्मि	विद्ये	हूँ
प्रजनः	प्रजोत्पत्तिहेतुः	संतानोत्पादक
कन्दर्पः	कामः	काम
अस्मि	वर्ते	हूँ
सर्पाणाम्	भुजङ्गानां मध्ये	साँपों में
च	तथा	और
वासुकिः	वासुकिनामा	वासुकि नामक सर्प
अस्मि	भवामि	हूँ।

भावार्थः

संस्कृतम्—श्रीकृष्णोऽनेन आयुधादिषु स्वविभूतीः परिगणयति—

हे पार्थ! आयुधानां मध्येऽहं वज्रमस्मि। वज्रं हि महर्षिदधीचेः अस्थिनः निर्मितम्, अतः तत्र दधीचेः तपसः भगवतः तेजसश्च प्रभावात् तदमोघमस्त्रं परिकीर्तितम्। किञ्च तदेव इन्द्रस्य इन्द्रत्वम्, अतः स भगवतो विभूतिरस्ति। दुग्धदात्रीणां गवां मध्ये समुद्रमथनात् प्रादुर्भूता कामधेनुः भगवतो विभूतिः। यतो हि सा देवानां मनुष्याणां च सर्वान् कामान् दोग्धि, अतः गोषु श्रेष्ठा मता। शास्त्रोक्तरीत्या सन्तानोत्पत्ति–हेतुः प्रजनः इत्युच्यते। भगवान् कामानां मध्ये तादृशः संतानजनयिता धर्माविरुद्धः कामोऽस्ति। धर्मविरुद्धः विषयसुखहेतुः कामस्तु निकृष्टो हेयोऽवगन्तव्यः। अथ च भगवान् विषधराणां सर्पाणां मध्ये तेषां राजा वासुकिरस्ति। वासुकिः हि सर्पाणामधिपतिः भगवद्भक्तश्च, अतः सर्पेषु श्रेष्ठः भगवद्विभूतिर्मन्तव्यः।

हिन्दी—भगवान् श्रीकृष्ण ने इस श्लोक के द्वारा आयुधादि में अपनी विभूति का निर्देश किया है।

हे अर्जुन! शस्त्रास्त्रों में मैं वज्र हूँ। महर्षि दधीचि की हड्डी से वज्र का निर्माण हुआ है। उसमें दधीचि की तपस्या और भगवान् का विशेष तेज सन्निहित है, इसलिए वह इन्द्र का अमोघ अस्त्र है। वस्तुतः वही इन्द्र की शक्ति है। अतः भगवान् ने उसे अपनी विभूति कहा है। दूध देने वाली गायों में समुद्र-मन्थन से उत्पन्न कामधेनु भगवान् की विभूति है। वह ऋषियों के पास रहने वाली और समस्त कामनाओं को देने वाली सर्वश्रेष्ठ गौ है। कामनाओं में धर्माविरुद्ध सन्तानोत्पादक काम को भगवान् ने अपना स्वरूप बताया है। शास्त्रोक्त रीति से सन्तान उत्पन्न करना धर्म है। तथा केवल वैषयिक सुख के लिए काम धर्मविरुद्ध है। धर्माविरुद्ध प्रजोत्पादन में हेतु को यहाँ 'प्रजन' कहा है। भगवान् विषधर साँपों में वासुकि हैं। वासुकि सभी सर्पों के राजा और भगवान् के भक्त है, अतः भगवान् ने उन्हें अपना स्वरूप अपनी विभूति बताया है।

अवबोधाभ्यासः

अधस्तनान् प्रश्नान् उत्तरयतु–

१. इह श्लोके का विभूतयो निर्दिष्टाः? ....

२. वज्रं केन निर्मितं कस्यास्त्रं च? ....

३. कामधेनुः कुतः प्रादुर्भूता? ....

४. प्रजनशब्दस्य कोऽर्थः? ....

५. भगवान् केषां मध्ये कन्दर्पः? ....

६. वासुकेः सर्पेषु कथं प्राधान्यम्? ....

व्याकरणाभ्यासः

(अ) सन्धिः

१. चास्मि - च + अस्मि - दीर्घसन्धिः

२. प्रजनश्च - प्रजनः + च - श्चुत्वसन्धिः

३. अहं वज्रम् - अहम् + वज्रम् - अनुस्वारसन्धिः

४. वज्रं धेनूनाम् - वज्रम् + धेनूनाम् - अनुस्वारसन्धिः

अधस्तनेषु रेखाङ्कितपदेषु सन्धिच्छेदं करोतु–

(i) भगवन्! तव हृदयं सर्वधर्मः। ....

(ii) अग्निर्मुखं तेऽखिलदेवतात्मा। ....

(iii) दिशश्च कर्णौ रसनं जलेशः। ....

(iv) सूर्यश्च चक्षूंषि जलं स्म रेतः। ....

(v) कामाध्वरं क्षपयतः स्तुतये न तत् ते। ....

(vi) ब्रह्मादयः स्वरूपगमने न प्रभवन्ति। ....

(vii) प्राणैश्चलैः प्राणिनः पान्ति साधवः। ....

(आ) कृत्प्रत्ययः उपपदसमासश्च

१. कामधुक् - कामान् दोग्धि - काम +अम् दुह् + सु = उपपदसमासः

काम + दुह् + क्विप् (०) = कामदुह्।

अधस्तनेभ्यः प्रकृति प्रत्ययेभ्यो निष्पन्नं पदं लिखतु–

(i) शाक + भुज् + क्विप् - ....

(ii) रस + लिह् + क्विप् - ....

(iii) गो + दुह् + क्विप् - ....

(iv) जल + मुच् + क्विप् - ....

(v) पुण्य + भज् + ण्वि - ....

(vi) वध + कृ + क्विप् - ....

(vii) वृत्र + हन् + क्विप् - ....

(इ) क्रियाकारकसम्बन्धः

अस्मि	-	कर्तरि क्रिया	कन्दर्पः	-	कर्तृविशेषणम्
अहम्	-	कर्ता	प्रजनः	-	कर्तृविशेषणविशेषणम्
वज्रम्	-	कर्तृविशेषणम्	अस्मि	-	कर्तरि क्रिया
आयुधानाम्	-	निर्धारणषष्ठी	अहम्	-	आक्षिप्तः कर्ता
कामधुक्	-	कर्तृविशेषणम्	वासुकिः	-	कर्तृविशेषणम्
धेनूनाम्	-	निर्धारणषष्ठी	सर्पाणाम्	-	निर्धारणषष्ठी
अस्मि	-	कर्तरि क्रिया	च	-	समुच्चये
अहम्	-	आक्षिप्तः कर्ता			

(उ) पर्यायशब्दः

१. **आयुधम्** - १. प्रहरणम् (अका. नपुं), २. शस्त्रम् (अका. नपुं), ३. अस्त्रम् (अका. नपुं)

२. **कन्दर्पः** - १. मदनः(अका. पुं.), २. मन्मथः (अका. पुं.), ३. मारः (अका. पुं.), ४. अनङ्गः (अका. पुं.), ५. स्मरः (अका. पुं.)

३. **धेनुः**- १. नवसूतिका (आका. स्त्री.), २. दोग्ध्री (ईका. स्त्री.)

४. **सर्पः** - १. भुजगः (अका. पुं.), २. अहिः (इका. पुं.) ३. भुजङ्गः (अका. पुं), ४. फणी (फणिन् नका. पुं), ५. उरगः (अका. पुं) ६. पन्नगः (अका. पुं)

◆◆◆

६१. श्लोकः

अनन्तश्चास्मि नागानां वरुणो यादसामहम्।
पितॄणामर्यमा चास्मि यमः संयमतामहम्।।(भ. गी. १०.२९)

पदच्छेदः

अनन्तः, च, अस्मि, नागानाम्, वरुणः, यादसाम्, अहम्।
पितॄणाम्, अर्यमा, च, अस्मि, यमः, संयमताम्, अहम्।।

पदच्छेदाभ्यासः

अधस्तनेषु पदेषु विच्छेदं करोतु–

(i) चास्मि – ....

(ii) अनन्तश्च – ....

(iii) वरुणो यादसाम् – ....

(iv) नागानां वरुणः – ....

पदपरिचयः

पदम्	विश्लेषणम्	पदम्	विश्लेषणम्
अनन्तः	अका.पुं.प्र.एक.विधेयम्	पितॄणाम्	पितृ–ऋका.पुं.ष.बहु.
च	अव्ययम्	अर्यमा	अर्यमन्–नका.पुं.प्र.एक.विधेयम्
अस्मि	अस्+लट् उपु.एक.अदादि कर्तरि परस्मैपदम्	च	अव्ययम्
नागानाम्	नाग–अका.पुं.ष.बहु.	अस्मि	अस्+लट् उपु.एक.अदादि कर्तरि परस्मैपदम्
वरुणः	वरुण–अका.पुं.प्र.एक.विधेयम्	यमः	यम–अका.पुं.प्र.एक.विधेयम्
यादसाम्	यादस्–सका.नपुं.ष.बहु.	संयमताम्	संयमत्–नका.पुं.ष.बहु.शत्रन्तम्
अहम्	अस्मद्–दका.प्र.एक.सर्व.उद्देश्यम्	अहम्	अस्मद्–दका.प्र.एक.सर्व.उद्देश्यम्

वर्गीकरणाभ्यासः

अधस्तनेषु वर्गेषु श्लोकपदानि विभजतु–

(i) प्रथमान्तम् (६) ....

(ii) षष्ठ्यन्तम् (४) ....

(iii) अकारान्तम् (४) ....

(iv) ऋकारान्तम् (१) ....

(v) तकारान्तम् (१) ....

(vi) नकारान्तम् (१) ....

(vii) सकारान्तम् (१) ....

(viii) पुंलिङ्गम् (७) ....

(ix) नपुंसकम् (१) ....

(x) सर्वनाम (२) ....

(xi) अव्ययम् (२) ....

(xii) क्रियापदम् (२) ....

(xiii) उद्देश्यम् (२) ....

(xiv) विधेयम् (४) ....

(xv) उद्देश्येन सह विधेयं लिखतु।

आकाङ्क्षाविस्तरः

अस्मि (= वर्ते)।

कः अस्ति? **अहम् अस्मि।**

अहं किम् अस्मि? .... (अका. प्र.)

अहं केषां मध्ये अनन्तः अस्मि? .... (अका. ष.)

पुनश्च अहं किम् अस्मि? .... (अका. प्र.)

अहं केषां मध्ये वरुणः अस्मि? .... (सका. ष.)

पुनश्चाहं किम् अस्मि? .... (नका. प्र.)

अहं केषां मध्ये अर्यमा अस्मि? .... (ऋ. ष.)

पुनश्चाहं किम् अस्मि? .... (तका. ष.)

पदार्थः

पदम्	संस्कृतम्	हिन्दी
अहम्	अहं (श्रीकृष्णः)	मैं (परमात्मा)
नागानाम्	नागजातीनां काद्रवेयाणां मध्ये	निर्विष नागों में
अनन्तः	शेषराजः	शेषराज
यादसाम्	जलचराणां	जलजन्तुओं में
च	तथा	और
वरुणः	प्रचेताः	वरुण
अस्मि	भवामि	हूँ
अहम्	अहं (श्रीकृष्णः)	मैं (भगवान् श्रीकृष्ण)
पितृणाम्	पितृलोकवासिनां पितृणां मध्ये	पितरों में
अर्यमा	पितृराजः अर्यमा नाम	राजा अर्यमा
च	तथा	और
संयमताम्	नियमनकर्तृणां मध्ये	यमलोक के अधिकारियों में
यमः	यमराजः	यमराज
अस्मि	विद्ये	हूँ

भावार्थः

संस्कृतम्–भगवान् श्रीकृष्णः अनेन श्लोकेन नागादिषु स्वविभूतीः निरूपयति–

हे पार्थ! विषधरेभ्यः सर्पेभ्यो भिन्नानां निर्विषाणां कद्रूपुत्राणां नागानां मध्येऽहं वासुदेवः शेषनागोऽस्मि। स हि शेषाख्यो नागः सहस्रफणाभिर्युक्तः नागराजः शेषशायिनो भगवतो विष्णोः शय्या वर्तते। किञ्च स विष्णुना सह अवतीर्य लीलाविग्रहमपि तनुते, अतः स भगवत्स्वरूपो वेदितव्यः।

यादोगणानां जलजन्तूनाम् अधिपतिः वरुणदेवोऽपि भगवतो विशेषांशो विभूतिः मन्तव्यः, यतोहि स भगवद्भक्तः लोकपालोऽस्ति। पितृलोके सप्त पितृगणाः सन्ति, ते हि कव्यवाहः, अनलः, सोमः, यमः, अर्यमा, अग्निष्वात्ताः, बर्हिषदः इति। तेषु अर्यमा श्रेष्ठः प्रधानश्च, अतः स भगवत्स्वरूपः

परिगणितः। एवमेव संयन्तृणां मध्ये यमराजः भगवतः स्वरूपं निगद्यते। स हि पक्षपातरहितं न्याय्यं धर्म्यं च दण्डं प्रयच्छति। अन्ये च ये नियन्तारः मर्त्यलोके देवलोके वा, ते कदाचित्पक्षपातमपि कुर्युः। असौ यमो न तथा, अत एव लोकपालः भगवद्विभूतिश्च। असावेव पुण्यात्मनां धर्मराजः, पापात्मनां च यमराज इति विवेकः।

हिन्दी–भगवान् श्रीकृष्ण इस श्लोक से नागादि में अपना स्वरूप बता रहे हैं।

हे अर्जुन! विष-हीन नागों में मैं शेषनाग हूँ। सर्प से भिन्न नाग होता है। उनमें सर्प विषधर होता है, किन्तु नाग में विष नहीं रहता है। अतएव पूर्व श्लोक में भगवान् ने साँपों में स्वयं को वासुकि कहा है और अब यहाँ नाग में अपने को अनन्तनाग बता रहे हैं। अनन्त नाग की शय्या पर ही भगवान् विष्णु शयन करते हैं। उस अनन्त की हज़ार फणें होती हैं और वह कभी-कभी विष्णु के साथ अवतार लेकर लीला में सम्मिलित होते हैं, अतः उन्हें भगवान् ने अपना स्वरूप बताया है।

जलचरों में उनके राजा वरुण देव भगवान् के रूप, उनके भक्त और लोकपाल हैं। ये अति प्राचीन और जल के अधिष्ठातृ देवता माने जाते हैं। पितृलोक में पितरों के कव्यवाह, अनल आदि सात गण माने गये हैं। उनमें अर्यमा सबसे प्रधान और श्रेष्ठ हैं, अतः भगवान् ने उन्हें अपना स्वरूप कहा है। मर्त्यलोक अथवा देवलोक में नियमन करने वाले जितने अधिकारी हैं, उनमें यमराज भगवान् के रूप हैं। वही धर्मात्मा के लिए धर्मराज और पापियों को यमराज लगते हैं। उनका दण्ड सदा पक्षपात रहित न्याय और धर्म से युक्त होता है, अतः भगवान् ने उन्हें अपना रूप कहा है।

अवबोधाभ्यासः

अधस्तनान् प्रश्नान् उत्तरतु–

१. अस्मिन् श्लोके प्रधानत्वेन के निरूपिताः? ....

२. सर्पनागयोः कथं भिन्ना जातिः? ....

३. शेषनागः कथं प्रधानम्? ....

४. वरुणस्य प्राधान्ये किं कारणम्? ....

५. पितृणां कति गणाः, ते कुत्र निवसन्ति? ....

६. यमराजधर्मराजयोः कः भेदः? ....

७. यमः कथं भगवतो विशेषांशः? ....

व्याकरणाभ्यासः

(अ) सन्धिः

१. चास्मि – च + अस्मि – दीर्घसन्धिः

२. अनन्तश्च – अनन्तः + च – श्चुत्वसन्धिः

३. वरुणो यादसाम् – वरुणः + यादसाम् – विसर्गसन्धिः

४. नागानां वरुणः – नागानाम् + वरुणः – अनुस्वारसन्धिः

५. संयमताम् – सम् + यमताम् – अनुस्वारसन्धिः

अधस्तनेषु रेखाङ्कितपदेषु सन्धिं विसन्धिं च करोतु–

(i) न गृह्णीमः + वयम् + पुच्छम् अहेः। ....

(ii) ममन्थुः परम + आयत्ता अमृतार्थम् + पयोनिधिम्। ....

(iii) तम् + दृष्ट्वा बालाः + चकिता जाताः। ....

(iv) तस्मिन् क्षेत्रेऽनुदिनं गावश्चरन्ति। ....

(v) लोभः कार्यो न वो रोषः। ....

(vi) अभ्यभाषत तत्सर्वं शिक्षितं पुरुषोत्तमात्। ....

(vii) अवरोप्यागतो बालं स्कन्धात्। ....

(आ) कृत्प्रत्ययः

संयमताम् – सम् + यम + क्विप् + शतृ = संयमत्।

अधस्तनेभ्यः प्रकृतिप्रत्ययेभ्यो रूपं निष्पाद्य वाक्ये प्रयुङ्क्ताम्–

(i) तर्ज् + शतृ – ....

(ii) गर्ज् + शतृ – ....

(iii) त्रस् + शतृ – ....

(iv) चित् + शतृ – ....

(v) या + शतृ – ....

(vi) जागृ + शतृ – ....

(vii) सिव् + शतृ – ....

(इ) क्रियाकारकसम्बन्धः

अस्मि	–	कर्तरि क्रिया	अस्मि	–	कर्तरि क्रिया
अहम्	–	कर्ता	अहम्	–	कर्ता
अनन्तः	–	कर्तृविशेषणम्	अर्यमा	–	कर्तृविशेषणम्
नागानाम्	–	निर्धारणषष्ठी	पितृणाम्	–	निर्धारणषष्ठी
वरुणः	–	कर्तृविशेषणम्	यमः	–	कर्तृविशेषणम्
यादसाम्	–	निर्धारणषष्ठी	संयमताम्	–	निर्धारणषष्ठी
च	–	समुच्चये	च	–	समुच्चये

(उ) पर्यायशब्दः

१. **वरुणः** – १. प्रचेताः (प्रचेतस् सका. पुं.), २. पाशी (पाशिन् नका. पुं.) ३. यादसाम्पतिः (इका. पुं.) ४. अप्पतिः (इका. पुं.)

२. **यमः** – १. धर्मराजः (अका. पुं.) २. कृतान्तः (अका. पुं.) ३. परेतराट् (परेत राज् जका. पुं.) ४. यमुनाभ्राता (यमुनाभ्रातृ ऋका. पुं.)

◆◆◆

६२. श्लोकः

प्रह्लादश्चास्मि दैत्यानां कालः कलयतामहम्।
मृगाणां च मृगेन्द्रोऽहं वैनतेयश्च पक्षिणाम्।। (भ. गी. १०.३०)

पदच्छेदः

प्रह्लादः, च, अस्मि, दैत्यानाम्, कालः, कलयताम्, अहम्।
मृगाणाम्, च, मृग + इन्द्रः, अहम्, वैनतेयः, च, पक्षिणाम्।।

पदच्छेदाभ्यासः

अधस्तनानि पदानि विच्छिनत्तु–

(i) चास्मि – ....

(ii) प्रह्लादश्च – ....

(iii) दैत्यानां कालः – ....

(iv) मृगाणां च – ....

(v) मृगेन्द्रः – ....

(vi) मृगेन्द्रोऽहम् – ....

(vii) वैनतेयश्च – ....

(viii) अहं वैनतेयः – ....

पदपरिचयः

पदम्	विश्लेषणम्
प्रह्लादः	प्रह्लाद–अका.पुं.प्र.एक.विधेयम्
च	अव्ययम्
अस्मि	अस्+लट् उपु.एक.अदादि.कर्तरि परस्मैपदम्
दैत्यानाम्	दैत्य–अका.पुं.ष.बहु.तद्धितान्तम्
कालः	काल–अका.पुं.प्र.एक.विधेयम्
कलयताम्	कलयत्–तका.पुं.ष.बहु.शत्रन्तम्
अहम्	अस्मद्–दका.प्र.एक.सर्व.उद्देश्यम्

पदम्	विश्लेषणम्
मृगाणाम्	मृग–अका.पुं.ष.बहु.
च	अव्ययम्
मृगेन्द्रः	मृगेन्द्र–अका.पुं.प्र.एक.समस्तं विधेयम्
अहम्	अस्मद्–दका.प्र.एक.सर्व.उद्देश्यम्
वैनतेयः	वैनतेय–अका.पुं.प्र.एक.तद्धितान्तं विधेयम्
च	अव्ययम्
पक्षिणाम्	पक्षिन्–नका.पुं.ष.बहु.तद्धितान्तम्

वर्गीकरणाभ्यासः

यथानिर्देशमधः श्लोकपदानि लिखन्तु–

(i) प्रथमान्तम् (६) ....

(ii) षष्ठ्यन्तम् (४) ....

(iii) अकारान्तम् (६) ....

(iv) तकारान्तम् (१) ....

(v) नकारान्तम् (१) ....

(vi) पुंलिङ्गम् (८) ....

(vii) शत्रन्तम् (१) ....

(viii) तद्धितान्तम् (३) ....

(ix) समस्तम् (१) ....

(x) सर्वनाम (२) ....

(xi) अव्ययम् (३) ....

(xii) क्रियापदम् (१) ....

(xiii) उद्देश्यम् (२) ....

(xiv) विधेयम् (४) ....

(xv) उद्देश्येन सह विधेयानि लिखतु।

आकाङ्क्षाविस्तरः

अस्मि (= भवामि)।

कः अस्ति?	**अहमस्मि।**	
अहं किम् अस्मि?	....	(अका. प्र.)
अहं केषां मध्ये प्रह्लादः अस्मि?	....	(अका. ष.)
पुनश्च अहं किम् अस्मि?	....	(अका. प्र.)
अहं केषां मध्ये कालः अस्मि?	....	(तका. ष.)
पुनश्चाहं किमस्मि?	....	(समस्तं प्र.)

अहं केषां मध्ये मृगेन्द्रः अस्मि? .... (अका. ष.)

पुनश्चाहं किमस्मि? .... (तद्धितान्तं प्र.)

अहं केषां मध्ये वैनतेयः अस्मि? .... (नका. ष.)

अहं पक्षिणां च वैनतेयोऽस्मि।

पदार्थः

पदम्	संस्कृतम्	हिन्दी
अहम्	अहं (श्रीकृष्णः)	मैं (भगवान् कृष्ण)
दैत्यानाम्	दितिवंश्यानां मध्ये	दैत्यों में
प्रह्लादः	प्रह्लादो नाम	प्रह्लाद
च	तथा	और
कलयताम्	कालगणकानां दैवज्ञानां	काल गिनने वाले ज्योतिषियों का
कालः	समयः मुहूर्त्तम्	मुहूर्त्त समय
अस्मि	वर्ते	हूँ।
अहम्	अहं (श्रीकृष्णः)	मैं (श्रीकृष्ण)
मृगाणाम्	पशूनां मध्ये	पशुओं में
मृगेन्द्रः	सिंहः	सिंह
च	तथा	और
पक्षिणाम्	खगानां पतत्रिणां मध्ये	पक्षियों में
वैनतेयः	विनतासुतः गरुडः	गरुड़
च	अस्मि	हूँ

भावार्थः

संस्कृतम्—इह श्लोके श्रीकृष्णः दैत्यादिषु स्वविशेषांशं परिगणयति—

हे पार्थ! अहं वासुदेवः श्रीकृष्णः दैत्यानां दानवानां मध्ये प्रह्लादोऽस्मि। दैत्यकुलोत्पन्नः हिरण्यकशिपोः पुत्रः प्रह्लादः भगवतोऽनन्यभक्तः। स हि भगवतो विशेषांशोऽवगन्तव्यः। वर्ष-मास-पक्ष-दिन-घटिकादिभिः गणितज्ञा मौहूर्तिकाः यं गणयन्ति, स कालः साक्षात् परमात्मस्वरूपोऽस्ति।

गणितविद्यानिष्णातानां गणनाविषयः कालः भगवतः श्रीकृष्णस्य विशेषांश एव विज्ञेयः। आरण्यकानां पशूनां मध्ये सिंहः सर्वाधिको बलिष्ठः शौर्यक्रौर्यसमन्वितो वनराज इत्युच्यते, अतः स भगवद्विभूतिषु परिगणितः। विनतायाः पुत्रो गरुडः विहगेषु श्रेष्ठः बलिष्ठः, अतः तेषां नभश्चराणां राजेत्युच्यते। स हि भगवतो विष्णोर्महान् भक्तः तद्वाहनं च प्रोक्तम्, अतः इह भगवान् तं स्वस्वरूपमुक्तवान्।

हिन्दी–इस श्लोक में भगवान् श्रीकृष्ण ने दैत्य आदि में प्रधान अपने विशेषांश का वर्णन किया है–

हे अर्जुन! मैं दैत्यों में प्रह्लाद हूँ। दिति की सन्तान दैत्य हैं। उनमें हिरण्यकशिपु के पुत्र प्रह्लाद भगवान् के अनन्य भक्त प्रसिद्ध हुए हैं। उनमें भगवान् का विशेष अंश होने से वे भगवत्स्वरूप कहे गये हैं। वर्ष, मास, दिन, घटी आदि शुभ मुहूर्त्त की गणना करने वाले दैवज्ञ कहे जाते हैं। उनकी गणना का विषय जो काल है, भगवान् श्रीकृष्ण ने उसे अपना स्वरूप बताया है। पशुओं में सिंह सबसे अधिक शक्तिशाली शूर एवं क्रूर होता है, अतः उसे वन का राजा कहा जाता है। भगवान् ने पशुओं में उसे अपना स्वरूप कहा है। पक्षियों में गरुड़ पक्षी को विनता की संतान माना गया है। वह सबसे अधिक बल सम्पन्न होता है, अतः उसे पक्षिराज कहते हैं। गरुड़ जी भगवान् के ज्ञानी भक्त और वाहन हैं, अतः श्रीकृष्ण ने पक्षियों में उन्हें अपना रूप माना है।

अवबोधाभ्यासः

अधस्तनान् प्रश्नान् उत्तरतु–

१. इह के भगवत्स्वरूपा निर्दिष्टाः? ....

२. प्रह्लादः कस्य पुत्र आसीत्? ....

३. स कथं भगवद्रूपः उक्तः? ....

४. श्लोके कालशब्देन किं गृह्यते? ....

५. पशुषु सिंहस्य प्राधान्ये को हेतुः? ....

६. गरुडः कस्याः सुतः प्रोक्तः? ....

७. खगेषु गरुडः कथं विभूतिः? ....

व्याकरणाभ्यासः

(अ) सन्धिः

१. चास्मि – च + अस्मि – दीर्घसन्धिः

२. मृगेन्द्रः – मृग + इन्द्रः – गुणसन्धिः

३. मृगेन्द्रोऽहम् - मृगेन्द्रः + अहम् - विसर्गसन्धिः, सन्धिश्च

४. प्रह्लादश्च - प्रह्लादः + च - श्चुत्वसन्धिः

५. वैनतेयश्च - वैनतेयः + च - श्चुत्वसन्धिः

६. दैत्यानां कालः- दैत्यानाम् + कालः - अनुस्वारसन्धिः

७. मृगाणां च - मृगाणाम् + च - अनुस्वारसन्धिः

८. अहं वैनतेयः - अहम् + वैनतेयः - अनुस्वारसन्धिः

अधस्तनेषु रेखाङ्कितपदेषु सन्धिच्छेदं सन्धिं वा करोतु-

(i) कोऽस्ति लोके मनुष्येन्द्र! पितुः प्रतिकर्तुं क्षमः? ....

(ii) वसति एको वने कश्चिद् विचिन्वति प्रियमात्मनः? ....

(iii) उत्तमश्चिन्तितं कुर्यात्। ....

(iv) प्रोक्तकारी तु मध्यमः। ....

(v) अधमोऽश्रद्धया कुर्यात्। ....

(vi) अकर्तोच्चरितं पितुः। ....

(vii) गुहावासं वासुदेवं मनसाधारयत्। ....

(आ) समासः

१. मृगेन्द्रः - मृगाणाम् इन्द्रः - षष्ठीतत्पुरुषः

अधस्तनेषु रेखाङ्कितेषु विग्रहपूर्वकं समासं निर्दिशतु-

(i) नामनिर्वचनं तस्य बालस्य करोति।

(ii) स सम्राड् लोकपाल इव श्रियं भुनक्ति।

(iii) सोमवंशे कलौ नष्टे कृतादौ स्थापयिष्यति।

(iv) कर्मणि धर्मसूत्रे ग्रथ्नीयात्।

(v) यदुवंशं महापुण्यं वर्णयामि मुनीश्वराः।

(vi) रोमपादसुतो बभ्रुर्बभूव।

(vii) शृण्वन् यशो भगवतो धुनुते कर्मवासनाम्।

(इ) तद्धितप्रत्ययः

१. दैत्यानाम् – दितेः अपत्यम् – दिति + ण्य (य) = दैत्य, तेषां दैत्यानाम्।

२. वैनतेयः – विनतायाः अपत्यम् – विनता + ढक् (एय) = वैनतेय।

३. पक्षिणाम् – पक्षाः अस्य सन्ति – पक्ष + इनि (इन्) = पक्षिन्, तेषाम्

अधस्तनेभ्यः प्रकृतिप्रत्ययेभ्यः निष्पन्नं पदं लिखतु–

(i) सेनापति + ण्य – ....

(ii) मधु + ण्य – ....

(iii) शुभ्रा + ढक् – ....

(iv) नर्मदा + अण् – ....

(v) पत्र + इनि – ....

(vi) शकट + इनि – ....

(ई) कृत्प्रत्ययः

कलयताम् - कल + णिच् + शतृ = कलयत्, तेषाम्

अधस्तनेभ्यः प्रकृतिप्रत्ययेभ्यः निष्पन्नं रूपं वाक्ये व्यवहरतु–

(i) स्खलि + शतृ – ....

(ii) स्तेनि + शतृ – ....

(iii) स्तोभि + शतृ – ....

(iv) स्पृहि + शतृ – ....

(v) स्फोटि + शतृ – ....

(vi) स्वटि + शतृ – ....

(vii) स्वादि + शतृ – ....

(उ) क्रियाकारकसम्बन्धः

अस्मि	–	कर्तरि क्रिया	अहम्	–	कर्ता
अहम्	–	कर्ता	मृगेन्द्रः	–	कर्तृविशेषणम्
प्रह्लादः	–	कर्तृविशेषणम्	मृगाणाम्	–	निर्धारणषष्ठी

दैत्यानाम्	-	निर्धारणषष्ठी	वैनतेयः	-	कर्तृविशेषणम्
कालः	-	कर्तृविशेषणम्	पक्षिणाम्	-	निर्धारणषष्ठी
कलयताम्	-	सम्बन्धषष्ठी	च	-	समुच्चये
अस्मि	-	आक्षिप्ता क्रिया			

(ऊ) पर्यायशब्दः

१. पक्षी - १. खगः (अका. पुं.) २. विहगः (अका. पुं.)
३. विहङ्गः (अका. पुं.) ४. शकुनिः (इका. पुं.)
५. विहायाः (विहायस् सका. पुं.)

२. मृगेन्द्रः - १. पञ्चास्यः (अका. पुं.), २. केसरी (केसरिन् नका. पुं.), ३. कण्ठीरवः (अका. पुं.), ४. हर्यक्षः (अका. पुं.), ५. पञ्चाननः (अका. पुं.)

३. मृगः - १. पशुः (उका. पुं.), २. पादबन्धनम् (अका. नपुं.)

◆◆◆

६३. श्लोकः

पवनः पवतामस्मि रामः शस्त्रभृतामहम्।
झषाणां मकरश्चास्मि स्रोतसामस्मि जाह्नवी॥ (भ. गी. १०.३१)

पदच्छेदः

पवनः, पवताम्, अस्मि, रामः, शस्त्र-भृताम्, अहम्।
झषाणाम्, मकरः, च, अस्मि, स्रोतसाम्, अस्मि, जाह्नवी॥

पदच्छेदाभ्यासः

अधस्तनेषु पदेषु पदच्छेदं करोतु–

(i) चास्मि – ....

(ii) मकरश्च – ....

(iii) झषाणां मकरः – ....

पदपरिचयः

पदम्	विश्लेषणम्	पदम्	विश्लेषणम्
पवनः	पवन-अका.पुं.प्र.एक.विधेयम्	मकरः	मकर अका.पुं.प्र.एक.विधेयम्
पवताम्	पवत्-तका.पुं.ष.बहु.शत्रन्तम्	च	अव्ययम्
अस्मि	अस्+लट् उपु.एक.अदादि कर्तरि परस्मैपदम्	अस्मि	अस्+लट् उपु.एक.अदादि कर्तरि परस्मैपदम्
रामः	राम-अका.पुं.प्र.एक.विधेयम्	स्रोतसाम्	स्रोतस् सका.नपुं.ष.बहु.
शस्त्रभृताम्	शस्त्रभृत्-तका.पुं.ष.बहु.समस्तम्	अस्मि	अस्+लट् उपु.एक.अदादि कर्तरि परस्मैपदम्
अहम्	अस्मद्-दका.प्र.एक.उद्देश्यम्	जाह्नवी	जाह्नवी-ईका.स्त्री.प्र.एक.विधेयम्
झषाणाम्	झष-अका.पुं.ष.बहु.		

वर्गीकरणाभ्यासः

यथानिर्देशमधः श्लोकपदानि लिखन्तु–

(i) प्रथमान्तम् (५) ....

(ii) षष्ठ्यन्तम् (४) ....

(iii) अकारान्तम् (४) ....

(iv) तकारान्तम् (२) ....

(v) सकारान्तम् (१) ....

(vi) ईकारान्तम् (१) ....

(vii) पुंलिङ्गम् (६) ....

(viii) स्त्रीलिङ्गम् (१) ....

(ix) नपुंसकम् (१) ....

(x) शत्रन्तम् (१) ....

(xi) समस्तम् (१) ....

(xii) अव्ययम् (१) ....

(xiii) सर्वनाम (१) ....

(xiv) क्रियापदम् (१) ....

(xv) विधेयम् (४) ....

(xvi) उद्देश्यम् (१) ....

(xvii) उद्देश्येन सह विधेयं लिखतु।

आकाङ्क्षाविस्तरः

अस्मि (= भवामि)।

कः अस्ति? **अहम् अस्मि।**

अहं किम् अस्मि? .... (अका. प्र.)

अहं केषां मध्ये किमस्मि? .... (तका. ष.)

पुनश्च अहं किमस्मि? .... (अका. प्र.)

अहं केषां मध्ये रामः अस्मि? .... (तका. ष.)

पुनश्चाहं किमस्मि? .... (अका. प्र.)

अहं केषां मध्ये मकरः अस्मि? .... (अका. ष.)

पुनश्चाहं किमस्मि? .... (ईका. प्र.)

अहं केषां मध्ये जाह्नवी अस्मि? .... (सका. ष.)

पदार्थः

पदम्	संस्कृतम्	हिन्दी
अहम्	अहं (श्रीकृष्णः)	मैं (भगवान् कृष्ण)
पवताम्	पावयितृणां मध्ये	पवित्र करने वालों में
पवनः	वायुः	वायु
शस्त्रभृताम्	शस्त्रधारिणां मध्ये	शस्त्रधारियों में
रामः	दाशरथी रामः	दशरथनन्दन श्रीराम
अस्मि	वर्ते	हूँ।
झषाणाम्	(अहं) मीनानां मध्ये	मछलियों में
मकरः	तिमिङ्गिलः	मगर
अस्मि	विद्ये	हूँ
च	तथा	और
स्रोतसाम्	स्रवन्तीनां नदीनां मध्ये	नदियों में
जाह्नवी	भागीरथी	गंगा
अस्मि	भवामि	हूँ।

भावार्थः

संस्कृतम्–इह श्लोके श्रीकृष्णः पवनादिषु स्वस्वरूपं निरूपयति–

हे पार्थ! अहं पावनानां मध्ये पवनः अस्मि। अनिल एव अकामेनापि सर्वान् पुनाति, जलं पुनर्मज्जनेन। अतः पावनकारिषु श्वसनः एव प्रधानम्। अत एव स परमात्मनो विभूतिर्ज्ञेयः। इह जगतीतले शस्त्रास्त्रधारिणः पुरुषाः बहवो बभूवुः भविष्यन्ति च। तेषां मध्ये धनुर्धारी श्रीरामचन्द्रः साक्षाद् भगवतः स्वरूपमेव। मत्स्यानां मध्ये मकरो मत्स्यजातिविशेषः तिमिङ्गिलः आकारेण बलेन च महत्तमः। अतः स भगवतो विशेषांशो विज्ञेयः। एवमेव वेगेन चलज्जलानां नदीनां मध्ये भगवतः पदाङ्गुष्ठनिःसृता भगवती भागीरथी भगवत्स्वरूपा विभूतिः अवगन्तव्या।

हिन्दी–इस श्लोक में भगवान् श्रीकृष्ण ने पवन आदि अपने विशेष रूप का निरूपण किया है।

हे अर्जुन! पावन करने वालों में मैं साक्षात् पवन हूँ। वायु विना प्रयास सर्वत्र विद्यमान होकर वस्तुओं को पवित्र करता रहता है, जबकि जलादि प्रयासपूर्वक स्नानादि करने पर पवित्र करता है, अतः वायु पवित्र करने वालों में प्रमुख है। अत एव भगवान् ने उसे अपना स्वरूप बतलाया है। शस्त्रास्त्रधारी वीरों में भगवान् ने दशरथ नन्दन श्रीरामचन्द्र को अपना स्वरूप कहा है। क्योंकि

रामावतार में उन्होंने सम्पूर्ण राक्षस कुल का विनाश किया था, अतः वीरों में कभी रण-छोड़ नहीं रहे श्रीरामचन्द्र प्रधान हैं। मगर एक जलचर जाति का विशेष प्राणी है। जलचरों की मछली जाति में वह बल और आकार की दृष्टि से सबसे बड़ा है। उसे तिमिंगिल भी कहते हैं। यहाँ भगवान् ने उसे अपनी विभूति बताया है। श्रीकृष्ण ने नदियों में गंगा जी को सबसे श्रेष्ठ मानते हुए उन्हें अपनी विभूति और अपना स्वरूप कहा है। पुराणों में गंगा जी की सर्वाधिक महिमा गायी गयी है। वहाँ उन्हें ब्रह्म-द्रव कहा है।

अवबोधाभ्यासः

अधस्तनान् प्रश्नान् समादधातु–

१. इह श्लोके काः विभूतयः परिगणिताः? ....

२. पावनकारिषु पवनस्य प्राधान्ये किं कारणम्? ....

३. इह रामपदेन कस्य ग्रहणम्? ....

४. मकरः कथं प्रधानम्? ....

५. गङ्गायाः किं वैशिष्ट्यम्? ....

६. गङ्गामाश्रित्य दश वाक्यानि लेख्यानि। ....

व्याकरणाभ्यासः

(अ) सन्धिः

१. चास्मि – च + अस्मि – दीर्घसन्धिः

२. मकरश्च – मकरः + च – श्चुत्वसन्धिः

३. झषाणां मकरः – झषाणाम् + मकरः – अनुस्वारसन्धिः

अधस्तनेषु रेखाङ्कितपदेषु सन्धिं विसन्धिं वा करोतु–

(i) वायुर्यथा घनानीकं तृणं तूलम्। ....

(ii) रजश्च संयोज्य + आक्षिपते भूयः। ....

(iii) तत्र + आगमद् वृतो गोपैः। ....

(iv) तत्कृताम् + मैत्रीम् + स्मरति। ....

(v) धीरश्चलचित्तो न भवति। ....

(vi) बालः + चञ्चलो न मनाग् विरमति। ....

(vii) पत्रम् + पुष्पम् + फलम् + तोयम् + यो मे भक्त्या प्रयच्छति। ....

(viii) पृथुकप्रसृतिं विप्रो नायच्छद् अवाङ्मुखः। ....

(आ) समासः

शस्त्रभृताम् - शस्त्रं बिभर्ति - शस्त्र + भृ + क्विप् (.) = शस्त्रभृत्-कृत्प्रत्ययः उपपदसमासः च।

अधस्तनानां पदानां विग्रहं समासं च निर्दिशतु–

(i) विश्वभुक् - ....

(ii) विश्वधृक् - ....

(iii) जन्मकृत् - ....

(iv) शिष्टकृत् - ....

(v) ब्रह्मविद् - ....

(vi) प्रियकृत् - ....

(vii) हुतभुक् - ....

(इ) तद्धितप्रत्ययः

जाह्नवी - जह्नोः अपत्यं स्त्री - जह्नु + अण् (अ) = जाह्नव + ङीष् (ई) = जाह्नवी

अधस्तनेभ्यः प्रकृतिप्रत्ययेभ्यः निष्पन्नं रूपं तदर्थं च लिखतु–

(i) सिन्धु + अण् - ....

(ii) बन्धु + अण् + ङीष् - ....

(iii) द्रुपद + अण् + ङीष् - ....

(iv) जनक + अण् + ङीष् - ....

(v) पृथा + अण् - ....

(vi) शूरसेन + अण् - ....

(vii) कलिङ्गः + अण् - ....

(ई) कृत्प्रत्ययः

पवताम् - पूङ् + शतृ = पवत्, तेषाम्

अधस्तनेभ्यः प्रकृतिप्रत्ययेभ्यः निष्पन्नं रूपं वाक्ये प्रयुङ्क्ताम्–

(i) खुर् + शतृ - ....

(ii) क्षिप् + शतृ - ....

(iii) क्षुभ् + शतृ - ....

(iv) क्रुध् + शतृ - ....

(v) क्रन्द् + शतृ - ....

(vi) कूज् + शतृ - ....

(vii) इङ्ख् + शतृ - ....

(उ) विशेषः

पूङ् + शतृ = पवत् - पवताम् इत्यत्र शतृप्रत्यय-विधानम् अपाणिनीयम्; पूङ्-धातोः आत्मनेपदित्वात्।

पूञ् - पवने इति क्र्‌यादिः कइयन धातुर्वर्तते। तस्मात् परस्मैपदविवक्षायां शतृप्रत्ययः, आत्मनेपदविवक्षायां ज्ञानञ्च भवति। तथा च पवन्। पवमानः इतिरूपद्वयं भवत्येव। यथा पयन्, पयमानः इत्यादि।

ङित्वात् 'पूङ्-पवने' इति धातुः आत्मनेपदी। ततः शानच् प्रत्ययो विधेयः। तथा च पू+शानच् = पवमानः इति प्रथमान्तं रूपं स्यात्।

(ऊ) क्रियाकारकसम्बन्धः

अस्मि	-	कर्तरि क्रिया	शस्त्रभृताम्	-	निर्धारणषष्ठी
अहम्	-	कर्ता	मकरः	-	कर्तृविशेषणम्
पवनः	-	कर्तृविशेषणम्	झषाणाम्	-	निर्धारणषष्ठी
पवताम्	-	निर्धारणषष्ठी	जाह्नवी	-	कर्तृविशेषणम्
रामः	-	कर्तृविशेषणम्	स्रोतसाम्	-	निर्धारणषष्ठी

(ए) पर्यायशब्दः

१. पवनः - १. वायुः(उका. पुं.), २. समीरः (अका. पुं.), ३. अनिलः (अका. पुं.), ४. श्वसनः (अका. पुं.)

२. झषः - १. मत्स्यः(अका. पुं.), २. मीनः(अका. पुं.), ३. वैसारिणः (अका. पुं.), ४. पृथुरोमा (पृथुरोमन् नका. पुं.), ५. शकली (शकलिन् नका. पुं.), ६. विसारः (अका. पुं.)

३. मकरः - १. नक्रः (अका. पुं.), २. ग्राहः (अका. पुं.), ३. कुम्भीरः (अका. पुं.),

४. जाह्नवी - १. गङ्गा (आका. स्त्री.), २. विष्णुपदी (ईका. स्त्री.), ३. त्रिस्रोताः (त्रिस्रोतस् सका. स्त्री.), ४. भीष्मसूः (ऊका. स्त्री.), ५. भागीरथी (ईका. स्त्री.)

◆◆◆

६४. श्लोकः

सर्गाणामादिरन्तश्च मध्यं चैवाहमर्जुन।
अध्यात्मविद्या विद्यानां वादः प्रवदतामहम्।।(भ. गी. १०.३२)

पदच्छेदः

सर्गाणाम्, आदिः, अन्तः, च, मध्यम्, च, एव, अहम्, अर्जुन।
अध्यात्म-विद्या, विद्यानाम्, वादः, प्रवदताम्, अहम्।।

पदच्छेदाभ्यासः

अधस्तनेषु पदच्छेदं करोतु–

(i) आदिरन्तः – ....

(ii) अन्तश्च – ....

(iii) चैव – ....

(iv) एवाहम् – ....

(v) मध्यं च – ....

पदपरिचयः

पदम्	विश्लेषणम्	पदम्	विश्लेषणम्
सर्गाणाम्	सर्ग-अका.पु.ष.बहु.कृदन्तम्	अहम्	अस्मद्-दका.प्र.एक.सर्व.
आदिः	आदि-इका.पुं.प्र.एक.विधेयम्	अर्जुन	अर्जुन-अका.पुं.सम्बो.प्र.एक.
अन्तः	अन्त-अका.पुं.प्र.एक.विधेयम्	अध्यात्मविद्या	आका.स्त्री.प्र.एक.विधेयं समस्तम्
च	अव्ययम्	विद्यानाम्	विद्या-आका.स्त्री.ष.बहु.
मध्यम्	मध्य-अका.नपुं.प्र.एक.विधेयम्	वादः	वाद-अका.पुं.प्र.एक.विधेयम्
च	अव्ययम्	प्रवदताम्	प्रवदत्-तका.पुं.ष.बहु.शत्रन्तम्
एव	अव्ययम्	अहम्	अस्मद्-दका.प्र.एक.सर्व.

वर्गीकरणाभ्यासः

अधस्तनेषु वर्गेषु श्लोकपदानि विभज्य लिखतु–

(i) प्रथमान्तम् (७) ....

(ii) षष्ठ्यन्तम् (३) ....

(iii) सम्बोधनान्तम् (१) ....

(iv) अकारान्तम् (५) ....

(v) इकारान्तम् (१) ....

(vi) आकारान्तम् (२) ....

(vii) तकारान्तम् (१) ....

(viii) पुंलिङ्गम् (६) ....

(ix) स्त्रीलिङ्गम् (२) ....

(x) नपुंसकम् (१) ....

(xi) सर्वनाम (२) ....

(xii) अव्ययम् (३) ....

(xiii) उद्देश्यम् (२) ....

(xiv) विधेयम् (५) ....

(xv) उद्देश्येन सह विधेयं लिखतु।

आकाङ्क्षाविस्तरः

अस्मि (- आक्षिप्ता क्रिया)।

अहम् अस्मि।

अहं किम् अस्मि? .... (इका. प्र.)

अहम् आदिः पुनश्च किम्? .... (अका. पुं. प्र.)

अहमादिः अन्तः पुनश्च किम्? .... (अका. नपुं. प्र.)

अहं केषाम् आदिः मध्यं अन्तश्च अस्मि? .... (अका. ष.)

पुनश्चाहं किम् अस्मि? .... (आका. प्र.)

अहं केषां मध्ये अध्यात्मविद्या अस्मि? .... (आका. ष.)

पुनश्चाहं किमस्मि? .... (अका. प्र.)

अहं केषां वादः अस्मि? .... (तका. ष.)

श्लोके किं सम्बोधनम्? .... (अका. सम्बो.)

पदार्थः

पदम्	संस्कृतम्	हिन्दी
अर्जुन!	हे पार्थ!	हे अर्जुन!
अहम्	अहं (श्रीकृष्णः)	मैं (परमात्मा)
एव	एव	ही
सर्गाणाम्	आकाशादिजडसृष्टीनाम्	अचेतन सृष्टि का
आदिः	उत्पत्तिः	जन्म
मध्यम्	स्थितिः	स्थिति
अन्तः	लयः	नाश
च	तथा (अस्मि)	और (हूँ)
विद्यानाम्	चतुर्दशसंख्यानां विद्यानां मध्ये	चौदह विद्याओं में
अध्यात्मविद्या	आत्मविद्या	ब्रह्मविद्या
च	तथा	और
अहम्	अहं (परमेश्वरः)	मैं
प्रवदताम्	वादिसम्बन्धिनां तिसृणां मध्ये	वादियों के वादादि तीन भेदों में
वादः	तत्त्वनिर्णयान्तः	प्रमाण और तर्क से तत्त्व निर्णायक वाद
अस्मि	(अस्मि)	हूँ।

भावार्थः

संस्कृतम्–इह श्लोके श्रीकृष्णः सर्गादिषु आत्मनः विभूतीः निर्दिशति।

हे पार्थ! सृष्टीनां जन्मस्थितिलयाः अहमेव अस्मि। इह श्लोके 'सर्गाणाम्' इति पदेन आकाशादिजडसृष्टीनाम् इत्यर्थो बोध्यः। यतोहि अस्य प्रकरणस्य प्रथमे श्लोके – अहमादिश्च मध्यं च भूतानामन्त एव च–इत्यत्र 'भूतानाम्' इति पदेन जीवसृष्टीनाम् इत्यर्थः कृतः। एवञ्चात्र चेतनाचेतनोभयविधानां सृष्टीनां ग्रहणे पुनरुक्तिदोषः स्यात्, अतोऽत्र अचेतनसृष्टिः गृह्यते। तथा च सर्गाणाम् उत्पत्तिः, पालनम्, प्रलयश्च भगवतः ऐश्वर्यविलासः, अतः एता भगवद्विभूतयः एव।

इह जगति ज्ञाता अज्ञाता वा यावत्यो विद्याः सन्ति, ताः सर्वा ब्रह्मविद्यातो निकृष्टाः; ब्रह्मविद्याया बन्धच्छेदहेतुत्वात्। अतएव श्रीकृष्णः ब्रह्मविद्याम् आत्मनः स्वरूपं निर्दिशति। इयम् आत्मविद्या भगवद्- विभूतिर्वेद्या।

मिथः प्रवदतां शास्त्रार्थं कुर्वतां वादिनां त्रयः शास्त्रार्थप्रकाराः भवन्ति—वादः, जल्पः, वितण्डा चेति। यत्र द्वाभ्यामपि पक्षाभ्यां प्रमाणतः तर्कतश्च स्वपक्षः स्थाप्यते, स वादः। परपक्षः छलजातिनिग्रहस्थानैर्दूष्यते, स जल्पः। स्वपक्षस्थापनाहीना छलजात्यादिभिः परपक्षदूषणा वितण्डा नाम कथा। तत्रैतासु तिसृषु कथासु जल्पवितण्डे विजिगीषमाणयोः वादिनोः शक्तिपरीक्षामात्रफले, वादस्तु शिष्याचार्ययोः अन्ययोर्वा तत्त्वनिर्णयफलः। अतः वादः श्रेष्ठत्वाद् भगवद्विभूतिः उक्तः।

हिन्दी—इस श्लोक के द्वारा भगवान् श्रीकृष्ण ने सर्गादि में अपनी विभूति का निर्देश किया है—

हे अर्जुन! जड़ सृष्टि की उत्पत्ति, स्थिति और लय मैं ही हूँ। इस प्रकरण के प्रारम्भ में 'अहमादिश्च मध्यं च भूतानामन्त एव च' इस वाक्य के द्वारा भगवान् ने अपने को भूतों का - जीव-सृष्टि का आदि मध्य और अन्त बताया है। इस श्लोक में 'सर्गाणाम्' पद से जड़ और चेतन दोनों सृष्टि का ग्रहण करने पर पुनरुक्ति दोष होगा, अतः यहाँ अचेतन सृष्टि अर्थ समझना चाहिए। सृष्टि की उत्पत्ति, स्थिति और प्रलय परमैश्वर्यशाली परमात्मा की विभूतियाँ हैं।

संसार में ज्ञाताज्ञात जितनी भी विद्यायें हैं, वे सब अध्यात्मविद्या से निकृष्ट हैं, क्योंकि ब्रह्मविद्या अज्ञान की ग्रन्थि को सदा-सदा के लिए समाप्त कर देती है। इसीलिए वह सभी विद्याओं में प्रधान है। अतः यहाँ भगवान् ने उसे अपना स्वरूप माना है।

शास्त्रार्थ के तीन स्वरूप होते हैं। जल्प, वितण्डा और वाद। छल, जाति और निग्रहस्थानादि अनुचित तर्क से दूसरे के पक्ष का खण्डन और अपने पक्ष के मण्डन को जल्प-कथा कहते हैं। अपना पक्ष न रखकर केवल दूसरे के पक्ष को अनुचित तर्क से खण्डन करना वितण्डा-कथा है और तत्त्वनिर्णय के उद्देश्य से गुरुशिष्य अथवा किन्हीं दो पक्षों में शुद्ध प्रमाण और तर्काधारित शास्त्रार्थ को 'वाद' कहा जाता है। इनमें जल्प और वितण्डा का फल शक्ति-परीक्षा है तथा वाद का फल तत्त्व-निर्णय है। इनमें तत्त्व-निर्णायक वाद को अपना स्वरूप बताते हुए उसे विभूति माना है।

अवबोधाभ्यासः

अधस्तनान् प्रश्नान् समाधत्ताम्—

१. इह का विभूतीः निर्दिशति? ....

२. सर्गपदेनात्र कस्याः सृष्टेर्ग्रहणमिष्टम्? ....

३. अध्यात्मविद्या कथं श्रेष्ठा? ....

४. वादः कुत्र जायते? ....

५. शास्त्रार्थस्य कति कथाप्रकाराः निर्दिष्टाः? ....

६. वादस्य किं स्वरूपम्? ....

७. जल्पकथायां किं भवति? ....

८. वितण्डायाः किं फलम्? ....

व्याकरणाभ्यासः

(अ) सन्धिः

१. आदिरन्तः	– आदिः + अन्तः	–	विसर्गसन्धिः
२. अन्तश्च	– अन्तः + च	–	श्चुत्वसन्धिः
३. चैव	– च + एव	–	वृद्धिसन्धिः
४. एवाहम्	– एव + अहम्	–	दीर्घसन्धिः
५. अध्यात्म	– अधि + आत्म	–	यण्सन्धिः
६. विद्यानां वादः	– विद्यानाम् + वादः	–	अनुस्वारसन्धिः
७. मध्यं च	– मध्यम् + च	–	अनुस्वारसन्धिः

अधस्तनेषु रेखाङ्कितेषु सन्धिच्छेदं करोतु–

(i) भक्त्युपहृतम् अश्नामि। ....

(ii) प्रयतात्मा प्रयच्छति। ....

(iii) पुम्भिः स्त्रीभिश्च हरिणादिभिः। ....

(iv) श्रीकामश्चरितं तपः। ....

(v) आत्मानं स्वर्गतं मेने। ....

(vi) उषित्वाच्युतमन्दिरे। ....

(vii) तमसैवावृता दिशः। ....

(viii) अम्बुभिरिहार्दिता भृशम्। ....

(ix) सान्दीपनिर्गुरुरन्वेषयति। ....

(x) नैवातिप्रीयसे विद्वन्। ....

(आ) समासः

अध्यात्मविद्या – आत्मनि इति – अध्यात्मम् – अव्ययीभावः, अध्यात्मं* विद्या अध्यात्मविद्या– षष्ठीतत्पुरुषः।

(इ) *विशेषः

अव्ययीभावसमासे अकारान्तानां पञ्चमीं विहाय सर्वासु विभक्तिषु समानमेवं रूपं भवति, परन्तु तृतीयासप्तम्योः तत्तद्विभक्तिरूपमपि विकल्पेन प्रयुज्यते। यथा–'अध्यात्मम्' इति सर्वासु विभक्तिषु समानं रूपम्, किन्तु पञ्चम्याम्–अध्यात्मात् अध्यात्माभ्याम् अध्यात्मेभ्यः इति रूपाणि। तृतीयायां सप्तम्यां च क्रमेण अध्यात्मम् - अध्यात्मेन, अध्यात्मम् - अध्यात्मे इत्यादीनि वैकल्पिकरूपाणि बोध्यानि।

अधस्तनेषु समस्तेषु विग्रहपूर्वकं समासं करोतु–

(i) अध्यात्मगुरुः ....

(ii) यथाशक्तियुद्धष्व ....

(iii) उपग्रामनदी ....

(iv) अनुकूलशासनः ....

(v) प्रतिकूलशासनः ....

(vi) प्रतिकूलारये ....

(vii) सशास्त्रम् ....

(ई) कृत्प्रत्ययः

१. सर्गाणाम् – सृज् + घञ् = सर्ग, तेषाम्

२. वादः – वद् + घञ् = वाद, वादः

३. प्रवदताम् – प्र + वद् + शतृ = प्रवदत्, तेषाम्

अधः प्रकृतिप्रत्ययेभ्यः निष्पन्नं पदं वाक्ये प्रयुक्ताम्–

(i) मुद् + अच् – ....

(ii) मोदि + शतृ – ....

(iii) मुह् + अच् – ....

(iv) मुह् + शतृ – ....

(v) मुण्ड् + शतृ – ....

(vi) भल् + घञ् – ....

(vii) भण् + घञ् – ....

(viii) भ्रम् + अच् - ....

(ix) भ्रम् + शतृ - ....

(उ) क्रियाकारकसम्बन्धः

अस्मि	- आक्षिप्ता क्रिया	अर्जुन!	- सम्बोधने
अहम्	- कर्ता	अहम्	- कर्ता
आदिः	- कर्तृविशेषणम्	अस्मि	- आक्षिप्ता क्रिया
अन्तः	- कर्तृविशेषणम्	अध्यात्मविद्या	- कर्तृविशेषणम्
मध्यम्	- कर्तृविशेषणम्	विद्यानाम्	- निर्धारणषष्ठी
सर्गाणाम्	- सम्बन्धषष्ठी	वादः	- कर्तृविशेषणम्
एव	- निर्धारणे	प्रवदताम्	- लक्षणया निर्धारणषष्ठी
च	- समुच्चये		

(ऊ) पर्यायशब्दः

१. सर्गः - १. सृष्टिः(इका. स्त्री.), २. रचना (आका. स्त्री.), ३. उत्पत्तिः (इका. स्त्री.), ४. स्वभावः (अका. पुं.), ५. त्यागः (अका. पुं.), ६. निश्चयः (अका. पुं.)

२. आदिः - १. पूर्वः (अका. त्रिलि.), २. पौरस्त्यः (अका. त्रिलि.), ३. प्रथमः (अका. त्रिलि.), ४. आद्यः (अका. त्रिलि.), ५. उत्पत्तिः (इका. स्त्री.), ६. हेतुः (उका. पुं.), ७. कारणम् (अका. नपुं.)

◆◆◆

६५. श्लोकः

अक्षराणामकारोऽस्मि द्वन्द्वः सामासिकस्य च।
अहमेवाक्षयः कालो धाताऽहं विश्वतोमुखः।। (भ. गी. १०.३३)

पदच्छेदः

अक्षराणाम्, अकारः, अस्मि, द्वन्द्वः, सामासिकस्य, च।
अहम्, एव, अक्षयः, कालः, धाता, अहम्, विश्वतो-मुखः।।

पदच्छेदाभ्यासः

अधस्तनानि पदानि विच्छिनत्तु-

(i) अकारोऽस्मि - ....

(ii) एवाक्षयः - ....

(iii) कालो धाता - ....

(iv) धाताहम् - ....

(v) विश्वतोमुखः - ....

पदपरिचयः

पदम्	विश्लेषणम्	पदम्	विश्लेषणम्
अक्षराणाम्	अक्षर-अका.नपुं.ष.बहु.समस्तम्	एव	अव्ययम्
अकारः	अकार-अका.पुं.प्र.एक.कृदन्तं विधेयम्	अक्षयः	अक्षय-अका.पुं.प्र.एक.समस्तं **विशेषणम्**
अस्मि	अस्+लट् उपुं एक.अदादि कर्तरि क्रिया	कालः	काल-अका.पुं.प्र.विशेष्यं **विधेयम्**
द्वन्द्वः	द्वन्द्व-अका.पुं.प्र.एक.विधेयम्	धाता	धातृ-ऋका.पुंप्र.एक.कृदन्तं विशेष्यं विधेयम्
सामासिकस्य	सामासिक-अका.पुं.ष.एक.तद्धितान्तम्	अहम्	अस्मद्-दका.प्र.एक.उद्देश्यं सर्व.
च	अव्ययम्	विश्वतोमुखः	विश्वतोमुख-अका.पुंप्र.एक.समस्तं विशेषणम्
अहम्	अस्मद्-दका.प्र.एक.सर्व.उद्देश्यम्		

वर्गीकरणाभ्यासः

अधस्तनेषु वर्गेषु श्लोकपदानि विभज्य लिखन्तु-

(i) प्रथमान्तम् (८) ....

(ii) षष्ठ्यन्तम् (२) ....

(iii) अकारान्तम् (७) ....

(iv) ऋकारान्तम् (१) ....

(v) पुंलिङ्गम् (७) ....

(vi) नपुंसकम् (१) ....

(vii) समस्तम् (३) ....

(viii) कृदन्तम् (१) ....

(ix) सर्वनाम (२) ....

(x) अव्ययम् (२) ....

(xi) क्रियापदम् (१) ....

(xii) विशेष्यम् (२) ....

(xiii) विशेषणम् (२) ....

(xiv) उद्देश्यम् (२) ....

(xv) विधेयम् (४) ....

(xvi) विशेष्यं विशेषणेन योजयतु।

(xvii) उद्देश्यं विधेयैः संयुनक्तु।

आकाङ्क्षाविस्तरः

अस्मि (= विद्ये)।

क: अस्ति? **अहम् अस्मि।**

अहं किम् अस्मि? .... (अका. प्र.)

अहं केषां मध्ये अकारः अस्मि? .... (अका. ष. बहु.)

अहं पुनश्च किम् अस्मि? .... (अका. प्र.)

अहं कस्य मध्ये द्वन्द्वः अस्मि? .... (अका. ष. एक.)

पुनश्चाहं किम् अस्मि? .... (अका. प्र.)

अहं कीदृशः कालः अस्मि? .... (अका. प्र.)

पुनश्चाहं किम् अस्मि? .... (ऋका. प्र.)

अहं कीदृशः धाता अस्मि? .... (अका. प्र. समस्तम्)

अहं विश्वतोमुखः धाताऽस्मि।

पदार्थः

पदम्	संस्कृतम्	हिन्दी
अहम्	अहं (श्रीकृष्णः)	मैं (परमात्मा)
अक्षराणाम्	अकारादिवर्णानां मध्ये	अकारादि वर्णों में
अकारः	अ-वर्णः	अ-अक्षर
च	तथा	और
सामासिकस्य	समास - समुदायस्य मध्ये	समासों में
द्वन्द्वः	द्वन्द्वसमासः	द्वन्द्व समास
अस्मि	भवामि	हूँ।
अहम्	अहं (श्रीकृष्णः)	मैं (कृष्णः)
एव	एव	ही
अक्षयः	अविनाशी	अनश्वर
कालः	महाकालः	काल
विश्वतोमुखः	सर्वतोमुखः	चतुर्दिक् व्याप्त
धाता	कर्मफलविधाता	धारक
(अस्मि)	(अस्मि)	(हूँ।)

भावार्थः

संस्कृतम्–इह श्लोके श्रीकृष्णः अक्षरादिषु विभूतीः स्वाः निरूपयति–

हे पार्थ! अहम् अकारादिस्वराणां व्यञ्जनानां च मध्ये अकारः अस्मि, तस्य सर्ववाङ्मयत्वेन श्रेष्ठत्वात्। तथा च श्रुतिः–अकारो हि सर्वा वाक् सैषा स्पर्शोष्मभिः व्यज्यमाना बह्वी नानारूपा भवति–(ऐत. ब्राह्म. पूर्वा. ३/६)। सर्वेषु वर्णेषु अकारस्य व्याप्तिः, अतः स प्रधानम्।

अव्ययीभावः, तत्पुरुषः बहुव्रीहिः द्वन्द्वश्चेति चतुर्विधः समासः। तत्र पूर्वपदार्थप्रधानः अव्ययीभावः, उत्तरपदार्थप्रधानः तत्पुरुषः, अन्यपदार्थप्रधानः बहुव्रीहिः, उभयपदार्थप्रधानश्च द्वन्द्वः। तत्र उभयपद-प्रधानत्वेन द्वन्द्वः समासेषु श्रेष्ठः। अत एव स भगवतो विभूतिर्विज्ञेयः।

हे पार्थ! अहमेव अविनाशिकालः महाकालः अस्मि। कालः त्रिविधः–

१. वर्ष-मास-दिन-घटीरूपः प्रकृतिकार्यः कालः।

२. महाप्रलये प्रकृतिसाम्यावस्थायां विद्यमानः कालः।

३. परमेश्वराख्यः अक्षयो महाकालः।

तेषु अक्षयः कालः महाकालः मम परमेश्वरस्य स्वरूपमस्ति।

फलदातृणां मध्ये विश्वतोमुखः सर्वातिशायी सर्वकर्मफलानां विधाता परमेश्वरः श्रीकृष्ण एव। स हि विराड्रूपेण सर्वं जगत् धारयति पालयति व्याप्नोति च। अतः सर्वतोमुखेन विधातृत्वं भगवतो श्रीकृष्णस्यैव स्वरूपम्।

हिन्दी–इस श्लोक के द्वारा भगवान् श्रीकृष्ण ने अक्षर आदि में अपनी विभूतियों का निरूपण किया है–

हे अर्जुन! अकारादि स्वरों और व्यञ्जनों में मैं अकार हूँ। सभी अक्षरों में अकार व्याप्त रहता है। ऐतरेय ब्राह्मण की पूर्व कण्डिका में कहा है–अकारो हि सर्वा वाक् सैषा स्पर्शोष्मभिः व्यज्यमाना बह्वी नानारूपा भवति–(३/६)। अकार से सभी अक्षरों की उत्पत्ति होने के कारण वह अक्षरों में श्रेष्ठ है। इसीलिए भगवान् ने उसे अपनी विभूति कहा है।

समास चार प्रकार के होते हैं–अव्ययीभाव, तत्पुरुष, बहुव्रीहि और द्वन्द्व। अव्ययीभाव में केवल पूर्वपद का अर्थ प्रधान होता है। तत्पुरुष में उत्तर पद का अर्थ प्रधान होता है। बहुव्रीहि में अन्य पदार्थ प्रधान होता है। तथा द्वन्द्व में दोनों पदों का अर्थ प्रधान होता है। द्वन्द्व में सबकी प्रधानता होने से ही इसे समासों में प्रधान कहा गया है और भगवान् ने इसे अपना स्वरूप बताया है।

हे अर्जुन! मैं ही अक्षय काल हूँ। मुख्यतः काल के तीन भेद माने गये हैं–

१. वर्ष-मास-दिन-घण्टा आदि रूप में प्रकृति का कार्यरूप काल।

२. महाप्रलय के समय प्रकृति की साम्यावस्था का काल।

३. उससे भिन्न परमेश्वर रूप अक्षयकाल महाकाल।

ऊपर के दो काल विनाशी हैं, किन्तु तीसरा अविनाशी महाकाल ही परमात्मा का स्वरूप है।

फल देने वालों में परमात्मा सर्वतोमुख सब प्रकार के कर्म-फलों को देने वाला सबसे बड़ा विधाता है। वह विराट् रूप से सम्पूर्ण ब्रह्माण्ड को धारण-पोषण करने वाला विश्वरूप परमेश्वर है।

अवबोधाभ्यासः

अधस्तनान् प्रश्नान् समाधत्ताम्–

१. इह श्लोके कासां विभूतीनां निरूपणम्? ....
२. अकारः कथं श्रेष्ठः? ....
३. अकारस्य श्रेष्ठत्वे किं प्रमाणम्? ....
४. समासः कतिविधः, के च भेदाः तस्य? ....
५. द्वन्द्वस्य किं स्वरूपम्? ....
६. कश्च क्षयः कालः? ....
७. तत्पुरुषे कस्य प्राधान्यम्? ....
८. अन्यपदार्थः कस्मिन् समासे प्रधानम्? ....
९. अव्ययीभावस्य किं लक्षणम्? ....
१०. 'विराड्रूपः' इत्यर्थः कस्य पदस्य? ....

व्याकरणाभ्यासः

(अ) सन्धिः

१. अकारोऽस्मि – अकारः + अस्मि – विसर्गसन्धिः पूर्वरूपसन्धिश्च
२. एवाक्षयः – एव + अक्षयः – दीर्घसन्धिः
३. धाताहम् – धाता + अहम् – दीर्घसन्धिः
४. कालो धाता – कालः + धाता – विसर्गसन्धिः
५. विश्वतोमुखः – विश्वतः + मुखः – विसर्गसन्धिः
६. अहं विश्वतोमुखः – अहम् + विश्वतोमुखः – अनुस्वारसन्धिः

अधस्तनेषु रेखाङ्कितेषु सन्धिं विसन्धिं च करोतु–

(i) सुप्तायां मयि जागर्ति नागोऽयम्। ....
(ii) योऽनाथवर्गाधिमलम् उपोहति। ....
(iii) न विदाम वयं सम्यक्। ....

(iv) कमु + नु त्वदन्यमु + रमये। ....

(v) अथ मे + अभिहितः + देवः। ....

(vi) तपः + अतप्यत दारुणम्। ....

(vii) प्रहृष्ट + आत्मा छात्रः गुरुं नमति। ....

(viii) रोषाद् विस्फुरित + अधरः + राजपुरुषः + अवोचत्। ....

(ix) भूतानुग्रहकातराः साधवो भवन्ति। ....

(x) अथातः श्रूयतां कथा। ....

(आ) समासः

१. अक्षराणाम् – न क्षरम् = अक्षरम्, तेषाम् – नञ्तत्पुरुषः

२. अक्षयः – न विद्यमानः क्षयः यस्य सः – बहुव्रीहिः

३. विश्वतोमुखः – विश्वतो मुखानि यस्य सः – बहुव्रीहिः

अधस्तनेषु रेखाङ्कितपदेषु सविग्रहं समासं करोतु–

(i) अवध्यः अयं मृगः। ....

(ii) अमेध्यं वस्तु परित्यजेत्। ....

(iii) तद् उपस्पर्शनाद् एव विनिर्धूतमलाशयाः। ....

(iv) संस्कृतस्य प्रचाराय एते सन्ति धृतव्रताः। ....

(v) अफलो वृक्षः दर्शनैकफलः। ....

(vi) अशिक्षो वञ्चितो भवति। ....

(vii) पयोव्रतो न दध्यत्ति। ....

(इ) तद्धितप्रत्ययः

१. सामासिकस्य – समासानां समूहः – **समास + ठक् (इक) = सामासिकः**

अधस्तनेभ्यः प्रकृतिप्रत्ययेभ्यः निष्पन्नं पदं वाक्ये व्यवहरतु–

(i) हस्तिनां समूहः – हस्ति + ठक् – ....

(ii) केदाराणां समूह – केदार + ठञ् – ....

(iii) कवचिनां समूहः - कवचि + ठञ् - ....

(iv) केशानां समूहः - केश + ठक् - ....

(v) अश्वानां समूहः - अश्व + छः - ....

(vi) धेनुनां समूहः - धेनु + ठक् (क) - ....

(vii) वस्तूनां समूहः - वस्तु + ठक् (क) - ....

(ई) कृत्प्रत्ययः

धाता - धा + तृच् (तृ) = धातृ - धाता

अधस्तनेभ्यः धातुभ्यः तृजन्तं रूपं निष्पाद्य तेषां वाक्यप्रयोगं करोतु–

(i) अत् + तृच् = ...

(ii) अद् + तृच् = ...

(iii) अञ्च् + तृच् = ...

(iv) अर्च् + तृच् = ...

(v) ईक्ष् + तृच् = ...

(vi) ईर्ष्य् + तृच् = ...

(vii) ईश् + तृच् = ...

(उ) क्रियाकारकसम्बन्धः

अस्मि	-	कर्तरि क्रिया	च	-	समुच्चये
अहम्	-	कर्ता	अस्मि	-	आक्षिप्ता क्रिया
अकारः	-	कर्तृविशेषणम्	अहम्	-	कर्ता
अक्षराणाम्	-	निर्धारणषष्ठी	कालः	-	कर्तृविशेषणविशेषणम्
द्वन्द्वः	-	कर्तृविशेषणम्	धाता	-	कर्तृविशेषणम्
सामासिकस्य	-	निर्धारणषष्ठी	विश्वतोमुखः	-	कर्तृविशेषणविशेषणम्
एव	-	अन्यव्यवच्छेदे			

(ऊ) पर्यायशब्दः

१. अक्षयः – १. अविनाशी (अविनाशिन् नका. त्रिलि.), २. अनश्वरः (अका. त्रिलि.), ३. अक्षरः (अका. त्रिलि.), ४. अक्षीणः (अका. त्रिलि.)

२. धाता – १. विधाता (विधातृ – ऋका. त्रिलि.), २. धारयिता (धारयितृ – ऋका. त्रिलि.), ३. पालयिता (पालयितृ – ऋका. त्रिलि.), ४. परमेश्वरः (अका. पुं.), ५. ब्रह्मा (ब्रह्मन् नका. पुं.)

(ए) विशेषः

पञ्चमीविभक्त्यर्थे तसिल् (तस्) सर्वप्रातिपदिकेभ्यो विधीयते।

यथा– वि श्वतः + तसिल् (तस्) = वि श्वतः = वि श्वतोमुखम्

अधस्तनानां पदानां वाक्ये प्रयोगं करोतु–

(i) ग्राम + तसिल् = ग्रामतः – ....

(ii) नगर + तसिल् = नगरतः – ....

(iii) हिमालय + तसिल् = हिमालयतः – ....

(iv) वाराणसी + तसिल् = वाराणसीतः – ....

(v) मध्य + तसिल् = मध्यतः – ....

(vi) सर्व + तसिल् = सर्वतः – ....

◆◆◆

६६. श्लोकः

मृत्युः सर्वहरश्चाहमुद्भवश्च भविष्यताम्।
कीर्तिः श्रीर्वाक्च नारीणां स्मृतिर्मेधा धृतिः क्षमा।।(भ. गी. १०.३४)

पदच्छेदः

मृत्युः, सर्व-हरः, च, अहम्, उद्भवः, च, भविष्यताम्।
कीर्तिः, श्रीः, वाक्, च, नारीणाम्, स्मृतिः, मेधा, धृतिः, क्षमा।।

पदच्छेदाभ्यासः

अधस्तनेषु पदच्छेदं करोतु–

(i) चाहम् – ....

(ii) सर्वहरश्च – ....

(iii) सर्वहरः – ....

(iv) उद्भवश्च – ....

(v) श्रीर्वाक् – ....

(vi) स्मृतिर्मेधा – ....

(vii) नारीणां स्मृतिः – ....

पदपरिचयः

पदम्	विश्लेषणम्	पदम्	विश्लेषणम्
मृत्युः	मृत्यु-उका.पुं.प्र.एक.विशेष्यं विधेयम्	श्रीः	श्री-ईका.स्त्री.प्र.एक.विधेयम् कृदन्तम्
सर्वहरः	सर्वहर-अका.पुंप्र.एक.समस्तं विशेषणम् कृदन्तम्	वाक्	वाच्-चका.स्त्री.प्र.एक.विधेयम् कृदन्तम्
च	अव्ययम्	च	अव्ययम्
अहम्	अस्मद्-दका.प्र.एक.सर्व.उद्देश्यम्	नारीणाम्	नारी-ईका.स्त्री.ष.बहु.
उद्भवः	उद्भव-अका.पुं.प्र.एक.कृदन्तं विधेयम्	स्मृतिः	स्मृति-इका.स्त्री.प्र.एक.विधेयम् कृदन्तम्
च	अव्ययम्	मेधा	मेधा-आका.स्त्री.प्र.एक.विधेयम् कृदन्तम्
भविष्यताम्	भविष्यत्-तका.पुं.ष.बहु.शत्रन्तम्	धृतिः	धृति इका.स्त्री.प्र.एक.विधेयम् कृदन्तम्
कीर्तिः	कीर्ति-इका.स्त्री.प्र.एक.विधेयम् कृदन्तम्	क्षमा	क्षमा आका.स्त्री.प्र.एक.विधेयम् कृदन्तम्

वर्गीकरणाभ्यासः

अधस्तनेषु वर्गेषु श्लोकपदानां विभाजनं करोतु–

(i) प्रथमान्तम् (११) ....

(ii) षष्ठ्यन्तम् (२) ....

(iii) अकारान्तम् (२) ....

(iv) आकारान्तम् (२) ....

(v) इकारान्तम् (३) ....

(vi) ईकारान्तम् (२) ....

(vii) उकारान्तम् (१) ....

(viii) चकारान्तम् (१) ....

(ix) तकारान्तम् (१) ....

(x) पुंलिङ्गम् (४) ....

(xi) स्त्रीलिङ्गम् (८) ....

(xii) समस्तम् (१) ....

(xiii) शत्रन्तम् (१) ....

(xiv) कृदन्तम् (९) ....

(xv) सर्वनाम (१) ....

(xvi) अव्ययम् (३) ....

(xvii) उद्देश्यम् (१) ....

(xviii) विधेयम् (९) ....

(xix) विशेष्यम् (१) ....

(xx) विशेषणम् (१) ....

(xxi) विशेष्येण सह विशेषणं संयुनक्तु।

(xxii) उद्देश्यस्य विधेयानि लिखन्तु।

आकाङ्क्षाविस्तरः

अहम् अस्मि।

अहं किम् अस्मि? .... (अका. प्र.)

अहं कीदृशः मृत्युः अस्मि? .... (अका. प्र. समस्तम्)

पुनश्च अहं किम् अस्मि? .... (अका. प्र.)

अहं केषाम् उद्भवः अस्मि? .... (तका. ष.)

पुनश्च अहं किं अस्मि?

अहं कीर्तिः, श्रीः, वाक्, स्मृतिः, मेधा, धृतिः, क्षमा च अस्मि।

अहं केषां मध्ये कीर्तिः श्री वाक् स्मृतिः
मेधा धृतिः क्षमा च अस्मि? .... (ईका. ष.)

पदार्थः

पदम्	संस्कृतम्	हिन्दी
अहम्	अहं (श्रीकृष्णः)	मैं (भगवान् कृष्ण)
सर्वहरः	संहारकरः	सबका नाश करने वाला
मृत्युः	विनाशः	मृत्यु
भविष्यताम्	भाविकल्याणानां प्राणिनाम्	भविष्य में कल्याण प्राप्त करने वाले जीवों का
च	तथा	और
उद्भवः	अभ्युदयः	उत्कर्ष हेतु
नारीणाम्	स्त्रीणां मध्ये	स्त्रियों में
च	तथा	और
कीर्तिः	ख्यातिः	कीर्ति
श्रीः	सम्पत्	सम्पत्ति शोभा
वाक्	सरस्वती	वाणी
स्मृतिः	स्मरणशक्तिः	स्मृति

मेधा	धारणा शक्तिः	मेधा
धृतिः	धैर्यम्	धैर्य
क्षमा	सहनशक्तिः	क्षमा
च (अस्मि)	च (अस्मि)	और (हूँ)

भावार्थः

संस्कृतम्—इह श्लोके श्रीकृष्णः मृत्युप्रभृतीः विभूतीः निर्दिशति—

हे पार्थ! अहं प्रलये सर्वेषां संहारकरः मृत्युः अस्मि। इह लोकेऽपि मृत्युः द्विविधः—धनादिहरः प्राणहरश्च। अहं श्रीकृष्णः उभयहरः अतः सर्वहरः मृत्युरस्मि। किं च यथा भगवान् जीवं शरीरेण वियोजयति तथा स एव पुनः जीवं शरीरेण योजयति। तदुक्तम्—भविष्यत्काले उत्पत्स्यमानानां प्राणिनां स भगवानेव उत्पत्तिहेतुः उद्भवश्च वर्तते। अपि च भविष्यत्काले ये प्राणिनः कल्याणं प्राप्स्यन्ति, तेषाम् अभ्युदयात्मकं कल्याणम्, कल्याणहेतुः वा स भगवानेव अवगन्तव्यः। एवञ्च नाशश्च अभ्युदयश्च अथवा मरणं च जन्म च इति उभे अपि भगवतो विभूती स्तः।

स्त्रीणां मध्ये कीर्त्याद्याः सप्त देवतारूपाः उत्तमाः स्त्रियोऽहं भगवान् श्रीकृष्ण एव। एताः सप्त भगवत्स्वरूपाः स्त्रियो विभूतयः सन्ति, यासाम् आभासमात्रसम्बन्धेनापि लोकः आत्मानं कृतार्थं मन्यते।

दक्षप्रजापतेः प्रसूतिभार्यायां कीर्तिः मेधा धृतिः स्मृतिः क्षमा चेति पञ्च कन्या बभूवुः। तासु कीर्तिः मेधा धृतिश्च धर्मेण, स्मृतिः अङ्गिरसा, पुलहेन च क्षमा विवाहिताः। भृगोः ख्यातिभार्यायां श्रीः जाता, या विष्णोः पाणिं जग्राह। वाक् च चतुर्मुखस्य ब्रह्मणः कन्या। एताः सप्त देव्यः कीर्त्यादि गुणानाम् अधिष्ठात्र्यः सन्ति।

हिन्दी—इस श्लोक में भगवान् कृष्ण ने मृत्यु आदि को अपनी विभूति बताया है—

हे अर्जुन! प्रलय में सबका नाश करने वाला मृत्यु मैं हूँ। इस संसार में भी धन आदि वस्तु का हरण और प्राण का हरण दोनों मृत्यु कहलाता है। यहाँ भगवान् ने दोनों ही प्रकार के हरण को अपना स्वरूप कहा है। जिस प्रकार मृत्युरूप होकर भगवान् जीव का शरीर से वियोग कराते हैं, उसी प्रकार भगवान् ही उनका पुनः दूसरे शरीर से संयोग कराकर उन्हें उत्पन्न करते हैं। यही भाव दिखलाने के लिए भगवान् ने अपने को भावी जीवों की उत्पत्ति का हेतु बताया है। भाष्यकारों ने यहाँ 'उद्भव' शब्द का अभ्युदय अर्थ मानते हुए अर्थ किया है—भविष्य में उत्कर्ष पाने वाले जीवों का मैं अभ्युदय हूँ अर्थात् उनके कल्याण का हेतु हूँ।

कीर्ति आदि सात देवियाँ स्त्रियों में उत्तम हैं। वे सातों स्त्रियाँ मैं ही हूँ। अर्थात् वे भगवान् की विभूतियाँ हैं और भगवत्स्वरूप हैं। इनमें कीर्ति, मेधा, धृति, स्मृति और क्षमा दक्ष प्रजापति की भार्या प्रसूति से उत्पन्न हैं, जिनमें धर्म से कीर्ति, मेधा और धृति का अङ्गिरा से स्मृति का तथा पुलह से क्षमा का विवाह हुआ था। भृगु की कन्या श्री का जन्म ख्याति से हुआ था, जिसका विवाह विष्णु

से हुआ था। वाक् ब्रह्माजी की कन्या हैं। ये सातों देवियाँ कीर्ति आदि गुणों की अधिष्ठात्री देवता हैं। इनकी कृपा-कणिका मात्र से व्यक्ति लोक में कृतार्थ एवं श्लाघ्य हो जाता है।

अवबोधाभ्यासः

अधस्तनान् प्रश्नान् उत्तरयतु–

१. इह श्लोकेन कासां विभूतीनां वर्णनम्? ....

२. लोके मृत्युः कतिविधयः? ....

३. उद्धवस्य इह कौ द्वौ अर्थौ कृतौ? ....

४. श्रीः कस्य कन्या कस्य भार्या च? ....

५. वाक् कस्य पुत्री? ....

६. आसु कीर्त्यादिषु दक्षप्रजापतेः पुत्रीणां नामानि कानि? ....

७. एतासां प्राधान्ये किं कारणम्? ....

व्याकरणाभ्यासः

(अ) सन्धिः

१. चाहम् – च + अहम् – दीर्घसन्धिः

२. सर्वहरश्च – सर्वहरः + च – श्चुत्वसन्धिः

३. उद्धवश्च – उद्धवः + च – श्चुत्वसन्धिः

४. श्रीर्वाक् – श्रीः + वाक् – विसर्गसन्धिः

५. स्मृतिर्मेधा – स्मृतिः + मेधा – विसर्गसन्धिः:

६. नारीणां स्मृतिः– नारीणाम् + स्मृतिः – अनुस्वारसन्धिः

अधस्तनेषु रेखाङ्कितेषु सन्धिं विसन्धिं च करोतु–

(i) ईशितुः + चराचरं क्रीडनमाहुः। ....

(ii) सम्भवः + च विनाशः + च शोकः

+ च विविधः स्मृतिः। ....

(iii) भूतानि निजयोनि कर्मभिः + भवन्ति। ....

(iv) रिपोः + अभिमुखे श्लाघ्यः शूराणां वधः। ....

(v) कामम् + नयतु माम् + देव। ....

(vi) स निरीक्ष्याम्बरे देवं सवाहं ननाम। ....

(vii) असाधवो लोके दुर्मैत्राश्छद्मवेषिणः सन्ति। ....

(आ) समासः

१. सर्वहरः - सर्वाणि हरति - सर्व + हर् + अच् = सर्व + हर - कृत्प्रत्ययः उपपदसमासश्च

अधस्तनेषु रेखाङ्कितेषु सविग्रहं समासं लिखतु–

(i) हितकरं नैव जहाति लोकः। ....

(ii) अन्तेऽधुना प्राणहरः विदेशे। ....

(iii) क्वचित् कर्मकरो न सीदति। ....

(iv) नन्दनन्दनं नमति भास्करः। ....

(v) विषधरादपि भयङ्करो दुर्जनः। ....

(vi) वनेचराणामपि सन्ति सेतवः। ....

(इ) कृत्प्रत्ययः

१. उद्भवः - उद् + भू + अच् = उद्भव

२. श्रीः - श्रयति हरिं – श्रि + क्विप् = श्री

३. वाक् - वक्ति इति – वच् + क्विप् = वाच्

४. मेधा - मेधते सङ्गच्छते सर्वम् अस्याम् – मेध् + अ + टाप् = मेधा

५. क्षमा - क्षम्यते इति – क्षम् + अच् + टाप = क्षमा

६. धृतिः - धार्यते इति – धृ + क्तिन् (ति) = धृति

७. स्मृतिः - स्मरणम् इति – स्मृ + क्तिन् = स्मृति

८. कीर्तिः - कीर्यते इति – कृ + क्तिन् = कीर्ति

९. भविष्यताम् - भू + लृट् = भू + शतृ = भविष्यत्

अधः प्रकृतिप्रत्ययेभ्यः निष्पन्नं रूपं वाक्ये व्यवहरतु–

(i) हन् + क्तिन् - ....

(ii) शुध् + क्तिन् - ....

(iii) वृध् + क्तिन् - ....

(iv) प्र + गम् + क्तिन् - ....

(v) क्षुध् + अ - ....

(vi) मुन्थ् + अ - ....

(vii) प्रच्छ् + क्विप् - ....

(ई) विशेषः

यथा धातोर्लटः स्थाने शतृशानचौ, तथैव धातोर्लृटः स्थानेऽपि परस्मैपदिनः शतृप्रत्ययः, आत्मनेपदिनश्च धातोः शानच्प्रत्ययः विधीयेते। प्रत्यये सति लृडर्थं बोधयितुं प्रकृतिप्रत्यययोर्मध्ये 'स्य' विकरणः सेड्धातुभ्य इडागमः षत्वं च जायन्ते। यथा–

भविष्यताम् – भू+ लृट् = भू + शतृ = भू + इ + स्य + अत् = भविष्यत्, तेषाम् भविष्यताम् (परस्मैपदम्)

अधस्तनेभ्यः प्रकृतिप्रत्ययेभ्यः निष्पन्नं पदं वाक्ये व्यवहरतु–

(i) गम् + इ + स्य + शतृ - ....

(ii) वृध् + इ + स्य + शानच् - ....

(iii) वद् + इ + स्य + शतृ - ....

(iv) मुद् + इ + स्य + शानच् - ....

(v) स्था + स्य + शतृ - ....

(vi) सम् + पद + स्य + शानच् - ....

(vii) नम् + स्य + शतृ - ....

(viii) लभ् + स्य + शानच् - ....

(उ) क्रियाकारकसम्बन्धः

अस्मि	–	आक्षिप्ता कर्तरि क्रिया	श्रीः	–	कर्तृविशेषणम्
अहम्	–	कर्ता	वाक्	–	कर्तृविशेषणम्
मृत्युः	–	कर्तृविशेषणम्	स्मृतिः	–	कर्तृविशेषणम्
सर्वहरः	–	कर्तृविशेषणविशेषणम्	मेधा	–	कर्तृविशेषणम्
उद्भवः	–	कर्तृविशेषणम्	धृतिः	–	कर्तृविशेषणम्
भविष्यताम्	–	सम्बन्धषष्ठी	क्षमा	–	कर्तृविशेषणम्
कीर्तिः	–	कर्तृविशेषणम्	च	–	समुच्चये

◆◆◆

६७. श्लोकः

बृहत्साम तथा साम्नां गायत्री छन्दसामहम्।
मासानां मार्गशीर्षोऽहमृतूनां कुसुमाकरः।।(भ. गी. १०.३५)

पदच्छेदः

बृहत्-साम, तथा, साम्नाम्, गायत्री, छन्दसाम्, अहम्।
मासानाम्, मार्गशीर्षः, अहम्, ऋतूनाम्, कुसुम+आकरः।।

पदच्छेदाभ्यासः

अधस्तनेषु पदेषु विच्छेदं करोतु–

(i) मार्गशीर्षोऽहम् – ....

(ii) मासानां मार्गशीर्षः – ....

(iii) कुसुमाकरः – ....

(iv) ऋतूनां कुसुम – ....

(v) साम्नां गायत्री – ....

(vi) बृहत्साम – ....

पदपरिचयः

पदम्	विश्लेषणम्	पदम्	विश्लेषणम्
बृहत्साम	बृहत्सामन्–नका.नपुं.प्र.एक.समस्तं विधेयम्	मासानाम्	मास–अका.पुं.ष.एक.
तथा	अव्ययं तद्धितान्तम्	मार्गशीर्षः	मार्गशीर्ष–अका.पुंप्र.एक.समस्तं तद्धितान्तं विधेयम्
साम्नाम्	सामन्–नका.नपुं.ष.बहु.	अहम्	अस्मद्–दका.प्र.एक.सर्व.उद्देश्यम्
गायत्री	गायत्री–ईका.स्त्री.प्र.एक.विधेयम्	ऋतूनाम्	ऋतु–उका.पुं.ष.बहु.
छन्दसाम्	छन्दस्–सका.नपुं.ष.बहु.	कुसुमाकरः	कुसुमाकर–अका.पुं.प्र.एक.समस्तं विधेयम्
अहम्	अस्मद्–दका.प्र.एक.सर्व.उद्देश्यम्		

वर्गीकरणाभ्यासः

अधस्तनेषु वर्गेषु श्लोकपदानां विभाजनं करोतु–

(i) प्रथमान्तम् (६) ....

(ii) षष्ठ्यन्तम् (४) ....

(iii) अकारान्तम् (३) ....

(iv) ईकारान्तम् (१) ....

(v) उकारान्तम् (१) ....

(vi) नकारान्तम् (२) ....

(vii) सकारान्तम् (१) ....

(viii) पुंलिङ्गम् (४) ....

(ix) स्त्रीलिङ्गम् (१) ....

(x) नपुंसकम् (३) ....

(xi) समस्तम् (३) ....

(xii) तद्धितान्तम् (२) ....

(xiii) अव्ययम् (१) ....

(xiv) सर्वनाम (२) ....

(xv) उद्देश्यम् (२) ....

(xvi) विधेयम् (४) ....

(xvii) उद्देश्येन सह विधेयानि संयुनक्तु।

आकाङ्क्षाविस्तरः

अहम् अस्मि।

अहं किम् अस्मि? .... (नका. प्र.)

अहं केषां मध्ये बृहत्साम अस्मि? .... (नका. ष.)

पुनश्च अहं किम् अस्मि? .... (ईका. प्र.)

अहं केषां मध्ये गायत्री अस्मि? .... (सका. ष.)

तथा अहं पुनः किम् अस्मि? .... (अका. प्र. तद्धितान्तम्)

अहं केषां मध्ये मार्गशीर्षः अस्मि? .... (अका. ष.)

पुनश्चाहं किमस्मि? .... (अका. प्र.)

अहं केषां मध्ये कुसुमाकरः अस्मि? .... (उका. ष.)

अहम् ऋतूनां कुसुमाकरोऽस्मि।

पदार्थः

पदम्	संस्कृतम्	हिन्दी
अहम्	अहं (श्रीकृष्णः)	मैं (भगवान् कृष्ण)
साम्नाम्	वेदगीतीनां मध्ये	वेद-गानों में
बृहत्साम	बृहत्सामाख्यं पृष्ठस्तोत्रम्	बृहत्साम नामक पृष्ठस्तोत्र
तथा	एवम्	उसी प्रकार
छन्दसाम्	छन्दोबद्धानाम् ऋचां मध्ये	छन्दोबद्ध ऋचाओं में
गायत्री	गायत्री ऋक्	गायत्री मन्त्र
	(अस्मि)	(हूँ)
अहम्	अहं (श्रीकृष्णः)	मैं (भगवान् कृष्ण)
मासानाम्	चैत्रादिचान्द्रमासानां मध्ये	चैत्रादि महीनों में
मार्गशीर्षः	आग्रहायणः	अगहन महीना
ऋतूनाम्	ग्रीष्मादीनाम् ऋतूनां मध्ये	ऋतुओं में
कुसुमाकरः	वसन्तः	वसन्त ऋतु
(अस्मि)	(अस्मि)	हूँ।

भावार्थः

संस्कृतम्–अस्मिन् श्लोके श्रीकृष्णः बृहत्सामादीः स्वविभूतीः निर्दिशति–

हे पार्थ! वेदगानानां साम्नां मध्ये अतिरात्रयागे गीयमानं पृष्ठस्तोत्रं 'त्वामिद्धि हवामहे' इत्यादि–मन्त्रात्मकं 'बृहत्साम'– नामाहम् अस्मि। तद्धि सामगानेषु अर्थदृष्ट्या गानदृष्ट्या च बृहत् प्रधानम्, अतः 'बृहत्साम' इत्युच्यते। इतः पूर्वं द्वाविंशे श्लोके 'वेदानां सामवेदोऽस्मि' इत्यादिना सामवेदस्य प्राधान्यमुक्तम्। इदानीमनेन श्लोकेन सामवेदेऽपि अवान्तरप्राधान्यं निर्दिष्टम्।

पुनश्च छन्दोविशिष्टानां मन्त्राणां मध्ये गायत्रीमन्त्रः अहमस्मि। सा हि गायत्री द्विजातेर्द्वितीयजन्मजननी प्रातःसवनादि-सवनत्रयव्यापिनी सोमाहरणसम्पादिका चेति छन्दस्सु श्रेष्ठा विभूतिरवगन्तव्या।

चैत्रादिषु द्वादशसु चान्द्रमासेषु आग्रहायणो मासः प्रधानम्। तत्र कारणम्, तस्मिन् मासे अभिनवशालिधान्यानि पच्यन्ते, वास्तूकशाकादिकं प्रभूतम् उपलभ्यते, ऋतौ शीतातपशून्यता च भवति। किं च पूर्वं महाभारतकाले तत एव नववर्षारम्भोऽपि भवति स्म, अत एव हायनस्य (= वर्षस्य) अग्रे इति आग्रहायणो नाम सार्थकमासीत्। अतः श्रीकृष्णः मार्गशीर्षं स्वस्वरूपं निर्दिशति।

एवमेव ग्रीष्मादीनाम् ऋतूनां मध्ये श्रेष्ठत्वात् वसन्तर्तुः भगवतो विभूतिरस्ति। तस्य प्राधान्यादेव स कुसुमानां सर्वसुगन्धिपुष्पाणामाकरोऽतिरमणीयः कथितः। तदुक्तम्–'वसन्ते ब्राह्मणमुपनयीत' 'वसन्ते ब्राह्मणोऽग्नीनादधीत' इत्यादि। किं च वसन्तस्य श्रेष्ठत्वं सर्वे अनुभवन्ति।

हिन्दी–इस श्लोक में भगवान् श्रीकृष्ण ने बृहत्साम आदि अपनी विभूतियों का निरूपण किया है–

हे अर्जुन! सामगानों में मैं 'बृहत्साम' नामक गान हूँ। 'त्वामिद्धि हवामहे' इत्यादि मन्त्रों वाले बृहत्साम का गान अतिरात्र याग में पृष्ठस्तोत्र के रूप में होता है। उस स्तोत्र में इन्दुस्वरूप परमात्मा का सुन्दर वर्णन है, अतः अर्थ और गान की दृष्टि से वह साम-गानों में प्रधान है, इसीलिए उसका नाम 'बृहत्-साम' है। भगवान् ने यहाँ उसे अपनी विभूति कहा है। इसके पूर्व बाईसवें श्लोक में 'वेदानां सामवेदोऽस्मि' वाक्य से सामवेद की प्रधानता का निरूपण कर चुके हैं। यहाँ सामवेद की अवान्तर विभूति का निरूपण हुआ है।

छन्दों में मैं गायत्री हूँ–यहाँ छन्दः शब्द से छन्दोमयी ऋचा समझना चाहिए। अर्थात् छन्दोविशिष्ट मन्त्रों में मैं गायत्री मन्त्र हूँ। श्रीकृष्ण ने यहाँ गायत्री मन्त्र को अपनी विभूति बताया है, क्योंकि गायत्री सभी मन्त्रों में श्रेष्ठ है। वह द्विजाति के द्वितीय जन्म की जननी है, प्रातः सवन आदि तीनों सन्ध्याओं में व्याप्त रहती है और याग में उसी के अक्षरों से सोम का आहरण होता है।

चैत्र-वैशाख आदि बारह चान्द्र महीनों में भगवान् ने मार्गशीर्ष (= अगहन) को अपना स्वरूप कहा है। अगहन में नये धान खेतों में पक जाते हैं, शाक-सब्जियाँ भी अधिक होती हैं और अधिक सर्दी-गर्मी न होने से ऋतु सुहावनी लगती है। इसलिए महीनों में वह प्रधान विभूति है। महाभारत काल में अगहन से ही नया वर्ष प्रारम्भ होता था। इसीलिए उसका 'आग्रहायण' (हायन = वर्ष के आगे) नाम पड़ा था।

उसी प्रकार ग्रीष्म-वर्षा आदि ऋतुओं में मैं (भगवान् कृष्ण) कुसुमाकर वसन्त ऋतु हूँ। कुसुमाकर नाम से ही स्पष्ट है कि इस ऋतु में सभी प्रकार के सुगन्धित पुष्प खिले रहते हैं। यह ऋतु सबके लिए अनुकूल रहता है, अतः यह ऋतुओं में प्रधान विभूति है।

अवबोधाभ्यासः

अधस्तनान् प्रश्नान् उत्तरयतु–

१. इह श्लोके का विभूतयो निर्दिष्टाः? ....

२. बृहत्साम कस्मिन् यागे गीयते? ....

३. बृहत्साम कस्य वेदस्य स्तोत्रम्? ....

४. वेदानां कस्य प्राधान्यं भगवता पूर्वमुक्तम्? ....

५. गायत्री - मन्त्रस्य श्रेष्ठत्वे कानि कारणानि? ....

६. मार्गशीर्षस्य किं वैशिष्ट्यम्? ....

७. आग्रहायणशब्देन किं सङ्केत्यते? ....

८. वसन्तः कथं प्रधानम्? ....

व्याकरणाभ्यासः

(अ) सन्धिः

१. मार्गशीर्षोऽहम् - मार्गशीर्षः + अहम् - विसर्गसन्धिः पूर्वरूपसन्धिश्च

२. कुसुमाकरः - कुसुम + आकरः - दीर्घसन्धिः

३. साम्नां गायत्री - साम्नाम् + गायत्री - अनुस्वारसन्धिः

४. मासानां मार्गशीर्षः - मासानाम् + मार्गशीर्षः - अनुस्वारसन्धिः

५. ऋतूनां कुसुमाकरः - ऋतूनाम् + कुसुमाकरः - अनुस्वारसन्धिः

अधस्तनेषु रेखाङ्कितेषु सन्धिच्छेदं करोतु–

(i) अविदित्वा सुखं ग्राम्यं वैतृष्ण्यं नैति पूरुषः। ....

(ii) प्रतीच्छेमां जरां देहि निजं वयः। ....

(iii) भगवानपि विश्वात्मा पावनः श्रीनिकेतनः। ....

(iv) राजन्! त्वया गृहीतोऽहम्। ....

(v) पूरोर्वंशं प्रवक्ष्यामि यत्र जातोऽसि भारत! ....

(vi) रन्तिदेवानुवर्तिनो योगिनोऽभवन्। ....

(आ) समासः

१. बृहत्साम - बृहत् च तत् साम = बृहत्सामन् - कर्मधारयः

२. कुसुमाकरः - कुसुमानाम् आकरः - षष्ठीतत्पुरुषः

अधस्तनेषु रेखाङ्कितेषु सविग्रहं समासं निर्दिशतु–

(i) जीवजलप्रापणात् मे शोकादयो निवृत्ताः। ....

(ii) गात्रपरिश्रमो गतः तवानुभावेन। ....

(iii) विपुलधनं नेच्छति कर्मयोगी। ....

(iv) त्वं विद्यालयस्य पुस्तकालये भविष्यसि। ....

(v) महासुरः कालनेमिः निखिललोकं निरुद्धवान्। ....

(vi) हिमासारेऽपि विकटभटा युध्यन्ते। ....

(इ) तद्धितप्रत्ययः

१. तथा – तेन प्रकारेण – तद् + थाल् (था) = तथा

२. मार्गशीर्षः – मृगशिरसा नक्षत्रेण युक्ता पूर्णिमा – (मृगशिरसाम् + अण् + ङीप् = मार्गशीर्षी) मार्गशीर्षी अस्मिन् अस्ति मार्गशीर्षः – (मार्गशीर्षी + अण् = मार्गशीर्षः मासः)

अधस्तनेभ्यः प्रकृतिप्रत्ययेभ्यः निष्पन्नं रूपं वाक्ये व्यवहरतु–

(i) चित्रा नक्षत्रेण युक्ता पूर्णिमा – (चित्रा + अण् + ङीप्) = ...

(ii) विशाखानक्षत्रेण युक्ता पूर्णिमा – (विशाखा + अण् + ङीप्) = ...

(iii) चैत्री पूर्णिमा अस्मिन् मासे – (चैत्री + अण्) = ...

(iv) वैशाखी पौर्णमासी अस्मिन् मासे – (वैशाखी + अण्) = ...

(v) येन प्रकारेण – (यद् + थाल्) = ...

(vi) सर्वैः प्रकारैः – (सर्व + थाल्) = ...

(vii) अन्येन प्रकारेण – (अन्य + थाल्) = ...

(ई) क्रियाकारकसम्बन्धः

अस्मि – आक्षिप्ता कर्तरि क्रिया

अहम् – कर्ता

बृहत्साम – कर्तृविशेषणम्

मार्गशीर्षः – कर्तृविशेषणम्

मासानाम् – निर्धारणषष्ठी

कुसुमाकरः – कर्तृविशेषणम्

साम्नाम्	-	निर्धारणषष्ठी	ऋतूनाम्	-	निर्धारणषष्ठी
गायत्री	-	कर्तृविशेषणम्	तथा	-	समुच्चये
छन्दसाम्	-	निर्धारणषष्ठी			

(उ) पर्यायशब्दः

१. छन्दः - १. वेदः (अका. पुं.), २. ऋक् (ऋच् चका. स्त्री.), ३. वृत्तम् (अका. नपुं.), ४. पद्यम् (अका. नपुं.)

२. **मार्गशीर्षः** - १. आग्रहायणः (अका. पुं.), २. सहाः (सहस् सका. पुं.), ३. मार्गः (अका. पुं.), ४. आग्रहायणिकः (अका. पुं.)

३. **कुसुमाकरः** - १. वसन्तः (अका. पुं.), २. पुष्पसमयः (अका. पुं.), ३. सुरभिः (इका. पुं.)

◆◆◆

६८. श्लोकः

द्यूतं छलयतामस्मि तेजस्तेजस्विनामहम्।
जयोऽस्मि व्यवसायोऽस्मि सत्त्वं सत्त्ववतामहम्।।(भ. गी. १०.३६)

पदच्छेदः

द्यूतम्, छलयताम्, अस्मि, तेजः, तेजस्विनाम्, अहम्।

जयः, अस्मि, व्यवसायः, अस्मि, सत्त्वम्, सत्त्ववताम्, अहम्।।

पदच्छेदाभ्यासः

अधस्तननि पदानि विच्छिनत्तु–

(i) तेजस्तेजस्विनाम् – ....

(ii) जयोऽस्मि – ....

(iii) व्यवसायोऽस्मि – ....

(iv) सत्त्वं सत्त्ववताम् – ....

(v) द्यूतं छलयताम् – ....

पदपरिचयः

पदम्	विश्लेषणम्
द्यूतम्	द्यूत–अका.नपुं.प्र.एक.विधेयं कृदन्तम्
छलयताम्	छलयत्–तका.पुं.ष.बहु.शत्रन्तम्
अस्मि	अस्+लट् उपु.एक.अदादि कर्तरि परस्मै.क्रिया.
तेजः	तेजस्–सका.नपुं.प्र.एक.विधेयम्
तेजस्विनाम्	तेजस्विन्–नका.पुं.ष.बहु.विन्नन्तम्
अहम्	अस्मद्–दका.प्र.एक.सर्व.उद्देश्यम्
जयः	जय–अका.पुं.प्र.एक.कृदन्तं विधेयम्
अस्मि	अस्+लट् उपु.एक.अदादि.कर्तरि परस्मै.क्रिया.
व्यवसायः	व्यवसाय–अका.पुं.प्र.एक.कृदन्तं विधेयम्
अस्मि	अस्+लट् उपु.एक.अदादि.कर्तरि परस्मै क्रिया.
सत्त्वम्	सत्त्व–अका.नपुं.प्र.एक.तद्धितान्तं विधेयम्
सत्त्ववताम्	सत्त्ववत्–तका.पुं.ष.बहु.तद्धितान्तम्
अहम्	अस्मद्–दका.प्र.एक.सर्व.उद्देश्यम्

वर्गीकरणाभ्यासः

अधस्तनेषु वर्गेषु श्लोकपदानि विभजतु–

(i) प्रथमान्तम् (७) ....

(ii) षष्ठ्यन्तम् (३) ....

(iii) अकारान्तम् (४) ....

(iv) तकारान्तम् (२) ....

(v) नकारान्तम् (१) ....

(vi) सकारान्तम् (१) ....

(vii) पुंलिङ्गम् (५) ....

(viii) नपुंसकम् (३) ....

(ix) सर्वनाम (२) ....

(x) क्रियापदम् (३) ....

(xi) कृदन्तम् (४) ....

(xii) तद्धितान्तम् (३) ....

(xiii) उद्देश्यम् (२) ....

(xiv) विधेयम् (५) ....

(xv) उद्देश्येन सह विधेयं लिखतु।

आकाङ्क्षाविस्तरः

अस्मि (= भवामि)।

कः अस्ति?	**अहम् अस्मि।**	
अहं किम् अस्मि?	....	(अका. प्र. नपुं.)
अहं केषां द्यूतम् अस्मि?	....	(तका. ष.)
पुनरहं किम् अस्मि?	....	(सका. प्र.)
अहं केषां तेजः अस्मि?	....	(नका. ष.)
पुनश्चाहं किम् अस्मि?	....	(अका. प्र. पुं.)
पुनश्चाहं किमस्मि?	....	(अका. प्र. पुं.)
पुनरहं किमस्मि?	....	(अका. प्र. नपुं.)
अहं केषां सत्त्वम् अस्मि?	....	(तका. ष.)

पदार्थः

पदम्	संस्कृतम्	हिन्दी
अहम्	अहं (श्रीकृष्णः)	मैं (भगवान् कृष्ण)
छलयताम्	परवञ्चनपराणाम्	छल-ठगी करने वालों का
द्यूतम्	अक्षदेवनादिलक्षणम्	जूआ
तेजस्विनाम्	अत्युग्रप्रभावानाम्	प्रभावशाली पुरुषों का
तेजः	प्रभावः	प्रभाव
अस्मि	भवामि	हूँ
जयः	विजयः	विजय
अस्मि	(अहं) विद्ये	(मैं) हूँ
व्यवसायः	निश्चयः उद्यमो वा	उद्यम / निश्चय
अस्मि	(अहं) वर्ते	(मैं) हूँ
अहम्	(श्रीकृष्णः) अहम्	मैं (भगवान् कृष्ण)
सत्त्ववताम्	सात्त्विकपुरुषाणाम्	सात्त्विक पुरुषों का
सत्त्वम्	सात्त्विको भावः	सात्त्विक भाव
(अस्मि)	(अस्मि)	(हूँ।)

भावार्थः

संस्कृतम्–इह श्लोके भगवान् कृष्णः द्यूतादि-भावात्मिकाः विभूतीः निर्दिशति–

हे पार्थ! अन्योन्यं परवञ्चनां कुर्वतां जनानाम् अक्षक्रीडनादि– वञ्चनासाधनं सर्वस्वापहारकारणम् अहमस्मि। यथा सर्वस्वहरणं मृत्युः भगवद्विभूतिः, तथैव सर्वस्वहरणकारणं द्यूतादिकमपि भगवद्विभूतिः भगवतो स्वरूपं चावगन्तव्यम्। न च तेन द्यूतादौ प्रवृत्तिः कार्या इति गम्यते, अन्यथा सिंहादिमुखपातेऽपि प्रवृत्तिः स्यात्, तस्यापि भगवद्रूपत्वात्। किन्तु यथा तत्र सिंहादिहिंस्रसेवनं न विधीयते, तथात्र द्यूतादिसेवनमपि न विधीयतेऽनेन।

हे पार्थ! अप्रतिहताज्ञानां प्रभावशालिपुरुषाणां प्रभावः अबाधादेशत्वम् अहमस्मि। तत्तेजः भगवतः अंशो ज्ञेयः। एवमेव जेतृणां पराजितापेक्षया उत्कर्षलक्षणो विजयः, व्यवसायिनां व्यवसायः, उद्यमवताम् उद्यमः, सात्त्विकानां जनानां धर्मज्ञानवैराग्यैश्वर्यमूलकं सत्त्वकार्यं च अहमेवास्मि। एवञ्च

प्रभावः विजयः उद्यमः सात्त्विकभावश्चेति चत्वारोऽपि भावाः भगवतः स्वरूपं सन्ति। अतः एते भावाः येषु सन्ति ते जनाः श्रेष्ठाः। अथ च ते श्रेष्ठा अपि जनाः एतान् भावान् भागवतान् मत्वा तत्र निजत्वाभिमानं न कुर्युरिति भावः।

हिन्दी–इस श्लोक में भगवान् कृष्ण ने जूआ आदि अपनी भावरूप विभूतियों का निर्देश किया है–

हे अर्जुन! दूसरों के साथ छल-कपट करने वाले लोगों के छल का साधन जूआ मैं ही हूँ, जो कि खेलने वालों का सर्वस्व हर लेता है। यहाँ जूए को भगवान् का रूप बतलाने से उसे खेलना अच्छा नहीं समझना चाहिए। जैसे भगवान् का रूप होने पर भी सिंह या मगर से लोग दूर ही रहते हैं, वैसे लोगों को जूए आदि छल-कपट के धन्धे से दूर ही रहना चाहिए।

हे अर्जुन! जिनकी आज्ञा का कभी उल्लंघन नहीं हो सकता, ऐसे प्रभावशाली पुरुषों का प्रभाव मैं हूँ। उस प्रभाव को भगवान् का ही अंश समझना चाहिए। इसी प्रकार विजेताओं का शत्रु पर विजय, व्यवसायी उद्यमी पुरुषों का उद्यम तथा सात्त्विक जनों का धर्म, ज्ञान, वैराग्य और ऐश्वर्य मूलक कार्य सात्त्विक कार्य भी मैं ही हूँ। एवञ्च प्रभाव, विजय, उद्यम और सात्त्विक कार्य ये चारों ही भाव भगवान् के स्वरूप हैं। अतः जिन व्यक्तियों में ये भाव रहते हैं, वे आदरणीय श्रेष्ठ जन कहे जाते हैं तथा उन श्रेष्ठ जनों को भी अपने प्रभावादि पर अभिमान नहीं करना चाहिए, अपितु उन प्रभावादि गुणों को भगवान् का प्रसाद समझना चाहिए।

अवबोधाभ्यासः

अधस्तनान् प्रश्नान् समादधातु–

१. इह श्लोके भावरूपाः काः का विभूतयः परिगणिताः? ....

२. प्रवञ्चनसाधनं क उपयुङ्क्ते? ....

३. अप्रतिहताज्ञया किम् अवगम्यते? ....

४. केषां भावो जयः? ....

५. व्यवसायं कः करोति? ....

६. सात्त्विकभावः कतिविधः, के च ते? ....

व्याकरणाभ्यासः

(अ) सन्धिः

१. जयोऽस्मि – जयः + अस्मि – विसर्गसन्धिः पूर्वरूपसन्धिश्च

२. व्यवसायोऽस्मि – व्यवसायः + अस्मि – विसर्गसन्धिः पूर्वरूपसन्धिश्च

३. तेजस्तेजस्विनाम् – तेजः + तेजस्विनाम् – श्चुत्वसन्धिः

४. द्यूतं छलयताम् – द्यूतम् + छलयताम् – अनुस्वारसन्धिः

५. सत्त्वं सत्त्ववताम् – सत्त्वम् + सत्त्ववताम् – अनुस्वारसन्धिः

अधस्तनेषु रेखाङ्कितेषु सन्धिं असन्धिं च करोतु–

(i) नमो महद्भ्यः + अस्तु। ....

(ii) पुस्तकैः + तनुते ज्ञानम्। ....

(iii) महात्मनाम् + वः प्रचुरः समागमः। ....

(iv) ध्यायन्तु भूतानि शिवं मिथो धिया। ....

(v) युवयोस्तप्यतोस्तीव्रं तपः परमदुष्करम्। ....

(vi) शिष्योऽस्मि। ....

(vii) श्रेयोऽस्माकं विधीयताम्। ....

(आ) तद्धितप्रत्ययः

१. सत्त्वम् – सतो भावः – सत् + त्व = सत्त्व – सत्त्वम्।

२. सत्त्ववताम् – सत्त्वम् अस्ति येषाम् – सत्त्व + मतुप् (मत्) = सत्त्ववत्, तेषाम् – सत्त्ववताम्।

३. तेजस्विनाम् – तेजः अस्ति अस्मिन् – तेजस् + विनि (विन्) = तेजस्विन्, तेषां तेजस्विनाम्।

अधस्तनेषु पदेषु सविग्रहं प्रत्ययं निर्दिशतु–

(i) मनस्विनः – ....

(ii) तपस्वी – ....

(iii) यशस्वी – ....

(iv) शस्त्रवन्तः – ....

(v) शक्तिमान् – ....

(vi) प्रभावताम् – ....

(vii) शिष्यत्वम् – ....

(viii) बुद्धिमत्त्वम् – ....

(ix) छात्रत्वम् – ....

(इ) कृदन्तप्रत्ययः

१. द्यूतम् – दिव + क्त = द्यूत

२. छलयताम् – छलि + शत् = छलयत्

३. जयः – जि + अच् = जय

४. व्यवसायः – वि + अव + सो + घञ् = व्यवसाय

अधस्तनेभ्यः प्रकृतिप्रत्ययेभ्यः निष्पन्नं रूपं वाक्ये प्रयुङ्क्ताम्–

(i) वप् + क्त – ....

(ii) वच् + क्त – ....

(iii) स्वप् + क्त – ....

(iv) कलि + शतृ – ....

(v) कुट्टि + शतृ – ....

(vi) जल्पि + शतृ – ....

(vii) इ + अच् – ....

(viii) जि + अच् – ....

(ix) शी + अच् – ....

(x) अव + सो + घञ् – ....

(ई) क्रियाकारकसम्बन्धः

अस्मि	–	कर्तरि क्रिया	तेजस्विनाम्	–	सम्बन्धषष्ठी
अहम्	–	कर्ता	जयः	–	कर्तृविशेषणम्
द्यूतम्	–	कर्तृविशेषणम्	व्यवसायः	–	कर्तृविशेषणम्
छलयताम्	–	सम्बन्धषष्ठी	सत्त्वम्	–	कर्तृविशेषणम्
तेजः	–	कर्तृविशेषणम्	सत्त्वताम्	–	सम्बन्धषष्ठी

(उ) पर्यायशब्दः

तेजः – १. प्रभावः (उका. पुं.), २. पराक्रमः (अका. पुं.), ३. रेतः (सका. नपुं.), ४. वीर्यम् (अका. नपुं.)

◆◆◆

६९. श्लोकः

वृष्णीनां वासुदेवोऽस्मि पाण्डवानां धनञ्जयः।
मुनीनामप्यहं व्यासः कवीनामुशना कविः॥ (भ. गी. १०.३७)

पदच्छेदः

वृष्णीनाम्, वासुदेवः, अस्मि, पाण्डवानाम्, धनञ्जयः।
मुनीनाम्, अपि, अहम्, व्यासः, कवीनाम्, उशना, कविः॥

पदच्छेदाभ्यासः

अधस्तनानि पदानि च्छिनत्तु–

(i) वासुदेवोऽस्मि – ....

(ii) अप्यहम् – ....

(iii) अप्यहं व्यासः – ....

(iv) पाण्डवानां धनञ्जयः – ....

(v) वृष्णीनां वासुदेवः – ....

पदपरिचयः

पदम्	विश्लेषणम्	पदम्	विश्लेषणम्
वृष्णीनाम्	वृष्णि–इका.पुं.ष.बहु.	अपि	अव्ययम्
वासुदेवः	वासुदेव–अका.पुं.प्र.एक.तद्धितान्तं विधेयम्	अहम्	अस्मद्–दका.प्र.एक.सर्व.उद्देश्यम्
अस्मि	अस्+लट् उपु.एक.अदादि कर्तरि परस्मै.क्रिया	व्यासः	व्यास–अका.पुं.प्र.एक.कृदन्तं विधेयम्
पाण्डवानाम्	पाण्डव–अका.पुं.ष.बहु.तद्धितान्तम्	कवीनाम्	कवि–इका.पुं.ष.बहु.
धनञ्जयः	धनञ्जय–अका.पुंप्र.एक.कृदन्तं समस्तं विधेयम्	उशना	उशनस्–सका.पुं.प्र.एक.विधेयम् विशेष्यम्
मुनीनाम्	मुनि–इका.पुं.ष.बहु.	कविः	कवि–इका.पुं.प्र.एक.विधेयम् विशेषणम्

वर्गीकरणाभ्यासः

यथानिर्देशमधः श्लोकपदानि लिखन्तु–

(i) प्रथमान्तम् (६) ....

(ii) षष्ठ्यन्तम् (४) ....

(iii) अकारान्तम् (४) ....

(iv) इकारान्तम् (४) ....

(v) सकारान्तम् (१) ....

(vi) सर्वनाम (१) ....

(vii) अव्ययम् (१) ....

(viii) पुंलिङ्गम् (९) ....

(ix) क्रियापदम् (१) ....

(x) उद्देश्यम् (१) ....

(xi) विधेयम् (४) ....

(xii) कृदन्तम् (२) ....

(xiii) तद्धिततम् (२) ....

(xiv) उद्देश्येन सह विधेयानि लिखतु।

आकाङ्क्षाविस्तरः

(अस्मि = भवामि)।

कः अस्ति?	**अहम् अस्मि।**	
अहं किम् अस्मि?	....	(अका. प्र. तद्धितान्तम्)
अहं केषां मध्ये वासुदेवः अस्मि?	....	(इका. ष.)
पुनरहं किमस्मि?	....	(अका. प्र. कृदन्तम्)
केषां मध्येऽहं धनञ्जयः अस्मि?	....	(अका. ष.)
पुनश्चाहं किमस्मि?	....	(अका. प्र. कृदन्तम्)
केषां मध्येऽहं व्यासः अस्मि?	....	(इका. ष.)
पुनश्चाहं किमस्मि?	....	(सका. प्र.)
अहं कीदृशः उशना अस्मि?	....	(इका. प्र.)
अहं केषां मध्ये उशना कविः अस्मि?	....	(इका. ष.)

पदार्थः

पदम्	संस्कृतम्	हिन्दी
अहम्	अहं परमात्मा	मैं भगवान् परमात्मा
वृष्णीनाम्	यादवानाम्	यदुवंशियों में
वासुदेवः	वसुदेवपुत्रः	वसुदेव का पुत्र
पाण्डवानाम्	पाण्डुपुत्राणां मध्ये	पाण्डवों में
धनञ्जयः	अर्जुनः (त्वम्)	(तुम) अर्जुन
मुनीनाम्	मननशीलानां मध्ये	मुनियों में
व्यासः	वेदव्यासः	वेदव्यास
अपि	तथा	और
कवीनाम्	काव्यदर्शिनां मध्ये	कवियों में
उशना	शुक्राचार्यः	शुक्राचार्य
कविः	काव्यकर्ता (सूक्ष्मद्रष्टा)	कवि
अस्मि	विद्ये	हूँ।

भावार्थः

संस्कृतम्–इह श्लोके भगवान् श्रीकृष्णः आत्मानमपि अन्यैः सह विभूतिं निर्दिशति–

हे पार्थ! यदुवंशिनां मध्ये अहं परमात्मा त्वदुपदेष्टा वसुदेवपुत्रोऽस्मि। पाण्डवानां मध्ये यश्च धनञ्जयः त्वं श्रोता, सोऽपि अहमेवास्मि। अनेन वचनेन अवतारावतारिणोर्मध्ये एकत्वं बोध्यम्। यश्च परमेश्वरः अनादिनिधनं निर्गुणं निर्विकारं पूर्णब्रह्म स एव वासुदेवः श्रीकृष्ण इत्युभयोरभेदोऽवगन्तव्यः। अपि च पाण्डुपुत्रेषु यद्यपि ज्येष्ठः धर्मराजः युधिष्ठिरः, तथापि नरनारायणावतारे अर्जुनस्य नररूपेण प्रसिद्धत्वात् श्रीकृष्णस्य प्रियसखत्वाच्च स एव भगवद्रूपः विभूतिश्च प्रोक्तः।

एवमेव भगवतः स्वरूपस्य मनने वेदादिशास्त्राणां चिन्तने च वेदव्यास एव प्रधानम्। स एव वेदार्थस्य सम्यक् मननं कृत्वा तस्य विभागं कृतवान्, महाभारतं पुराणानि शास्त्राणि च रचितवान्, अतः स व्यासः भगवद्विभूतिरुक्तः। अपि च भृगुपुत्रेषु शुक्राचार्यः सर्वविद्याविशारदः, सञ्जीवनीविद्याविज्ञः कविरासीत्। अतः सूक्ष्मार्थदर्शिषु स श्रेष्ठः विभूतिः। अतः अभेदं दर्शयितुमुक्तम् - क्रान्तदर्शिनाम् उशना कविः, मननशीलानां व्यासः अहमेवास्मि इति।

हिन्दी–इस श्लोक में भगवान् श्रीकृष्ण ने अन्य विभूतियों के साथ स्वयं को भी विभूति बताया है–

हे अर्जुन! यादवों में मैं स्वयं भगवान् की विभूति हूँ। अर्थात् मुझे केवल वसुदेव जी का पुत्र समझकर मेरे उपदेशों को सामान्य जन का कथन मत समझो। मैं वासुदेव श्रीकृष्ण भगवान् का अवतार हूँ और तुम भी नर के अवतार हो। इसीलिए पाण्डवों में तुम धनञ्जय प्रधान हो। हाँलाकि सभी भाइयों में बड़े और धर्मराज धर्मात्मा युधिष्ठिर हैं, तथापि मेरा विशेष अंश होने से भगवद् विभूति तुम हो। अर्थात् तुम अपने को केवल श्रोता मत समझो। इस कथन से भगवान् ने अवतार और अवतारी में अभेद प्रतिपादित किया है।

भगवान् के स्वरूप का वेदादि शास्त्रों का मनन करने वाले को मुनि कहते हैं। वेदव्यास जी ने वेदार्थ का भलीभाँति मनन करके उनका विभाग किया है और महाभारत, पुराण आदि अनेक शास्त्रों की रचना की है। वे भगवान् के अंशावतार माने जाते हैं, इसलिए यहाँ उन्हें अपना स्वरूप बताते हुए 'मुनियों में मैं वेदव्यास हूँ' कहा है।

महर्षि भृगु के च्यवन आदि सात पुत्रों में उशना = शुक्र प्रधान हैं। वे संजीवनी विद्या के एकमात्र जानकार थे, अतः उन्हें कवियों में प्रधान कवि और भगवान् का स्वरूप बताया गया है। यहाँ विलक्षण प्रतिभा सम्पन्न सूक्ष्मार्थदर्शी को कवि कहा गया है।

अवबोधाभ्यासः

अधस्तनान् प्रश्नान् उत्तरतु–

१. इह श्लोके काः का विभूतयः परिगणिताः? ....

२. श्रीकृष्णेन स्वस्य विभूतिनिर्देशे किं कारणम्? ....

३. धनञ्जयस्य भगवद्रूपत्वे को हेतुः? ....

४. व्यासः किं किं रचितवान्? ....

५. कविषु उशनसः प्राधान्ये किं कारणम्? ....

६. इह कविशब्देन कोऽर्थः गृह्यते? ....

७. उशना कस्य पुत्रः आसीत्? ....

व्याकरणाभ्यासः

(अ) सन्धिः

१. वासुदेवोऽस्मि	– वासुदेवः + अस्मि	– विसर्गसन्धिः, पूर्वरूपसन्धिश्च
२. अप्यहम्	– अपि + अहम्	– यण्सन्धिः
३. अहं व्यासः	– अहम् + व्यासः	– अनुस्वारसन्धिः

४. पाण्डवानां धनञ्जयः - पाण्डवानाम् + धनञ्जयः - अनुस्वारसन्धिः

५. वृष्णीनां वासुदेवः - वृष्णीनाम् + वासुदेवः - अनुस्वारसन्धिः

६. सुवासा हरिः - सुवासाः + हरिः - विसर्गसन्धिः (लोपः)

अधस्तनेषु रेखाङ्कितेषु सन्धिं विसन्धिं च करोतु-

(i) ते पुनन्ति + उरु कालेन। ....

(ii) हनिष्यामः + अद्य धातुकान्। ....

(iii) आयुः श्रियम् + यशः + धर्मम् + हन्ति। ....

(iv) देवकीवसुदेवाभ्यामनुज्ञातोऽविशद् गृहम्। ....

(v) मिथो घ्नन्तं न पश्यन्ति। ....

(vi) अभिसरत्युदायुधः। ....

(vii) निर्दिशन्त्युपमानं ते। ....

(viii) नेहस्थेयं बहुतिथम्। ....

(ix) दुर्वासा नाम महान् ऋषिः। ....

(आ) समासः कृत्प्रत्ययश्च:

१. धनञ्जयः - धनं जयति-धन + जि + खच् (अ) = धनम् जय = धनञ्जयः उपपदसमासः

२. व्यासः - वि + अस् + घञ् (अ) = वि आस = व्यासः उपपदसमासः

अधस्तनेषु विग्रहेषु निष्पन्नं पदं वाक्ये प्रयुङ्क्ताम्-

(i) पुरं दरति - ....

(ii) वाचं यमति - ....

(iii) शर्ध जहाति - ....

(iv) कालं जयति - ....

(v) वि + नि + अस् + घञ् - ....

(vi) सम् + नि + अस् + घञ् - ....

(vii) वि + स्तृ + घञ् - ....

(viii) वि + कृ + घञ् - ....

(इ) तद्धितप्रत्ययः

१. वासुदेवः – वसुदेवस्य अपत्यं पुमान् – वसुदेव + अण् (अ)= वासुदेव।

२. पाण्डवानाम् – पाण्डोः अपत्यं पुमान् – पाण्डु + अण् = पाण्डव, तेषाम्।

अधस्तनेषु विग्रहेषु निष्पन्नं पदं वाक्ये व्यवहरतु–

(i) कुरोः अपत्यं पुमान् – ....

(ii) पुरोरपत्यं स्त्री – ....

(iii) यदोरपत्यं पुमान् – ....

(iv) वसोरपत्यं स्त्री – ....

(v) मधुनः भवः – ....

(vi) सिन्धोर्भवः – ....

(vii) अजमीढस्यापत्यं पुमान् – ....

(viii) रुद्रस्य अयम् – ....

(ix) सुवीरस्यापत्यम् – ....

(x) चक्रवर्मणः अपत्यम् – ....

(xi) वसिष्ठस्यापत्यम् – ....

(ई) क्रियाकारकसम्बन्धः

अस्मि	–	कर्तरि क्रिया	व्यासः	–	कर्तृविशेषणम्
अहम्	–	कर्ता	मुनीनाम्	–	निर्धारणषष्ठी
वासुदेवः	–	कर्तृविशेषणम्	उशना	–	कर्तृविशेषणम्
वृष्णीनाम्	–	निर्धारणषष्ठी	कविः	–	कर्तृविशेषणविशेषणम्
धनञ्जयः	–	कर्तृविशेषणम्	कवीनाम्	–	निर्धारणषष्ठी
पाण्डवानाम्	–	निर्धारणषष्ठी	अपि	–	समुच्चये

(उ) पर्यायशब्दः

१. **व्यासः** – १. वेदव्यासः (अका. पुं.), २. सत्यवतीसुतः (अका. पुं.), ३. कृष्ण द्वैपायनः (अका. पुं.)

२. **मुनिः** - १. वाचंयमः (अका. पुं.), २. तापसः (अका. पुं.), ३. तपस्वी (तपस्विन् नका. पुं.)

३. **कविः** - १. शुक्रः (अका. पुं.), २. दैत्यगुरुः (उका. पुं.), ३. काव्यः (अका. पुं.), ४. उशना (उशनस् सका. पुं.) ५. भार्गवः (अका. पुं.)

४. **धनञ्जयः** - १. अर्जुनः (अका. पुं.), २. पार्थः (अका. पुं.), ३. कौन्तेयः (अका. पुं.), ४. गाण्डीवी (गाण्डीविन् नका. पुं.)

५. **वासुदेवः** - १. कृष्णः (अका. पुं.), २. नारायणः (अका. पुं.), ३. विष्णुः (अका. पुं.), ४. हरिः (इका. पुं.), ५. गोविन्दः (अका. पुं.)

◆◆◆

७०. श्लोकः

दण्डो दमयतामस्मि नीतिरस्मि जिगीषताम्।
मौनं चैवास्मि गुह्यानां ज्ञानं ज्ञानवतामहम्।। (भ. गी. १०.३८)

पदच्छेदः

दण्डः, दमयताम्, अस्मि, नीतिः, अस्मि, जिगीषताम्।
मौनम्, च, एव, अस्मि, गुह्यानाम्, ज्ञानम्, ज्ञानवताम्, अहम्।।

पदच्छेदाभ्यासः

अधः प्रदत्तानां पदानां विच्छेदं करोतु–

(i) दण्डो दमयताम् – ....

(ii) नीतिरस्मि – ....

(iii) चैव – ....

(iv) एवास्मि – ....

(v) मौनं च – ....

(vi) गुह्यानां ज्ञानम् – ....

(vii) ज्ञानं ज्ञानवताम् – ....

पदपरिचयः

पदम्	विश्लेषणम्	पदम्	विश्लेषणम्
दण्डः	दण्ड–अका.पुं.प्र.एक.विधेयम्	एव	अव्ययम्
दमयताम्	दमयत्–तका.पुं.ष.बहु.शत्रन्तम् १	अस्मि	अस्+लट् उपुएक.अदादि कर्तरि परस्मैक्रिया.
अस्मि	अस्+लट् उपुएक.अदादि कर्तरि परस्मै.क्रिया.	गुह्यानाम्	गुह्य–अका.नपुं.ष.बहु.कृदन्तम्
नीतिः	नीति–इका.स्त्री.प्र.एक.अदादि कर्तरि परस्मैक्रिया.	ज्ञानम्	ज्ञान–अका.नपुं.प्र.एक.कृदन्तं विधेयम्
जिगीषताम्	जिगीषत्–तका.पुं.ष.बहु.शत्रन्तम् २	ज्ञानवताम्	ज्ञानवत्–तका.पुं.ष.बहु.तद्धितान्तम् ३
मौनम्	मौन–अका.नपुं.प्र.एक.तद्धितान्तं विधेयम्	अहम्	अस्मद्–दका.प्र.एक.सर्व.उद्देश्यम्
च	अव्ययम्		

वर्गीकरणाभ्यासः

अधस्तनेषु वर्गेषु श्लोकपदानि लिखतु–

(i) प्रथमान्तम् (५) ....

(ii) षष्ठ्यन्तम् (४) ....

(iii) अकारान्तम् (४) ....

(iv) इकारान्तम् (१) ....

(v) तकारान्तम् (३) ....

(vi) पुंलिङ्गम् (४) ....

(vii) स्त्रीलिङ्गम् (१) ....

(viii) नपुंसकम् (३) ....

(ix) सर्वनाम (१) ....

(x) अव्ययम् (२) ....

(xi) क्रियापदम् (३) ....

(xii) शत्रन्तम् (२) ....

(xiii) कृदन्तम् (३) ....

(xiv) तद्धितान्तम् (२) ....

(xv) उद्देश्यम् (१) ....

(xvi) विधेयम् (४) ....

(xvii) विधेयानि उद्देश्येन सह लेख्यानि।

आकाङ्क्षाविस्तरः

अस्मि = वर्ते।

कः अस्ति? अहम् अस्मि।

अहं किम् अस्मि? .... (अका. प्र.)

अहं केषां दण्डः अस्मि? .... (तका. ष. १)

पुनरहं किमस्मि? .... (इका. प्र.)

अहं केषां नीतिः अस्मि? .... (तका. ष. २)

पुनश्चाहं किमस्मि? .... (अका. प्र.)

अहं केषां मौनम् अस्मि? .... (अका. ष.)

पुनश्चाहं किमस्मि? .... (अका. प्र.)

अहं केषां मौनम् अस्मि? .... (तका. ष. ३)

पदार्थः

पदम्	संस्कृतम्	हिन्दी
अहम्	अहं श्रीकृष्णः	मैं (कृष्ण)
दमयताम्	दान्तानाम्	दमन करने वालों का
दण्डः	दमनहेतुः	दमन शक्ति
अस्मि	विद्ये	हूँ
जिगीषताम्	जयेच्छुकानाम्	जय चाहने वालों का
नीतिः	जयसाधनम्	विजय के उपाय
अस्मि	वर्ते	हूँ
एव	अहमेव	मैं ही
गुह्यानाम्	गोप्यानाम्	गोपनीय विषयों का
मौनम्	तूष्णींभावः	मौन
ज्ञानवताम्	तत्त्वज्ञानिनाम्	ब्रह्म ज्ञानियों का
ज्ञानम्	सम्यग् ज्ञानम्	ब्रह्म ज्ञान
च	चास्मि	हूँ

भावार्थः

संस्कृतम्–इह श्लोके दण्डादीनां भावरूपाणां विभूतीनां वर्णनम्–

हे पार्थ! दमनकर्तृणां राज्ञां साधकानां वा दमनशक्तिः दण्डः अहमेवास्मि। राजानः असंयमात् उत्पथान् वा जनान् दण्डेन सन्मार्गे प्रवर्तयन्ति। अध्यात्मसाधकोऽपि मन इन्द्रियाणि च दमनशक्त्या वशीकृत्य तानि ब्रह्मस्वरूपे नियोजयति। एवञ्च दण्डेनैव धर्मशासनम् ईश्वरदर्शनं वा प्रवर्तते, अतः

दण्डो भगवद्विभूतिः। ये च शत्रून् न्यायेन नीत्या जिगीषन्ति, तेषामेव जयः स्वाभाविकः स्थायी च। ये च राजानोऽनयेन वर्तन्ते तेषां जयो विनश्यति। एवञ्च सामादिरूपो न्याय एव विजये हेतुः, अतः स भगवद्विभूतिः।

सर्वे गोपनीयभावाः अवचनेनैव गुप्ताः सुरक्षिताः प्रभवन्ति। असौ च तूष्णींभावः काठिन्येन साध्यते। अतः मौनसाधनं भगवद्विभूतिः उक्तम्। न हि तूष्णीं स्थितस्य अभिप्रायः ज्ञायते। अपि च आत्मज्ञानिनां ज्ञानं भगवत्स्वरूपमेव। तदेव ज्ञानं सर्वश्रेष्ठम्, यतोहि तेन ज्ञानेन सर्वेषाम् अज्ञानानां लोपो जायते। अतः ब्रह्मज्ञानं भगवद्विभूतिरस्ति।

हिन्दी–इस श्लोक में दण्ड आदि भावरूप विभूतियों का कथन हुआ है–

हे अर्जुन! दमन करने वालों की दमन-शक्ति मैं ही हूँ। आध्यात्मिक और भौतिक दो प्रकार के दमन होते हैं। आध्यात्मिक दमन से मन और इन्द्रियों को वश में करके उन्हें भगवान् की ओर उन्मुख किया जाता है तथा भौतिक दमन से राजादि प्रशासक कुमार्ग में प्रवृत्त लोगों को सन्मार्ग में प्रवृत्त करके धर्म की स्थापना करते हैं। एवञ्च समाज में व्यवस्था लाने के कारण दण्ड को भगवान् ने अपना स्वरूप बताया है।

यहाँ नीति = न्याय को भगवान् ने अपना स्वरूप कहा है। नीति से प्राप्त विजय ही स्थायी होती है। अतः जीत चाहने वालों को नीति का ही सहारा लेना चाहिए। एवञ्च साम आदि नीति भगवान् की विभूति है।

गोपनीय बातों को मौन रहकर ही गुप्त रखा जा सकता है। किन्तु मौन रहना बड़ा ही दुष्कर है। मौनी के अभिप्राय को कोई नहीं समझ सकता है। अतः गोपनीय भावों के रक्षक मौन को भगवान् की विभूति समझना चाहिए।

परमात्मा का साक्षात्कार करने वाले तत्त्वज्ञानियों के ज्ञान को प्रधान माना जाता है, क्योंकि वह ज्ञान प्राप्त हो जाने पर अन्य सारे अज्ञान स्वतः समाप्त हो जाते हैं। इसलिए उस ज्ञान को भगवान् ने अपना स्वरूप बताया है।

अवबोधाभ्यासः

अधस्तनान् प्रश्नान् उत्तरयतु–

१. इह श्लोके काः काः विभूतयो निर्दिष्टाः? ....

२. दण्डेन किं भवति? ....

३. विजये नीतिः कथं प्रधानम्? ....

४. इह दण्डस्य कौ भेदौ, तयोः के नामनी? ....

५. मौनं कस्य साधनम्? ....

६. ज्ञानस्य प्राधान्ये किं कारणम्? ....

व्याकरणाभ्यासः

(अ) सन्धिः

१. दण्डो दमयताम्- दण्डः + दमयताम् - विसर्गसन्धिः
२. नीतिरस्मि - नीतिः + अस्मि - विसर्गसन्धिः
३. चैव - च + एव - वृद्धिसन्धिः
४. एवास्मि - एव + अस्मि - दीर्घसन्धिः
५. मौनं च - मौनम् + च - अनुस्वारसन्धिः
६. गुह्यानां ज्ञानम् - गुह्यानाम् + ज्ञानम् - अनुस्वारसन्धिः
७. ज्ञानं ज्ञानवताम् - ज्ञानम् + ज्ञानवताम् - अनुस्वारसन्धिः

अधस्तनेषु रेखाङ्कितेषु सन्धिं विसन्धिं च करोतु–

(i) जात + आह्लादः + महामनाः। ....
(ii) स्नातः शुचिः + अलङ्कृतः। ....
(iii) धेनूनाम् + नियुते प्र + अदात्। ....
(iv) सौमङ्गल्ये गिरो विप्रा जगुः। ....
(v) गावो वृषा वत्सतरा हरिद्रातैलरुषिताः। ....
(vi) दर्शनेन + एव साधवः। ....
(vii) तैस्तैः कामैरदीनात्मा यथोचितमपूजयत्। ....
(viii) करो वै वार्षिको दत्तो राज्ञे। ....
(ix) बालं च तस्या उरसि क्रीडन्तमकुतोभयम् ....
(x) नैवाशृणोद् वै रुदितं सुतस्य। ....

(आ) तद्धितप्रत्ययः

१. मौनम् - मुनेर्भावः - मुनि + अण् (अ) = मौन
२. ज्ञानवताम् - ज्ञानमस्य अस्ति - ज्ञान + मतुप् (मत्) = ज्ञानवत्, तेषाम्

अधस्तनेषु विग्रहेषु निष्पन्नं पदं वाक्ये व्यवहरतु–

(i) गुणस्य भावः - ....

(ii) यूनो भावः – ....

(iii) भक्तेर्भावः – ....

(iv) बलमस्यास्ति – ....

(v) चक्षुरस्यास्ति – ....

(vi) पय अस्यास्ति – ....

(vii) शक्तिरस्यास्ति – ....

(इ) कृत्प्रत्ययः

१. दमयताम् – दमि + शतृ = दमयत्, तेषाम्।

२. जिगीषताम् – जि + सन् = जिगीष + शतृ = जिगीषत्, तेषाम्।

३. ज्ञानम् – ज्ञा + ल्युट् (अन) = ज्ञान

४. नीतिः – नी + क्तिन् (ति) = नीति

५. गुह्यानाम् – गुह् + क्यप् (य) = गुह्य (गुहां = गोपनमर्हति इति गुह्यम्। तदर्हति (५-१-६३) इति यत्।। इत्यादि)

अधस्तनेभ्यः प्रकृतिप्रत्ययेभ्यः निष्पन्नं पदं वाक्ये व्यवहरतु–

(i) गुप् + णिच् + शतृ – ....

(ii) कुप् + णिच् + शतृ – ....

(iii) कूज् + शतृ – ....

(iv) प्र + काश् + ण्यत् – ....

(v) प्र + इष् + ण्यत् – ....

(vi) या + क्तिन् – ....

(vii) गा + क्तिन् – ....

(ई) क्रियाकारकसम्बन्धः

अस्मि	–	कर्तरि क्रिया	अस्मि	–	कर्तरि क्रिया
अहम्	–	कर्ता	अहम्	–	आक्षिप्तः कर्ता
दण्डः	–	कर्तृविशेषणम्	मौनम्	–	कर्तृविशेषणम्

दमयताम्	-	सम्बन्धषष्ठी	गुह्यानाम्	-	सम्बन्धषष्ठी
अस्मि	-	कर्तरि क्रिया	ज्ञानम्	-	कर्तृविशेषणम्
अहम्	-	आक्षिप्तः कर्ता	ज्ञानवताम्	-	सम्बन्धषष्ठी
नीतिः	-	कर्तृविशेषणम्	च	-	समुच्चये
जिगीषताम्	-	सम्बन्धषष्ठी			

(उ) पर्यायशब्दः

१. **दण्डः** - १. दमः (अका. पुं.), २. साहसम् (अका. नपुं.), ३. चास्तिः (इका. स्त्री.)

२. **नीतिः** - १. नयः (अका. पुं.), २. न्यायः (अका. पुं.), ३. सिद्धान्तः (अका. पुं.)

३. **मौनम्** - १. अभाषणम् (अका. नपुं.) २. तूष्णीम् (अव्ययम्), ३. वाचंयमत्वम् (अका. नपुं.), ४. अवचनम् (अका. नपुं.)

४. **गुह्यम्** - १. गोप्यम् (अका. नपुं.), २. गोपनीयम् (अका. नपुं.), ३. रहस्यम् (अका. नपुं.)

◆◆◆

७१. श्लोकः

यच्चापि सर्वभूतानां बीजं तदहमर्जुन।
न तदस्ति विना यत्स्यान्मया भूतं चराचरम्।। (भ. गी. १०.३९)

पदच्छेदः

यत्, च, अपि, सर्व-भूतानाम्, बीजम्, तद्, अहम्, अर्जुन।
न, तद्, अस्ति, विना, यत्, स्यात्, मया, भूतम्, चर+अचरम्।।

पदच्छेदाभ्यासः

अधस्तनानि पदानि विच्छिनत्तु–

(i) चापि – ....

(ii) यच्च – ....

(iii) सर्वभूतानां बीजम् – ....

(iv) बीजं तद् – ....

(v) स्यान्मया – ....

(vi) भूतं चराचरम् – ....

(vii) चराचरम् – ....

पदपरिचयः

पदम्	विश्लेषणम्	पदम्	विश्लेषणम्
यत्	यद्–दका.नपुं.प्र.एक.सर्व. १ विशेषणम्	तद्	तद्–दका.नपुं.प्र.एक.सर्व. ४ विशेषणम्
च	अव्ययम् १	अस्ति	अस्+लट् प्रपु.एक.अदादि कर्तरि परस्मै.क्रिया.
अपि	अव्ययम् २	विना	अव्ययम् ४
सर्वभूतानाम्	सर्वभूत–अका.नपुं.ष.बहु.समस्तम्	यत्	यद्–दका.नपुं.प्र.एक.सर्व. ५ विधेयम्
बीजम्	बीज–अका.नपुं.प्र.एक.विशेष्यम्	स्यात्	अस्+विधिलिङ् प्रपु.एक.अदादि कर्तरि परस्मै क्रिया.
तद्	तद्–दका.प्र.एक.सर्व. १ उद्देश्यम्	मया	अस्मद्–दका.तृ.प्र.एक.सर्व. ३ उद्देश्यम्
अहम्	अस्मद्–दका.प्र.एक.सर्व. २ उद्देश्यम्	भूतम्	भूत–अका.नपुं.प्र.एक.विशेष्यम्
अर्जुन	अर्जुन–अका.पुं.सम्बो.एक.	चराचरम्	अका.नपुं.प्र.एक.समस्तं विशेषणम्
न	अव्ययम्		

वर्गीकरणाभ्यासः

अधस्तनेषु वर्गेषु श्लोकपदानि लिखतु–

(i) प्रथमान्तम् (८) ....

(ii) तृतीयान्तम् (१) ....

(iii) षष्ठ्यन्तम् (१) ....

(iv) संबोधनान्तम् (१) ....

(v) अकारान्तम् (५) ....

(vi) दकारान्तम् (६) ....

(vii) पुंलिङ्गम् (१) ....

(viii) नपुंसकम् (८) ....

(ix) समस्तम् (२) ....

(x) सर्वनाम (६) ....

(xi) अव्ययम् (४) ....

(xii) क्रियापदम् १ ....

(xiii) विशेष्यम् २ ....

(xiv) विशेषणम् ३ ....

(xv) उद्देश्यम् ३ ....

(xvi) विधेयम् २ ....

आकाङ्क्षाविस्तरः

(अस्मि - आक्षिप्ता क्रिया)।

अहम् अस्मि।

अहं किम् अस्मि? .... (सर्व. २)

तत् किम् अस्ति? .... (अका. नपुं. प्र.)

तद् बीजं किम्? यत् = प्रसिद्धमित्यर्थः।

यच्च बीजं तत् केषाम्? .... (अका. नपुं. ष.)

किं च सम्बोधनम्? .... (सम्बो. एक.)

(हे) अर्जुन! यच्च सर्वभूतानां बीजम्, तदपि अहम् अस्मि।

नास्ति।

किं नास्ति? .... (सर्व. ४)

तत् किं नास्ति? .... (अका. नपुं. विशेष्यम्)

तत् कीदृशं भूतं नास्ति? .... (अका. प्र. समस्तम्)

कीदृशं तत् चराचरं भूतं नास्ति? .... यत् स्यात्।

यत् कथं स्यात्? .... (अव्यय ४)

यत् केन विना स्यात्? .... (सर्व. तृ.)

यत् मया विना स्यात्, तत् चराचरं भूतं नास्ति।

पदार्थः

पदम्	संस्कृतम्	हिन्दी
अर्जुन!	हे पार्थ!	हे अर्जुन!
सर्वभूतानाम्	सम्पूर्णजीवानाम्	सभी प्राणियों की
यत्	यत् (प्रसिद्धम्)	जो
च	साकल्ये	प्रधान
बीजम्	प्ररोहकारणम्	उत्पत्ति का कारण
	(अस्ति)	(है)
तद्	तद् (बीजम्)	वह
अपि	समुच्चये	भी
अहम्	अहं (श्रीकृष्णः)	मैं (भगवान् कृष्ण)
(अस्मि)	(अस्मि)	(हूँ)
मया	मया (श्रीकृष्णेन)	मेरे (परमात्मा के)
विना	विना	(वगैर) अभाव में
यत्	यत् (भूतम्)	जो

स्यात्	भवेत्	हो
तत्	तादृशम्	वैसा (कोई)
चराचरम्	स्थावरजङ्गमम्	चर या अचर
भूतम्	जीव:	प्राणी
न	न	नहीं
अस्ति	वर्तते	है।

भावार्थ:

संस्कृतम्–इह श्लोके श्रीकृष्ण: भूतं प्रति परमात्मन: कारणतां निरूपयति–

हे पार्थ! सर्वप्राणिनां प्ररोहकारणं यच्चैतन्यं तद् अहमेव। किं च भगवान् एव सर्वेषां जीवानामाधार: उत्पत्तिकारणं च। अत एव स संसारमहीरुहस्य बीजमुच्यते। इत: पूर्वमपि सप्तमनवमाध्याययो: 'सनातनं बीजम्' 'अविनाशि बीजम्' इत्युक्तम्।

मां श्रीकृष्णं विना यत् स्यात्, चरमचरं वा भूतं वस्तु तन्नास्त्येव। यत: सर्वं मत्कार्यमेवेत्यर्थ:। अनेन परमात्मन: सर्वकारणता सर्वरूपता च दर्शिता भवति। अत: सर्वप्राणिषु मम रूपं मत्वा यत्र मनो रमेत तत्रैव श्रीकृष्ण: ध्येय:।

हिन्दी–इस श्लोक में श्रीकृष्ण ने भूतकाल के प्रति अपनी कारणता का निरूपण किया है–

हे अर्जुन! जो सब प्राणियों की उत्पत्ति का प्रधान कारण है, वह भी मैं ही हूँ। क्योंकि चर और अचर कोई भी भूत वस्तु ऐसा नहीं है, जो मुझसे रहित हो।

भगवान् ही समस्त चराचर जगत् के परम आधार और उनकी उत्पत्ति के कारण हैं। इसलिए उन्हें यहाँ संसार रूपी वृक्ष का बीज बतलाया गया है। इसके पूर्व भी सातवें और नवें अध्याय में उन्हें 'सनातन-बीज' और 'अविनाशी बीज' कहा गया है।

अपनी विभूतियों का उपसंहार करते हुए भगवान् ने चराचर जगत् को अपना कार्य बतलाया है। सारे ही रूप भगवान् के रूप हैं। अत: जिस रूप में मन रमे उसी में उनका मनन-चिन्तन करना चाहिए।

अवबोधाभ्यास:

अधस्तनान् प्रश्नान् उत्तरतु–

१. इह श्लोके किं वर्णितम्? ....

२. 'चराचरं जगत् वृक्ष:' इत्यर्थ: कथं प्रतीयते? ....

३. इतः पूर्वं कस्मिन्नध्याये 'सनातनं बीजम्' इत्युक्तम्? ....

४. सर्वं जगत् श्रीकृष्णस्य कार्यमित्यर्थः कथं ज्ञायते? ....

५. भगवतः सर्वरूपता इह कथं साधिता? ....

६. सर्वस्मिन् रूपे भगवद्ध्यानेन को लाभः? ....

व्याकरणाभ्यासः

(अ) सन्धिः

१. चापि	च + अपि	दीर्घसन्धिः
२. चराचरम्	चर + अचरम्	दीर्घसन्धिः
३. यच्च	यत् + च	श्चुत्वसन्धिः
४. तदहम्	तत् + अहम्	जश्त्वसन्धिः
५. सर्वभूतानां बीजम्	सर्वभूतानाम् + बीजम्	अनुस्वारसन्धिः
६. बीजं तद्	बीजम् + तद्	अनुस्वारसन्धिः
७. भूतं चराचरम्	भूतम् + चराचरम्	अनुस्वारसन्धिः
८. स्यान्मया	स्यात् + मया	अनुनासिकसन्धिः
९. यत्स्यात्	यद् + स्यात्	चर्त्वसन्धिः

अधस्तनेषु रेखाङ्कितेषु सन्धिच्छेदं करोतु–

(i) एकावशिष्टावरजा कन्या। ....

(ii) सापि दिवं गता। ....

(iii) भ्रातुर्मम सुतः कच्चिन्मात्रा सह भवद्व्रजे अस्ति। ....

(iv) प्रकीर्णारुणमूर्धजम्। ....

(v) रक्षां चक्रुश्च द्वादशाङ्गेषु नामभिः। ....

(vi) शृणुयान्नोद्विजेच्च। ....

(vii) क्रीडन्तं पातु गोविन्दः शयानं पातु माधवः। ....

(viii) स एतत् पूतनामोक्षं शृणुयात्। ....

(आ) समासः

१. सर्वभूतानाम् - सर्वाणि च तानि भूतानि = सर्वभूतानि, तेषाम् - कर्मधारयः

२. चराचरम् - चरं च अचरं च इत्यनयोः समाहारः = चराचरम् - द्वन्द्वः (समाहारद्वन्द्वः)

अधस्तनेषु रेखाङ्कितेषु विग्रहं समासं च निर्दिशतु–

(i) व्रजे सर्वसमृद्धयः सन्ति। ....

(ii) परमहंसं नमन्ति सर्वे। ....

(iii) क्लिश्यमानजनेषु मैत्रीं दयां च करोतु। ....

(iv) ऊरुवेगेन महता द्रुमान् क्षिपति। ....

(v) मृदङ्गपटहं वादयन्ति वादकाः। ....

(vi) प्लक्षन्यग्रोधे वृक्षे लघुफलानि भवन्ति। ....

(vii) आश्रमे गोव्याघ्रं सहैव चरति। ....

(इ) उपपदविभक्तिः

मया विना यत् स्यात् – मेरे बिना जो हो

अस्मिन् वाक्ये 'विना' पदस्य योगे 'मया' इत्यत्र तृतीया विभक्तिः जायते, अतः इह पदयोगे जायमाना तृतीया उपपदविभक्तिरुच्यते; पदयोगे जायमाना विभक्तिः उपपदविभक्तिरिति सिद्धान्तः। 'विना' पदयोगे द्वितीया पञ्चमी अपि प्रयुज्येते। यथा–श्रमं विना कार्यसिद्धिर्न स्यात्, धनाद् विना तत्पुस्तकं न मिलेत्, इत्यादि।

अधस्तनेषु वाक्येषु 'विना' योगे द्वितीयां पञ्चमीं च योजयित्वा पृथक्-पृथक् वाक्यं लिखतु–

(i) मया विना शुष्यति। ....

(ii) येन विना यद् अनुपपन्नं तत् तेनाक्षिप्यते। ....

(iii) त्वया विना गन्तुं सन्नद्धा। ....

(iv) ज्ञानेन विना न सुखम्। ....

(v) धर्मेण विना न शान्तिः। ....

(vi) उपद्रवन्ति शौर्येण विना। ....

(ई) क्रियाकारकसम्बन्धः

अस्ति	-	आक्षिप्ता कर्तरि क्रिया	यत्	-	कर्ता
बीजम्	-	कर्ता	विना	-	क्रियाविशेषणम्
यत्	-	कर्तृविशेषणम्	मया	-	उपपदतृतीया
सर्वभूतानाम्	-	सम्बन्धषष्ठी	अस्ति	-	कर्तरि क्रिया
अस्मि	-	आक्षिप्ता कर्तरि क्रिया	न	-	क्रियाविशेषणम्
अहम्	-	कर्ता	भूतम्	-	कर्ता
तद्	-	कर्तृविशेषणम्	चराचरम्	-	कर्तृविशेषणम्
स्यात्	-	कर्तरि विधिलिङ् क्रिया	तद्	-	कर्तृविशेषणम्

(उ) पर्यायशब्दः

१. **बीजम्** - १. हेतुः (अका. पुं.), २. कारणम् (अका. नपुं.), ३. निदानम् (अका. नपुं.)

२. **चराचरम्** - १. चेतनाचेतनम् (अका. नपुं.), २. जडचेतनम् (अका. नपुं.), ३. स्थावरजङ्गम् (अका. नपुं.), ४. जङ्गमाजङ्गमम् (अका. नपुं.)

३. **भूतम्** - १. प्राणी (प्राणिन् - नका. पुं.), २. जीवः (अका. पुं.), ३. वस्तु (उका. नपुं.), ४. महाभूतम् (अका. नपुं.)

◆◆◆

७२. श्लोकः

नान्तोऽस्ति मम दिव्यानां विभूतीनां परंतप।
एष तूद्देशतः प्रोक्तो विभूतेर्विस्तरो मया।।(भ. गी. १०.४०)

पदच्छेदः

न, अन्तः, अस्ति, मम, दिव्यानाम्, विभूतीनाम्, परंतप।
एषः, तु, उद्देशतः, प्रोक्तः, विभूतेः, विस्तरः, मया।।

पदच्छेदाभ्यासः

अधस्तनानि पदानि विच्छिनत्तु–

(i) नान्तः – ....

(ii) अन्तोऽस्ति – ....

(iii) तूद्देशतः – ....

(iv) विभूतेर्विस्तरः – ....

(v) विस्तरो मया – ....

(vi) एष तु – ....

(vii) दिव्यानां विभूतीनाम् – ....

(viii) विभूतीनां परंतप – ....

(ix) प्रोक्तो विभूतेः – ....

पदपरिचयः

पदम्	विश्लेषणम्	पदम्	विश्लेषणम्
न	अव्ययम्	एषः	एतद्–दका.पुं.प्र.एक.सर्व.विशेषणम्
अन्तः	अन्त–अका.पुं.प्र.एक.	तु	अव्ययम्
अस्ति	अस्+लट् प्रपु.एक.अदादि कर्तरि परस्मै.क्रिया.	उद्देशतः	तसिलन्तम् अव्ययम्
मम्	अस्मद्–दका.ष.एक.सर्व.	प्रोक्तः	प्रोक्त–अका.पुं.प्र.एक.क्तान्तं विशेषणं क्रिया.
दिव्यानाम्	दिव्या–आका.स्त्री.ष.बहु.तद्धितान्तं विशेषणम्	विभूतेः	विभूति–इका.स्त्री.ष.एक.कृदन्तम्
विभूतीनाम्	विभूति–इका.स्त्री.ष.बहु.कृदन्तम् विशेष्यम्	विस्तरः	विस्तर–अका.पुं.प्र.एक.कृदन्तं विशेष्यम्
परंतप	परंतप–अका.पुं.सम्बो.एक.कृदन्तम्	मया	अस्मद्–दका.तृ एक.सर्व.

वर्गीकरणाभ्यासः

अधस्तनेषु वर्गेषु श्लोकपदानि विभजतु–

(i) प्रथमान्तम् (४) ....

(ii) तृतीयान्तम् (१) ....

(iii) षष्ठ्यन्तम् (३) ....

(iv) सम्बोधनान्तम् (१) ....

(v) पुंलिङ्गम् (५) ....

(vi) स्त्रीलिङ्गम् (३) ....

(vii) अकारान्तम् (४) ....

(viii) आकारान्तम् (१) ....

(ix) इकारान्तम् (२) ....

(x) सर्वनाम (३) ....

(xi) अव्ययम् (३) ....

(xii) क्रियापदम् (१) ....

(xiii) तसन्तम् (१) ....

(xiv) तद्धितान्तम् (१) ....

(xv) कृदन्तम् (४) ....

(xvi) विशेष्यम् (२) ....

(xvii) विशेषणम् (३) ....

(xviii) विशेष्यविशेषणानि सहैव लेख्यानि।

आकाङ्क्षाविस्तरः

न + अस्ति (= न वर्तते)।

किं नास्ति? .... (अका. प्र.)

कासाम् अन्तः नास्ति? .... (इका. ष. बहु.)

कीदृशीनां विभूतीनाम् अन्तो नास्ति? .... (आका. ष.)

कस्य दिव्यानां विभूतीनाम् अन्तो नास्ति? .... (सर्व. ष.)

किं सम्बोधनम्? .... (सम्बो.)

प्रोक्त: (= परिगणित:)।

केन प्रोक्त:? .... (तृ. सर्व.)

मया क: प्रोक्त:? .... (अका. प्र.)

मया कस्या: एष: विस्तर: प्रोक्त:? .... (इका. ष. एक.)

मया विभूते: एष: विस्तर: केन प्रकारेण प्रोक्त:? .... (तसन्तम्)

पदार्थ:

पदम्	संस्कृतम्	हिन्दी
परंतप	शत्रुञ्जय हे पार्थ!	हे परंतप!
मम	मम श्रीकृष्णस्य	मेरी
दिव्यानाम्	अलौकिकीनाम्	अलौकिक
विभूतीनाम्	ऐश्वर्याणाम्	विभूतियों का
अन्त:	इयत्ता	अन्त
न	न	नहीं
अस्ति	विद्यते	है।
मया	मया (श्रीकृष्णेन)	मैंने
विभूते:	ऐश्वर्यस्य	(अपनी) विभूति का
एष:	अयम्	यह
विस्तर:	विस्तार:	विस्तार
तु	किन्तु	तो
उद्देशत:	नामग्राहेण (संक्षेपेण)	संक्षेप से
प्रोक्त:	सङ्कीर्तित:	कहा है।

भावार्थः

संस्कृतम्—अस्मिन्नध्याये विंशश्लोकात् इतः प्रभृति आत्मनः दिव्यविभूतीनां नाम भगवता सङ्कीर्तितम्। इदानीं तासाम् आनन्त्यमुक्त्वा प्रकरणमिदम् उपसंहरति।

परेषां कामक्रोधलोभादीनां शत्रूणां तापजनक हे पार्थ! मम लोकोत्तराणां दिव्यानां विभूतीनां रूपाणि साकल्येन वक्तुं सर्वज्ञेनापि न शक्यन्ते। परन्तु विभूतेः एष विस्तरः मया संक्षेपेण नाममात्रेण कथितः। नाममात्रेण वस्तुसङ्कीर्तनम् उद्देशः परिभाषितः। अतः विभूतीनामिह नाममात्रेण उल्लेखमहं कृतवान् इत्यर्थः। वस्तुतः अनन्तकोटिब्रह्माण्डेषु विद्यमानानां दिव्यानां विभूतीनां नामोल्लेखः तथैवासम्भवः, यथा पृथिव्यादिपरमाणूनां गणनोल्लेखः। अतस्ता अनन्ता इत्येवावधार्यम्।

हिन्दी—श्रीकृष्ण ने इस अध्याय के बीसवें श्लोक से यहाँ तक अपनी विभूतियों का नामोल्लेख किया है। अब उन्होंने अपनी दिव्य विभूतियों को अनन्त बताकर इस प्रकरण का उपसंहार किया है।

काम, क्रोध, लोभ आदि षड् रिपु हैं, इन पर विजय पाने वाले हे अर्जुन! मेरी लोकोत्तर विभूतियों की कोई सीमा नहीं है। जैसे—जल, पृथ्वी आदि के परमाणुओं की गणना नहीं की जा सकती, उसी प्रकार मेरी विभूतियों की गणना नहीं हो सकती है। अनन्त कोटि ब्रह्माण्ड में मेरी अनन्त दिव्य विभूतियाँ हैं, उनका कोई भी पार नहीं पा सकता है।

हे अर्जुन! मैंने अपनी विभूतियों का यह विस्तार संक्षेप में कहा है। यहाँ विभूतियों का वर्णन अंशमात्र से हुआ है, केवल उनका नामोल्लेख हुआ है। वस्तु के नामोल्लेख मात्र को उद्देश कहते हैं। अतः यहाँ विभूतियों का केवल नाम से संकेत किया गया है, क्योंकि उनका विस्तार से वर्णन अत्यन्त दुष्कर कार्य है।

अवबोधाभ्यासः

अधस्तनान् प्रश्नान् उत्तरतु—

१. अस्मिन् श्लोके किमुक्तम्? ....

२. अस्मिन्नध्याये कस्मात् श्लोकात् विभूतीनां वर्णनं वर्तते? ....

३. मनुष्याणां कति आभ्यन्तराः रिपवः, के च ते? ....

४. विभूतयः सामस्त्येन वक्तुं कथं न शक्यन्ते? ....

५. कस्तावद् उद्देशपदार्थः? ....

६. कति ब्रह्माण्डानि? ....

७. किं परमाणवो गणितुं शक्यन्ते? ....

व्याकरणाभ्यासः

(अ) सन्धिः

१. नान्तः	– न + अन्त	– दीर्घसन्धिः
२. तूद्देशतः	– तु + उद्देशतः	– दीर्घसन्धिः
३. अन्तोऽस्ति	– अन्तः + अस्ति	– विसर्गसन्धिः पूर्वरूपसन्धिश्च
४. प्रोक्तः	– प्र + उक्तः	– गुणसन्धिः
५. प्रोक्तो विभूतेः	– प्रोक्तः + विभूतेः	– विसर्गसन्धिः
६. विस्तरो मया	– विस्तरः + मया	– विसर्गसन्धिः
७. विभूतेर्विस्तरः	– विभूतेः + विस्तरः	– विसर्गसन्धिः
८. एष तु	– एषः + तु	– विसर्गसन्धिः (लोपः)
९. दिव्यानां विभूतीनाम्	– दिव्यानाम् + विभूतीनाम्	– अनुस्वारसन्धिः
१.. विभूतीनां परंतप	– विभूतीनाम् + परंतप	– अनुस्वारसन्धिः
११. परंतप	– परम् + तप	– अनुस्वारसन्धिः

अधस्तनेषु रेखाङ्कितेषु सन्धिं विच्छिनत्तु–

(i) माता सूनोरभिषेचनं करोति। ....

(ii) येन येनावतारेण भगवान् हरिरीश्वरः। ....

(iii) द्विजोत्तमैर्नन्दो वाचयति स्वस्त्ययनम्। ....

(iv) दैत्यो नाम्ना तृणावर्तः। ....

(v) तृणावर्तनिसृष्टाभिः शर्कराभिरुपद्रुतः। ....

(vi) एष ब्रह्मविदां श्रेष्ठः। ....

(vii) अलक्षितोऽस्मिन् रहसि। ....

(viii) एष वः श्रेय आधास्यत्। ....

(ix) वासुदेव इति श्रीमान्। ....

(x) भूमौ निधाय तं गोपी विस्मिता। ....

(आ) तद्धितप्रत्ययः

१. दिव्यानाम् – दिवि भवा – दिव् + यत् (य) + टाप् = दिव्या

२. उद्देशतः – उद्देशेन – उद्देश + तसिं (तस्) = उद्देशतः

अधस्तनेषु विग्रहं निष्पन्नं रूपं च लिखतु–

(i) सभा + यत् – ....

(ii) सोदर + यत् – ....

(iii) गो + यत् – ....

(iv) कण्ठ + यत् – ....

(v) नभ + यत् – ....

(vi) मुख + तसि – ....

(vii) पृष्ठ + तसि – ....

(viii) प्रयाग + तसि – ....

(ix) क्षेत्र + तसि – ....

(इ) कृत्प्रत्ययः

१. विभूतीनाम् – वि + भू + क्तिन् (ति) = विभूति, तासाम्।

२. परंतप – परं तापयति – पर + तापि + खच् (अ) = परंतप, तत्संबुद्धौ।

३. विस्तरः – वि + स्तृ + अप् (अ) = विस्तरः।

४. प्रोक्तः – प्र + वच् + क्त = प्रोक्तः।

अधस्तनेभ्यः प्रकृतिप्रत्ययेभ्यः निष्पन्नं पदं वाक्ये व्यवहरतु–

(i) सम् + नम् + क्तिन् – ....

(ii) वि + नम् + क्तिन् – ....

(iii) सम् + गम् + क्तिन् – ....

(iv) सम् + यम् + क्तिन् – ....

(v) सर्व + सह् + खच् – ....

(vi) सर्व + कष् + खच् – ....

(vii) ललाट + तप् + खच् - ....

(viii) वि + कृ + अप् - ....

(ix) सम् + गृ + अप् - ....

(x) सम् + वच् + क्त - ....

(xi) वि + युज् + क्त - ....

(ई) क्रियाकारकसम्बन्धः

अस्ति	-	कर्तरि क्रिया	प्रोक्तः	-	क्तान्ता कर्मणि क्रिया
न	-	क्रियाविशेषणम्	मया	-	कर्ता
अन्त	-	कर्ता	विस्तरः	-	कर्म
विभूतीनाम्	-	सम्बन्धषष्ठी	एषः	-	कर्मविशेषणम्
दिव्यानाम्	-	सम्बन्धिविशेषणम्	उद्देशतः	-	क्रियाविशेषणम्
मम	-	सम्बन्धिसम्बन्धषष्ठी	विभूतेः	-	सम्बन्धषष्ठी
परंतप	-	सम्बोधनम्			

(उ) पर्यायशब्दः

१. विस्तरः - १. शब्दस्य व्यासः (अका. पुं.), २. विस्तारः (अका. पुं.), ३. वितानः (अका. पुं.), ४. विग्रहः (अका. पुं.)

२. दिव्यम् - १. अलौकिकम् (अका. त्रिलि.), २. लोकोत्तरम् (अका. त्रिलि.), ३. स्वर्ग्यम् (अका. त्रिलि.)

३. अन्तः - १. समाप्तिः (इका. स्त्री.), २. इयत्ता (आका. स्त्री.), ३. सीमा (आका. स्त्री.)

◆◆◆

७३. श्लोकः

यद्यद्विभूतिमत्सत्त्वं श्रीमदूर्जितमेव वा।
तत्तदेवावगच्छ त्वं मम तेजोंऽशसम्भवम्।।(भ. गी. १०.४१)

पदच्छेदः

यत्-यत्, विभूतिमत्, सत्त्वम्, श्रीमत्, ऊर्जितम्, एव, वा।
तत्-तत्, एव, अवगच्छ, त्वम्, मम, तेजः, अंश-सम्भवम्।।

पदच्छेदाभ्यासः

अधस्तनानि पदानि विच्छिनतु-

(i) यद्यद् - ....
(ii) सत्त्वं श्रीमद् - ....
(iii) श्रीमदूर्जितम् - ....
(iv) एवावगच्छ - ....
(v) त्वं मम - ....
(vi) तेजोंऽश - ....
(vii) अंशसम्भवम् - ....
(viii) तत्तदेव - ....
(ix) यद्यद्विभूतिमत् - ....

पदपरिचयः

पदम्	विश्लेषणम्	पदम्	विश्लेषणम्
यत्-यत्	यद्-दका.नपुं.प्र.एक.सर्व-विशेषणम्	तत्-तत्	तद्-दका.नपुंद्वि.एक.वीप्सा विशेष्यम् उद्देश्यम्
विभूतिमत्	विभूतिमत्-तका.नपुं.प्र.एक.तद्धितान्तं विशेषणम्	एव	अव्ययम्
सत्त्वम्	सत्त्व-अका.नपुं.प्र.एक.तद्धितान्तं विशेषणम्	अवगच्छ	अव्+गम्+लोट् मपु.एक.भ्वादि. कर्तरि परस्मै.क्रिया.
श्रीमत्	श्रीमत्-तका.नपुं.प्र.एक.तद्धितान्तं विशेष्यम्	त्वम्	युष्मद्-दका.प्र.एक.सर्व.
ऊर्जितम्	ऊर्जित-अका.नपुं.प्र.एक.क्तान्तं विशेषणम्	मम्	अस्मद्-दका.ष.एक.सर्व.
एव	अव्ययम्	तेजोंऽश-सम्भवम्	तेजोंऽशसम्भव-अका.नपुं.द्वि.एक.समस्तं विधेयं विशेषणम्
वा	अव्ययम्		

वर्गीकरणाभ्यासः

अधस्तनेषु वर्गेषु श्लोकपदानि विभजतु–

(i) प्रथमान्तम् (६) ....

(ii) द्वितीयान्तम् (२) ....

(iii) षष्ठ्यन्तम् (१) ....

(iv) अकारान्तम् (३) ....

(v) तकारान्तम् (२) ....

(vi) सर्वनाम (४) ....

(vii) अव्ययम् (३) ....

(viii) क्रियापदम् (१) ....

(ix) नपुंसकम् (७) ....

(x) विशेष्यम् (२) ....

(xi) विशेषणमम् (५) ....

(xii) उद्देश्यम् (१) ....

(xiii) विधेयम् (१) ....

(xiv) वीप्सा (२) ....

(xv) क्तान्तम् (१) ....

(xvi) तद्धितान्तम् (३) ....

(xvii) समस्तम् (१) ....

(xviii) उद्देश्यं विधेयं च पृथक्कृत्य लिखतु।

(xiv) विशेष्यं तद्विशेषणं च संकल्प्य एकत्र लिखतु।

आकाङ्क्षाविस्तरः

अस्ति (= आक्षिप्ता कर्तरि क्रिया)

किम् अस्ति? .... (अका. नपुं. प्र.)

सत्त्वं कीदृशम् अस्ति? .... (तका. नपुं. प्र.)

विभूतिमत् सत्त्वं पुनश्च कीदृशम् अस्ति? .... (तका. नपुं. प्र.)

विभूतिमत् श्रीमत् सत्त्वं पुनश्च कीदृशम् अस्ति? .... (अका. नपुं प्र.)

यद्-यद् विभूतिमत् श्रीमत् ऊर्जितम् एव वा किं सत्त्वम् अस्ति, तत् किम्? ....

तत्-तद् अवगच्छ (जानीहि)।

कः अवगच्छतु? त्वम् अवगच्छ।

त्वं तत्-तत् कीदृशम् अवगच्छ? .... (अका. द्विव एक.)

त्वं तत्तत् कस्य तेजोंऽशसम्भवम् एवावगच्छ? .... (सर्व. ष.)

त्वं तत्तत् मम तेजोंऽशसम्भवमेवावगच्छ।

पदार्थः

पदम्	संस्कृतम्	हिन्दी
यद्-यद्	यद्यत् (सत्त्वम्)	जो-जो
एव	अपि	भी
विभूतिमत्	ऐश्वर्ययुक्तम्	ऐश्वर्यशाली
श्रीमत्	सम्पत्तियुक्तम्	शोभा-सम्पन्न
ऊर्जितम्	शक्तिसम्पन्नम्	शक्तियुक्त
वा	अथवा	या
सत्त्वम्	वस्तुमात्रम् (अस्ति)	वस्तु (है)
त्वम्	त्वम् (अर्जुनः)	तुम
तत्-तत्	तादृशं वस्तु	उस-उस वस्तु को
मम	मम (परमात्मनः कृष्णस्य)	मेरे
तेजोंऽशसम्भवम्	प्रभावांशसम्भूतम्	तेज के अंश से उत्पन्न
एव	हि	ही
अवगच्छ	जानीहि	समझो

भावार्थः

संस्कृतम्—दिव्यविभूतीः वर्णयित्वा श्रीकृष्णः इह श्लोके संक्षेपेण स्वयोगशक्तिं निर्दिशति। एवञ्च साकाङ्क्षं प्रति साकल्येन स्वयोगं निरूपयति।

हे पार्थ! विभूतियुक्तं लक्ष्मीसहितं बलादिना गुणेन अतिशयितं वा यद्-यद् चेतनाचेतनं वस्तु इह लोके दृश्यते, तत्सर्वं मम परमात्मनः तेजसः शक्तेरंशेन सम्भूतमिति त्वं बुध्यस्व। जगति सर्वम् असाधारणं वस्तु मम योगशक्त्यैव उत्पन्नं जानीहि। तत्र-तत्र विलक्षणेऽतिशयिते वस्तुनि मम प्रभावस्य सम्बन्धोऽवश्यं विज्ञेयः। यथा विद्युच्छक्त्या कुत्रचित् प्रकाशः, क्वचित् वायुप्रवाहः, कुहचित् गीतम्, क्वचन यन्त्रगत्यादिकं जायते, तत्र सर्वत्र विद्युच्छक्तेरेवाऽभिव्यक्तिर्भवति। तथैव प्राणिनि वस्तुनि वा यदलौकिकत्वं वैलक्षण्यमतिशयितत्वं वा, तत्र-तत्र भगवतो योगशक्तेरेव अभिव्यक्तिरवगन्तव्या इति भावः।

हिन्दी—भगवान् श्रीकृष्ण दिव्य विभूतियों का वर्णन समाप्त करके इस श्लोक में संक्षेप से अपनी योगशक्ति का वर्णन कर रहे हैं। अर्जुन ने इस अध्याय के अट्ठारहवें श्लोक में योगशक्ति के वर्णन की आकांक्षा की थी, उसी के उत्तर में भगवान् ने समग्रता से अपनी योगशक्ति का निरूपण किया है।

इस संसार में सर्वातिशायी ऐश्वर्य, सम्पत्ति अथवा बल-प्रभावादि गुणों से युक्त जो भी व्यक्ति अथवा वस्तु दृष्टिगत है। हे अर्जुन! तुम उसे मेरे तेज के अंश की अभिव्यक्ति जानो। वह अतिशय अथवा असामान्य गुण परमात्मा के प्रभाव का योग है। उस अतिशय विलक्षण अथवा अलौकिक वस्तु या व्यक्ति में भगवान् की योगशक्ति की अभिव्यक्ति समझनी चाहिए। जैसे—बिजली की शक्ति से कहीं प्रकाश होता है, कहीं पंखे चलते हैं, कहीं रेडियो का गीत सुनाई देता है, इस प्रकार अनेक कार्य होते हैं, उन सबमें बिजली का प्रभाव ही कार्य कर रहा है। उसी प्रकार जिस प्राणी या वस्तु में जो भी किसी तरह की विशेषता दिखलाई पड़ती है, उसमें भगवान् के ही तेज अंश की अभिव्यक्ति समझनी चाहिए।

अवबोधाभ्यासः

अधस्तनान् प्रश्नान् समादधातु—

१. अस्मिन् श्लोके किं वर्णितम्? ....

२. योगशक्तिः वर्णयितुं कस्मिन् श्लोके आकाङ्क्षिता? ....

३. इह सत्त्वपदेन कोऽर्थो गृह्यते? ....

४. भगवतो योगशक्तेः कुत्राभिव्यक्तिः? ....

५. वस्तुनः प्राणिनो वा अतिशयो किं कारणम्? ....

६. विद्युच्छक्तेः प्रभावोदाहरणं किं बोधयितुं प्रदर्शितम्? ....

७. भगवतः प्रभावस्याभिव्यक्तिं स्पष्टयितुम् उदाहरणान्तरं लेख्यम्? ....

व्याकरणाभ्यासः

(अ) सन्धिः

१. यद्यद् - यत् + यत् - जश्त्वमसन्धिः

२. यद्यद्विभूतिमत् - यद्यत् + विभूतिमत् - जश्त्वसन्धिः

३. श्रीमदूर्जितम् - श्रीमत् + ऊर्जितम् - जश्त्वासन्धिः

४. तत्तदेव - तत्तत् + एव - जश्त्वसन्धिः

५. एवावगच्छ - एव + अवगच्छ - दीर्घसन्धिः

६. तेजोंऽशसम्भवम् - तेजः + अंशसम्भवम् - विसर्गसन्धिः पूर्वरूपसन्धिश्च

७. त्वं मम - त्वम् + मम - अनुस्वारसन्धिः

८. सत्त्वं श्रीमद् - सत्त्वम् + श्रीमद् - अनुस्वारसन्धिः

अधस्तनेषु वाक्येषु सन्धिच्छेदं करोतु–

(i) नन्दयित्वाब्रवीद् ब्रह्मन् वयं किं करवाम ते। ....

(ii) महद्विचलनं नृणां निःश्रेयसाय कल्पते। ....

(iii) सूपविष्टं कृतातिथ्यं गिरा सूनृतया। ....

(iv) पुत्रोऽहं पृथिव्याः। ....

(v) नारयोऽभिभवन्ति। ....

(vi) सेवकोऽवदद्वचः। ....

(vii) गर्गः पुरोहितो राजन्! यदूनाम्। ....

(viii) देवक्या अष्टमो गर्भो न स्त्री भवितुमर्हति। ....

(ix) बलाधिक्याद् बलं विदुः। ....

(x) अलक्षितोऽस्मिन् रहसि। ....

(आ) समासः

१. तेजोंऽशसम्भवम् - तेजसः अंशः - तेजोंऽशः - षष्ठीतत्पुरुषः

तेजोंऽशः सम्भवः यस्य - बहुव्रीहिः

तेजोंऽशेन सम्भवः, - तृतीयातत्पुरुषः, तम्

अधस्तनेषु रेखाङ्कितेषु विग्रहं समासं च करोतु–

१. इह भिक्षान्नभोजनाः निर्धनाः अपि निवसन्ति। ....

२. हस्तकौशलसम्भवं कल्पनाचित्रं पश्यति। ....

३. स्तम्भस्फोटसमुद्भवं शब्दमशृण्वन् जनाः। ....

४. शिरोवेदनापीडितो बालो नाद्य दृष्टः। ....

५. गुल्फशोथजातो विकारो मां बाधते। ....

६. मानवमस्तिष्काविर्भवस्य प्रक्षेपणस्य कार्यमिदम्। ....

७. सैन्यशिविरमूलेन उत्साहेन समन्विताः जनाः। ....

(इ) तद्धितप्रत्ययः

१. विभूतिमत् - विभूतिः अस्यास्ति तत् - विभूति + मतुप् (मत्)

२. श्रीमत् - श्रीः अस्यास्ति तत् - श्री + मतुप् = श्रीमत्

३. सत्त्वम् - सतो भावः - सत् + त्व = सत्त्व

४. ऊर्जितम् - ऊर्जा संजाता अस्य - ऊर्जा + इतच् (इत) = ऊर्जित।

अधस्तनेषु पदेषु विग्रहं प्रत्ययं च लिखतु–

(i) कान्तिमत् - ....

(ii) बलवान् - ....

(iii) बुद्धिमती - ....

(iv) महत्त्वम् - ....

(v) द्रव्यत्वम् - ....

(vi) स्वत्वम् - ....

(vii) ज्ञानवत्त्वम् - ....

(viii) गर्वितः – ....

(ix) इच्छिता – ....

(x) स्वनितम् – ....

(ई) कृत्प्रत्ययः

१. ऊर्जितम् – ऊर्ज् + क्त = ऊर्जित

२. सम्भवम् – सम् + भू + अच् = सम्भव

अधस्तनेभ्यः प्रकृतिप्रतययेभ्यः निष्पन्नं पदं वाक्ये व्यवहरतु--

(i) उन्द् + क्त – ....

(ii) ऊय् + क्त – ....

(iii) उज्झ् + क्त – ....

(iv) अर्थ + क्त – ....

(v) वि + भू + अच् – ....

(vi) कुप् + अच् – ....

(vii) शुध् + अच् – ....

(उ) क्रियाकारकसम्बन्धः

अस्ति	–	आक्षिप्ता कर्तरि क्रिया	अवगच्छ	–	कर्तरि क्रिया
सत्त्वम्	–	कर्ता	त्वम्	–	कर्ता
यद्यत्	–	कर्तृविशेषणम्	तत्तत्	–	कर्म
विभूतिमत्	–	कर्तृविशेषणम्	तेजोंऽशसम्भवम्	–	कर्मविशेषणम्
श्रीमत्	–	कर्तृविशेषणम्	मम	–	सम्बन्धषष्ठी
ऊर्जितम्	–	कर्तृविशेषणम्	एव	–	अवधारणे

(ऊ) पर्यायशब्दः

१. अंशः - १. भागः (अका. नपुं.), २. वण्टकः (अका. पुं.), ३. एकदेशः (अका. पुं.), ४. अवयवः (अका. पुं.)

२. तेजः - १. तेजः (तेजस् सका. नपुं.), २. प्रभावः (अका. पुं.), ३. दीप्तिः (इका. स्त्री.), ४. बलम् (अका. नपुं.), ५. शुक्रम् (अका. नपुं.)

◆◆◆

७४. श्लोकः

अथवा बहुनैतेन किं ज्ञातेन तवार्जुन।
विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत्।। (भ. गी. १०.४२)

पदच्छेदः

अथवा, बहुना, एतेन, किम्, ज्ञातेन, तव, अर्जुन।
विष्टभ्य, अहम्, इदम्, कृत्स्नम्, एक+अंशेन, स्थितः, जगत्।।

पदच्छेदाभ्यासः

अधस्तनेषु पदेषु विच्छेदं करोतु–

(i) बहुनैतेन – ....

(ii) तवार्जुन – ....

(iii) विष्टभ्याहम् – ....

(iv) एकांशेन – ....

(v) स्थितो जगत् – ....

(vi) इदं कृत्स्नम् – ....

(vii) किं ज्ञातेन – ....

पदपरिचयः

पदम्	विश्लेषणम्	पदम्	विश्लेषणम्
अथवा	अव्ययसमुच्चयः	विष्टभ्य	ल्यबन्तम् अव्ययम्
बहुना	बहु.-उका.नपुं.तृ.एक.विशेषणम्	अहम्	अस्मद्-दका.प्र.एक.सर्व विशेष्यम्
एतेन	एतद्-दका.नपुं.तृ.एक.सर्व.विशेषणम्	इदम्	इदम्-दका.नपुं.द्विती.एक.सर्व विशेषणम्
किम्	(अव्ययम्) किम्-मका.नपुं.प्र.एक.सर्व.	कृत्स्नम्	कृत्स्न-अका.नपुं.द्विती.एक.विशेषणम्
ज्ञातेन	ज्ञात-अका.नपुं.तृ.एक.क्तान्तं विशेष्यम्	एकांशेन	एकांश-अका.पुं.तृ.एक.समस्तम्
तव	युष्मद्-दका.ष.एक.सर्व.	स्थितः	स्थित-अका.पुं.प्र.एक.क्तान्तं विशेषणम्
अर्जुन	अर्जुन-अका.पुं.सम्बो.एक.	जगत्	जगत्-तका.नपुं.द्विती.एक.विशेष्यम्

वर्गीकरणाभ्यासः

अधस्तनेषु वर्गेषु श्लोकपदानि विभजतु–

(i) प्रथमान्तम् (२) ....

(ii) द्वितीयान्तम् (३) ....

(iii) तृतीयान्तम् (४) ....

(iv) षष्ठ्यन्तम् (१) ....

(v) सम्बोधनान्तम् (१) ....

(vi) सर्वनाम (४) ....

(vii) अव्ययम् (३) ....

(viii) क्तान्तम् (२) ....

(ix) ल्यबन्तम् (१) ....

(x) अकारान्तम् (५) ....

(xi) उकारान्तम् (१) ....

(xii) तकारान्तम् (१) ....

(xiii) पुंलिङ्गम् (३) ....

(xiv) नपुंसकम् (७) ....

(xv) विशेष्यम् (३) ....

(xvi) विशेषणम् (५) ....

(xvii) विशेष्येण सह तद्विशेषणं लिखतु।

आकाङ्क्षाविस्तरः

ज्ञातेन किम्? ज्ञातेन साध्यं नास्तीत्यर्थः। ज्ञातेन प्रयोजनं नास्तीति भावः।

कस्य ज्ञातेन साध्यं नास्ति? .... (युष्मद् ष.)

तव केन ज्ञातेन? .... (उका. तृ.)

तव केन बहुना ज्ञातेन? .... (सर्व. तृ.)

अस्मिन् वाक्ये कः सम्बोध्यः? .... (अका. सम्बो.)

अथवा अर्जुन! एतेन बहुना ज्ञातेन तव किम्? इत्यन्वयः।

अहं अस्मि।

अहं कीदृशः अस्मि? .... (अका. प्र.)

अहं किं कृत्वा स्थितः अस्मि? .... (ल्यबन्तम्)

अहं किं विष्टभ्य स्थितोऽस्मि? .... (तका. द्वि.)

अहं कीदृश जगत् विष्टभ्य स्थितोऽस्मि? .... (अका. द्वि.)

अहं कीदृशं कृत्स्नं जगत् केन विष्टभ्य स्थितोऽस्मि? .... (सर्व. द्वि.)

अहम् इदं कृत्स्नं जगत् केन विष्टभ्य स्थितोऽस्मि? .... (समस्त. तृ.)

पदार्थः

पदम्	संस्कृतम्	हिन्दी
अथवा	वा	अथवा
अर्जुन!	हे पार्थ!	हे अर्जुन
एतेन	अनेन (पूर्वोक्तेन)	इस
बहुना	अधिकेन	बहुत
ज्ञातेन	ज्ञानेन	जानने से
तव	तव (अर्जुनस्य)	तुम्हारा
किम्	किम् (प्रयोजनम्)?	क्या (प्रयोजन)?
अहम्	अहं (श्रीकृष्णः)	मैं
इदम्	एतत्	इस
कृत्स्नम्	सर्वम्	सम्पूर्ण
जगत्	विश्वब्रह्माण्डम्	ब्रह्माण्ड को
एकांशेन	एकभागेन	एक अंश से
विष्टभ्य	धृत्वा	धारण करके
स्थितः (अस्मि)	अवस्थितः (अस्मि)	स्थित (हूँ)

भावार्थः

संस्कृतम्–सर्वेषां सुगमत्वाय अवयवशो विभूतिमुक्त्वा श्रीकृष्णः अस्मिन् श्लोके भक्तानुग्रहार्थं साकल्येन योगशक्तिं वर्णयति।

अपरं पक्षं समाश्रयितुम् 'अथवा' इत्युक्तम्। इह एकः पक्षस्तु पूर्वश्लोके उपस्थापितः यत् सर्वेषु विभूतिमत्सु परमात्मनो योगशक्तेरेव अभिव्यक्तिर्ज्ञेया इति। द्वितीयं पक्षमनेन श्लोकेन निर्दिशति कृष्णः यत् सम्पूर्णेऽपि ब्रह्माण्डे परमात्मनो योगशक्तेरेव प्रभावः। तदुक्तं भगवता कृष्णेन–

हे अर्जुन! अनेन पूर्वोक्तेन परिच्छिन्नेन बहुना विभूतिविषयकेण ज्ञानेन तव किमपि प्रयोजनं साध्यं नास्तीत्यर्थः। यतोहि विभूतिज्ञानेन सर्वं नैव ज्ञायते। किं च सर्वासां विभूतीनाम् एकत्र शब्देन परिगणनमपि असम्भवम्। विभूतेर्ज्ञानं तु चित्तं शोधयति। तच्च तेऽर्जुनस्य चित्तं सम्प्रति शुद्धं जातम्। अतः शुद्धचित्ते त्वयि साम्प्रतं विभूतिज्ञानस्य प्रयोजनं नास्ति। अतः इदानीं शुद्धचित्तस्य अर्जुनस्य अल्पाक्षरेण चिन्तनीयं विषयं भगवान् श्रीकृष्णः उपस्थापयति–हे पार्थ! एतत्सम्पूर्णम् आधारहीनं विश्वम् अहम् एकपादेन अवष्टभ्य स्थितोऽस्मि। यथा आकाशे स्तम्भाधारेण छदिः अवस्थाप्यते तथैव भगवद्रूपे स्तम्भे इदं ब्रह्माण्डम् आधृतम्। अन्यथा भगवद्रूपं विना आकाशे ब्रह्माण्डस्य स्थितिरेव न स्यात्। एवञ्च भगवतः सत्तयैव जगतः सर्वस्य सत्ता दृश्यते। ब्रह्माण्डस्य अणुषु-अणुषु सत्तारूपेण परमात्मनो व्याप्तिरस्ति। एवञ्च सम्पूर्णेऽपि ब्रह्माण्डे परमेश्वरस्य तद्योगशक्तेः अभिव्यक्तिः दर्शनीया, विभूतिज्ञानस्यै- तदेव परमं प्रयोजनम्। किन्तु एतदपि दृश्यमानं ब्रह्माण्डं परमात्मनः सम्पूर्णं रूपं नास्ति, प्रत्युत तस्य चतुर्षु अंशेषु एक एव अंशः इदं जगत्। निखिलमपि ब्रह्माण्डं भगवतः चतुर्थांशस्यैव स्वरूपम्। तदुक्तं यजुर्वेदे– पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि - इति।

हिन्दी–सबको सरलता से अवगत कराने के लिए भगवान् ने अलग-अलग विभूतियों का उल्लेख किया। उसके बाद उन्होंने विभूतियों में अपनी योगशक्ति की अभिव्यक्ति बताई। अब इस श्लोक में भक्तों पर अनुग्रह करने के लिए योगशक्ति की समग्रता का वर्णन हुआ है।

श्लोक में 'अथवा' शब्द दो पक्षों की ओर संकेत करता है। उसमें प्रथम पक्ष पूर्वश्लोक में वर्णित है कि–विभूति सम्पन्न व्यक्ति या वस्तु में परमात्मा की योगशक्ति का आविर्भाव समझना चाहिए। दूसरा पक्ष इस श्लोक में वर्णित है कि सम्पूर्ण ब्रह्माण्ड ही परमात्मा की योग-शक्ति पर आश्रित है।

हे अर्जुन! पूर्व श्लोकों में तुमको बहुत-सी विभूतियाँ बतलाई हैं। किन्तु उनसे तुम्हारा कोई प्रयोजन सिद्ध होने वाला नहीं है। क्योंकि विभूतियों के ज्ञान से ही सम्पूर्ण ज्ञान नहीं हो सकता। किंच एक जगह सम्पूर्ण विभूतियों का कथन भी सम्भव नहीं है। दूसरी बात है कि विभूति-ज्ञान से चित्त का शोधन मात्र होता है। सो तुम्हारा चित्र इस विभूति-ज्ञान से शुद्ध हो गया है। अतः अब तुम्हारे लिए इस विभूति-ज्ञान का कोई प्रयोजन नहीं है।

इस प्रकार शुद्ध-चित्त अर्जुन के लिए भगवान् ने थोड़े शब्दों में चिन्तन का विषय बताया है– हे अर्जुन! आधार-हीन इस सम्पूर्ण विश्वब्रह्माण्ड को मैं एक पाद से धारण करके स्थित हूँ।

जैसे निराधार आकाश में छत आदि रोकने के लिए स्तम्भ का आधार अपेक्षित है। वैसे ही परमात्मा ने ब्रह्माण्ड को स्तम्भित किया है। परमात्म-स्तम्भ के बिना ब्रह्माण्ड की स्थिति सम्भव नहीं है। जगत् की सत्ता परमात्मा की सत्ता पर निर्भर है। भगवान् की सत्ता से जगत् सत्तावान् है। इस प्रकार संसार के कण-कण में भगवान् व्याप्त हैं। सम्पूर्ण ब्रह्माण्ड में भगवान् की योग-शक्ति का दर्शन करना चाहिए। विभूति-ज्ञान का यही परम प्रयोजन है।

दृष्टिगोचर यह ब्रह्माण्ड भी परमात्मा के सम्पूर्णरूप की अभिव्यक्ति नहीं है। उसकी योग-शक्ति इतनी ही नहीं है। अपितु यह उसका चतुर्थांश है। सम्पूर्ण ब्रह्माण्ड परमात्मा की चौथाई योग शक्ति का स्वरूप है। उसके शेष तीन अंश तो अमृतस्वरूप हैं जो दिव्य लोक में रूपायित हैं। जैसा कि यजुर्वेद में वर्णित है–पादोऽस्य विश्वा भूतानि, त्रिपादस्यामृतं दिवि।।

अवबोधाभ्यासः

अधस्तनान् प्रश्नान् समादधतु–

१. इह श्लोके किं वर्णितम्? ....

२. अथवा शब्देन कौ द्वौ पक्षौ सूचितौ? ....

३. विभूतिज्ञानस्य किं प्रयोजनम्? ....

४. विभूतिज्ञानेन अर्जुनस्य प्रयोजनं कथन्नास्ति? ....

५. विष्टभ्यपदेन कोऽर्थो गृह्यते? ....

६. उदाहरणे इह कस्य क आधारः दर्शितः? ....

७. भगवतो योगशक्तेः कुत्र व्याप्तिः वर्णिता? ....

८. भगवत एकांशस्य कुत्राभिव्यक्तिः? ....

९. भगवत शेषांशानां कुत्र स्थितिः श्रूयते? ....

१.. मन्त्राशं रटित्वा लिखतु। ....

व्याकरणाभ्यासः

(अ) सन्धिः

१. बहुनैतेन – बहुना + एतेन – वृद्धिसन्धिः

२. तवार्जुन – तव + अर्जुन – दीर्घसन्धिः

३. विष्टभ्याहम् – विष्टभ्य + अहम् – दीर्घसन्धिः

४. एकांशेन – एक + अंशेन – दीर्घसन्धिः

५. स्थितो जगत् - स्थितः + जगत् - विसर्गसन्धिः

६. किं ज्ञातेन - किम् + ज्ञातेन - अनुस्वारसन्धिः

७. इदं कृत्स्नम् - इदम् + कृत्स्नम् - अनुस्वारसन्धिः

अधस्तनेषु रेखाङ्कितेषु सन्धिं करोतु–

(i) अव्याहत + ऐश्वर्यः कृष्णः + अवोचत्। ....

(ii) न + अहम् + भक्षितवान् अम्ब। ....

(iii) सर्वे मिथ्या + अभिशंसिनः। ....

(iv) समक्षम् + पश्य मे मुखम्। ....

(v) नन्दः प्रमुदितः + मेने आत्मानम्। ....

(vi) निर्ममन्थ स्वयम् + दधि। ....

(vii) पूर्व + अपरम् + बहिश्च + अन्तर्जगतः। ....

(viii) स्मयन्ती विस्मिता + अभवत्। ....

(ix) दूरदर्शनेन + एव वार्ताम् + श्रुतवान्। ....

(x) कृत + एकान्तस्थितिः मुनिः। ....

(आ) समासः

१. एकांशेन - एकश्च असौ अंशश्च कर्मधारयः

एकांशः, तेन -

अधस्तनेषु रेखाङ्कितेषु विग्रहपूर्वकं समासं करोतु–

(i) शिशवः एकपर्यङ्के स्वपन्ति। ....

(ii) स्वच्छस्फटिकानां मालां धारयति। ....

(iii) भवनस्य दूषितजलं प्रणाल्या निर्गच्छति। ....

(iv) नवपिटके तव वस्त्राणि सन्ति। ....

(v) धन्वतरिः सुवर्णकलशे अमृतं धारयति। ....

(vi) धात्री जीर्णशूर्पं गृहाद् बहिः क्षिपति। ....

(vii) परशुना स्थूलकाष्ठं विदारयति। ....

(viii) गर्दभः शुष्कतृणं न चरति। ....

(इ) कृत्प्रत्ययः

१. ज्ञातेन – ज्ञा + क्त = ज्ञात

२. स्थितः – स्था + क्त = स्थित

३. विष्टभ्य – वि + ष्टभ् + ल्यप् (य) = विष्टभ्य

अधस्तनाभ्यां प्रकृतिप्रत्ययाभ्यां निष्पन्नपदं वाक्ये प्रयुङ्क्षम्–

(i) स्ना + क्त – ....

(ii) पा + क्त – ....

(iii) भज् + क्त – ....

(iv) भुज् + क्त – ....

(v) भ्रम् + क्त – ....

(vi) आ + नम् + ल्यप् – ....

(vii) आ + भाष् + ल्यप् – ....

(viii) सम् + तर्ज् + ल्यप् – ....

(ई) क्रियाकारकसम्बन्धः

साध्यं नास्ति	–	आक्षिप्ता कर्मणि क्रिया	अस्मि	–	आक्षिप्ता कर्तरि क्रिया
तव	–	कर्तृकारकम्	अहम्	–	कर्ता
किम्	–	कर्मकारकम्	स्थितः	–	कर्तृविशेषणम्
ज्ञातेन	–	करणम्	जगत्	–	कर्म
बहुना	–	करणविशेषकम्	इदम्	–	कर्मविशेषणम्
एतेन	–	करणविशेषणम्	कृत्स्नम्	–	कर्मविशेषणम्
अर्जुन	–	सम्बोधनम्	विष्टभ्य	–	ल्यबन्तक्रिया
अथवा	–	पक्षान्तरे	एकांशेन	–	ल्यबन्तक्रियायाः करणम्

(उ) कारकम्

'ज्ञातेन किम्?' इति प्रश्नात्मकेन वाक्येन 'अनेन ज्ञातेन तव किमपि साध्यं नास्ति' इत्यर्थः प्रतीयते। इह हि साध्यक्रियां प्रति 'ज्ञातम्' करणम्, अतोऽत्र तृतीया विभक्तिः। तथा च नियमः–गम्यमानापि क्रिया कारकविभक्तौ प्रयोजिका। यथा–अलं श्रमेण। कुतः? नद्याः।

◆◆◆

अथ एकादशोऽध्यायः

७५. श्लोकः

श्रीभगवानुवाच–

पश्य मे पार्थ रूपाणि शतशोऽथ सहस्रशः।
नानाविधानि दिव्यानि नानावर्णाकृतीनि च।। (भ. गी. ११.५)

पदच्छेदः

पश्य, मे, पार्थ, रूपाणि, शतशः, अथ, सहस्रशः।
नाना-विधानि, दिव्यानि, नाना-वर्ण+आकृतीनि, च।।

पदच्छेदाभ्यासः

अधस्तनानि पदानि विच्छिनत्तु–

(i) शतशोऽथ – ....

(ii) नानाविधानि – ....

(iii) वर्णाकृतीनि – ....

(iv) नानावर्णाकृतीनि – ....

पदपरिचयः

पदम्	विश्लेषणम्	पदम्	विश्लेषणम्
पश्य	दृश्+लोट् मपु.एक.भ्वादि.कर्तरि क्रिया	सहस्रशः	शसन्तम् अव्ययम् विशेषणम्
मे	अस्मद्-दका.ष.एक.सर्व.	नानाविधानि	नानाविध-अका.नपुं.द्विती.बहु.समस्तम् विशेषणम्२
पार्थ	पार्थ-अका.पुं.सम्बो.एक.	दिव्यानि	दिव्य-अका.नपुं.द्विती.बहु.तद्धितान्तं विशेषणम् ३
रूपाणि	रूप-अका.नपुं द्वि.बहु.विशेष्यम् १	नानावर्णा-कृतीनि	नानावर्णाकृति-इका.नपुं.द्विती.बहु.समस्तं विशेषणम्
शतशः	शसन्तम् अव्ययम् विशेषणम्		
अथ	अव्ययम्	च	अव्ययम्

वर्गीकरणाभ्यासः

अधस्तनेषु वर्गेषु श्लोकपदानि विभजतु–

(i) सम्बोधनान्तम् (१) ....

(ii) द्वितीयान्तम् (४) ....

(iii) षष्ठ्यन्तम् (१) ....

(iv) अकारान्तम् (४) ....

(v) इकारान्तम् (१) ....

(vi) पुंलिङ्गम् (१) ....

(vii) नपुंसकम् (४) ....

(viii) सर्वनाम (१) ....

(ix) अव्ययम् (४) ....

(x) क्रियापदम् (१) ....

(xi) विशेष्यम् (१) ....

(xii) विशेषणम् (५) ....

(xii) शसन्तमव्ययम् (२) ....

(xiii) तद्धितान्तम् (१) ....

(xv) समस्तम् (२) ....

(xvi) विशेष्येण सह विशेषणानि लिखतु।

आकाङ्क्षाविस्तरः

पश्य (= अवलोकय)।

कः पश्यतु? **त्वं पश्य।**

त्वं कानि पश्य? .... (अका. द्वि. १)

कीदृशानि रूपाणि पश्य? .... (अका. द्वि. २)

पुनश्च कीदृशानि नानाविधानि रूपाणि पश्य? .... (इका. द्वि.)

नानाविधानि नानावर्णाकृतीनि च रूपाणि पुनश्च कीदृशानि पश्य?	....	(अका. द्वि. ३)
नानाविधानि नानावर्णाकृतीनि च दिव्यानि कति रूपाणि पश्य?	....	(शसन्तम्)
नानाविधानि नानावर्णाकृतीनि च दिव्यानि किं शतशः एव रूपाणि?	....	नैव, सहस्रशः।
नानाविधानि नानावर्णाकृतीनि च दिव्यानि शतशः सहस्रशः कस्य रूपाणि पश्य?	....	(ष. सर्व.)
कश्च सम्बोध्यः?	....	(सम्बो. एक.)

पार्थ! अथ (त्वम्) नानाविधानि नानावर्णाकृतीनि च दिव्यानि मे शतशः सहस्रशः रूपाणि पश्य।

पदार्थः

पदम्	संस्कृतम्	हिन्दी
पार्थ!	हे कौन्तेय!	हे अर्जुन!
अथ	अधुना (त्वम्)	अब (तुम)
नानाविधानि	अनेकप्रकाराणि	नाना प्रकार के
नानावर्णाकृतीनि	अनेकरङ्गरूपाणि	नाना रंग और रूप वाले
च	तथा	एवम्
दिव्यानि	अलौकिकानि	अलौकिक
मे	मम	मेरे
शतशः	शतानि	सैकड़ों
सहस्रशः	सहस्राणि	हजारों
रूपाणि	आकारान्	रूपों को
पश्य	द्रष्टुम् अर्हो भव	देखो

भावार्थः

संस्कृतम्—अस्य एकादशस्य अध्यायस्य 'विश्वरूपदर्शनयोगाध्यायः' इति नाम प्रसिद्धमस्ति। यतो हि अत्राध्याये भगवतो विश्वरूपम्, अर्जुनकृतं तत्स्तवनं च वर्णिते स्तः। तदर्थम् अध्यायादौ अर्जुनः

श्रीकृष्णम् ऐश्वरं विश्वरूपं दर्शयितुं प्रार्थितवान्। अर्जुनस्य प्रार्थनाम् अनुनिशम्य भगवान् श्रीकृष्णः तं दर्शनयोग्यं मत्वा तद्रूपं द्रष्टुमादिशति।

पृथापुत्र हे अर्जुन! इदानीं त्वं मम शतशः सहस्रशः च अपरिमितानि विश्वरूपाणि द्रष्टुम् अर्हसि। तानि रूपाणि देव-मनुष्य-तिर्यग्योनीनां भिन्नानि-भिन्नानि अनेकप्रकारकाणि सन्ति। तेषु रूपेषु नीलपीतादयो भिन्नाः-भिन्नाः अनेके वर्णाः, अनेकाः पृथक्-पृथक् आकृतयश्च सन्ति। अतः तानि ऐश्वररूपाणि दिव्यानि मम योगशक्तिसमुद्भवानि अप्राकृतानि विश्वरूपाणि प्रोच्यन्ते।

इह पार्थपदेन त्वं मम प्रेमास्पदः सखा सम्बन्धी च इति स्मरितं भवति। भगवतो रूपस्य एकत्वेऽपि नानाविधत्वात् रूपाणि इति बहुवचनं प्रयुक्तम्। संख्यायाः वाचकयोः शतशः सहस्रशः इति द्वयोः पदयोः प्रयोगेण रूपाणाम् असंख्यता बोध्यते। नानाविधानीति पदेन रूपेषु जातिगतभेदानाम् अनेकता सङ्केतिता भवति। देव-मनुष्य-तिरश्चां नानाजातीनां रूपाणि सन्तीति बोध्यम्। 'नानावर्णाकृतीनि' पदे वर्णशब्दः शुक्लकृष्णनीलपीतादि-रङ्गवाची। आकृतिपदं च अवयवसंस्थानं बोधयति। तथा च विश्वरूपे समेषां रूपाणां वर्णकानि भिन्नानि-भिन्नानि, तेषामाकारोऽपि पृथक्-पृथक् वर्तते इति बोध्यम्। भगवतो विश्वरूपे विद्यमानानि सर्वाणि रूपाणि अद्भुतयोगशक्तिविरचितानि इत्यर्थं प्रकटयितुमिह 'दिव्यानि' पदं प्रयुक्तम्। तानि रूपाणि लौकिकानि न ज्ञेयानि इत्यवधेयम्।

हिन्दी–इस अध्याय को विश्वरूप दर्शनयोग कहते हैं। क्योंकि इसमें भगवान् के विश्वरूप और अर्जुन के द्वारा उनका दर्शन-स्तवन ही वर्णित है। अर्जुन ने अध्याय के प्रारम्भ में विश्वरूप दिखाने के लिए भगवान् से प्रार्थना की है। भगवान् ने अर्जुन को उसका अधिकारी समझकर उसे देखने की अनुमति दी है।

श्रीभगवान् बोले–हे अर्जुन! अब तुम मेरे सैकड़ों-हजारों अर्थात् अनन्त विश्वरूप को देखने के अधिकारी हो गये हो। वे रूप देव-मनुष्य-पशु-पक्षी आदि अनेक योनियों के हैं। उन प्रत्येक रूपों के रंग और उनकी आकृति पृथक्-पृथक् हैं, अतः वे दिव्य अलौकिक हैं, मेरी योगशक्ति से उत्पन्न होने के कारण उन्हें दिव्य विश्वरूप कहा जाता है।

श्लोक में पार्थ शब्द के प्रयोग से सम्बन्ध का स्मरण कराया गया है। भगवान् का रूप एक है, किन्तु उसमें नानात्व का बोध कराने के लिए 'रूपाणि' बहुवचन का प्रयोग हुआ है। शतशः और सहस्रशः विरुद्धार्थक पद का प्रयोग होने से यहाँ असंख्यता, अनन्तता का बोध होता है। यहाँ रूपों में जातिगत भेद बताने के लिए नानाविधानि पद तथा आकार और रंग का भेद बताने के लिए आकृति और वर्ण शब्द का प्रयोग हुआ है। अद्भुत योगमाया की सृष्टि होने से विश्वरूप को दिव्य कहा गया है।

अवबोधाभ्यासः

अधस्तनान् प्रश्नान् समाधत्ताम्–

१. अस्य अध्यायस्य किम् अभिधानम्? ....

२. तस्मिन् अभिधाने किं कारणम्? ....

३. रूपाणि कथं दिव्यानि? ....

४. काभ्यां पदाभ्याम् अनन्ततार्थः प्रतीयते? ....

५. नानाविधानीति विशेषणस्य कोऽभिप्रायः? ....

६. वर्णशब्देन इह कोऽर्थो गृह्यते? ....

७. आकृतिः का? ....

व्याकरणाभ्यासः

(अ) सन्धिः

१. वर्णाकृतीनि - वर्ण + आकृतीनि - दीर्घसन्धिः

२. शतशोऽथ - शतशः + अथ - विसर्गसन्धिः पूर्वरूपसन्धिश्च

अधस्तनेषु पदेषु सन्धिं विसधिं च करोतु–

(i) तेऽग्रजोऽपि वदति। ....

(ii) अम्ब! सर्वे मिथ्याभिशंसिनः। ....

(iii) नन्दः प्रमुदितः + अविशत् पुरीम्। ....

(iv) कालेन + अल्पेन रामः पद्भ्यां विक्रंस्यति। ....

(v) मनसः + अनवस्थां जह्यात्। ....

(vi) विदारित + आस्यं बालमहं दृष्टवान्। ....

(vii) वैकारिकाणीन्द्रियाणि। ....

(viii) सुतोऽसौ व्रजेश्वरस्य। ....

(आ) समासः

१. नानाविधानि - नाना विधाः येषु तानि - बहुव्रीहिः

२. नानावर्णाकृतीनि - वर्णाश्च आकृतयश्च इति वर्णाकृतयः- द्वन्द्वः

नाना वर्णाकृतयो येषु तानि - बहुव्रीहिः

अधस्तनेषु पदेषु विग्रहपूर्वकं समासं लिखतु–

(i) पङ्काङ्गरागरुचिरौ बालकौ आलिङ्गति माता। ....

(ii) धृतमणिगणं स्वाङ्गं प्रकाशते। ....

(iii) नानाविद्यो गुरुः दुर्लभः। ....

(iv) नानास्वभावानुभावान् जनान् पश्यति। ....

(v) अधिकदानेन रिक्तकोषोऽभूत्। ....

(vi) नानावेशभूषाभाषाः जनाः सम्मिलन्ति। ....

(vii) शैत्येन जातकम्पं वपुः वस्त्रेणाच्छादयति। ....

(इ) तद्धितप्रत्ययः

१. शतशः – शतं शतमिति – शत + शस्

२. सहस्रशः – सहस्रं सहस्रम् इति – सहस्र + शस्

३. दिव्यानि – दिवि भवम् – दिव् + यत्

अधस्तनेषु रेखाङ्कितेषु प्रकृति-प्रत्ययविभागं विग्रहं च करोतु–

(i) निर्वाचने कोटिशः जना मतं यच्छन्ति। ....

(ii) कुम्भमेलायां लक्षशो जनाः स्नान्ति। ....

(iii) बालकेभ्यः द्विशः पुस्तके प्रयच्छति। ....

(iv) जनेषु पञ्चशः किलोमितं तण्डुलं वितरति। ....

(v) न्याय्यं धनं फलति। ....

(vi) पक्वम् अन्नं पचेत्। ....

(vii) दन्त्याः कीटाः दन्तान् खुर्दन्ति। ....

(ई) कृत्प्रत्ययः

१. आकृति – आ + कृ + क्तिन् (ति)

अधस्तनेभ्यः प्रकृतिप्रत्ययेभ्यो निष्पन्नं पदं वाक्ये व्यवहरतु–

(i) जन् + क्तिन् – ....

(ii) ज्ञा + क्तिन् – ....

(iii) वि + अञ्ज् + क्तिन् – ....

(iv) सम् + हन् + क्तिन् – ....

(v) प्र + गम् + क्तिन् – ....

(vi) वि + आङ् + पृ + क्तिन् – ....

(viii) सम् + पुष् + क्तिन् – ....

(उ) क्रियाकारकसम्बन्धः

पश्य –	कर्तरिक्रिया	नानाविधानि –	कर्मविशेषणम्
त्वम् –	आक्षिप्तकर्ता	नानावर्णाकृतीनि –	कर्मविशेषणम्
रपाणि –	कर्म	दिव्यानि –	कर्मविशेषणम्
शतशः –	कर्मविशेषणम्	मे –	सम्बन्धषष्ठी
सहस्रशः –	कर्मविशेषणम्	पार्थ –	सम्बोधनम्

(ऊ) पर्यायशब्दः

(१) विधा १. प्रकारः (अका. पुं.), २. भिदा (अका. स्त्री.)

(२) वर्णः १. वर्णकम् (अका. नुपं.), २. रङ्गः (अका. पुं.), ३. रञ्जनम् (अका. नपुं.)

(३) आकृतिः १. आकारः (अका. पुं.), २. रूपम् (अका. नपुं.), ३. स्वरूपम् (आक. नपुं.), ४. व्यक्तिः (इका. स्त्री.)

◆◆◆

७६. श्लोकः

न तु मां शक्यसे द्रष्टुमनेनैव स्वचक्षुषा।
दिव्यं ददामि ते चक्षुः पश्य मे योगमैश्वरम्।। (भ. गी. ११.८)

पदच्छेदः

न, तु, माम्, शक्यसे, द्रष्टुम्, अनेन, एव, स्व-चक्षुषा।
दिव्यम्, ददामि, ते, चक्षुः, पश्य, मे, योगम्, ऐश्वरम्।।

पदच्छेदाभ्यासः

अधस्तनेषु पदच्छेदं करोतु-

(i) अनेनैव - ....

(ii) मां शक्यसे - ....

(iii) दिव्यं ददामि - ....

(iv) स्वचक्षुषा - ....

पदपरिचयः

पदम्	विश्लेषणम्	पदम्	विश्लेषणम्
न	अव्ययम् १	दिव्यम्	दिव्य-अका.नपुं.द्विती.एक.विशेषणम् तद्धितान्तम्
तु	अव्ययम् २	ददामि	दा+लट् उपु.एक.जुहोत्यादि परस्मै.कर्तरि सकर्मक.
माम्	अस्मद्-दका.द्विती.एक.सर्व.	ते	युष्मद्-दका.च.ए.सर्व.
शक्यसे	शक्+लट् मपु.एक.दिवादि.आत्मने.कर्तरि क्रिया	चक्षुः	चक्षुष्-षका.नपुं.प्र.एक.विशेष्यम्
द्रष्टुम्	तुमुनन्तम् अव्ययम् ३	पश्य	दृश्+लोट् मपु.एक.भ्वादि.परस्मै.सकर्मक.कर्तरि
अनेन	इदम्-मका.नपुं.तृ.एक.सर्व.विशेषणम्	मे	अस्मद्-दका.ष.एक.सर्व.
एव	अव्ययम् ४	योगम्	योग-अका.पुं.द्विती.एक.विशेष्यम्
स्वचक्षुषा	स्वचक्षुष्-षका.नपुं.तृ.एक.समस्तं विशेष्यम्	ऐश्वरम्	ऐश्वर-अका.पुं.द्विती.एक.तद्धितान्तं विशेषणम्

वर्गीकरणाभ्यासः

अधस्तनेषु वर्गेषु श्लोकपदानि विभजतु-

(i) प्रथमान्तम् (२) ....

(ii) द्वितीयान्तम् (३) ....

(iii) तृतीयान्तम् (२) ....

(iv) चतुर्थ्यन्तम् (१) ....

(v) षष्ठ्यन्तम् (१) ....

(vi) अकारान्तम् (३) ....

(vii) षकारान्तम् (२) ....

(viii) नपुंसकम् (६) ....

(ix) सर्वनाम (४) ....

(x) अव्ययम् (४) ....

(xi) क्रियापदम् (३) ....

(xii) विशेष्यम् (२) ....

(xiii) विशेषणम् (२) ....

(xiv) समस्तम् (१) ....

(xv) तद्धितान्तम् (२) ....

(xvi) विशेष्येण सह विशेषणं लिखतु।

आकाङ्क्षाविस्तरः

न शक्यसे (= समर्थो न भविष्यसि)।

क: न शक्यते? **त्वं न शक्यसे।**

किं कर्तुं न शक्यसे? .... (तुमुनन्तम्)

केन द्रष्टुं न शक्यसे? .... (षका. तृ.)

केन स्वचक्षुषा द्रष्टुं न शक्यसे? .... (तृ. सर्व.)

अनेनैव स्वचक्षुषा कं द्रष्टुं न शक्यसे? .... (द्विती. सर्व.)

अनेनैव तु स्वचक्षुषा मां द्रष्टुं न शक्यसे। अत:

ददामि (= प्रयच्छामि)।

क: ददाति? **अहं ददामि।**

किं ददामि? .... (षका. द्वि.)

कीदृशं चक्षुः ददामि? .... (अका. नपुं. द्वि.)

दिव्यं चक्षुः कस्मै ददामि? .... (सर्व. चतु.)

दिव्यं चक्षुः ते ददामि। तेन त्वम्–

पश्य (= अवलोकय)।

त्वं कं पश्य? .... (अ. पुं. द्वि. विशेष्यम्)

त्वं कीदृशं योगं पश्य? .... (अ. पुं. द्वि. विशेषणम्)

कस्य ऐश्वरं योगं पश्य? .... (ष. सर्व.)

पदार्थः

पदम्	संस्कृतम्	हिन्दी
तु	किन्तु	परन्तु
अनेन	ईदृशेन प्राकृतेन	इस
एव	हि	ही
स्वचक्षुषा	स्वस्य नेत्रेण	अपनी आँख से
माम्	विश्वरूपधरं माम्	मुझे
द्रष्टुम्	विलोकितुम्	देखने के लिए
न	नहि	नहीं
शक्यसे	शक्नोषि	समर्थ हो
ते	तुभ्यम्	तुमको
दिव्यम्	अलौकिकम्	अलौकिक
चक्षुः	अक्षि	आँख
ददामि	यच्छामि	देता हूँ
मे	मम	मेरी
ऐश्वरम्	असाधारणम्	ईश्वरीय
योगम्	सामर्थ्यम्	शक्ति को
पश्य	वीक्षितुं समर्थो भव	देखो

भावार्थः

संस्कृतम्—भगवता श्रीकृष्णेन प्रदर्शितेऽपि विश्वरूपे यदा अर्जुनः तं द्रष्टुं न प्रभवति तदा श्रीकृष्णः अर्जुनाय दिव्यदृष्टिं दातुं प्रतिजानीते—

हे पार्थ! अहं विश्वरूपं दर्शयामि, किन्तु त्वम् अनेन लौकिकेन एव नेत्रेण विराड्रूपं मां कृष्णं वीक्षितुं न समर्थोऽसि। अतोऽहं तुभ्यम् अलौकिकं ज्ञानचक्षुः = दिव्यदृष्टिम् अर्पयामि। यया दिव्यदृष्ट्या त्वं मम ईश्वरसम्बन्धिनम् असाधारणम् अघटितघटनापटीयसं सामर्थ्यं विलोकितुं योग्यो भव।

यथा भगवान् वेदव्यासः योगबलेन सञ्जयाय दिव्यदृष्टिं दत्तवान्, यस्याः प्रभावेण दूरस्थितोऽपि सञ्जयः व्यवहितं महाभारतयुद्धं प्रत्यक्षमिव अद्राक्षीत्। तथैव श्रीकृष्णः स्वस्य विराड्रूपं वीक्षितुम् अर्जुनाय दिव्यदृष्टिं प्रादात्।

हिन्दी—भगवान् श्रीकृष्ण के द्वारा विराड्रूप प्रकट किये जाने पर भी अर्जुन उसे नहीं देख सके, तब भगवान् ने उन्हें दिव्य दृष्टि प्रदान की थी—

हे अर्जुन! मैं विश्वरूप दिखा रहा हूँ किन्तु तुम उस विश्वरूपधारी मुझे इस लौकिक चर्म चक्षु से नहीं देख सकते हो। अतः अब मैं तुम्हें अलौकिक चक्षु (= दिव्य दृष्टि) प्रदान करता हूँ। उससे तुम मेरे ईश्वरीय योग शक्ति को देखो।

जिस प्रकार महर्षि वेदव्यास ने अपने तपोबल से संजय को दिव्यदृष्टि प्रदान की थी, जिससे संजय बहुत व्यवधान रहने पर भी घर बैठे-बैठे महाभारत युद्ध का आँखों-देखा हाल सुनाते थे। उसी प्रकार भगवान् ने अपने ईश्वरीय योगबल से अर्जुन को दिव्यदृष्टि प्रदान की, जिससे अर्जुन भगवान् के विराड् रूप को देखने में समर्थ हो सके।

अवबोधाभ्यासः

अधस्तनानां प्रश्नानां समाधानं विधेयम्—

१. अस्मिन् पद्ये किं प्रतिज्ञातम्? ....

२. अर्जुनः प्रदर्शितमपि विश्वरूपं द्रष्टुं कथं न समर्थः? ....

३. दिव्यदृष्टिं दातुं के समर्थाः भवन्ति? ....

४. प्राकृतेन करणेन कीदृशं कार्यं भवति? ....

५. ईश्वरीयं कार्यं कथम् अप्राकृतम् उच्यते? ....

६. वेदव्यासः कस्मै दिव्यदृष्टिम् अदात्? ....

७. विवेकानन्दे कः दिव्यं तेज आहितवान्? ....

व्याकरणाभ्यासः

(अ) सन्धिः

१. अनेनैव - अनेन + एव - वृद्धिसन्धिः
२. मां शक्यसे - माम् + शक्यसे - अनुस्वारसन्धिः
३. दिव्यं ददामि - दिव्यम् + ददामि - अनुस्वारसन्धिः

अधस्तनेषु रेखाङ्कितेषु सन्धिं विसन्धिं च करोतु–

(i) स प्रथमं स्थानमलङ्करोति। ....
(ii) अनेकवारम् + चातुर्येण शास्त्रार्थमकरोत्। ....
(iii) तस्यैकदा काव्यं श्रुत्वा आलोचितवान्। ....
(iv) अपमानेन + एतेन रुष्टो जातः। ....
(v) कीर्तिलता अल्पेनैव कालेन प्रासरत्। ....
(vi) को न जानाति माघस्य + औदार्यम्। ....
(vii) स एतत्पद्यं प्रणीतवान्। ....
(viii) श्रोतारः रम्यम् + काव्यम् + प्रशंसन्ति। ....

(आ) समासः

१. स्वचक्षुषा - स्वस्य चक्षुषा - षष्ठीतत्पुरुषः

अधस्तनेषु रेखाङ्कितेषु विग्रहं समासं च करोतु–

(i) गीतापुस्तकं पठति। ....
(ii) धर्मतत्त्वं गुहायां निहितम्। ....
(iii) सेवकः पितृतल्पं शोधयति। ....
(iv) माता हरिदर्शनाय मन्दिरम् अगमत्। ....
(v) पाकशालायां भानुप्रकाशः पतति। ....
(vi) विद्युन्निर्गमे सिक्थवर्तिकां ज्वलयति। ....
(vii) पुष्पाधान्यां स्थलपद्मानि सन्ति। ....
(viii) पूजागृहे नदीजलं स्थापितम्। ....

(इ) तद्धितप्रत्ययः

१. दिव्यम् – दिवि भवम् – दिव् + यत्

२. ऐश्वरम् – ईश्वरस्य अयम् – ईश्वर + अण्

अधस्तनेषु रेखाङ्कितेषु प्रकृतिप्रत्ययविभागं करोतु–

(i) गाङ्गं वारि आनयति। ....

(ii) वैष्णवानां चित्तेषु भक्तिः प्रचरिष्यति। ....

(iii) ये शैवाः त एव वैष्णवाः। ....

(iv) प्राकृतेषु जनेषु दिव्यदृष्टिर्न भवति। ....

(v) सभ्याः सर्वेषां वन्द्या भवन्ति। ....

(vi) मुख्यं भवनं निर्मितम्। ....

(vii) मम सतीर्थ्याः क्रीडाङ्गणे सन्ति। ....

(ई) कृत्प्रत्ययः

१. द्रष्टुम् – दृश् + तुमुन् (तुम्)

२. योगम् – युज् + घञ् (अ)

अधस्तनेभ्यः प्रकृतिप्रत्ययेभ्यः निष्पन्नं पदं वाक्ये प्रयुङ्क्ताम्–

(i) स्पृश् + तुमुन् – ....

(ii) स्पृह् + तुमुन् – ....

(iii) स्फुट् + तुमुनं – ....

(iv) सम् + स्तु + तुमुन् – ....

(v) वि + स्तृ + घञ् – ....

(vi) सृज् + घञ् – ....

(vii) प्र + स्वप् + घञ् – ....

(उ) क्रियाकारकसम्बन्धः

शक्यसे – कर्तरि क्रिया

त्वम् – आक्षिप्तः कर्ता

अहम् – आक्षिप्तः कर्ता

चक्षुः – कर्म

न	-	क्रियाविशेषणम्	दिव्यम्	-	कर्मविशेषणम्
द्रष्टुम्	-	क्रियाविशेषणम्	ते	-	सम्प्रदानम्
द्रष्टुम्	-	क्रियाविशेषणम् तुमुनन्तक्रिया	पश्य	-	कर्तरि क्रिया
माम्	-	कर्म	त्वम्	-	आक्षिप्तः कर्ता
स्वचक्षुषा	-	करणम्	योगम्	-	कर्म
अनेन	-	करणविशेषणम्	ऐश्वरम्	-	कर्मविशेषणम्
तु	-	पूर्ववाक्यापेक्षि- अव्ययम् हेत्वर्थम्	मे	-	सम्बन्धषष्ठी
ददामि	-	कर्तरि क्रिया			

(ऊ) पर्यायशब्दः

१. **चक्षुः** - १. नेत्रम् (अका. नपुं.), २. अक्षि (इका. नपुं.), ३. नयनम् (अका. नपुं.),४. लोचनम् (अका. नपुं.), ५. दृष्टिः (इका. स्त्री.), ६. दृक् (दृश् शका. स्त्री.)

२. **दिव्यम्** - १. अलौकिकम् (अका. त्रिलि.), २. अप्राकृतम् (अका. त्रिलि.), ३. स्वर्ग्यम् (अका. त्रिलि.), ४. असाधारणम् (अका. त्रिलि.)

३. **योगः** - १. सामर्थ्यम् (अका. नपुं.), २. शक्तिः (इका. स्त्री.)

◆◆◆

७७. श्लोकः

संजय उवाच

एवमुक्त्वा ततो राजन्महायोगेश्वरो हरिः।
दर्शयामास पार्थाय परमं रूपमैश्वरम्।। (भ. गी. ११.९)

पदच्छेदः

सञ्जयः, उवाच।

एवम्, उक्त्वा, ततः, राजन्, महायोग+ईश्वरः, हरिः।
दर्शयामास, पार्थाय, परमम्, रूपम्, ऐश्वरम्।।

पदच्छेदाभ्यासः

अधस्तनेषु पदच्छेदं करोतु–

(i) संजय उवाच – ....

(ii) ततो राजन् – ....

(iii) महायोगेश्वरः – ....

(iv) महायोगेश्वरो हरिः – ....

(v) परमं रूपम् – ....

पदपरिचयः

पदम्	विश्लेषणम्	पदम्	विश्लेषणम्
सञ्जयः	अका.पुं.प्र.एक.	हरिः	हरि–इका.पुं.प्र.एक.विशेष्यम्
उवाच	वच्+लिट् प्र.पु.एक.अदादि.परस्मै.कर्तरि क्रिया.	दर्शयामास	दृश्+णिच्+लिट् प्र.पु.एक.ण्यन्त.कर्तरि क्रिया.
एवम्	अव्ययम्	पार्थाय	पार्थ–अका.पुं.चतु.एक.तद्धितान्तम्
उक्त्वा	वच्+क्त्वा (क्त्वान्तम् अव्ययम्)	परमम्	परम–अका.नपुं.द्विती.एक.विशेषणम्
ततः	तसन्तम् अव्ययम्	रूपम्	रूप–अका.नपुं.द्विती.एक.विशेष्यम्
राजन्	नका.पुं.सम्बो.प्र.एक.	ऐश्वरम्	ऐश्वर–अका.नपुं.द्विती.एक.विशेषणं तद्धितान्तम्
महायोगेश्वरः	अका.पुं.प्र.एक.समस्तं विशेषणम्		

वर्गीकरणाभ्यासः

अधस्तनेषु वर्गेषु श्लोकपदानि लिखतु–

(i) प्रथमान्तम् (३) ....

(ii) द्वितीयान्तम् (३) ....

(iii) चतुर्थ्यन्तम् (१) ....

(iv) सम्बोधनान्तम् (१) ....

(v) अकारान्तम् (६) ....

(vi) इकारान्तम् (१) ....

(vii) नकारान्तम् (१) ....

(viii) पुंलिङ्गम् (५) ....

(ix) नपुंसकम् (३) ....

(x) समस्तम् (१) ....

(xi) तद्धितान्तम् (२) ....

(xii) अव्ययम् (३) ....

(xiii) क्रियापदम् (२) ....

(xiv) विशेष्यम् (२) ....

(xv) विशेषणम् (३) ....

(xvi) क्त्वान्तम् (१) ....

(xvii) तसन्तम् (१) ....

(xviii) विशेषणेन सह विशेष्यं लिखतु।

आकाङ्क्षाविस्तरः

दर्शयामास (= दर्शनं कारितवान्)।

कः दर्शयामास? .... (इका. प्र.)

कीदृशः हरिः दर्शयामास? .... (अका. समस्तम्)

किं कृत्वा महायोगेश्वरः हरिः दर्शयामास? .... (क्त्वान्तम्)

किम् उक्त्वा महायोगेश्वर: हरि: दर्शयामास? .... (अव्ययम्)

एवम् उक्त्वा कदा महायोगेश्वर: हरि: दर्शयामास? .... (तसन्तम्)

एवम् उक्त्वा ततो महायोगेश्वर: हरि: किं दर्शयामास? .... (द्विती. विशेष्यम्)

एवम् उक्त्वा तत: महायोगेश्वर: हरि: कीदृशं रूपं दर्शयामास? .... (द्विती. विशेषणम्)

एवम् उक्त्वा ततो महायोगेश्वर: हरि: कथम्भूतं परमं रूपं दर्शयामास? .... (द्विती. तद्धितान्तम्)

एवम् उक्त्वा ततो महायोगेश्वर: हरि: ऐश्वरं परमं रूपं कस्मै दर्शयामास? .... (अ. चतु.)

एवम् उक्त्वा ततो महायोगेश्वर: हरि: पार्थाय ऐश्वरं परमं रूपं दर्शयामास।

सञ्जय: कं सम्बोध्य उवाच? .... (सम्बो.)

पदार्थ:

पदम्	संस्कृतम्	हिन्दी
राजन्!	हे धृतराष्ट्र!	हे राजन्!
एवम्	पूर्वोक्तप्रकारेण	इस प्रकार
उक्त्वा	कथयित्वा	कहकर
तत:	तदनन्तरम्	उसके बाद
महायोगेश्वर:	सर्वोत्कृष्ट: योगाधिप:	महान् योगेश्वर
हरि:	क्लेशापहारी कृष्ण:	भगवान् श्रीकृष्ण ने
पार्थाय	प्रेमास्पदाय अर्जुनाय	परम प्रिय अर्जुन को
ऐश्वरम्	ईश्वरोद्भवम्	ईश्वरीय
परमम्	विराजम्	विराड्
रूपम्	स्वरूपम्	रूप
दर्शयामास	दर्शितवान्	दिखलाया।

भावार्थः

संस्कृतम्—श्रीकृष्णः अर्जुनाय दिव्यदृष्टिं प्रदाय यद् विराड्रूपं दर्शितवान्, सञ्जयः पञ्चभिः श्लोकैः तद्रूपं धृतराष्ट्राय वर्णयति—

हे राजन् धृतराष्ट्र! भगवान् श्रीकृष्णः 'दिव्यं ददामि ते चक्षुः' इत्युक्त्वा तदनन्तरं स्वस्य विराड्रूपं प्रादर्शयत्। तद्रूपम् अन्यैः योगेश्वरैः उत्पादयितुं नैव शक्यते, तत् केवलं जगन्नियन्त्रा ईश्वरेणैव कल्पयितुं शक्यम्। अतः इह 'ऐश्वरम्' इति विशेषणं कृतम्। श्रीकृष्णोऽपि नैव सामान्यो जनः। अपितु अखिलब्रह्माण्डनियन्ता, अतः सर्वोत्तमः योगेश्वरः सर्वविघ्नविनाशनश्च। एतादृशः श्रीकृष्णः स्वस्य प्रियभक्ताय पृथापुत्राय विराड्रूपम् अदर्शयत्।

हिन्दी—भगवान् श्रीकृष्ण ने अर्जुन को दिव्यदृष्टि प्रदान कर उन्हें अपने विराड् रूप का दर्शन कराया। संजय यहाँ पाँच श्लोकों से राजा धृतराष्ट्र को उसका वर्णन कर रहे हैं—

'तुम्हें दिव्यदृष्टि प्रदान करता हूँ' यह कहकर उसके बाद, हे राजन् धृतराष्ट्र! महान् योगेश्वर और सभी कष्टों को दूर करने वाले भगवान् श्रीहरि कृष्ण ने अर्जुन को ईश्वरीय विश्वरूप दिखलाया।

यहाँ कृष्ण के लिए दो विशेषणों का प्रयोग हुआ है। श्रीकृष्ण दृष्टि-दोष क्या समस्त दोषों का हरण करने वाले साक्षान्नारायण हरि हैं और वे योगशक्ति से सम्पन्न योगेश्वरों में सबसे महान् हैं, अतः महायोगेश्वर हैं। ईश्वर से भिन्न योगेश्वर भी अपने रूप को विशाल बना सकता है, किन्तु जिस विराड् रूप को श्रीकृष्ण ने दिखलाया, उसे ईश्वर-भिन्न व्यक्ति उद्भावित नहीं कर सकता है, यह भाव बताने के लिए यहाँ 'ऐश्वरम्' और 'परमम्' विशेषण प्रयुक्त हुए हैं।

अवबोधाभ्यासः

अधस्तनानां प्रश्नानां समाधानं लिखतु—

१. इह श्लोके कः कं प्रति कथयति? ....

२. कृष्णः किमुक्त्वा विश्वरूपम् अदर्शयत्? ....

३. कृष्णस्य द्वयोः विशेषणयोः किं तात्पर्यम्? ....

४. 'ऐश्वरम्' इति विशेषणेन किं बोध्यते? ....

५. 'परमम्' इत्यस्य कोऽभिप्रायः? ....

६. 'पार्थाय' इति पदेन कः सम्बन्धः स्मारितः? ....

व्याकरणाभ्यासः

(अ) सन्धिः

१. महायोगेश्वरः - महायोग + ईश्वरः - गुणसन्धिः

२. महायोगेश्वरो हरिः - महायोगेश्वरः + हरिः - विसर्गसन्धिः

३. ततो राजन् - ततः + राजन् - विसर्गसन्धिः

४. परमं रूपम् - परमम् + रूपम् - अनुस्वारसन्धिः

५. संजय उवाच - संजयः + उवाच - विसर्गलोपसन्धिः

अधस्तनेषु रेखाङ्कितेषु सन्धिच्छेदः कार्यः–

(i) भुवि विश्वेश्वरे हरौ भक्तिः स्यात्। ....

(ii) सद्यो नष्टस्मृतिर्गोपी। ....

(iii) कृष्णो ब्रह्मण आदेशं सत्यं कर्तुं व्रजेऽवसत्। ....

(iv) तेषां प्रीतिं स्वलीलया चक्रे। ....

(v) भयविह्वलेक्षणं हस्ते गृहीतवती। ....

(vi) तद् दाम द्व्यङ्गुलोनम् अभूत्। ....

(vii) बाल आस्ते गृहान्तरे। ....

(viii) संजय ईक्षते सर्वं दृश्यम्। ....

(आ) समासः

१. महायोगेश्वरः - योगस्य ईश्वरः इति योगेश्वरः - षष्ठीतत्पुरुषः

महान् चासौ योगेश्वरः - कर्मधारयः

अधस्तनेषु पदेषु विग्रहं समासं च करोतु–

(i) चक्रवर्तिनरेशः - ....

(ii) परिचितगृहपतिः - ....

(iii) देवर्षिनारदशापेन - ....

(iv) सुदृप्तरुद्रानुचरौ - ....

(v) रम्यकैलासोपवने – ....

(vi) मुकुन्दचरणैषिणाम् – ....

(vii) परमनेत्राञ्जनम् – ....

(इ) तद्धितप्रत्ययः

१. ऐश्वरम् – ईश्वराद् + आगतम् – ईश्वर + अण्

२. पार्थाय – पृथायाः अयम् – पृथा + अण्

३. ततः – तस्माद् इति – तद् + तस्

अधस्तनेषु विग्रहेषु प्रकृतिप्रत्ययान् निष्पन्नपदानि च लिखतु–

(i) महेश्वराद् आगतम् – ....

(ii) जनपदाद् आगतः – ....

(iii) मथुरायाः अपत्यम् – ....

(iv) नर्मदायाः अपत्यम् – ....

(v) महतः अपत्यम् – ....

(vi) कस्माद् इति – ....

(vii) ग्रामाद् इति – ....

(viii) प्रयागात् इति – ....

(ई) कृत्प्रत्ययः

१. उक्त्वा – वच् + क्त्वा (त्वा)

२. हरिः – हृ + इ

अधस्तनेभ्यः धातुभ्यः क्त्वाप्रत्ययेन निष्पन्नं रूपं वाक्ये प्रयुङ्क्ताम्–

(i) यज् + क्त्वा – ....

(ii) वप् + क्त्वा – ....

(iii) वह् + क्त्वा – ....

(iv) वस् + क्त्वा – ....

(v) ग्रह् + क्त्वा – ....

(vi) वे + क्त्वा – ....

(vii) व्यध् + क्त्वा – ....

विशेषः

क्त्वा– प्रत्यये ककारः इत्संज्ञकः, अतोऽयं प्रत्ययः 'कित्' इत्युच्यते। किति ङिति च प्रत्यये परे धातोः सम्प्रसारणं कार्यम्। अर्थात् धातोः य् व् र् ल् स्थाने क्रमेण इ उ ऋ लृ सञ्जायते। यथा–वच् + त्वा = उच् + त्वा = उक्त्वा। उपर्युक्तेषु सर्वेषु धातुषु सम्प्रसारणं कृत्वा रूपाणि निष्पादनीयानि।

(उ) तिङ्–प्रत्ययः

१. दर्शयामास – दृश् + णिच् (इ) = दर्शि + लिट् = दर्शि + आम् + लिट् = दर्शयाम् + लिट् = दर्शयाम् + अस् + लिट् = दर्शयाम् + आस = दर्शयामास। दर्शयाम् + कृ + लिट् = दर्शयाञ्चकार। दर्शयाम् + भू + लिट् = दर्शयाम्बभूव।

विशेषः

परोक्षे लिट्लकारे अनेकाज्धातोः अन्ते लिट्परक-कृ-भू-अस् धातुषु अन्यतमं प्रयुज्य रूपाणि निष्पाद्यन्ते। यथा–कथयामास, गोपायाञ्चकार, जनयाम्बभूव इत्यादि

(ऊ) क्रियाकारकसम्बन्धः

दर्शयामास	–	कर्तरि क्रिया	ततः	–	क्रियाविशेषणम्
हरिः	–	कर्ता	महायोगेश्वरः	–	कर्तृविशेषणम्
रूपम्	–	कर्म	परमम्	–	कर्मविशेषणम्
पार्थाय	–	सम्प्रदानम्	ऐश्वरम्	–	कर्मविशेषणम्
उक्त्वा	–	पूर्वक्रिया	राजन्	–	सम्बोधनम्
एवम्	–	पूर्वक्रियायाः कर्म			

(ए) पर्यायशब्दः

१. हरिः – १. नारायणः (अका. पुं.), २. माधवः (अका. पुं.), ३. मधुसूदनः (अका. पुं.), ४. कृष्णः (अका. पुं.), ५. वासुदेवः (अका. पुं.)

२. ईश्वरः – १. भगवान् (भगवत् तका. पुं.), २. शम्भुः (उका. पुं.), ३. मदनः (अका. पुं.), ४. धनाढ्यः (अका. पुं.), ५. स्वामी (स्वामिन् नका. पुं.)

◆◆◆

७८. श्लोकः

अनेकवक्त्रनयनमनेकाद्भुतदर्शनम्।
अनेकदिव्याभरणं दिव्यानेकोद्यतायुधम्।। (भ. गी. ११.१०)

पदच्छेदः

अनेक-वक्त्र-नयनम्, अनेक+अद्भुत-दर्शनम्।
अनेक-दिव्य+आभरणम्, दिव्य+अनेक+उद्यत+आयुधम्।।

पदच्छेदाभ्यासः

अधस्तनानि पदानि विच्छिनत्तु–

(i) अनेकवक्त्रनयनम् – ....

(ii) अनेकाद्भुत – ....

(iii) अनेकाद्भुतदर्शनम् – ....

(iv) दिव्याभरणम् – ....

(v) अनेकदिव्याभरणम् – ....

(vi) दिव्यानेक – ....

(vii) अनेकोद्यत – ....

(viii) उद्यतायुधम् – ....

पदपरिचयः

पदम्	विश्लेषणम्
अनेकवक्त्रनयनम्	अका. पुं. द्विती. एक. समस्तं विशेषणम्
अनेकाद्भुतदर्शनम्	अका. पुं. द्विती. एक. समस्तं विशेषणम्
अनेकदिव्याभरणम्	अका. पुं. द्विती. एक. समस्तं विशेषणम्
दिव्यानेकोद्यतायुधम्	अका. पुं. द्विती. एक. समस्तं विशेषणम्

वर्गीकरणाभ्यासः

अधस्तनेषु वर्गेषु श्लोकपदानि विभजतु–

(i) द्वितीयान्तम् (४) ....

(ii) अकारान्तम् (४) ....

(iii) पुंलिङ्गम् (४) ....

(iv) समस्तम् (४) ....

(v) विशेषणम् (४) ....

(vi) प्रथमे समस्तपदे पदानि (३) ....

(vii) द्वितीये समस्तपदे पदानि (३) ....

(viii) तृतीये समस्तपदे पदानि (३) ....

(ix) चतुर्थे समस्तपदे पदानि (४) ....

(x) चतुर्णां विशेषणानां विशेष्यम् 'देवम्' इति पदम् अग्रिमे श्लोके प्रयुक्तम्।

आकाङ्क्षाविस्तरः

अपश्यत् (= दृष्टवान् इति त्रयोदशे श्लोके प्रयुक्तायां क्रियायां सर्वेषाम् अन्वयः)।

कः अपश्यत्? 'पाण्डवः' इति कर्तृपदं त्रयोदशे श्लोके स्थितम्।

पाण्डवः कम् अपश्यत्? पाण्डवः देवम् अपश्यत्।

(अत्र 'देवम्' इति कर्मपदम् अग्रिमे एकादशश्लोके प्रयुक्तम्। तस्यैव 'देवम्' इति कर्मणः विशेषणानि चत्वारि इह श्लोके निबद्धानि सन्ति।)

पाण्डवः कीदृशं देवम् अपश्यत्? .... (समस्तम् १)

अनेकवक्त्रनयनं पुनश्च कीदृशं देवम् अपश्यत्? .... (समस्तम् २)

अनेकवक्त्रनयनम् अनेकाद्भुतदर्शनं पुनश्च कीदृशं देवम् अपश्यत्? .... (समस्तम् ३)

अनेकवक्त्रनयनम् अनेकाद्भुतदर्शनम् अनेकदिव्याभरणं पुनश्च कथम्भूतं देवमपश्यत्? .... (समस्तम् ४)

अनेकदिव्याभरणं दिव्यानेकोद्यतायुधं देवमपश्यत्।

पदार्थः

पदम्	संस्कृतम्	हिन्दी
अनेकवक्त्रनयनम्	अनेकमुखनेत्रम्	जिसके अनेकों मुख और आँखें हैं
अनेकाद्भुतदर्शनम्	नानाविस्मापन दृश्यम्	अनेक अचरज भरे रूपवाले
अनेकदिव्य-	अनेकालौकिक	जिनमें अनेकों
आभरणम्	भूषणम्	अलौकिक गहने हैं
दिव्यानेक	अलौकिक नाना-	जिसमें अलौकिक
उद्यतायुधम्	उच्छ्रितशस्त्रम्	अनेक शस्त्र उठाये हैं

भावार्थः

संस्कृतम्—अस्मिन् पद्ये सञ्जयः धृतराष्ट्राय श्रीकृष्णस्य विराड्रूपं वर्णयति—

हे राजन्! तदानीम् अर्जुनः अनेकानननेत्रं श्रीकृष्णं देवम् अद्राक्षीत्। कृष्णस्य अस्मिन् विराड्रूपे अनन्तानि मुखानि अक्षीणि च सन्ति। अपि च अस्मिन् रूपे विस्मापकानि अनन्तानि दर्शनानि दृश्यानि सन्ति। तथा च एतेषां रूपाणाम् अवयवेषु अनन्तानि अलौकिकानि आभूषणानि भूषितानि सन्ति। किञ्च एषां रूपाणां अनन्तेषु हस्तेषु अनन्तानि अलौकिकानि शस्त्रास्त्राणि उद्यतानि समुद्धृतानि सन्ति।

इत्थञ्च तद् विश्वरूपम् असंख्यमुखनेत्रसत्त्वाद् अद्भुतदर्शनम्, दिव्याभूषणधारितत्वाद् मनोहरम्, दिव्यायुधधारणाद् भयङ्करं चासीत्।

हिन्दी—उस समय संजय ने कृष्ण के जिस रूप का दर्शन किया था, राजा धृतराष्ट्र से उसका वर्णन कर रहे हैं—

हे राजन्! उस समय अर्जुन ने अनेक मुख और नेत्र से युक्त देव श्रीकृष्ण को देखा। श्रीकृष्ण के इस रूप में असंख्य मुख हैं और असंख्य आँखें है। इनके रूप में आश्चर्यकारी असंख्य दृश्य हैं। इन रूपों के प्रत्येक अवयवों में यथायोग्य अलौकिक गहने हैं तथा इनके असंख्य हाथों में अलौकिक असंख्य शस्त्रास्त्र धारण किये हुए हैं।

इस प्रकार श्रीकृष्ण का वह विराड् रूप असंख्य मुख और नेत्र वाला होने से अद्भुत दिखाई देता था। अवयवों में दिव्य आभूषण होने से सुन्दर लगता था तथा हाथों में असंख्य अलौकिक आयुध धारण से भयंकर भी था।

अवबोधाभ्यासः

अधस्तनान् प्रश्नान् उत्तरतु–

१. इह कः कं प्रति वर्णयति? ....

२. एतद् विश्वरू॰ कस्यास्ति? ....

३. असंख्यानि मुखानि समानि समानजातीनि विषमाणि वा? ....

४. तद् रूपम् अद्भुतदर्शनं कथम्? ....

५. दिव्याभरणानि कुत्र आसन्? ....

६. आयुधानि रूपस्य कस्मिन् भागे आसन्? ....

७. अद्भुतदृश्यमाश्रित्य पञ्चवाक्यानि लिखतु। ....

व्याकरणाभ्यासः

(अ) सन्धिः

१. अनेकाद्भुत – अनेक + अद्भुत – दीर्घसन्धिः

२. दिव्याभरणम् – दिव्य + आभरणम् – दीर्घसन्धिः

३. दिव्यानेक – दिव्य + अनेक – दीर्घसन्धिः

४. उद्यतायुधम् – उद्यत + आयुधम् – दीर्घसन्धिः

५. अनेकोद्यत – अनेक + उद्यत – गुणसन्धिः

अधः रेखाङ्कितेषु सन्धिं करोतु–

(i) देवर्षिः नारायण + आश्रमं गतः। ....

(ii) तव + अनुचरकिङ्करौ नौ अनुजानीहि। ....

(iii) दाम्ना च + उलूखले बद्धः। ....

(iv) बद्धो उलूखलम् आमन्त्र्य जग्मतुः। ....

(v) ऋषिणा करुण + आत्मना ज्ञातम्। ....

(vi) व्यक्त + अव्यक्तमिदं विश्वम्। ....

(vii) शिरसा + अखिललोकनाथं प्रणतवान्। ....

(viii) नमस्तुभ्यम् + भगवते। ....

(ix) यस्य + अवतारा ज्ञायन्ते। ....

(x) श्रवणौ कथायाम् + हस्तौ च कर्मसु भवेताम्। ....

(आ) समासः

१. अनेकवक्त्रनयनम् - वक्त्राणि च नयनानि च इति वक्त्रनयनम् - द्वन्द्वः

न एकम् इति अनेकम्, अनेकं वक्त्रनयनं यस्मिन् कृष्णे तम् - बहुव्रीहिः

२. अनेकाद्भुतदर्शनम् - अद्भुतानि च तानि दर्शनानि इति अद्भुतदर्शनानि - कर्मधारयः

अनेकानि अद्भुतदर्शनानि यस्मिन् कृष्णे तम् - बहुव्रीहिः

३. अनेकदिव्याभरणम् - दिव्यानि च तानि आभरणानि इति दिव्याभरणानि - कर्मधारयः

अनेकानि दिव्याभरणानि यस्य कृष्णस्य तम् - बहुव्रीहिः

४. दिव्यानेकोद्यतायुधम् - दिव्यानि च तानि अनेकानि च तानि उद्यतानि च इति दिव्यानेकोद्यतानि -कर्मधारयः दिव्यानेकोद्यतानि आयुधानि यस्मिन् यस्य वा तम् - बहुव्रीहिः

अधस्तनेषु विग्रहेषु समासं समस्तपदं च लिखतु–

(i) कृतः स्थानस्य विभागः यैः ते - ....

(ii) सम्भ्रान्ताः मीनाश्च मकराश्च यस्य तस्मात् - ....

(iii) तिमयश्च ग्राहाश्च तिमिङ्गिलाश्च आकुलाः यस्मिन् सः - ....

(iv) परिम्लाना मुखस्य श्रीः येषां ते - ....

(v) दुरन्तं बलं च वीर्यं च सायकश्च यस्य तम् - ....

(vi) सहस्राणि बाहवः यस्य तेन - ....

(vii) रक्ते नेत्रे यस्य सः - ....

(viii) श्वासस्य अग्नेः धूमेन आहतं वर्चः येषां ते - ....

(इ) कृत्प्रत्ययः

१. नयनम् - नीयतेऽनेन - नी + ल्युट् (अन) = नयन

२. दर्शनम्	–	दृश्यते यत्	– दृश् + ल्युट्	=	दर्शन
३. आभरणम्	–	आभ्रियते यत्	– आ + भृ + ल्युट्	=	आभरण
४. उद्यत	–		उद् + यम् + क्त	=	उद्यत
५. आयुधम्	–	आयुध्यतेऽनेन	– आ + युध् + क (अ)	=	आयुध
६. वक्त्र	–	वक्ति इति	– वच् + ष्ट्रन् (त्र)		

अधस्तनेभ्यः प्रकृतिप्रत्ययेभ्यः निष्पन्नं पदं वाक्ये व्यवहरतु–

(i) शी + ल्युट् – ....

(ii) भू + ल्युट् – ....

(iii) आ + वृ + ल्युट् – ....

(iv) नि + युज् + ल्युट् – ....

(v) उद् + भू + क्त – ....

(vi) सम् + भ्रम् + क्त – ....

(vii) अनु + सिव् + क्त – ....

(viii) कृश् + क – ....

(ix) गुड् + क – ....

(x) घुण् + क + टाप् – ....

(xi) तुद् + ष्ट्रन् – ....

(ई) क्रियाकारकसम्बन्धः

अपश्यत् – आक्षिप्ता कर्तरि क्रिया (उत्तरश्लोकात्)

पाण्डवः – आक्षिप्तः कर्ता (उत्तरश्लोकात्)

देवम् – कर्म आक्षिप्तम् (उत्तरश्लोकात्)

अनेकवक्त्रनयम् – कर्मविशेषणम्

अनेकाद्भुतदर्शनम् – कर्मविशेषणम्

अनेकदिव्याभरणम् - कर्मविशेषणम्

दिव्यानेकोद्यतायुधम् - कर्मविशेषणम्

(उ) पर्यायशब्दः

१. **वक्त्रम्** - १. मुखम् (अका. नपुं.), २. आननम् (अका. नपुं.), ३. वदनम् (अका. नपुं.), ४. आस्यम् (अका. नपुं.)

२. **आभरणम्** - १. आभूषणम् (अका. नपुं.), २. अलङ्कारः (अका. पुं.), ३. परिष्कारः (अका. नपुं.), ४. मण्डनम् (अका. नपुं.) ५. विभूषणम् (अका. नपुं.)

३. **आयुधम्** - १. प्रहरणम् (अका. नपुं.), २. शस्त्रम् (अका. नपुं.), ३. अस्त्रम् (अका. नपुं.)

४. **नयनम्** - १. नेत्रम् (अका. नपुं.), २. चक्षुः (चक्षुष् - षका. नपुं.), ३. अक्षि (इका. नपुं.), ४. दृष्टिः (इका. स्त्री.), ५. दर्शनम् (अका. नपुं.)

◆◆◆

७९. श्लोकः

दिव्यमाल्याम्बरधरं दिव्यगन्धानुलेपनम्।
सर्वाश्चर्यमयं देवमनन्तं विश्वतोमुखम्।।(भ. गी. ११.११)

पदच्छेदः

दिव्य-माल+अम्बर-धरम्, दिव्य-गन्ध+अनुलेपनम्।
सर्व+आश्चर्यमयम्, देवम्, अनन्तम्, विश्वतः-मुखम्।।

पदच्छेदाभ्यासः

अधस्तनानि पदानि छिनत्तु–

(i) माल्याम्बर – ....

(ii) दिव्यमाल्याम्बरधरम् – ....

(iii) गन्धानुलेपनम् – ....

(iv) दिव्यगन्धानुलेपनम् – ....

(v) सर्वाश्चर्यमयम् – ....

(vi) सर्वाश्चर्यमयं देवम् – ....

(vii) विश्वतोमुखम् – ....

(viii) अनन्तं विश्वतो मुखम्– ....

(ix) धरं दिव्य – ....

पदपरिचयः

पदम्	विश्लेषणम्
दिव्यमाल्याम्बरधरम्	अका. पुं. द्विती. एक. समस्तं विशेषणम् १
दिव्यगन्धानुलेपनम्	अका. पुं. द्विती. एक. समस्तं विशेषणम् २
सर्वाश्चर्यमयम्	अका. पुं. द्विती. एक. समस्तं विशेषणम् ३
विश्वतोमुखम्	अका. पुं. द्विती. एक. समस्तं विशेषणम् ४
अनन्तम्	अका. पुं. द्विती. एक. समस्तं विशेषणम् ५
देवम्	अका. पुं. द्विती. एक. समस्तं विशेष्यम्

वर्गीकरणाभ्यासः

अधस्तनेषु वर्गेषु श्लोकपदानि विभज्य लिखतु–

(i) द्वितीयान्तम् (६) ....

(ii) अकारान्तम् (६) ....

(iii) पुंलिङ्गम् (६) ....

(iv) विशेषणम् (५) ....

(v) समस्तम् (५) ....

(vi) प्रथमे समस्तपदे पदानि (४) ....

(vii) द्वितीये समस्तपदे पदानि (३) ....

(viii) तृतीये समस्तपदे पदे (२) ....

(ix) चतुर्थे समस्तपदे पदे (२) ....

(x) पञ्चमे समस्तपदे पदे (२) ....

(xi) विशेष्येण सह विशेषणानि लिखतु।

आकाङ्क्षाविस्तरः

अपश्यत् (= अद्राक्षीत् इति कर्तरि आक्षिप्ता क्रिया त्रयोदशश्लोकात्)।

कः अपश्यत्? (पाण्डवः इति कर्तापि आक्षिप्तः तत एव।)

पाण्डवः कम् अपश्यत्? .... (विशेष्यम्)

पाण्डवः कीदृशं देवम् अपश्यत्? .... (विशेषणम् १)

दिव्यमाल्याम्बरधरं पुनः कीदृशम् देवम्? .... (विशेषणम् २)

दिव्यमाल्याम्बरधरं दिव्यगन्धानुलेपनं पुनः कीदृशम् देवम्? .... (विशेषणम् ३)

दिव्यमाल्याम्बरधरं दिव्यगन्धानुलेपनं सर्वाश्चर्यमयं पुनः कीदृशम् देवम्? .... (विशेषणम् ४)

दिव्यमाल्याम्बरधरं दिव्यगन्धानुलेपनं सर्वाश्चर्यमयं विश्वतोमुखं पुनः कथम्भूतं देवम्? .... (विशेषणम् ५)

पाण्डवः दिव्यमाल्याम्बरधरं दिव्यगन्धानुलेपनं सर्वाश्चर्यमयं विश्वतोमुखम् अनन्तं देवम् अपश्यत्।

पदार्थः

पदम्	संस्कृतम्	हिन्दी
(पाण्डवः)	(अर्जुनः)	(अर्जुन ने)
दिव्यमाल्याम्बर-धरम्	अलौकिकमालावस्त्र-धारिणम्	दिव्य मालायें और वस्त्र धारण किये हुए
दिव्यगन्धानुलेपनम्	दिव्यसुगन्धाङ्गरागम्	अलौकिक सुगन्धकारी अनुलेप किए हुए
सर्वाश्चर्यमयम्	सकलाद्भुतपूर्णम्	सब कुछ अचरज भरा
विश्वतोमुखम्	सर्वतोमुखम्	सब ओर मुँह किए हुए
अनन्तम्	निःसीमम्	अन्त हीन
देवम्	तेजोमयं श्रीकृष्णम्	तेजःस्वरूप कृष्ण को
(अपश्यत्)	(ददर्श)	(देखा)

भावार्थः

संस्कृतम्—सञ्जयः विराड्रूपं भगवन्तं श्रीकृष्णं यथादृष्टं धृतराष्ट्राय पुनः विशिनष्टि—

हे राजन्! तदानीम् अर्जुनः प्रकाशस्वरूपं द्योतमानं श्रीकृष्णम् अपश्यत्। यस्य विश्वरूपधारिणः श्रीकृष्णस्य रूपाणां काचित् सीमैव न दृष्टा। यत्र-यत्र दृष्टिः प्रसरति, ततोऽतिक्रम्यैव तस्य रूपाणि वर्तन्ते, अतः तद्विश्वरूपेषु मुखानि सर्वासु दिशासु (दिक्षु) आसन्। अतः तद् विराड्रूपं सर्वतोमुखमासीत्। सर्वेषां रूपाणाम् अवयवेषु यथायोगं दिव्यपुष्पनिर्मितानि दिव्यरत्नगुम्फितानि च माल्यानि दिव्यवस्त्राणि च धृतानि आसन्। अथ च दिव्यसुगन्धप्रदम् अनुलेपनम् अङ्गेषु अनुलिप्तमासीत्। किमधिकम्, तद् विश्वरूपम्, तत्र दृश्यमानं सर्वमपि वस्तुजातं च आश्चर्यप्रचुरम् आसीत् - यतोहि सर्वं तद् अदृष्टपूर्वं दिव्यं चासीत्।

हिन्दी—संजय धृतराष्ट्र से विराड् रूप श्रीकृष्ण के अन्य विशेषणों का वर्णन कर रहे हैं—

हे राजन्! उस समय अर्जुन ने देखा कि श्रीकृष्ण देदीप्यमान हो रहे हैं। उनके रूपों की कोई सीमा नहीं है, दृष्टि से परे भी उनके रूप हैं, अनन्त हैं। सभी रूपों के मुख चारों दिशाओं में हैं। उन रूपों के अवयवों में यथायोग्य दिव्य पुष्पों और दिव्य रत्नों की मालाएँ तथा दिव्य वस्त्र धारण किये हुए हैं। सभी अवयवों में दिव्य सुगन्ध विखेर रहा अनुलेप लगा हुआ है। श्रीकृष्ण का वह विराड् रूप तथा उस रूप के सभी अवयव अथवा माल्यादि सारी वस्तुएँ आश्चर्य से परिपूर्ण

हैं, क्योंकि वे सभी अदृष्टपूर्व और दिव्य थी।

अवबोधाभ्यासः

अधस्तनान् प्रश्नान् उत्तरतु–

१. इह श्लोके कस्य वर्णनम्? ....

२. रूपाणां कस्मिन् अङ्गे माल्यानि सन्ति? ....

३. 'विश्वतोमुखम्' इत्यस्य कोऽभिप्रायः? ....

४. सर्वम् अद्भुतं कथम् आसीत्? ....

५. अनुलेपनं कुत्र कृतम्? ....

६. कस्यां क्रियायामिह अन्वयः? ....

७. 'अपश्यत्' क्रियायाः कश्च कर्ता? ....

व्याकरणाभ्यासः

(अ) सन्धिः

१. माल्याम्बर – माल्य + अम्बर – दीर्घसन्धिः

२. गन्धानुलेपनम् – गन्ध + अनुलेपनम् – दीर्घसन्धिः

३. सर्वाश्चर्यमयम् – सर्व + आश्चर्यमयम् – दीर्घसन्धिः

४. विश्वतोमुखम् – विश्वतः + मुखम् – विसर्गसन्धिः

५. अनन्तं विश्वतः – अनन्तम् + विश्वतः – अनुस्वारसन्धिः

६. आश्चर्यमयं देवम् – आश्यर्चमयम् + देवम्– अनुस्वारसन्धिः

७. धरं दिव्य – धरम् + दिव्य – अनुस्वारसन्धिः

अधस्तनेषु रेखाङ्कितेषु सन्धिच्छेदं करोतु–

(i) दिव्यं ददामि ते चक्षुः। ....

(ii) स्थिरो भव। ....

(iii) न प्रकृतेन चक्षुषा निरीक्षितुं क्षमम्। ....

(iv) यमलार्जुनौ भूम्यां निपतितौ ददृशुः। ....

(v) नन्दः प्रहसद्वदनो विमुमोच। ....

(vi) प्रातरेव कृताहारः तद्भवान् भोक्तुमर्हति। ....

(vii) याने धूलिधूसरिताङ्गने भवान्। ....

(viii) तं वीक्ष्य विस्मिताः बालाः। ....

(ix) कश्चित् शृगालो नगराभ्याशम् आगमत्। ....

(x) कुक्कुरैर्भीतो नीलीभाण्डेऽपतत्। ....

(आ) समासः

१. दिव्यमाल्याम्बरधरम् – माल्यानि च अम्बराणि च इति माल्याम्बराणि = द्वन्द्वः

दिव्यानि च तानि माल्याम्बराणि इति दिव्यमाल्याम्बराणि – कर्मधारयः

दिव्यमाल्याम्बराणि धरति इति तम् – उपपदसमासः

दिव्यमाल्याम्बर धृ + अच् = दिव्यमाल्याम्बरधर

२. दिव्यगन्धानुलेपनम् – दिव्यश्चासौ गन्धश्च इति दिव्यगन्धः – कर्मधारयः

दिव्यगन्धः अनुलेपनं यस्य यस्मिन् वा तम् – बहुव्रीहिः

३. सर्वाश्चर्यमयम् – सर्वम् आश्चर्यमयं यस्मिन् तम् – बहुव्रीहिः

४. विश्वतोमुखम् – विश्वतो मुखानि यस्य तम् – बहुव्रीहिः

५. अनन्तम् – न विद्यमानः इति अविद्यमानः – नञ्तत्पुरुषः

अविद्यमानः अन्तः यस्य तम् – बहुव्रीहिः

अधस्तनेषु विग्रहेषु समासं करोतु–

(i) महार्हाणि रत्नानि आसनानि च धरतीति – ....

(ii) अलौकिकः अङ्गरागः मण्डनं यस्य तेन – ....

(iii) सुरलोके वसन्तीति – ....

(iv) उत्कलितः अङ्घ्र्योः बन्धः यस्य तम् – ....

(v) कृतः चण्डः शब्दः याभ्यां तौ – ....

(vi) अविद्यमानानि पुष्पाणि यस्मिन् तत् – ....

(vii) फलम् आकाङ्क्षन्ति इति - ....

(viii) विस्रंसितं केशस्य बन्धनं यस्य सः - ....

(ix) चौर्येण विशङ्किते ईक्षणे यस्य तम् - ....

(x) अद्भुतेन दर्शनेन आकुलाः इति - ....

(इ) तद्धितप्रत्ययः

१. दिव्य - दिवि भवम् - दिव् + यत् (य)

२. आश्चर्यमयम् - आश्चर्यप्रचुरम् इति - आश्चर्य + मयट् (मय)

३. विश्वतः - विश्वस्मिन् इति - विश्व + तस् =

अधस्तनेषु रेखाङ्कितेषु प्रकृति-प्रत्ययं विभजत–

(i) राजगृहे सुवर्णमयं पात्रं विलोकितम्। ....

(ii) दुग्धमयेन आहारेण दिनं वर्तितम्। ....

(iii) सर्वतोभावेन परिचरति स्वामिनम्। ....

(iv) उभयतः पाशारज्जुः समापतिता। ....

(v) देवेभ्यो हव्यं रोचते। ....

(vi) मात्रे गव्यमानीयम्। ....

(vii) पुस्तकमयं शयनं हरेः। ....

(ई) कृत्प्रत्ययः

१. धरम् - धरतीति - धृ + अच् = धर

२. अनुलेपनम् - अनुलिप्यतेऽनेनेति - अनु + लिप् + ल्युट् =अनुलेपन

अधस्तनेभ्यः प्रकृतिप्रत्ययेभ्यः निष्पन्नं रूपं वाक्ये प्रयुङ्क्त्म्–

(i) द्रुह् + अच् - ....

(ii) रुध् + अच् - ....

(iii) शुध् + अच् - ....

(iv) क्रुध् + अच् - ....

(v) मुह् + अच् – ....

(vi) चन्द् + ल्युट् – ....

(vii) नन्द् + ल्युट् – ....

(viii) वि + लिप् + ल्युट् – ....

(ix) भ्रंश् + ल्युट् – ....

(x) बन्ध् + ल्युट् – ....

(उ) क्रियाकारकसम्बन्धः

अपश्यत् – क्रिया (उत्तरश्लोकाद् आक्षिप्ता)

पाण्डवः – कर्ता (उत्तरश्लोकाद् आक्षिप्तः)

देवम् – कर्म

दिव्यमाल्याम्बरधरम् – कर्मविशेषणम्

दिव्यगन्धानुलेपनम् – कर्मविशेषणम्

सर्वाश्चर्यमयम् – कर्मविशेषणम्

विश्वतोमुखम् – कर्मविशेषणम्

अनन्तम् – कर्मविशेषणम्

(ऊ) पर्यायशब्दः

१. माल्यम् – १. माला (आका. स्त्री.), २. हारः (अका. पुं.), ३. स्रक् (स्रज् जका. स्त्री.)

२. अम्बरम् – १. वस्त्रम् (अका. नपुं.), २. पटः (अका. पुं.), ३. वासः (वासस् सका. नपुं.), ४. कर्पटम् (अका. नपुं.)

३. गन्धः – १. सुगन्धः (अका. पुं.), २. सुवासः (अका. पुं.), ३. वर्णकम् (अका. नपुं.), ४. वर्तिः (इका. स्त्री.)

४. आश्चर्यम् – १. अद्भुतम् (अका. नपुं.), कौतुकम् (अका. नपुं.), ३. चमत्कारः (अका. नपुं.)

◆◆◆

८०. श्लोकः

दिवि सूर्यसहस्रस्य भवेद्युगपदुत्थिता।
यदि भाः सदृशी सा स्याद्भासस्तस्य महात्मनः।। (भ. गी. ११.१२)

पदच्छेदः

दिवि, सूर्य-सहस्रस्य, भवेत्, युगपद्, उत्थिता।
यदि, भाः, सदृशी, सा, स्यात्, भासः, तस्य, महात्मनः।।

पदच्छेदाभ्यासः

अधस्तनानि पदानि विच्छिनत्तु–

(i) भवेद्युगपद् – ....

(ii) युगपदुत्थिता – ....

(iii) स्याद्भासः – ....

(iv) भासस्तस्य – ....

पदपरिचयः

दिवि	–	दिव् - नका. स्त्री. सप्त. एक.
सूर्यसहस्रस्य	–	सूर्यसहस्र - अका. नपुं. षष्ठी एक. समस्तम्
भवेत्	–	भू + विधिलिङ् प्रपु. एक. भ्वादि कर्तरि अकर्मक.
युगपद्	–	अव्ययम्
उत्थिता	–	आका. स्त्री. प्र. एक. क्तान्तं विशेषणम्
यदि	–	अव्ययम्
भाः	–	भास् - सका. स्त्री. प्र. एक. विशेष्यम्
सदृशी	–	ईका. स्त्री. प्र. एक. विशेषणम्
सा	-	तद् - दका. स्त्री. प्र. एक. सर्व. विशेषणम्
स्यात्	–	अस् + विधिलिङ् प्रपु. एक. वदादि. कर्तरि अक.
भासः	–	भास् - सका. स्त्री. षष्ठी एक.
तस्य	–	तद् - दका. पुं. षष्ठी एक. सर्व. पूर्वपरामर्शकम् विशेष्यम्
महात्मनः	–	महात्मन् - नका. पुं. ष. एक. समस्तं विशेषणम्

वर्गीकरणाभ्यासः

अधस्तनेषु वर्गेषु श्लोकपदानि विभजतु–

(i) प्रथमान्तम् ४..

(ii) षष्ठ्यन्तम् ४..

(iii) सप्तम्यन्तम् १..

(iv) पुंलिङ्गम् २..

(v) स्त्रीलिङ्गम् ६..

(vi) नपुंसकम् १..

(vii) अकारान्तम् १..

(viii) आकारान्तम् १..

(ix) ईकारान्तम् १..

(x) वकारान्तम् १..

(xi) सकारान्तम् १..

(xii) नकारान्तम् १..

(xiii) सर्वनाम २..

(xiv) अव्ययम् २..

(xv) क्रियापदम् २..

(xvi) विशेष्यम् २..

(xvii) विशेषणम ४..

(xviii) विशेषणानि विशेष्येण सह योजनीयानि।

आकाङ्क्षाविस्तरः

भवेत् (= स्यात्)।

का भवेत्? ....(सका. प्र.)

कस्य भाः भवेत्? ....(अका. ष.)

सूर्यसहस्रस्य भाः कथम्भूता भवेत्? .... (आका. प्र. + अव्ययम्)

सूर्यसहस्रस्य भाः यदि युगपद् उत्थिता कुत्र भवेत्? .... (नका. सप्त)

सूर्यसहस्रस्य भाः यदि दिवि युगपद् उत्थिता भवेत्। तदा किं स्यात्?

सा स्यात्।

सा कीदृशी स्यात्? .... (ईका. प्र.)

सा कस्याः सदृशी स्यात्? .... (सका. ष.)

सा कस्य भासः सदृशी स्यात्? .... (सर्व. ष.)

सा तस्य कथम्भूतस्य भासः सदृशी स्यात्? .... (नका. ष.)

सा महात्मनः तस्य भासः सदृशी स्यात्।

पदार्थः

पदम्	संस्कृतम्	हिन्दी
दिवि	अन्तरिक्षे	आकाश में
सूर्यसहस्रस्य	असंख्यसूर्यसमूहस्य	हजारों सूर्य की
भाः	प्रभाः	प्रभा
यदि	चेत्	यदि
युगपद्	(सहैव) एकपदे	एक साथ
उत्थिता	उद्गता	प्रकाशित
भवेत्	सम्भवेत्	हो
(तर्हि) सा	(तदा) सा	(तो) वह
महात्मनः	विराड्रूपस्य	विराड् रूप
तस्य	श्रीकृष्णस्य	उन श्रीकृष्ण की
भासः	दीप्तेः	प्रभा के
सदृशी	तुल्या	समान
स्यात्	कथञ्चिद् भवेत्	शायद हो

भावार्थः

संस्कृतम्–अस्मिन् श्लोके विराड्रूपस्य भगवतः श्रीकृष्णस्य प्रभाया निरुपमत्वं निरूप्यते–

हे राजन्! यदि आकाशे समुदितस्य अपरिमितसूर्यसमूहस्य प्रकाशः एकस्मिन्नेव काले समुद्भासितः स्यात्, तदा तेनापि प्रकाशेन विश्वरूपस्य तस्य श्रीकृष्णस्य प्रभायाः सादृश्यं भवेत् इत्यत्र संशय एवास्ति। यथा आकाशे समुदितेष्वपि असंख्येषु तारामण्डलेषु तेषां प्रकाशः एकस्यैव सूर्यप्रकाशस्य सदृशो न भवति, तथैव असंख्यसूर्यप्रकाशः विश्वरूपस्य प्रकाशे तारायते। विराड्रूपस्य दीप्तेः सदृशी असंख्यसूर्यदीप्तिः नास्तीत्यर्थः। विश्वरूपस्य प्रभा ततोऽतिरिच्यते इत्याशयः। इह उभयोः 'भवेत् स्यात्' इति क्रियापदयोः लिङ्-प्रयोगेण साम्ये सम्भावना सन्देहः दर्शितः।

हिन्दी–यहाँ विराड्रूप परमदेव श्रीकृष्ण की प्रभा का वर्णन करते हुए संजय ने उसे निरूपम बताया है–

हे राजन्! आकाश में यदि अपरिमित सूर्यसमूह एक-साथ उदित हो जाय और उस समय उसका जो प्रकाश होगा, वह प्रकाश विश्वरूप उस परमदेव के प्रकाश के समान हो अथवा न हो यह सम्भावना बनी हुई है । अर्थात् अनन्त सूर्य समूह के प्रकाश की अपेक्षा विश्वरूप श्रीकृष्ण का प्रकाश उससे बढ़कर अलग प्रतीत होगा। जैसे आकाश में हजारों तारे एक साथ उदय होकर भी एक सूर्य के प्रकाश की समानता नहीं करते, अपितु सूर्य के प्रकाश में वे तिरोहित हो जाते हैं। वैसे ही विराड्रूप के प्रकाश के सामने असंख्य सूर्य का प्रकाश अभिभूत हो जायेगा। असंख्य सूर्य की प्रभा, विराड्रूप की प्रभा के समान नहीं हो सकती है। यहाँ दोनों क्रियापदों में लिङ् लकार के प्रयोग से समानता में सम्भावना संशय का बोध होता है।

अवबोधाभ्यासः

अधस्तनान् प्रश्नान् उत्तरतु–

१. इह श्लोके सञ्जयः किं वर्णितवान्? ....

२. इह कयोः प्रकाशयोः साम्यं दर्शितम्? ....

३. द्वयोः प्रकाशयोः साम्ये संशयः केन पदेन बोध्यते? ....

४. इह दृष्टान्ते कयोः प्रकाशयोः चर्चा कृता? ....

५. प्रकाशेन प्रकाशस्य तिरोभावे अन्यद् उदाहरणं दीयताम्? ....

६. उदाहरणेन प्रकाशसाम्ये किं निश्चीयते? ....

व्याकरणाभ्यासः

(अ) सन्धिः

१. भवेद्युगपद् – भवेत् + युगपद् – जश्त्वसन्धिः

२. युगपदुत्थिता - युगपत् + उत्थिता- जश्त्वसन्धिः

३. स्याद्भासः - स्यात् + भासः - जश्त्वसन्धिः

४. भासस्तस्य - भासः + तस्य - श्चुत्वसन्धिः

अधस्तनेषु रेखाङ्कितेषु सन्धिं छिनत्तु–

(i) श्रुत्वा तद् विस्मिता गोपाः। ....

(ii) क्वचिद् वनाशाय मनोऽधात्। ....

(iii) विचेरुस्तत्र तत्र ह। ....

(iv) बकस्तुण्डेन हन्तुं पुनरभ्यपद्यत। ....

(v) प्राहिणोद् गतजीवितम्। ....

(vi) ग्रामवासिनस्तद् आदाय गतवन्तः। ....

(vii) यद् यदाचरते श्रेष्ठः। ....

(viii) लोकस्तदनुवर्तते। ....

(आ) समासः

१. सूर्यसहस्रस्य - सूर्याणां सहस्रं तस्य - षष्ठीतत्पुरुषः

२. महात्मनः - महान् आत्मा यस्य तस्य - बहुव्रीहिः

अधस्तनेषु विग्रहेषु समासं करोतु–

(i) राज्ञां सहस्रेण इति - ....

(ii) पुण्यानां पुञ्जः इति - ....

(iii) कृतः पुण्यपुञ्ज येन स - ....

(iv) दृशः विषयः इति - ....

(v) गोपालस्य सुताः इति - ....

(vi) कृष्णरामयोः कथामिति - ....

(vii) पीतम् अमृतं यैः इति - ....

(viii) व्यात्तं गुहा इव आननं येन तम् - ....

(ix) गिरिशृङ्गाणि इव दंष्ट्रा यस्य सः - ....

(x) विततावध्वा इव जिह्वा यस्य तम् – ....

(इ) कृत्प्रत्ययः

१. उत्थिता – उद् + स्था + क्त – टाप्

२. भाः – भासते इति – भास् + क्विप् = भास्

अधस्तनेभ्यः प्रकृति-प्रत्ययेभ्यः निष्पन्नं पदं वाक्ये व्यवहरतु–

(i) सम् + पद + क्त – ....

(ii) सु + पच् + क्त – ....

(iii) प्र + भुज् + क्त – ....

(iv) परि + बृंह् + क्त – ....

(v) परि + म्लै + क्त – ....

(vi) प्रसूयते इति प्र + सू + क्विप् – ....

(vii) जलं मुञ्चति इति जल + मुच् + क्विप् – ....

(viii) वने रोहन्ते इति वन + रुह् + क्विप् – ....

(ई) क्रियाकारकसम्बन्धः

भवेत् – कर्तरि अकर्म. क्रिया

भाः – कर्ता

दिवि – अधिकरणम्

यदि – क्रियाविशेषणम्

युगपत् – क्रियाविशेषणम्

उत्थिता – कर्तृविशेषणम्

सूर्यसहस्रस्य – सम्बन्धषष्ठी

स्यात् – कर्तरि अकर्म. क्रिया

सा – कर्ता

सदृशी – कर्तृविशेषणम्

भासः – उपमानषष्ठी

तस्य – सम्बन्धषष्ठी

महात्मनः – सम्बन्धविशेषणम्

(उ) अलङ्कारः

लोके सूर्यसहस्रस्य प्रकाशः अविद्यमानः। अविद्यमानस्य तस्य प्रकाशस्य उपमानरूपेण अध्यवसायात् अभूतोपमारूपा अतिशयोक्तिरियम्। अयम् अतिशयोक्त्यलङ्कारः उत्प्रेक्षां व्यञ्जयन् उपमेयस्य विश्वरूपप्रकाशस्य निरुपमत्वं द्योतयति। यथा–उभौ यदि व्योम्नि पृथक्-प्रवाहौ आकाशगङ्गापयसः पतेताम्। (शिशुपालवधम् ३/८) इत्यत्रापि आकाशगङ्गायाः पृथक् प्रवाह द्वयोपमानस्य असम्भवात् अतिशयोक्तिः अलङ्कारः। तेन श्रीकृष्णस्य आमुक्तमुक्तालतवक्षसः निरुपमत्वं द्योतितम्।

◆◆◆

८१. श्लोकः

तत्रैकस्थं जगत्कृत्स्नं प्रविभक्तमनेकधा।
अपश्यद् देवदेवस्य शरीरे पाण्डवस्तदा।। (भ. गी. ११.१३)

पदच्छेदः

तत्र, एकस्थम्, जगत्, कृत्स्नम्, प्रविभक्तम्, अनेकधा।

अपश्यत्, देव-देवस्य, शरीरे, पाण्डवः, तदा।।

पदच्छेदाभ्यासः

अधस्तनानि पदानि छिनत्तु–

(i) तत्रैकस्थम् – ....

(ii) कृत्स्नं प्रविभक्तम्– ....

(iii) देवदेवस्य – ....

(iv) पाण्डवस्तदा – ....

(v) अपश्यद्देवदेवस्य – ....

पदपरिचयः

पदम्	विश्लेषणम्	पदम्	विश्लेषणम्
तत्र	त्रलन्तमव्ययम् विशेषणम्	अपश्यत्	दृश्+लङ् प्रपु.एक.भ्वादि.सकर्म.परस्मै. कर्तरि क्रिया.
एकस्थम्	एकस्थ–अका.नपुं.द्वि.एक.समस्तं विशेषणम् १	देवदेवस्य	देवदेव–अका.पुं.ष.एक.समस्तम्
जगत्	जगत्–तका.नपुं.द्वि.एक.विशेष्यम्	शरीरे	शरीर अका.नपुं.सप्त.एक.
कृत्स्नम्	कृत्स्न–अका.नपुं.द्वि.एक.विशेषणम् २	पाण्डवः	पाण्डव–अका.पुं.प्र.एक.तद्धितान्तम्
प्रविभक्तम्	प्रविभक्त–अका.नपुं.द्वि.एक.क्तान्तं विशेषणम् ३	तदा	अव्ययम्
अनेकधा	अव्ययम्, समस्तं तद्धितान्तम्		

वर्गीकरणाभ्यासः

अधस्तनेषु वर्गेषु श्लोकपदानि विभजतु–

(i) प्रथमान्तम् (१) ....

(ii) द्वितीयान्तम् (४) ....

(iii) षष्ठ्यन्तम् (१) ....

(iv) सप्तम्यन्तम् (१) ....

(v) अकारान्तम् (६) ....

(vi) तकारान्तम् (१) ....

(vii) पुंलिङ्गम् (२) ....

(viii) नपुंसकम् (५) ....

(ix) समस्तम् (३) ....

(x) तद्धितान्तम् (४) ....

(xi) क्रियापदम् (१) ....

(xii) अव्ययम् (३) ....

(xiii) विशेष्यम् (१) ....

(xiv) विशेषणम् (३) ....

आकाङ्क्षाविस्तरः

अपश्यत् (= दृष्टवान्)।

कः अपश्यत्? .... (अका. प्र.)

पाण्डवः कुत्र अपश्यत्? .... (त्रलन्तम्)

पाण्डवः तत्र किम् अपश्यत्? .... (तका. द्वि.)

तत्र पाण्डवः कीदृशं जगत् अपश्यत्? .... (विशेषणम् २)

तत्र पाण्डवः कृत्स्नं पुनश्च कीदृशं जगत् अपश्यत्? .... (विशेषणम् १)

तत्र पाण्डवः एकस्थं कृत्स्नं पुनश्च जगत् अपश्यत्? .... (विशेषणम् ३)

तत्र पाण्डवः एकस्थं कृत्स्नं कतिधा प्रविभक्तं जगत् अपश्यत्? .... (तद्धितान्तमव्ययम् समस्तम्)

पाण्डवः तत्र कुत्र अपश्यत्? .... (अका. सप्त.)

पाण्डवः तत्र कस्य शरीरे अपश्यत्? .... (अका. ष.)

पाण्डवः तत्र देवदेवस्य शरीरे एकस्थं .... (तद्धितान्तमव्ययम्)
कृत्स्नम् अनेकधा प्रविभक्तं जगत् कदा अपश्यत्?

तदा पाण्डवः तत्र देवदेवस्य शरीरे एकस्थम् अनेकधा प्रविभक्तं कृत्स्नं जगत् अनेकधा अपश्यत्, इत्यन्वयः।

पदार्थः

पदम्	संस्कृतम्	हिन्दी
पाण्डवः	पाण्डुपुत्रः	पाण्डुनन्दन अर्जुन ने
देवदेवस्य	देवाधिदेवस्य श्रीकृष्णस्य	देवों के देव श्रीकृष्ण के
तत्र	तस्मिन्	उस
शरीरे	विश्वरूपदेहे	विराड् रूप में
अनेकधा	अनेक प्रकारेण	अनेकों तरह
प्रविभक्तम्	पृथक्-पृथक् स्थितम्	विभक्त
कृत्स्नम्	सम्पूर्णम्	समस्त
जगत्	संसारम्	संसार को
तदा	तदानीं	उस समय
एकस्थम्	एकस्मिन् विराड्रूपे स्थितम्	एक जगह
अपश्यत्	अद्राक्षीत्	देखा

भावार्थः

संस्कृतम्–दिव्यप्रकाशमये भगवतः विराड्रूपे अर्जुनः कीदृशं जगद् अपश्यत् इति सञ्जयो वर्णयति–

हे राजन्! यदा दिव्यदृष्टिं लब्धवान् अर्जुनः तदा स देवाधिदेवस्य श्रीकृष्णस्य तस्मिन् विराट्स्वरूपे अखिलं जगत् विश्वरूपस्य एकत्रावयवे स्थितम् अपश्यत्। तच्च निखिलं जगत् तत्र देवपितृमनुष्यादिभेदेन पृथक्-पृथक् विभक्तम् अवालोकयत्। किञ्च तस्मिन् विराड्रूपे केवलो देवादिरूपो भोक्तृवर्ग एव न, अपितु तत्र पृथिव्यन्तरिक्षस्वर्गादीनि भोग्यस्थानानि भोग्यवस्तून्यपि विराड्रूपस्य एकस्मिन् अवयवे अवस्थितानि अपश्यत्। अत एव पूर्वस्मिन् अध्यायान्ते भगवताऽज्ञप्तम्–'इहैकस्थं जगत् कृत्स्नं पश्याद्य सचराचरम्' इति। अर्जुनः तदेव भोक्तृभोग्यभोग्यस्थानेन स्पष्टं विभक्तं निखिलकोटिब्रह्माण्डं विराड्रूपस्य एकपादे स्थितं दृष्टवान्।

'पाण्डवः' इति पदेन पाण्डुपुत्रस्य अर्जुनस्य भगवद्दर्शनेन पाण्डोः सौभाग्यातिशयत्वं सूचितम्, न तु धृतराष्ट्रस्य; दुयोधनस्य तथा दर्शनाभावात्।

हिन्दी–भगवान् के उस प्रकाशमय अद्भुत विराड् रूप में अर्जुन ने सारा संसार किस प्रकार देखा? संजय उसका वर्णन कर रहे हैं–

हे राजन्! जब भगवान् ने अर्जुन को दिव्य दृष्टि दी तब उस समय अर्जुन ने देवों के देव श्रीकृष्ण के उस विराड् रूप में सम्पूर्ण ब्रह्माण्ड को एक भाग में अवस्थित देखा। उसमें जगत् अलग-अलग बँटा हुआ दिखलाई दे रहा था। एक तरफ जहाँ देव, पितृ और मनुष्यादि भोक्ता वर्ग दृष्टिगत हो रहा था तो दूसरे तरफ पृथिवी, अन्तरिक्ष और स्वर्गादि भोग्य स्थान और भोग्य सामग्रियाँ भी विद्यमान थीं। इस प्रकार सम्पूर्ण भोक्ता, भोग्य और भोग्यस्थान भगवान् के उस विराट् स्वरूप के एक-पाद में समाविष्ट थे।

इसके पूर्व दसवें अध्याय में भगवान् ने अर्जुन को कहा था कि तुम सम्पूर्ण सचराचर जगत् को मेरे एक भाग में स्थित देख–'इहैकस्थं जगत् कृत्स्नं पश्याद्य सचराचरम्'। यहाँ भगवान् ने अर्जुन को विराड् रूप में अखिल कोटि ब्रह्माण्ड को एक पाद में समाविष्ट प्रत्यक्ष दिखला दिया।

यहाँ 'पाण्डवः' पद के प्रयोग से अर्जुन जैसा भक्त पुत्र के कारण पाण्डु को सौभाग्यशाली और दुर्योधन के कारण धृतराष्ट्र को उससे हीन बताने का भाव संकेतित होता है।

अवबोधाभ्यासः

अधस्तनान् प्रश्नान् उत्तरतु–

१. इह श्लोके किं वर्णितम्? ....

२. जगतः इह कतिधा मुख्यो विभागः दर्शितः? ....

३. एकस्थमित्यस्य कोऽभिप्रायः? ....

४. पूर्वस्मिन् कस्मिन् अध्याये एकस्थं जगत् द्रष्टुम् आज्ञप्तम्? ....

५. इह पाण्डवपदेन किं व्यञ्जितम्? ....

६. विश्वरूप श्रीकृष्णः कथं देवदेवः? ....

७. जगत्पदमिह मर्त्यलोकस्य वाचकः उत ब्रह्माण्डस्य? ....

व्याकरणाभ्यासः

(अ) सन्धिः

१. तत्रैकस्थम् – तत्र + एकस्थम् – वृद्धिसन्धिः

२. अपश्यद्देवदेवस्य - अपश्यत् + देवदेवस्य - जश्त्वम्

३. पाण्डवस्तदा - पाण्डव: + तदा - श्चुत्वसन्धि:

४. कृत्स्नं प्रविभक्तम् - कृत्स्नम् + प्रविभक्तम् - अनुस्वारसन्धि:

५. एकस्थं जगत् - एकस्थम् + जगत् - अनुस्वारसन्धि:

अधस्तनेषु रेखाङ्कितेषु सन्धिं छिनत्तु–

(i) तत्र गत्वौदनं यूयं याचत। ....

(ii) ते भगवद्वाच्ञां न शुश्रुवु:। ....

(iii) ते तद्द्रव्यं पृथगानयन्ति। ....

(iv) राजपुरुषैस्तदा चैवापहृतानि आनीतानि। ....

(v) गौपैस्सह तद्वनं गतवान्। ....

(vi) अजायतैतस्मिन् नगरे सा क्रीडा। ....

(vii) शिक्षकस्ता: बालिका: उक्तवान् ....

(viii) बालस्तल्पे शेते। ....

(ix) ध्यायन्त्यस्तत्पदाम्भोजं प्रतिनिवृत्ता:। ....

(आ) समास:

१. देवदेवस्य - देवानां देवस्य - षष्ठीतत्पुरुष:

२. अनेकम् - न् एकम् - नञ्तत्पुरुष:

३. एकस्थम् - एकस्मिन् तिष्ठतीति - एक + स्थ - एकस्थम् - उपपदसमास:

अधस्तनेषु रेखाङ्कितेषु विग्रहं समासं च करोतु–

(i) स्ववासांसि प्रतीच्छन्तु। ....

(ii) पादस्पर्शाय आजग्मु:। ....

(iii) एतत्तु देवहेलनम्। ....

(iv) महीध्रम् आरोहते। ....

(v) विश्वभुक् पालको हरि:। ....

(vi) अनल्पं कष्टमनुभूतम्। ....

(vii) अनवद्यानि कर्माणि आचरणीयानि। ....

(viii) तलस्थानि पुष्पाणि न चेतव्यानि। ....

(इ) तद्धितप्रत्ययः

१. तत्र - तस्मिन् इति (तद् + त्रल्)

२. अनेकधा - अनेकैः प्रकारैः इति (अनेक + धा)

३. तदा - तस्मिन् काले इति (तद् + दा)

अधस्तनेषु पदेषु विग्रहं प्रत्ययं च लिखतु–

(i) सर्वत्र ....

(ii) बहुत्र ....

(iii) एकधा ....

(iv) दशधा ....

(v) अष्टधा ....

(vi) सदा ....

(vii) सर्वदा ....

(ई) कृत्प्रत्ययः

१. एकस्थम् - एक + स्था + क (अ) = एकस्थ

२. प्रविभक्तम् - प्र + वि + भज् + क्त (त) = प्रविभक्त

अधस्तनेभ्यः प्रकृतिप्रत्ययेभ्यः निष्पन्नं पदं वाक्ये व्यवहरतु–

(i) वृक्ष + स्था + क = ...

(ii) तल + स्था + क = ...

(iii) मधु + पा + क = ...

(iv) वसु + धा + क = ...

(v) आ + विश् + क्त = ...

(vi) अनु + राध् + क्त = ...

(vii) वि + रञ्ज् + क्त = ...

(उ) क्रियाकारकसम्बन्धः

अपश्यत्	-	कर्तरि सकर्मकक्रिया	कृत्स्नम्	-	कर्मविशेषणम्
पाण्डवः	-	कर्ता	प्रविभक्तम्	-	कर्मविशेषणम्
जगत्	-	कर्म	अनेकधा	-	कर्मीभूतविभागक्रियाविशेषणम्
शरीरे	-	अधिकरणम्	एकस्थम्	-	कर्मविशेषणम्
तदा	-	क्रियाविशेषणम्	देवदेवस्य	-	सम्बन्धषष्ठी

(ऊ) पर्यायशब्दः

१. **जगत्** - १. संसारः (अका. पुं.), २. विश्वम् (अका. नपुं.), ३. लोकः (अका. पुं.), ४. ब्रह्माण्डम् (अका. नपुं.)

२. **प्रविभक्तम्**- १. विभक्तम् (अका. त्रिलि.), २. विविक्तम् (अका. त्रिलि.), ३. अतिरिक्तम् (अका. त्रिलि.), ४. पृथग्भूतम् (अका. त्रिलि.)

३. **देवः** - १. अमरः (अका. पुं.), २. सुरः (अका. पुं.), ३. देवता (आका. स्त्री.), ४. विबुधः (अका. पुं.)

◆◆◆

८२. श्लोकः

ततः स विस्मयाविष्टो हृष्टरोमा धनञ्जयः।
प्रणम्य शिरसा देवं कृताञ्जलिरभाषत।।(भ. गी. ११.१४)

पदच्छेदः

ततः, सः, विस्मय+आविष्टः, हृष्ट-रोमा, धनंजयः।

प्रणम्य, शिरसा, देवम्, कृत+अञ्जलिः, अभाषत।।

पदच्छेदाभ्यासः

अधस्तनानि पदानि विच्छिनत्तु–

(i) विस्मयाविष्टः – ....

(ii) कृताञ्जलिः – ....

(iii) कृताञ्जलिरभाषत – ....

(iv) देवं कृताञ्जलिः – ....

(v) विस्मयाविष्टो हृष्ट – ....

(vi) स विस्मय – ....

पदपरिचयः

पदम्	विश्लेषणम्	पदम्	विश्लेषणम्
ततः	तसिलन्तमव्यम्	प्रणम्य	ल्यबन्तमव्ययम्
सः	तद्-दका.पुं.प्र.एक.सर्व.विशेषणम्	शिरसा	शिरस्-सका.नपुं.तृ.एक.
विस्मयाविष्टः	अका.पुं.प्र.एक.समस्तं विशेषणम्	देवम्	देव-अका.पुं.द्विती.एक.
हृष्टरोमा	हृष्टरोमन्-नका.पुं.प्र.एक.समस्तं विशेषणम्	कृताञ्जलिः	इका.पुं.प्र.एक.समस्तं विशेषणम्
धनंजयः	अका.पुं.प्र.एक.समस्तं विशेष्यम्	अभाषत	भाष्+लङ् प्रपु.एक.भ्वादि.आत्मने.सकर्म. कर्तरि क्रिया.

वर्गीकरणाभ्यासः

अधस्तनेषु वर्गेषु श्लोकपदानि विभज्य लिखतु–

(i) प्रथमान्तम् (५) ....

(ii) द्वितीयान्तम् (१) ....

(iii) तृतीयान्तम् (१) ....

(iv) अकारान्तम् (३) ....

(v) इकारान्तम् (१) ....

(vi) नकारान्तम् (१) ....

(vii) सकारान्तम् (१) ....

(viii) पुंलिङ्गम् (६) ....

(ix) नपुंसकम् (१) ....

(x) सर्वनाम (१) ....

(xi) अव्ययम् (२) ....

(xii) क्रियापदम् (१) ....

(xiii) विशेष्यम् (१) ....

(xiv) विशेषणम् (४) ....

(xv) विशेष्येण सह विशेषणानि योजयतु।

आकाङ्क्षाविस्तरः

अभाषत (= उक्तवान्)।

कः अभाषत? .... (अका. प्र. विशेष्यम्)

धनञ्जयः कदा अभाषत? .... (तसिलन्तमव्ययम्)

ततः कः धनञ्जयः अभाषत? .... (सर्व प्र.)

कथंभूतः सः धनञ्जयः? .... (समस्तम् अका. विशेषणम्)

विस्मयाविष्टः सः धनञ्जयः पुनश्च कथम्भूतः? .... (नका. प्र.)

विस्मयाविष्टः हृष्टरोमा स धनञ्जयः पुनश्च कथम्भूतः? .... (इका. प्र.)

ततः विस्मयाविष्टः हृष्टरोमा कृताञ्जलिः स धनञ्जयः .... (ल्यबन्तम्)
किं कृत्वा अभाषत?

कं प्रणम्य स धनञ्जयः अभाषत? .... (अका. द्वि.)

स धनञ्जयः देवं कथं प्रणम्य अभाषत? .... (सका. तृ.)

ततः विस्मयाविष्टः हृष्टरोमा कृताञ्जलिः स धनञ्जयः शिरसा देवं प्रणम्य अभाषत।

पदार्थः

पदम्	संस्कृतम्	हिन्दी
ततः	तदनन्तरम्	उसके बाद
विस्मयाविष्टः	आश्चर्यचकितः	आश्चर्यचकित
हृष्टरोमा	रोमाञ्चितगात्रः	पुलकित शरीर
सः	पूर्वोक्तः सः	वह
धनञ्जयः	विख्यातविजयः अर्जुनः	विजेता अर्जुन
शिरसा	मस्तकेन	शिर से
देवम्	विश्वरूपं श्रीकृष्णम्	श्रीकृष्ण को
प्रणम्य	भक्तिश्रद्धातिशयेन नत्वा	प्रणाम करके
कृताञ्जलिः	संपुटितहस्तः	हाथ जोड़कर
अभाषत	अवदत्	बोले।

भावार्थः

संस्कृतम्—अर्जुनः विश्वरूपधरस्य भगवतः दर्शनानन्तरं किमकरोत् इत्याकाङ्क्षायां सञ्जय आह—

हे राजन्! तस्य विराड्रूपस्य दर्शनानन्तरम् अर्जुनः न भीतः, नापि सञ्चलितः, न वा सम्भ्रमात् कर्तव्यं विस्मृतः, नैव तस्माद्देशात् अपसृतः। अपितु अलौकिकचमत्कारविशेषेण भरितः सन् अर्जुनः उत्फुल्ललोमा बभूव। तदानीं स धनञ्जयः नतमस्तकेन भक्तिश्रद्धातिशयेन विराड्रूपं प्रकाशमयं श्रीकृष्णं नत्वा नमस्कारार्थं सम्पुटीकृतहस्तः सन् अवोचत्।

इह धनञ्जयपदेन अर्जुनस्य अतिधीरत्वं स्मारितम्। पूर्वं युधिष्ठिरराजसूये यज्ञे अर्जुनः उत्तरकुरून् राज्ञः जित्वा तेभ्यः असीमं धनमाहृतवान्, अतः स प्रख्यातपराक्रमोऽतिधीरः, अतस्तदानीमपि अर्जुनः आश्चर्येण पुलकितलोमावलिः निर्भय आसीत्।

हिन्दी–भगवान् के विराट् स्वरूप का दर्शन करने के पश्चात् अर्जुन ने क्या किया? आकांक्षा का समाधान करने के लिए संजय ने कहा–

हे राजन्! उस विराड्रूप का दर्शन करते ही अर्जुन अलौकिक आश्चर्य से भर गया। उसके शरीर में रोमांच हो गया। उस समय वह भयभीत नहीं हुआ, नहीं विचलित हुआ और नहीं अपने कर्तव्य को भूला। वह भयवशात् वहाँ से पीछे नहीं हटा, क्योंकि वह महान् योद्धा, प्रख्यात पराक्रमी अतिधीर था। इसी भाव को बताने के लिए यहाँ अर्जुन को धनंजय शब्द से बोधित किया गया है। पूर्व में सम्पन्न युधिष्ठिर के राजसूय यज्ञ में अर्जुन ने उत्तर कुरु देश के राजाओं को परास्त करके उनसे प्रभूत धन जीत लाया था, अतः वह निर्भीक, आश्चर्यचकित और पुलकित था।

विराट् स्वरूप के दर्शन से कृष्ण के प्रति उसकी पूर्व धारण विद्युत्प्रवाह की भांति अचानक परिवर्तित हो गयी। विश्वरूप के आगे उसका शिर भक्ति और श्रद्धा से अवनत हो गया। इस प्रकार वह शिर झुकाकर और हाथ जोड़कर कहने लगा।

अवबोधाभ्यासः

अधस्तनान् प्रश्नान् समाधत्ताम्–

१. इह सञ्जयः काम् आकाङ्क्षां समाधत्ते? ....

२. विश्वरूपदर्शनेन अर्जुने के भावाः समागताः? ....

३. अर्जुनः कदा धनं जितवान्? ....

४. कृष्णं प्रति मित्रभावः कस्मिन् भावे परिवर्तितः? ....

५. भक्त्या श्रद्धया च स किं कृतवान्? ....

६. भयभीतः भयं विलोक्य किं कुरुते? ....

व्याकरणाभ्यासः

(अ) सन्धिः

१. विस्मयाविष्टः - विस्मय + आविष्टः - दीर्घसन्धिः

२. कृताञ्जलिः - कृत + अञ्जलिः - दीर्घसन्धिः

३. कृताञ्जलिरभाषत - कृताञ्जलिः + अभाषत - विसर्गसन्धिः

४. विस्मयाविष्टो हृष्ट - विस्मयाविष्टः + हृष्ट - विसर्गसन्धिः

५. स विस्मय. - सः + विस्मय. - विसर्गसन्धिः

६. देवं कृता. - देवम् + कृता. - अनुस्वारसन्धिः

अधस्तनेषु रेखाङ्कितेषु सन्धिच्छेदं करोतु–

(i) इति विज्ञापितो गोपैर्भगवान् देवकीसुतः। ....

(ii) तव पादमूलं प्राप्ता वयम्। ....

(iii) सन्मार्गे तेषां मतिर्जाता। ....

(iv) भानुरयं तपति प्रचण्डम्। ....

(v) नान्या भवेद् गतिररिन्दम। ....

(vi) य एवं विसृजेद् वाचम्। ....

(vii) कर्मसिद्धिर्नाविदुषो भवेत्। ....

(viii) स एष भगवान् साक्षात्। ....

(ix) प्रश्रयावनतोऽपृच्छत्। ....

(x) क्षेमं कर्मणैवाभिपद्यते। ....

(आ) समासः

१. विस्मयाविष्टः – विस्मयेन आविष्टः इति – तृतीयातत्पुरुषः

२. हृष्टरोमा – हृष्टानि रोमाणि यस्य सः – बहुव्रीहिः

३. कृताञ्जलिः – कृतः अञ्जलिः येन सः – बहुव्रीहिः

४. धनञ्जयः – धनं जयतीति (धनम् + जय) – उपपदसमासः

अधस्तनेषु रेखाङ्कितेषु विग्रहं समासं च करोतु–

(i) स्वभावस्थम् इदं सर्वम्। ....

(ii) छात्रप्रेषितान् सन्देशान् शृणोतु। ....

(iii) प्रवाहाक्षिप्तानि काष्ठानि नदीतटे सन्ति। ....

(iv) पर्जन्यः फलभावनः कामं वर्षति। ....

(v) प्रहसिताननः अधिकारी सर्वान् तोषयति। ....

(vi) त्यक्तफलाशः आशु सिद्धिमाप्नोति। ....

(vii) पूर्णकामस्य महात्मनः नास्ति द्वेष्यः। ....

(viii) कृष्णः लीलानरवपुः गोपैः सह रेमे। ....

(इ) कृत्प्रत्ययः

१. आविष्टः - आ + विश् + क्त ४. प्रणम्य - प्र + नम् + ल्यप् (य)

२. हृष्टः - हृष् + क्त ५. देवम् - दिव् + अच्

३. धनंजयः - धन + जि + खच् (अ) ६. कृत - कृ + क्त

अधस्तनेषु रेखाङ्कितेषु प्रकृति-प्रत्ययभाग करोतु–

(i) अतिलङ्घ्य समस्तबन्धून्। ....

(ii) प्राप्ता वयं त्वाम्। ....

(iii) वचो निशम्य नन्दस्य। ....

(iv) बलदेवेन संयुतः। ....

(v) पुरन्दरस्य कोपं सोढुं न शक्नुमः। ....

(vi) मेघाः तस्यात्ममूर्तयः। ....

(vii) जन्तुः देहान् प्राप्य उत्सृजति। ....

(viii) गोधनानि पुरस्कृत्य गिरिं प्रदक्षिणं चक्रुः। ....

(ix) अनुडुद्युक्तानि शकटानि आरुह्य गताः। ....

(x) वाचंयमाः ते मुनयः स्वेच्छया अटन्ति। ....

(ई) तद्धितप्रत्ययः

१. ततः - तद् + तसिल् (तस्) = ततः

अधस्तनेषु तसन्तानां पदानामर्थान् लिखतु–

(i) ततस्तेषु गतेषु दुःखितोऽभूत्। ....

(ii) अग्रतस्ते नमः पृष्ठतस्ते नमः। ....

(iii) स्वभावतस्ते श्रमशीलाः। ....

(iv) एकतः अपहरणम्, अपरतश्चायं विवादः। ....

(v) कुतस्ते कश्मलम्? ....

(vi) मथुरातो निर्गते कृष्णे विघ्नानि जातानि। ....

(उ) क्रियाकारकसम्बन्धः

अभाषत	–	कर्तरि आत्मने. क्रिया	हृष्टरोमा	–	कर्तृविशेषणम्
धनञ्जयः	–	कर्ता	कृताञ्जलिः	–	कर्तृविशेषणम्
ततः	–	क्रियाविशेषणम्	प्रणम्य	–	पूर्वकालिकक्रिया
सः	–	कर्तृविशेषणम्	देवम्	–	पूर्वकालिकक्रियायाः कर्म
विस्मयाविष्टः	–	कर्तृविशेषणम्	शिरसा	–	करणम्

(ऊ) पर्यायशब्दः

१. **विस्मयः** – १. आश्चर्यम् (अका. नपुं.), २. चमत्कारः (अका. पुं.)

२. **रोम** (रोमन्, नका. नपुं.) १. लोम (लोमन् नका. नपुं.) २. तनूरुहम् (अका. नपुं.)

३. **शिरः** – १. उत्तमाङ्गम् (अका. नपुं.) २. शीर्षम् (अका. नपुं.) ३. मूर्धा (मूर्धन् नका. पुं.) ४. मस्तकम् (अका. पुं.)

◆◆◆

८३. श्लोकः

अर्जुन उवाच

पश्यामि देवांस्तव देव देहे सर्वांस्तथा भूतविशेषसंघान्।
ब्रह्माणमीशं कमलासनस्थमृषींश्च सर्वानुरगांश्च दिव्यान्।। (भ. गी. ११.१५)

पदच्छेदः

पश्यामि, देवान्, तव, देव, देहे,
सर्वान्, तथा, भूत-विशेष-संघान्।

ब्रह्माणम्, ईशम्, कमल+आसन-स्थम्
ऋषीन्, च, सर्वान्, उरगान्, च दिव्यान्।।

पदच्छेदाभ्यासः

अधस्तनानि पदानि विच्छिनत्तु–

(i) देवांस्तव – ....

(ii) सर्वांस्तथा – ....

(iii) कमलासनस्थम् – ....

(iv) ईशं कमल. – ....

(v) ऋषींश्च – ....

(vi) उरगांश्च – ....

पदपरिचयः

पदम्	विश्लेषणम्	पदम्	विश्लेषणम्
पश्यामि	दृश्+लट् उपु.एक.भ्वादि.सकर्म. कर्तरि परस्मै.क्रिया.	ब्रह्माणम्	ब्रह्मन्–नका.पुं.द्विती.एक.विशेष्यम्
देवान्	देव–अका.पुं.द्विती.बहु.	ईशम्	ईश–अका.पुं.द्विती.एक.
तव	युष्मद्–दका.ष.एक.सर्व.	कमला-सनस्थम्	कमलासनस्थ–अका.पुं.द्विती.एक.विशेषणम्
देव	अका.पुं.सम्बो.एक.	ऋषीन्	ऋषि–इका.पुं.द्विती.बहु.विशेष्यम्

देहे	देह-अका.पुं.सप्त.एक.	च	अव्ययम्
सर्वान्	सर्व-अका.पुं.द्विती.बहु.सर्व.विशेषणम्	उरगान्	उरग-अका.पुं.द्विती.बहु विशेष्यम्
तथा	अव्ययं तद्धितान्तम्	दिव्यान्	दिव्य-अका.पुं.द्विती.बहु.तद्धितान्तं विशेषणम्
भूतविशेष-संघान्	भूतविशेषसंघ-अका.पुं.द्विती.बहु. समस्तं विशष्यम्		

वर्गीकरणाभ्यासः

अधस्तनेषु वर्गेषु श्लोकपदानि विभजतु–

(i) द्वितीयान्तम् (१) ....

(ii) षष्ठ्यन्तम् (१) ....

(iii) सप्तम्यन्तम् (१) ....

(iv) सम्बोधनान्तम् (१) ....

(v) अकारान्तम् (१) ....

(vi) इकारान्तम् (१) ....

(vii) नकारान्तम् (१) ....

(viii) पुंलिङ्गम् (१२) ....

(ix) अव्ययम् (३) ....

(x) सर्वनाम (३) ....

(xi) क्रियापदम् (१) ....

(xii) विशेष्यम् (४) ....

(xiii) विशेषणम् (४) ....

(xiv) समस्तम् (२) ....

(xv) तद्धितान्तम् (२) ....

(xvi) विशेष्येण विशेषणं योजनीयम्। ....

आकाङ्क्षाविस्तरः

पश्यामि (= अवलोकयामि)।

क: पश्यति? अहं पश्यामि।

अहं कान् पश्यामि? .... (अका. द्विती.)

अहं देवान् कुत्र पश्यामि? .... (अका. स.)

अहं कस्य देहे देवान् पश्यामि? .... (सर्व. ष.)

तव देहे देवान् तथा अन्यान् कान् पश्यामि? .... (द्वितह.बहु.समस्तम्)

तव देहे देवान् तथा कति भूतविशेषसंघान् पश्यामि? .... (सर्व. द्विती. बहु.)

तव देहे अन्यं च कं पश्यामि? .... (नका. द्विती. एक.)

तव देहे कथम्भूतं ब्रह्माणं पश्यामि? .... (द्विती.एक.समस्तम्)

तव देहे कमलासनस्थं ब्रह्माणम् अन्यं च कं पश्यामि? .... (द्विती. एक.)

तव देहे पुनश्च कान् पश्यामि? .... (इका. द्विती. बहु.)

तव देहे कति ऋषीन् पश्यामि? .... (सर्व द्विती. बहु.)

तव देहे सर्वान् ऋषीन् अन्यान् च कान् पश्यामि? .... (द्विती. बहु.)

तव देहे कथम्भूतान् उरगान् पश्यामि? .... (अक. द्विती. बहु.)

अर्जुनस्य क: सम्बोध्य:? .... (सम्बो.)

देव! तव देहे सर्वान् देवान् तथा भूतविशेषसंघान् कमलासनस्थं ब्रह्माणम् ईशं च सर्वान् ऋषीन् दिव्यान् उरगान् च पश्यामि।

पदार्थः

पदम्	संस्कृतम्	हिन्दी
देव!	प्रकाशस्वरूप हे कृष्ण!	हे देव!
तव	(अहम्) भवत:	(मैं) आपके
देहे	विराड्रूपे	विराट् शरीर में
देवान्	आदित्यादीन् सुरान्	सूर्यादि देवताओं को
तथा	एवम्	और

सर्वान्	सकलान्	सभी
भूतविशेष-	जरायुजादीन्	जरायुजादि चतुर्विध-
संघान्	चतुर्विधान प्राणिवर्गान्	प्राणि समूहों को
कमलासनस्थम्	पद्मासनस्थं	कमल के आसन पर अवस्थित
ब्रह्माणम्	प्रजापतिं हिरण्यगर्भम्	ब्रह्मा जी
ईशम्	महेश्वरम्	शिव जी
च	तथा	और
सर्वान्	अखिलान्	सभी
ऋषीन्	वसिष्ठादिमुनीन्	ऋषियों को
दिव्यान्	अलौकिकान्	दिव्य
उरगान्	तक्षकादिसर्पान्	सर्पों को
च	एवम्	तथा
पश्यमि	उपलभे	देखता हूँ।

भावार्थः

संस्कृतम्—विश्वरूपदर्शनेन विस्मितः अर्जुनः विश्वरूपे दृष्टान् पदार्थान् वर्णयति—

अर्जुनः अवदत्—प्रकाशस्वरूप हे देव! अहं भवतः विराड्शरीरे स्वर्गलोकनिवासिनो देवान् आदित्यादीन् वीक्षे। अधुना अर्जुनः भक्तिश्रद्धातिशयेन भगवन्तं 'देव' इति सम्बोधयति, न तु 'हे मित्र, हे सखे' इति। मर्त्यलोके जरायुजाः अण्डजाः स्वेदजाः उद्भिजश्चेति चतुर्विधा जीवाः जायन्ते। एते चत्वार एव भूतविशेषाः, तेषां सर्वान् समूहान् अपि अर्जुनः तत्र रूपे पश्यति। किञ्च देवेषु ब्रह्मा जगदुत्पादकः, शिवः संहर्त्ता, पालकः विष्णुश्च पृथक् ईश्वरकोटौ वर्तन्ते, अतः एतेषामिह पार्थक्येनोल्लेखः। कमलासनस्थमिति विशेषणेन क्षीराब्धौ शयानस्य विष्णोः तन्नाभिकमले स्थितस्य ब्रह्मणश्च बोधो जायते। एवञ्च कमलमूलं विष्णुं कमलासने स्थितं ब्रह्माणं शिवं च देवाधिदेवं पश्यामि इत्यर्थः। मर्त्यलोकनिवासिषु वसिष्ठादयो मन्त्रद्रष्टारः अव्याहतगतयः ऋषयः श्रेष्ठाः, अतः तेषां पृथगुल्लेखः। तान् सर्वान् ऋषीन् पश्यामीत्यर्थः। पाताललोके तक्षकवासुकिप्रमुखाः नागाः श्रेष्ठाः सन्ति। अतः इह अर्जुनः तान् पार्थक्येन वर्णयति— अहम्, दिव्यान् अप्राकृतान् उरगान् सर्पान् पश्यामीति। एवञ्च भगवतः विश्वरूपे पृथिवीस्वर्गपातालेति त्रयः लोकाः चतुर्दश भुवनानि च, तद्भोक्तारो जीवाः भोग्यवस्तूनि च स्थितानि आसन्।

हिन्दी—विश्वरूप दर्शन से आश्चर्यचकित अर्जुन उस विराट् रूप में दृष्ट पदार्थों का वर्णन कर रहे हैं—

अर्जुन बोले–हे देव! मैं आपके विराट् रूप में स्वर्गलोक निवासी सूर्यादि देवों को देख रहा हूँ। यहाँ अर्जुन ने भक्ति और श्रद्धा के कारण श्रीकृष्ण को 'देव' शब्द से सम्बोधित किया है, यद्यपि इसके पूर्व वह उनको मित्र और सखा शब्द से सम्बोधित करता था।

पृथिवी लोक पर चार प्रकार के जीव समुदाय रहते हैं – १. जरायुज, २. अण्डज, ३. स्वदेज और ४. उद्भिज्। इन्हें भूत विशेष का संघ कहा है। अर्जुन ने विराट् शरीर में उन सभी जीव निकायों को देखा।

देवताओं में ब्रह्मा, विष्णु और महेश ईश्वर कोटि में आते हैं, ये जगत् के कर्ता, धर्ता और संहर्त्ता हैं। अत एव यहाँ अर्जुन ने इनका पृथक् वर्णन किया है। यहाँ ब्रह्मा का विशेषण दिया है–कमलासनस्थ। इस कमल का मूल है क्षीरसागरशायी भगवान् विष्णु की नाभि। एवञ्च इस विशेषण से भगवान् विष्णु का भी बोध होता है। कमलमूल विष्णु, कमलासन पर स्थित ब्रह्मा और शिव जी को भी मैं देख रहा हूँ।

पृथिवीलोक के निवासियों में मन्त्रद्रष्टा वसिष्ठादि ऋषि श्रेष्ठ हैं। इसलिये उनका अलग वर्णन हुआ है–मैं सभी ऋषियों को देखता हूँ।

वासुकि नाग, तक्षक आदि पातालवासियों में श्रेष्ठ हैं। अतएव यहाँ उनके लिए 'दिव्य' विशेषण का प्रयोग हुआ है। 'दिव्य सर्पों' को भी देख रहा हूँ।

इस प्रकार भगवान् के उस विराट् शरीर में पृथ्वी, स्वर्ग और पाताल तीनों लोक, चौदहों भुवन, उनके निवासी जीव-निकाय तथा भोग्य वस्तुएँ सभी विद्यमान् थे।

अवबोधाभ्यासः

अधस्तनानां प्रश्नानां समाधानं करोतु–

१. इह अर्जुनः किं वर्णयति? ....

२. अर्जुनः केन भावेन 'देव' इति सम्बोधयति? ....

३. कति भूतविशेषसंघाः, के च ते? ....

४. ब्रह्मादीनां देवाद् भेदेन कथमुल्लेखः? ....

५. केन विशेषणेन विष्णोः सङ्केतः? ....

६. ऋषीणां किं वैशिष्ट्यम्? ....

७. दिव्याः उरगाः कुत्र निवसन्ति? ....

८. ब्रह्माण्डे कतिलोकाः भुवनानि च भवन्ति? ....

व्याकरणाभ्यासः

(अ) सन्धिः

१. देवांस्तव – देवान् + तव – सानुनासिकरुत्वम् (अनुनासिकसन्धिः)
२. सर्वांस्तथा – सर्वान् + तथा – सानुनासिकरुत्वम् (अनुनासिकसन्धिः)
३. ऋषींश्च – ऋषीन् + च – सानुनासिकरुत्वम् (अनुनासिकसन्धिः)
४. उरगांश्च – उरगान् + च – सानुनासिकरुत्वम् (अनुनासिकसन्धिः)
५. कमलासनस्थम् – कमल + आसनस्थम् – दीर्घसन्धिः
६. ईशं कमल. – ईशम् + कमल. – अनुस्वारसन्धिः

अधस्तनेषु पदेषु सन्धिं करोतु–

(i) ग्रामान् + चारुतरान् – ....
(ii) राजन् + त्वाम् – ....
(iii) वत्सान् + चारयन्ति – ....
(iv) शब्दान् + छन्दोमयान् – ....
(v) तान् + टीकाग्रन्थान् – ....
(vi) ग्रन्थ + आगारे – ....
(vii) ज्ञातृ + ऋद्धिम् – ....
(viii) नदी + ईशम् – ....
(ix) निधानम् + परम् – ....
(x) विधिम् + विधत्ते – ....

(आ) समासः

१. भूतविशेषसंघान् – भूतानां विशेषाः इति भूतविशेषाः – षष्ठीतत्पुरुषः
भूतविशेषाणां संघान् इति – षष्ठीतत्पुरुषः
२. कमलासनस्थम् – कमलस्य आसनमिति – षष्ठीतत्पुरुषः
कमलासने तिष्ठतीति – उपपदसमासः

अधस्तनेषु रेखाङ्कितेषु विग्रहं समासं च करोतु–

(i) राष्ट्ररक्षाभिलेखान् गोपायति। ....

(ii) पत्राक्षराणि वाचयति। ....

(iii) पत्रावलीसमूहं बध्नाति। ....

(iv) कार्यालयद्वारपालस्थानम् एतत्। ....

(v) प्राचार्यकक्षघण्टिकां नादयति। ....

(vi) देवसम्मुखस्थो भवति। ....

(vii) अम्बरस्थोऽपि चन्द्रो भ्राजते। ....

(इ) तद्धितप्रत्ययः

१. तथा – तेन प्रकारेण इति – तद् + थाल् (था) = तथा

२. दिव्यम् – दिवि भवम् – दिव् + यत् (य) = दिव्य

अधस्तनेषु विग्रहेषु निष्पन्नं पदं वाक्ये व्यवहरतु–

(i) केन प्रकारेण – ....

(ii) येन प्रकारेण – ....

(iii) सर्वप्रकारेण – ....

(iv) मुखे भवम् – ....

(v) ओष्ठे भवम् – ....

(vi) आदौ भवम् – ....

(ई) कृत्प्रत्ययः

१. देहे – दिह् + अच् = देह

२. भूत – भू + क्त = भूत

३. विशेष – वि + शिष् + अच् = विशेष

४. ब्रह्माणम् – बृह + मनिन् = ब्रह्मन्

५. ईशम् – ईश् + क = ईश

६. आसनस्थम् - आसन् + स्था + क = आसनस्थ

७. उरगान् - उरस् + गम् + उ (अ) = भूत

(उ) छन्दोविधानम्

अस्य श्लोकस्य आद्येषु त्रिषु पादेषु इन्द्रवज्रा छन्दः, चतुर्थे पादे तु उपेन्द्रवज्रा। इन्द्रवज्रोपेन्द्रवज्रयोः एकत्र समावेशात् उपजातिः छन्दः। सा च उपजातिः बहुविधा। तत्र इह बाला उपजातिः छन्दः बोध्यः।

(ऊ) क्रियाकारकसम्बन्धः

पश्यामि	-	दृश्-लट्-उपु.एक सकर्म.परस्मै.कर्तरि क्रिया	कमलासनस्थम्	-	कर्मविशेषणम्
अहम्	-	आक्षिप्तः कर्ता	ईशम्	-	कर्म
देवान्	-	कर्म	ऋषीन्	-	कर्म
देहे	-	अधिकरणम्	सर्वान्	-	कर्मविशेषणम्
तव	-	अधिकरणसम्बन्धषष्ठी	उरगान्	-	कर्म
सर्वान्	-	कर्मविशेषणम्	दिव्यान्	-	कर्मविशेषणम्
भूतविशेषसंघान्	-	कर्म	तथा	-	क्रियाविशेषणम्
ब्रह्माणम्	-	कर्म	च	-	क्रियाविशेषणम्

◆◆◆

८४. श्लोकः

अनेकबाहूदरवक्त्रनेत्रं
पश्यामि त्वां सर्वतोऽनन्तरूपम्।
नान्तं न मध्यं न पुनस्तवादिं
पश्यामि विश्वेश्वर विश्वरूप।।(भ. गी. ११.१६)

पदच्छेदः

अनेक-बाहु+उदर-वक्त्र-नेत्रम्,
पश्यामि, त्वाम्, सर्वतः, अनन्त-रूपम्।
न, अन्तम्, न मध्यम्, न, पुनः, तव, आदिम्,
पश्यामि, विश्व+ईश्वर, विश्व-रूप।।

पदच्छेदाभ्यासः

अधस्तनेषु पदेषु विच्छेदं करोतु–

(i) बाहूदर – ....
(ii) सर्वतोऽनन्तरूपम् – ....
(iii) अनेकबाहूदरवक्त्रनेत्रम् – ....
(iv) त्वां सर्वतः – ....
(v) नान्तम् – ....
(vi) मध्यं न – ....
(vii) तवादिम् – ....
(viii) पुनस्तवादिम् – ....
(ix) विश्वेश्वर – ....
(x) विश्वरूप – ....

पदपरिचयः

पदम्	विश्लेषणम्	पदम्	विश्लेषणम्
अनेक	अका.त्रिलि.विशेषणं समस्तं समासघटकपदम्	अन्तम्	अन्त-अका.पुं.द्विती.एक.
बाहु	उका.पुं.समासघटकपदम्	न	अव्ययम्

उदर	अका.नपुं.समासघटकम्	मध्यम्	मध्य-अका.त्रिलि.द्विती.एक.
वक्त्र	अका.नपुं.समासघटकीभूतम्	न	अव्ययम्
नेत्र	अका.नपुं.समासघटकम्	पुनः	अव्ययम्
अनेकबाहूदरवक्त्रनेत्रम्	अका.पुं.द्विती.एक.समस्तं विशेषणम्	तव	युष्मद्-दका.ष.एक.सर्व.
पश्यामि	दृश्+लट् उपुएक.सकर्म.भ्वादि.परस्मैकर्तरि क्रिया	आदिम्	आदि-इका.पुं.द्विती. एक.
त्वाम्	युष्मद्-दका.द्विती.एक.सर्व.विशेष्यम्	पश्यामि	दृश्+लट् उपुएक.भ्वादि.परस्मैसकर्मकर्तरि क्रिया
सर्वतः	तसन्तम् अव्ययम्	विश्वेश्वर	अका.पुं.सम्बो.एक.समस्तम् १
अनन्तरूपम्	अका.पुं.द्विती.एक.समस्तं विशेषणम्	विश्वरूप	अका.पुं.सम्बो.एक.समस्तम् २
न	अव्ययम्		

वर्गीकरणाभ्यासः

अधस्तनेषु वर्गेषु श्लोकपदानि विभज्य लिखतु–

(i) द्वितीयान्तम् (६) ....

(ii) षष्ठ्यन्तम् (१) ....

(iii) सम्बोधनान्तम् (२) ....

(iv) अकारान्तम् (६) ....

(v) इकारान्तम् (१) ....

(vi) पुंलिङ्गम् (७) ....

(vii) अव्ययम् (५) ....

(viii) सर्वनाम (२) ....

(ix) क्रियापदम् (२) ....

(x) समस्तम् (४) ....

(xi) विशेष्यम् (१) ....

(xii) विशेषणम् (२) ....

(xiii) विशेषणानि विशेष्यम् अनुलेख्यानि। ....

आकाङ्क्षाविस्तरः

पश्यामि (- विलोकयामि)।

कः पश्यति? **अहं पश्यामि।**

अहं कं पश्यामि? .... (सर्व. द्विती.)

अहं कथंभूतं त्वां पश्यामि? .... (समस्तं द्विती. एक. १)

अनेकबाहूदरवक्त्रनेत्रं पुनश्च कीदृशं त्वां पश्यामि? .... (समस्तं द्विती. एक.)

अनेकबाहूदरवक्त्रनेत्रं त्वां कुतः अनन्तरूपं पश्यामि? .... (तसन्तम्)

अनेकबाहूदरवक्त्रनेत्रं सर्वतः अनन्तरूपं त्वां पश्यामि।

न पश्यामि (- न वीक्षे।)

कः न पश्यति? **अहं न पश्यामि।**

अहं कं न पश्यामि? .... (अका. द्विती. एक.)

पुनश्च कं न पश्यामि? .... (अका. द्विती. एक. २)

पुनश्च कं न पश्यामि? .... (इका. द्विती. एक.)

अहं कस्य अन्तं न, मध्यं न, आदिं न पश्यामि? .... (सर्व. ष.)

किं सम्बोधनम्? .... (सम्बो. एक.)

हे विश्वेश्वर! विश्वरूप! तव आदिं न, मध्यं न, अन्तं न पश्यामि।

पदार्थः

पदम्	संस्कृतम्	हिन्दी
विश्वेश्वर!	हे जगदीश्वर!	हे जगदीश्वर!
विश्वरूपः	विराट्स्वरूप!	विराट् पुरुष!
अनेकबाहूदर-	असंख्यहस्तकुक्षि-	अनेक हाथ, पेट-
वक्त्रनेत्रम्	मुखनयनम्	मुख और नेत्रों से युक्त

सर्वतः	सर्वत्र	सब ओर से
अनन्तरूपम्	अपरिमिताकारम्	अनन्त रूपों वाला
त्वाम्	भवन्तम्	आपको
पश्यामि	विलोके	देखता हूँ
पुनः	किन्तु	परन्तु
तव	भवतः	(मैं) आपके
आदिम्	आरम्भम्	आरम्भ को
न	न	नहीं
मध्यम्	मध्यभागम्	बीच को
न	न हि	नहीं
अन्तम्	अवसानम्	अन्त को
न	न हि	(और) नहीं
पश्यामि	वीक्षे	देख रहा हूँ।

भावार्थः

संस्कृतम्—अर्जुनः भगवतः विराट्शरीरे यद् दृष्टवान् तदेव विशिनष्टि—

हे जगदीश्वर! अहं भवन्तम् असंख्यैः बाहुभिः उदरैः मुखैः नेत्रैश्च युक्तं पश्यामि। किञ्च सर्वासु दिक्षु भवतः आकृतयः अन्तहीनाः दृश्यन्ते। एवञ्च सर्वत्र अनन्तरूपवन्तं त्वां पश्यामि। यत्र-यत्र मम दृष्टिः प्रसरति, तत्र-तत्राहं भवतः भिन्नानि-भिन्नानि रूपाणि पश्यामि।

अतः अस्यां स्थितौ हे विराट्पुरुष! अहं भवतः रूपाणाम् आदिमध्यावसानं नोपलभे। भवतः आकृतीनाम् आदिबिन्दुं न पश्यामि, अन्तिमबिन्दुमपि न पश्यामि। यदा द्वयोः बिन्द्वोः निश्चयो नास्ति तदा तयोः अन्तरं मध्यभागमपि निश्चेतुमहं न शक्नोमि। अतः नाहं भवतः आदिं मध्यम् अन्तं वा पश्यामि। विराड्रूपविस्तारस्य काचित् सीमैव नास्तीति भावः।

हिन्दी—इस श्लोक में अर्जुन ने भगवान् के विराड् रूप के असीमित अवयवों और विस्तार का वर्णन किया है—

हे जगदीश! असंख्य भुजाओं से, अनन्त पेट, मुख और नेत्रों से युक्त आपके रूप को मैं देखता हूँ। किसी भी दिशा में मैं इन रूपों का अन्त नहीं देख पा रहा हूँ। अतः मैं सर्वत्र आपके अन्तहीन रूपों को देखता हूँ।

हे विराट् पुरुष! मैं आपके इस विराड् रूप का कहीं भी आदि और अन्त नहीं देख रहा हूँ। अर्थात् मुझे यह ज्ञात नहीं हो रहा है कि यह विस्तार कहाँ से कहाँ तक फैला हुआ है। इस प्रकार आदि और अन्त का पता न लगने के कारण मैं यह भी नहीं समझ रहा हूँ कि इसका बीच कहाँ है, इसलिए मैं आपके मध्य का भी निश्चय नहीं कर पा रहा हूँ। मुझे तो आगे-पीछे, दायें-बायें और ऊपर-नीचे– सब ओर से आप सीमा रहित दिखलाई पड़ रहे हैं। किसी ओर से भी आपके विस्तार की कोई सीमा नहीं दीखती है।

अवबोधाभ्यासः

अधस्तनान् प्रश्नान् समादधातु–

१. इह श्लोके अर्जुनः किं वर्णयति? ....

२. असंख्यावयवाः कस्य सन्ति? ....

३. सर्वतः इति पदस्य कोऽभिप्रायः? ....

४. मध्यस्य निश्चयः कदा भवति? ....

५. अर्जुनः कस्य अन्तं न पश्यति? ....

६. कस्य सीमा निश्चिता नास्ति? ....

७. देशस्य सीमां पञ्चभिर्वाक्यैः निर्दिशतु। ....

व्याकरणाभ्यासः

(अ) सन्धिः

१. बाहूदर	–	बाहु + उदर	–	दीर्घसन्धिः
२. नान्तम्	–	न + अन्तम्	–	दीर्घसन्धिः
३. तवादिम्	–	तव + आदिम्	–	दीर्घसन्धिः
४. विश्वेश्वर	–	विश्व + ईश्वर	–	गुणसन्धिः
५. सर्वतोऽनन्त	–	सर्वतः + अनन्त	–	विसर्गसन्धिः पूर्वरूपसन्धिश्च
६. पुनस्तव	–	पुनः + तव	–	श्चुत्वसन्धिः
७. नेत्रं पश्यामि	–	नेत्रम् + पश्यामि	–	अनुस्वारसन्धिः
८. त्वां सर्वतः	–	त्वाम् + सर्वतः	–	अनुस्वारसन्धिः
९. अन्तं न	–	अन्तम् + न	–	अनुस्वारसन्धिः

१.. मध्यं न – मध्यम् + न – अनुस्वारसन्धिः

११. आदिं पश्यामि – आदिम् + पश्यामि – अनुस्वारसन्धिः

अधस्तनेषु रेखाङ्कितेषु सन्धिं करोतु–

(i) कृत + उह्यमान् गोपान् अपश्यत्। ....

(ii) उदासीनः + अरिवद् वर्ज्यः। ....

(iii) द्रव्यैः + तद्रेतसा सिद्धैः। ....

(iv) नत + उन्नतं न + अदृश्यत। ....

(v) भव + अर्णवं तितीर्षन्ति। ....

(vi) लोक + ईशमानिनां तमो हरिष्ये। ....

(vii) निशम्य + उपरतं गोपान्। ....

(viii) तम् + शैलम् + स्वस्थाने स्थापयामास। ....

(ix) ततः + अनुरक्तैः पशुपैः। ....

(x) मुमुचुः + तुष्टाः पुष्पवर्षाणि। ....

(आ) समासः

१. अनेकबाहूदरवक्त्रनेत्रम् – बाहवश्च उदराणि च वक्त्राणि च नेत्राणि चेति – बाहूदरवक्त्रनेत्रम् – द्वन्द्वः

अनेकं बाहूदरवक्त्रनेत्रं यस्य तम् – बहुव्रीहिः

२. अनन्तरूपम् – न विद्यमानः – अविद्यमानः – नञ्तत्पुरुषः

अविद्यमानः अन्तः येषां तानि – अनन्तानि – बहुव्रीहिः

अनन्तानि रूपाणि यस्य तम् – बहुव्रीहिः

३. विश्वेश्वर – विश्वस्य ईश्वर – षष्ठीतत्पुरुषः

४. विश्वरूप – विश्वं रूपं यस्य तत्सम्बुद्धौ बहुव्रीहिः

अधस्तनेषु रेखाङ्कितेषु समासं विग्रहं च करोतु–

(i) व्रजौकसः गतविस्मयाः। ....

(ii) दृष्टश्रुतानुभावः इन्द्रः आह कृताञ्जलिः। ....

(iii) नष्टत्रिलोकेशमदः इन्द्रः। ....

(iv) ध्वस्तरजस्तमस्कं तव धाम। ....

(v) खलनिग्रहाय दण्डं बिभर्ति। ....

(vi) जगद्रूप! नमोऽस्तु ते। ....

(vii) सिद्धगन्धर्वचारणाः तुष्टुवुः। ....

(viii) वाक्पाणिपादं कर्मेन्द्रियं प्राहुः। ....

(ix) अनेकानि व्यतीतानि दिनानि नः। ....

(x) अनेकजन्मसंसिद्धः ततो याति परां गतिम्। ....

(इ) कृत्प्रत्ययः

१. वक्त्र – उच्यतेऽनेन – वाच् + त्र (त्र) –

२. नेत्रम् – नीयतेऽनेन – नी + ष्ट्रन् –

३. ईश्वर – अतिशयेन ईष्टे – ईश् + वरच् –

अधस्तनेषु पदेषु प्रकृतिप्रत्ययभागं विभजतु–

(i) दात्रम् ....

(ii) पात्रम् ....

(iii) क्षेत्रम् ....

(iv) मान्यवरः ....

(v) यायावरः ....

(ई) क्रियाकारकसम्बन्धः

पश्यामि	–	सकर्म.परस्मै.कर्तरि क्रिया	न	–	क्रियाविशेषणम्
अहम्	–	आक्षिप्तः कर्ता	अहम्	–	आक्षिप्तः कर्ता
त्वाम्	–	कर्म	अन्तम्	–	कर्म
अनेकबाहूदरवक्त्रनेत्रम्	–	कर्मविशेषणम्	मध्यम्	–	कर्म

अनन्तरूपम्	-	कर्मविशेषणम्	आदिम्	-	कर्म
सर्वतः	-	कर्मविशेषणविशेषणम्	पुनः	-	क्रियाविशेषणम्
पश्यामि	-	सकर्म.परस्मै.कर्तरि क्रिया	विश्वेश्वर!	-	सम्बोधनम्
न	-	क्रियाविशेषणम्	विश्वरूप!	-	सम्बोधनम्
न	-	क्रियाविशेषणम्			

(उ) छन्दोविधानम्

अस्य श्लोकस्य प्रथमपादे उपेन्द्रवज्रा, ततः त्रिषु पादेषु इन्द्रवज्रा इति उभयोरेकत्र समावेशाद् उपजातिच्छन्दः। इह इयम् उपजातिः कीर्तिः इत्युच्यते।

(ऊ) पर्यायशब्दः

१. **बाहुः** - १. भुजः (अका. पुं. / स्त्री.), २. प्रवेष्टः (अका. पुं.), ३. दोः (दोस् सका. पुं.), ४. दोषा (आका. स्त्री.), ५. पाणिः (इका. पुं.), ६. हस्तः (अका. पुं.), ७. करः (अका. पुं.)

◆◆◆

८५. श्लोकः

किरीटिनं गदिनं चक्रिणं च
तेजोराशिं सर्वतो दीप्तिमन्तम्।
पश्यामि त्वां दुर्निरीक्ष्यं समन्ताद्
दीप्तानलार्कद्युतिमप्रमेयम्।। (भ. गी. ११.१७)

पदच्छेदः

किरीटिनम्, गदिनम्, चक्रिणम्, च
तेजः-राशिम्, सर्वतः, दीप्तिमन्तम्।

पश्यामि, त्वाम्, दुर्निरीक्ष्यम्, समन्तात्
दीप्त+अनल+अर्क-द्युतिम्, अप्रमेयम्।।

पदच्छेदाभ्यासः

अधस्तनानि पदानि विच्छिनत्तु-

(i) तेजोराशिम् - ....

(ii) सर्वतो दीप्तिमन्तम् - ....

(iii) दीप्तानलार्कद्युतिम् - ....

(iv) समन्ताद् दीप्त - ....

(v) त्वां दुर्निरीक्ष्यम् - ....

(vi) चक्रिणं च - ....

पदपरिचयः

पदम्	विश्लेषणम्
किरीटिनम्	किरीटिन्-नका.पुं.द्विती.एक. तद्धितान्तं विशेषणम्
गदिनम्	गदिन्-नका.पुं.द्विती.एक.तद्धितान्तं विशेषणम्
चक्रिणम्	चक्रिन्-नका.पुं.द्विती.एक.तद्धितान्तं विशेषणम्
च	अव्ययम्
तेजोराशिम्	तेजोराशि-इका.पुं.द्विती.एक.समस्तं विशेषणम्
सर्वतः	तसन्तमव्ययम्

दीप्तिमन्तम्	दीप्तिमत्–तका.पुं.द्विती.एक.तद्धितान्तं विशेषणम्
पश्यामि	दृश्+लट् उ.पु.एक.भ्वादि.सकर्म.परस्मै.कर्तरि क्रिया.
त्वाम्	युष्मद्–दका.द्विती.एक.सर्व.विशेष्यम्
दुर्निरीक्ष्यम्	दुर्निरीक्ष्य–अका.पुं.द्विती.एक.विशेषणम् समस्तम्
समन्तात्	अव्ययम्
दीप्तानलार्कद्युतिम्	दीप्तानलार्कद्युति–इका.पुं.द्विती.एक.समस्तं विशेषणम्
अप्रमेयम्	अप्रमेय–अका.पुं.द्विती.एक.समस्तं विशेषणम्

वर्गीकरणाभ्यासः

अधस्तनेषु वर्गेषु श्लोकपदानि लिखतु–

(i) द्वितीयान्तम् (९) ....

(ii) अकारान्तम् (२) ....

(iii) इकारान्तम् (२) ....

(iv) तकारान्तम् (१) ....

(v) नकारान्तम् (३) ....

(vi) पुंलिङ्गम् (८) ....

(vii) विशेषणम् (८) ....

(viii) विशेष्यम् (१) ....

(ix) तद्धितान्तम् (४) ....

(x) समस्तम् (४) ....

(xi) सर्वनाम (१) ....

(xii) अव्ययम् (३) ....

(xiii) क्रियापदम् (१) ....

(xiv) विशेष्यम् अनुलेख्यानि विशेषणानि। ....

आकाङ्क्षाविस्तरः

पश्यामि (= अवलोके)।

कः पश्यति? **अहं पश्यामि।**

अहं कं पश्यामि?	....	(सर्व. द्विती. एक.)
अहं कीदृशं त्वां पश्यामि?	....	(नका. द्विती.)
किरीटिनं त्वां पुनः कथम्भूतम्?	....	(नका. द्विती.)
किरीटिनं गदिनं त्वां पुनः कथम्भूतम्?	....	(नका. द्विती.)
किरीटिनं गदिनं चक्रिणं त्वां पुनः कीदृशम्?	....	(इका. द्विती.)
किरीटिनं गदिनं चक्रिणं तेजोराशिं त्वां पुनः कीदृशम्?	....	(तका. द्विती.)
किरीटिनं गदिनं चक्रिणं तेजोराशिं त्वां कुत्र दीप्तिमन्तं पश्यामि?	....	(तसन्तम्)
किरीटिनं गदिनं चक्रिणं तेजोराशिं सर्वतः दीप्तिमन्तं त्वां पुनः कीदृशम्?	....	(अका. द्विती.)
किरीटिनं गदिनं चक्रिणं तेजोराशिं सर्वतः दीप्तिमन्तं त्वां कथं दुर्निरीक्ष्यं पश्यामि?	....	(इका. द्विती.)
किरीटिनं गदिनं चक्रिणं तेजोराशिं सर्वतः दीप्तिमन्तं दुर्निरीक्ष्यं त्वां कुत्र दीप्तानलार्कद्युतिं पश्यामि?	....	(अव्ययम्)
किरीटिनं गदिनं चक्रिणं तेजोराशिं सर्वतः दीप्तिमन्तं दुर्निरीक्ष्यं समन्ताद् दीप्तानलार्कद्युतिं त्वां पुनश्च कीदृशं पश्यामि?	....	(अका. द्विती.)

(हे विश्वरूप! अहम्) त्वां किरीटिनं गदिनं चक्रिणं तेजोराशिं सर्वतः दीप्तिमन्तं दुर्निरीक्ष्यं (यतो हि) समन्ताद् दीप्तानलार्कद्युतिम् (अत एव) अप्रमेयं पश्यामि। इत्यन्वयः।

पदार्थः

पदम्	संस्कृतम्	हिन्दी
(हे विश्वरूप! अहम्)	(हे विश्वरूप! अहम्)	(हे विराट् पुरुष! मैं)
त्वाम्	भवन्तम्	आपको
किरीटिनम्	मुकुटयुक्तम्	मुकुट पहने
गदिनम्	गदायुतम्	गदा लिए हुए
चक्रिणम्	सुदर्शनचक्रसहितम्	चक्र धारण किए हुए

तेजोराशिम्	तेजःपुञ्जम्	तेज के पुञ्ज
सर्वतः	सर्वत्र	सब ओर से
दीप्तिमन्तम्	कान्तिमन्तम्	प्रकाशमान
समन्तात्	परितः	चारों तरफ
दीप्तानलार्कद्युतिम्	प्रज्ज्वलितवह्निसूर्यतेजस्कम्	प्रज्ज्वलित अग्नि और सूर्य के सदृश ज्योतियुक्त
(अत एव)	(अत एव)	(इसीलिए)
दुर्निरीक्ष्यम्	द्रष्टुमशक्यम्	कठिनाई से देखने योग्य
अप्रमेयम्	अशक्यपरिच्छेदम्	बुद्धि के अविषय, अपरिमेय
च	तथा	और
पश्यामि	विलोकयामि	देख रहा हूँ।

भावार्थः

संस्कृतम्–अर्जुनः विराट्पुरुषस्य आभूषणम् आयुधं दीप्तिं च वर्णयति–

हे विश्वरूप! अहं भवतः शिरस्सु धृतानि मुकुटानि, हस्ते कौमोदकीं गदाम्, अन्यस्मिन् हस्ते च सुदर्शनचक्रं पश्यामि। अपि च भवन्तं प्रकाशपुञ्जं सर्वासु दिक्षु प्रकाशमानं च पश्यामि। किञ्च वह्निः सूर्यो वा यदि परितः प्रज्ज्वलितः स्यात् तदा तयोरिव भवतः तेजः पश्यामि। अत एव भवान् प्राकृतैः जनैः द्रष्टुम् अशक्यः तथा तेषां बुद्धेः अविषयश्च अस्ति। अतोऽहं भवन्तम् अशक्यदर्शनम् अशक्यपरिच्छेदं च मन्ये।

इह श्लोके सर्वाणि पदानि द्वितीयान्तानि 'त्वाम्' इत्यस्य विशेषणानि सन्ति।

हिन्दी–इस श्लोक में अर्जुन ने विराट् पुरुष के आभूषण, आयुध एवं तेजस् का वर्णन किया है–

हे विश्वरूप! मैं आपके मस्तकों में पहने हुए मुकुटों, हाथ में स्थित कौमोदकी नामक गदा और दाहिने हाथ में धारित सुदर्शन चक्र को देख रहा हूँ। इस समय आप प्रकाश के पुंज हैं और सब ओर प्रकाशमान हो रहे हैं। हे प्रभो! यदि चारों तरफ जलती आग की भयंकर लपट और प्रचण्ड तेज से चमकते सूर्य हों तो उनके समान आपका तेज प्रज्ज्वलित हो रहा है। अत एव सामान्य जन न आपको देख सकते हैं और न सोच ही सकते हैं। आपके प्रकाश का न कोई परिमाप हो सकता है और न उसे कोई देख सकता है।

इस श्लोक में केवल द्वितीयान्त पदों का प्रयोग हुआ है, जो 'त्वाम्' विश्वरूप श्रीकृष्ण के विशेषण हैं।

अवबोधाभ्यासः

अधस्तनान् प्रश्नान् उत्तरयतु–

१. इह श्लोके अर्जुनः किं वर्णयति? ....

२. शिरोभूषणस्य किं नाम? ....

३. भगवतो गदायाः किमभिधानम्? ....

४. सुदर्शनचक्रं भगवता कस्मिन् हस्ते धार्यते? ....

५. प्रकाशपुञ्जस्य कुत्र आरोपः? ....

६. अप्रमेयमित्यस्य किं तात्पर्यम्? ....

७. विश्वरूपः कैर्जनैः दुर्निरीक्ष्यः? ....

व्याकरणाभ्यासः

(अ) सन्धिः

१. दीप्तानल	–	दीप्त + अनल	–	दीर्घसन्धिः
२. दीप्तानलार्क	–	दीप्तानल + अर्क	–	दीर्घसन्धिः
३. समन्ताद् दीप्त	–	समन्तात् + दीप्त	–	जश्त्वसन्धि
४. सर्वतो दीप्तिमन्तम्	–	सर्वतः + दीप्तिमन्तम्	–	विसर्गसन्धिः
५. तेजोराशिम्	–	तेजः + राशिम्	–	विसर्गसन्धिः
६. किरीटिनं गदिनम्	–	किरीटिनम् + गदिनम्	–	अनुस्वारसन्धिः

अधस्तनेषु रेखाङ्कितेषु सन्धिं विसन्धिं च करोतु–

(i) किरीटेनार्कवर्चसा पादयोः पस्पर्श। ....

(ii) कृष्णस्यामिततेजसः + निकटे जगाम। ....

(iii) हित्वा + आर्यमार्गं प्रभजन्ति। ....

(iv) नारायणस्य + अंशम् + मन्ये। ....

(v) महौजसो महावीर्याः सन्ति सैनिकाः। ....

(vi) शुक्लः + नीलः + हरितश्च वर्णाः सन्ति। ....

(vii) वनम् अव्रजत् + हरिः। ....

(viii) वाक् + ईश्वरीं नमति। ....

(ix) चेष्टितम् + विहतम् + मन्ये। ....

(आ) समासः

१. तेजोराशिम् – तेजसः राशिम् – षष्ठीतत्पुरुषः

२. दुर्निरीक्ष्यम् – दुःखेन निश्शेषेण ईक्ष्यम्
– दुर् + निर् + ईक्ष्यम् – उपपदसमासः

३. दीप्तानलार्कद्युतिम् – अनलश्च अर्कश्च इति अनलार्कौ – द्वन्द्वः

अनलार्कयोः द्युतिः इति – अनलार्कद्युतिः – षष्ठीतत्पुरुषः

दीप्ता अनलार्कद्युतिरिव द्युतिः यस्य तम् – बहुव्रीहिः

४. अप्रमेयम् – न प्रमेयम् इति – नञ्तत्पुरुषः

अधस्तनेषु रेखाङ्कितेषु विग्रहसमासौ करोतु–

(i) कालिन्दीजलम् आविशत्। ....

(ii) भूमिभारापनुत्तये अवतीर्णोऽसि। ....

(iii) स्वभावो दुरतिक्रमः। ....

(iv) वर्षर्तौ दुर्निवार्यः पङ्कः। ....

(v) गोगोपगोकुलपतिं गोविन्दम् अभ्यषिञ्चत्। ....

(vi) नवकुङ्कुमारुणम् आननमपश्यत्। ....

(vii) उदितादित्यशशाङ्कसौभगं देवमपश्यत्। ....

(viii) अहिंस्रा ग्राम्यपशवः। ....

(इ) तद्धितप्रत्ययः

१. किरीटिनम् – किरीटम् अस्ति अस्य – किरीट + इनि (इन्) किरीटिन्

२. गदिनम् – गदा अस्यास्ति – गदा + इनि = गदिन्

३. चक्रिणम् – चक्रम् अस्यास्ति – चक्र + इनि = चक्रिन्

४. दीप्तिमन्तम् - दीप्तिः अस्यास्ति - दीप्ति + मतुप् (मत्) = दीप्तिमत्

५. सर्वतः - सर्व + तस् = सर्वतः

अधस्तनेषु विग्रहेषु प्रत्ययान्तं रूपं लिखतु–

(i) हस्तः अस्यास्ति - ....

(ii) विजयः अस्यास्ति तम् - ....

(iii) कान्तिः अस्यास्ति - ....

(iv) वर्तिः अस्मिन् अस्ति - ....

(v) ग्रन्थयः अस्य सन्ति तत् - ....

(vi) मेखलातः निर्गता किङ्किणी - ....

(ई) कृत्प्रत्ययः

१. दीप्ति - दीप् + क्तिन् (ति) - दीपनादिति दीप्तिः।

२. दुर्निरीक्ष्यम् - दुर् + निर् + ईक्ष् + यत् (य) = दुःखेन निरीक्षितुं योग्यम् - दुर्निरीक्ष्यम्।

३. दीप्त - दीप् + क्त (त) = दीप्यते यत् - दीप्तम्।

४. द्युतिम् - दिव् + क्तिन् = द्योतनमिति द्युतिः।

५. प्रमेयम् - प्र + मा + यत् = प्रमातुं योग्यमिति - प्रमेयम्।

अधस्तनेभ्यः प्रकृतिप्रत्ययेभ्यः निष्पन्नं रूपं वाक्ये प्रयुङ्क्ताम्–

(i) आ + दा + यत् - ....

(ii) आ + ख्या + यत् - ....

(iii) आ + घ्रा + यत् - ....

(iv) आ + धा + यत् - ....

(v) यम् + क्तिन् - ....

(vi) वि + तन् + क्तिन् - ....

(vii) सु + वच् + क्तिन् - ....

(viii) उद् + इ + क्त - ....

(उ) क्रियाकारकसम्बन्धः

पश्यामि	-	सकर्म. परस्मै. कर्तरि क्रिया	दीप्तिमन्तम्	-	कर्मविशेषणम्
अहम्	-	आक्षिप्तः कर्ता	सर्वतः	-	दीप्तिक्रियायाः विशेषणम्
त्वाम्	-	कर्म	दुर्निरीक्ष्यम्	-	कर्मविशेषणम्
किरीटिनम्	-	कर्मविशेषणम्	दीप्तानलार्कद्युतिम्	-	कर्मविशेषणम्
गदिनम्	-	कर्मविशेषणम्	समन्तात्	-	दीप्तक्रियायाः विशेषणम्
चक्रिणम्	-	कर्मविशेषणम्	अप्रमेयम्	-	कर्मविशेषणम्
तेजोराशिम्	-	कर्मविशेषणम्			

(ऊ) छन्दोऽलङ्कारविधानम्

इह विश्वरूपे तेजोराशेः आरोपाद् रूपकालङ्कारः। दीप्तानलार्कयोः द्युतिरिव द्युतिर्यस्य तमिति बहुव्रीहिसमासेन साधर्म्यवाचकशब्दयोः लोपाद् लुप्तोपमालङ्कारः। अस्य श्लोकस्य प्रथमपादे उपेन्द्रवज्रा तथा शेषेषु त्रिषु पादेषु इन्द्रवज्रा। अनयोः समावेशात् कीर्तिः नाम उपजातिच्छन्दः।

◆◆◆

८६. श्लोकः

त्वमक्षरं परमं वेदितव्यम्
त्वमस्य विश्वस्य परं निधानम्।
त्वमव्ययः शाश्वतधर्मगोप्ता
सनातनस्त्वं पुरुषो मतो मे।।(भ. गी. ११.१८)

पदच्छेदः

त्वम्, अक्षरम्, परमम्, वेदितव्यम्,
त्वम्, अस्य, विश्वस्य, परम्, निधानम्।

त्वम्, अव्ययः, शाश्वत-धर्म-गोप्ता,
सनातनः, त्वम्, पुरुषः, मतः, मे।।

पदच्छेदाभ्यासः

अधस्तनानि पदानि विच्छिनत्तु-

(क) त्वमक्षरम् - ....

(ख) परमं वेदितव्यम् - ....

(ग) शाश्वतधर्मगोप्ता - ....

(घ) सनातनस्त्वम् - ....

(ङ) पुरुषो मतः - ....

(च) मतो मे - ....

पद परिचयः

पदम्	विश्लेषणम्
त्वम्	युष्मद् - दका. प्र. एक. सर्व.
अक्षरम्	अक्षर - अका. नपुं. प्र. एक. समस्तं विशेषणम्
परमम्	परम - अका. नपुं. प्र. एक.
वेदितव्यम्	वेदितव्य - अका. नपुं. प्र. एक. कृदन्तं विशेषणम्
त्वम्	युष्मद् - दका. प्र. एक. सर्व.
अस्य	इदम् - मका. नपुं. ष. एक. सर्व. विशेषणम्

विश्वस्य	विश्व - अका. नपुं. ष. एक. सर्व.
परम्	पर - अका. नपुं. प्र. एक. विशेषणम्
निधानम्	निधान - अका. नपुं. प्र. एक. कृदन्तं विशेषणम्
त्वम्	युष्मद् - दका. प्र. एक. सर्व.
अव्ययः	अका. पुं. प्र. एक. समस्तं विशेषणम्
शाश्वत	शाश्वत - अका. तद्धितान्तं समासपूर्वपदम् विशेषणम्
धर्मगोप्ता	धर्मगोप्तृ - ऋका. पुं. प्र. एक. कृदन्तं विशेषणम्
सनातनः	सनातन - अका. पुं. प्र. एक. विशेषणम्
त्वम्	युष्मद् - दका. प्र. एक. सर्व.
पुरुषः	पुरुष - अका. पुं. प्र. एक.
मतः	मत - अका. पुं. प्र. एक. क्तान्तं विशेषणम्
मे	अस्मद् - दका. ष. एक. सर्व.

वर्गीकरणाभ्यासः

अधस्तनेषु वर्गेषु श्लोकपदानि विभजतु–

(i) प्रथमान्तम् (१४) ....

(ii) षष्ठ्यन्तम् (३) ....

(iii) अकारान्तम् (१) ....

(iv) ऋकारान्तम् (१) ....

(v) सर्वनाम (७) ....

(vi) पुंलिङ्गम् (५) ....

(vii) नपुंसकम् (७) ....

(viii) समस्तम् (३) ....

(ix) कृदन्तम् (६) ....

(x) तद्धितम् (१) ....

(xi) विशेष्यम् (४) ....

(xii) विशेषणम् (९) ....

आकाङ्क्षाविस्तरः

वेदितव्यम् (= ज्ञेयम्)।

कैः वेदितव्यम्? **मुमुक्षुभिः वेदितव्यम्।**

मुमुक्षुभिः किं वेदितव्यम्? .... (युष्मद् प्र.)

कीदृशं त्वं वेदितव्यम्? .... (समास्तं प्र.)

त्वं कीदृशम् अक्षरं वेदितव्यम्? .... (अका. विशे.)

त्वं परमम् अक्षरं मुमुक्षुभिः वेदितव्यम् असि।

निधानम् (= आश्रयः)।

किं निधानम्? **त्वं निधानम् असि।**

त्वं कीदृशं निधानम्? .... (अका. विशेषणम्)

त्वं कस्य परं निधानम्? .... (अका. ष. एक.)

त्वं कस्य विश्वस्य परं निधानम्? .... (इदम् ष.)

त्वम् अस्य विश्वस्य परं निधानम् असि।

अव्ययः (= अविनाशी)।

कः अव्ययः? **त्वम् अव्ययः।**

त्वं कीदृशः अव्ययः? .... (ऋका. प्र.)

अव्ययः त्वं शाश्वतधर्मगोप्ता असि।

पुरुषः (सोपाधिकः आत्मा)।

कः पुरुषः? **त्वं पुरुषः।**

त्वं कीदृशः पुरुषः? .... (अका. विशे.)

त्वं सनातनः पुरुषः मे मतः असि।

पदार्थः

पदम्	संस्कृतम्	हिन्दी
त्वम्	संमुखीनः श्रीकृष्णः	आप
वेदितव्यम्	ज्ञातव्यम्	(उपनिषदों से) वेद्य

परमम्	परम्	परात्पर
अक्षरम्	निर्गुणं ब्रह्म	निर्गुण ब्रह्म (हैं)
त्वम्	त्वं (श्रीकृष्णः)	आप
अस्य	एतस्य	इस
विश्वस्य	जगतः	जगत् के
परम्	अन्तिमम्	अन्तिम
निधानम्	आधारः	कारण (हैं)
त्वम्	त्वं श्रीकृष्णः	आप
अव्ययः	नित्यः	अविनाशी
शाश्वतधर्मगोप्ता	नित्यधर्मपालकः	मानव धर्म के रक्षक (हैं)
त्वम्	त्वं श्रीकृष्णः	आप
सनातनः	चिरन्तनः	पुराण
पुरुषः	जीवात्मा	पुरुष
मे	मम	मुझे
मतः	मतिस्थितः	मान्य (हैं)

भावार्थः

संस्कृतम्—अर्जुनः भगवतः श्रीकृष्णस्य योगशक्तिं दृष्ट्वा अनुमिनोति—

हे प्रभो! त्वमेव मुमुक्षुभिर्जनैः वेदान्तवाक्यैः ज्ञातव्यं निरुपाधिकं निष्प्रपञ्चं निर्गुणं ब्रह्मासि। अनेन श्रीकृष्णः शिवमद्वैतं तुरीयं ब्रह्म इति प्रतिपादितम्।

हे प्रभो! त्वमस्य निखिलस्य प्रपञ्चाञ्चितस्य ब्रह्माण्डस्य प्रकृष्टाश्रयः असि। अनेन श्रीकृष्णः सोपाधिकं सगुणं कारणब्रह्म इति संसूचितं भवति।

हे प्रभो! त्वम् अविनाशी नित्यः शाश्वतस्य वैदिकधर्मस्य पालयिता असि। अनेन वाक्येन श्रीकृष्ण एव कार्यब्रह्म हिरण्यगर्भः सगुणः ईश्वरः इति निवेदितम्।

हे प्रभो! त्वमेव सनातनोऽनादिपुरुषः मे मतः। अहं त्वामेव अनादिपुरुषं जीवात्मानं मानयामीत्यर्थः।

हिन्दी—अर्जुन भगवान् श्रीकृष्ण की योगशक्ति को देखकर उनके विषय में अनुमान कर रहा है—

हे प्रभो! आप ही निर्गुण निरुपाधिक अक्षर ब्रह्म हैं, जिन्हें मुमुक्षु साधक वेदान्त वाक्यों से

जानना चाहते हैं। 'शिवमद्वैतं चतुर्थं मन्यन्ते' वाक्य से जिस चतुर्थ शिवतत्त्व का कथन हुआ है, वह आप ही हैं।

हे प्रभो! आप ही इस अखिल कोटि ब्रह्माण्ड के परमाधार हैं। अर्थात् सगुण सोपाधिक कारण ब्रह्म आप ही हैं। हे प्रभो! आप ही शाश्वत वैदिक धर्म के रक्षक हैं। समय-समय पर अवतार लेकर इसकी रक्षा करते हैं, हे प्रभो! मैं आपको ही सनातन अनादि पुरुष अनादि जीवात्मा मानता हूँ।

अवबोधाभ्यासः

अधस्तनान् प्रश्नान् उत्तरयतु–

१. अस्मिन् श्लोके किं वर्णितम्? ....

२. इह परमम् अक्षरमिति पदाभ्यां किं प्रतिपादितम्? ....

३. श्रीकृष्ण एव कारणब्रह्म इत्याशयः कुत्र सङ्केतितः? ....

४. शाश्वतो धर्मः इह कोऽभिप्रेतः? ....

५. सनातनः पुरुषः इत्यस्य कः भावः? ....

६. जीवात्मा सनातनः भवितुमर्हति न वा? ....

७. इह श्रीकृष्णे चतस्त्रः कोटयः उद्भाविताः, ताः काः? ....

व्याकरणाभ्यासः

(अ) सन्धिः

१. सनातनस्त्वम्	–	सनातनः + त्वम्	–	श्चुत्वसन्धिः, विसर्गसन्धिः
२. पुरुषो मतः	–	पुरुषः + मतः	–	विसर्गसन्धिः
३. मतो मे	–	मतः + मे	–	विसर्गसन्धिः
४. त्वं पुरुषः	–	त्वम् + पुरुषः	–	अनुस्वारसन्धिः
५. परं निधानम्	–	परम् + निधानम्	–	अनुस्वारसन्धिः
६. परमं वेदितव्यम्	–	परमम् + वेदितव्यम्	–	अनुस्वारसन्धिः
७. अक्षरं परमम्	–	अक्षरम् + परमम्	–	अनुस्वारसन्धिः

अधस्तनेषु पदेषु सन्धिमसन्धिं च करोतु–

(क) मातः + त्वम् आयाहि शीघ्रम्। ....

(ख) बालकस्तरति सरसि। ....

(ग) तैस्तैः पदैस्तत्पदवीम् अन्वीक्षन्ते। ....

(घ) भारं वहतो गोविन्दस्य पादचिह्नानि। ....

(ङ) कृष्णः + विहाय गोपीं गतः। ....

(च) गोप्यो विचेतसः चेरुः। ....

(छ) प्रीतो गोविन्दो मुरलीमवादयत्। ....

(ज) सा च मेने तदात्मानं वरिष्ठं सर्वयोषिताम्। ....

(झ) न पारयेऽहं चलितुम्। ....

(ञ) उल्वणम् दावाग्निम् पश्यत। ....

(आ) समासः

१. अक्षरम् – न क्षरम् इति अक्षरम् – नञ्तत्पुरुषः

२. अव्ययः – न व्ययः इति अव्ययः – नञ्तत्पुरुषः

३. शाश्वतधर्मगोप्ता – शाश्वतश्च असौ धर्मः इति शाश्वतधर्मः – कर्मधारयः

शाश्वतधर्मस्य गोप्ता इति शाश्वतधर्मगोप्ता – षष्ठीतत्पुरुषः

अधस्तनेषु रेखाङ्कितेषु विग्रहं समासं च लिखतु–

(क) वृन्दावनलतास्तरून् कृष्णं पृच्छमाना। ....

(ख) भाराक्रान्तस्य कृष्णस्य पदानि पश्यत। ....

(ग) केशप्रसाधनमत्र श्रीकृष्णेन कृतम्। ....

(घ) नन्दसूनोः महात्मनः एतानि पादपद्मानि। ....

(ङ) माधवः करस्पर्शेन वो प्रीतिं जनयति। ....

(च) आरक्तपल्लवान् आम्रस्य पश्यति। ....

(छ) नीलनभोऽङ्गणे विहरन्ति पक्षिणः। ....

(ज) अमोघं तद्वलिदानम्। ....

(झ) अमन्दमानन्दमाप्नोति। ....

(ञ) असङ्केतितं गृहं कथमन्वेष्यम्। ....

(इ) तद्धितप्रत्ययः

१. शाश्वत - शश्वद् भवः इति शश्वत् + अण् (अ) = शाश्वत

अधस्तनेषु विग्रहेषु तद्धितप्रत्ययेन रूपं निष्पादयतु–

(क) उदके भवम्, उदक + अण् = ...

(ख) ग्रीष्मे भवम्, ग्रीष्म + अण् = ...

(ग) जगति भवा, जगत् + अण् = ...

(घ) सरसि भवम्, सरस् + अण् = ...

(ङ) सरय्वां भवः, सरयू + अण् = ...

(च) श्रीमति भवम्, श्रीमत् + अण् = ...

(ई) कृत्प्रत्ययः

१. अक्षरम् - क्षरतीति - क्षर् + अच् (अ) = क्षरम्
न क्षरम् इति अक्षरम्

२. वेदितव्यम् - वेदितुं योग्यमिति - वेद् + तव्य = वेदितव्य

३. निधानम् - निधीयतेऽस्मिन् इति - नि + धा + ल्युट् (अन) = निधान

४. अव्ययः - व्येति इति - वि + इ + अच् = व्यय
नव्ययः इति अव्ययः

५. गोप्ता - गोपायतीति - गुप् + तृच् (तृ) = गोप्तृ

६. पुरुषः - पुरि शेते इति पुरुषः

७. मतः - अमानि इति - मन् + क्त (त) = मत

अधस्तनेभ्यः प्रकृतिप्रत्ययेभ्यः निष्पन्नं पदं वाक्ये व्यवहरतु–

(क) विद् + तृच् - ....

(ख) भि + तव्यत् - ....

(ग) उद्या + ल्युट् - ....

(घ) वि + धा + क्त - ....

(ङ) वि + धा + तृच् - ....

(च) दा + तव्यत् - ....

(छ) उप + कृ + ल्युट् - ....

(ज) वि + अञ्ज् + क्त - ....

(झ) गम् + तव्यत् - ....

(ञ) वि + ज्ञा + तृच् - ....

(ट) अव + नम् + क्त - ....

(ठ) अधि + गम् + अच् - ....

(उ) कारकम्

अयं बन्धुः वेदितव्यः, अदितिर्देवमाता वेदितव्या, त्वम् अक्षरं ब्रह्म वेदितव्यम् इत्यादिषु वाक्येषु तव्यत्प्रत्ययान्तः कर्मणो विशेषणम्, अतः प्रयोगे तल्लिङ्गं वचनं च भजते। कर्मणो विशेषत्वात् कर्मणि तव्यत् इति बोध्यम्। अकर्मकधातुभ्यश्च अयं भावे विधीयते। यथा– त्वया उत्थातव्यम्, बालकैः क्रीडितव्यम् इत्यादि। सकर्मकधातुभ्योऽपि कर्मणोऽविवक्षायां भावेऽयं प्रत्ययः। यथा– अस्माभिर्वक्तव्यम् इत्यादि। तव्यत्प्रत्ययान्तेन क्रियापदेन पञ्च वाक्यानि रचितव्यानि।

....

....

....

....

....

(ऊ) क्रियाकारकभावसम्बन्धः

वेदितव्यम्	-	तव्यान्तकर्मणि क्रिया	विश्वस्य	-	सम्बन्धषष्ठी
मुमुक्षुभिः	-	आक्षिप्तः कर्ता	अस्य	-	सम्बन्धविशेषणम्
त्वम्	-	कर्म, उद्देश्यम्	असि	-	आक्षिप्ता क्रिया
अक्षरम्	-	कर्मविशेषणविशेषणम्, विधेयम्	त्वम्	-	आक्षिप्तक्रियायाः कर्ता
परमम्	-	कर्मविशेषणम्, विधेयम्	पुरुषः	-	विशेषणम्
असि	-	आक्षिप्ता क्रिया	सनातनः	-	विशेषणविशेषणम्
त्वम्	-	कर्ता, उद्देश्यम्	मतः	-	कर्मणि क्तान्तक्रिया

निधानम्	-	कर्तृविशेषणम्, विधेयम्	मे	-	कर्तरि षष्ठी
परम्	-	कर्तृविशेषणविशेषणम्, विधेयम्			

(ए) छन्दोविधानम्

इह पद्ये चतुर्षु पादेषु उपेन्द्रवज्रा छन्दः। सर्वत्र चर्तुषु पादेषु एकैकं वाक्यमिति इह चत्वारि वाक्यानि। तेषु त्वमिति उद्दिश्य विशेषणेन विधानं कृतम्।

(ऐ) पर्यायशब्दः

१. परमम् - १. परम् (अका. त्रिलि.), २. प्रकृष्टम् (अका. त्रिलि.), ३. चरमम् (अका. त्रिलि.)

२. शाश्वतः - १. सनातनः (अका. त्रिलि.), २. नित्यः (इका. त्रिलि.), ३. अनादिः (अका. त्रिलि.), ४. सिद्धः (अका. त्रिलि.)

३. पुरुषः - १. आत्मा (आत्मन् - नका. पुं.), २. जीवः (अका. पुं.), ३. देही (देहिन्, नका. पुं.), ४. क्षेत्रज्ञः (अका. पुं.)

◆◆◆

८७. श्लोकः

अनादिमध्यान्तमनन्तवीर्यम्
अनन्तबाहुं शशिसूर्यनेत्रम्।
पश्यामि त्वां दीप्तहुताशवक्त्रं
स्वतेजसा विश्वमिदं तपन्तम्।। (भ. गी. ११.१९)

पदच्छेदः

अनादि-मध्य+अन्तम्, अनन्त-वीर्यम्,
अनन्त-बाहुम्, शशि-सूर्य-नेत्रम्।

पश्यामि, त्वाम्, दीप्त-हुताश-वक्त्रम्,
स्व-तेजसा, विश्वम्, इदम्, तपन्तम्।।

पदच्छेदाभ्यासः

अधस्तनेषु पदेषु विच्छेदं करोतु–

(i) अनादिमध्यान्तम् - ....

(ii) अनन्तवीर्यम् - ....

(iii) अनन्तबाहुम् - ....

(iv) त्वां दीप्त - ....

(v) दीप्तहुताशवक्त्रम् - ....

(vi) स्वतेजसा - ....

(vii) इदं तपन्तम् - ....

पदपरिचयः

पदम्	विश्लेषणम्
अनादिमध्यान्तम्	अका. पुं. द्विती. एक. समस्तं वि. विधेयम् १
अनन्तवीर्यम्	अका. पुं. द्वि. एक. समस्तं वि. विधेयम् २
अनन्तबाहुम्	अनन्तबाहु उका. पुं. द्वि. एक. समस्तं वि. विधेयम् ३
शशिसूर्यनेत्रम्	अका. पुं. द्वि. एक. समस्तं वि. विधेयम् ४

पश्यामि	दृश् + लट् उपु. एक. परस्मै. कर्तरि क्रिया.
त्वाम्	युष्मद् - दका. द्विती. एक. सर्व. विशे. उद्देश्यम्
दीप्तहुताशवक्त्रम्	अका. पुं. द्विती. एक. समस्तं वि. विधेयम् ५
स्वतेजसा	स्वतेजस् - सका. नपुं. तृ. एक. समस्तम्
विश्वम्	विश्व - अका. नपुं. द्विती. एक. सर्व. विशे.
इदम्	इदम् - मका. नपुं. द्विती. एक. सर्व. विशे.
तपन्तम्	तपत् - तका. पुं. द्विती. एक. शत्रन्तं विशे. विधेयम् ६

वर्गीकरणाभ्यासः

अधस्तनेषु वर्गेषु श्लोकपदानि विभज्य लिखतु–

(i) द्वितीयान्तम् (९) ....

(ii) तृतीयान्तम् (१) ....

(iii) अकारान्तम् (५) ....

(iv) उकारान्तम् (१) ....

(v) तकारान्तम् (१) ....

(vi) सकारान्तम् (१) ....

(vii) सर्वनाम (३) ....

(viii) समस्तम् (६) ....

(ix) शत्रन्तम् (१) ....

(x) क्रियापदम् (१) ....

(xi) विशेष्यम् (२) ....

(xii) विशेषणम् (७) ....

(xiii) उद्देश्यम् (१) ....

(xiv) विधेयम् (६) ....

(xv) उद्देश्यमनु विधेयानि लिखन्तु। ....

आकाङ्क्षाविस्तरः

पश्यामि (= अवलोकयामि)।

कः पश्यति?	अहं पश्यामि।	
अहं कं पश्यामि?	....	(युष्मद् द्विती.)
अहं त्वां कीदृशं पश्यामि?	....	(विशेषणम् १)
अनादिमध्यान्तं त्वां पुनश्च कीदृशं पश्यामि?	....	(विशेषणम् २)
अनादिमध्यान्तम् अनन्तवीर्यं त्वां पुनश्च कीदृशं पश्यामि?	....	(विशेषणम् ३)
त्वाम् अनादिमध्यान्तम् अनन्तवीर्यम् अनन्तबाहुं पुनश्च कीदृशं पश्यामि?	....	(विशेषणम् ४)
अनादिमध्यान्तम् अनन्तवीर्यम् अनन्तबाहुं शशिसूर्यनेत्रं त्वां पुनश्च कीदृशं पश्यामि?	....	(विशेषणम् ५)
अनादिमध्यान्तम् अनन्तवीर्यम् अनन्तबाहुं शशिसूर्यनेत्रं दीप्तहुताशवक्त्रं त्वां पुनश्च कीदृशम् पश्यामि?	....	(विशेषणम् ६)
अनादिमध्यान्तम् अनन्तवीर्यम् अनन्तबाहुं	....	(सर्व. द्वि. एक.)
कथंभूतं विश्वं तपन्तम्?	....	(सर्व. द्वि. एक.)
इदं विश्वं केन तपन्तम्?	....	(सका. तृ.)

स्वतेजसा इदं विश्वं तपन्तं तथाभूतं त्वां पश्यामि।

पदार्थः

पदम्	संस्कृतम्	हिन्दी
त्वाम्	श्रीकृष्णम्	आपको
अनादिमध्यान्तम्	उत्पत्तिस्थितिलयरहितम्	उत्पत्ति स्थिति और आदि, मध्य और अन्त से रहित
अनन्तवीर्यम्	अपरिमितपराक्रमम्	अनन्त सामर्थ्य से युक्त
अनन्तबाहुम्	असंख्यभुजम्	अनन्त भुजा वाले

शशिसूर्यनेत्रम्	चन्द्रसूर्यनयनम्	चन्द्र और सूर्य रूप नेत्र वाले
दीप्तहुताशवक्त्रम्	प्रज्वलितवह्निमुखम्	मुख में जलती आग वाले
स्वतेजसा	आत्मवर्चसा	अपने तेज से
इदम्	दृश्यमानम्	इस
विश्वम्	लोकम्	जगत् को
तपन्तम्	संतापयन्तम्	तपाते हुए
पश्यामि	प्रेक्षे	देख रहा हूँ

भावार्थः

संस्कृतम्—अर्जुनः विश्वरूपस्य भगवतः श्रीकृष्णस्य विस्तारं तेजश्च आख्याति—

हे प्रभो! अहं तवोत्पत्तिं स्थितिं प्रलयं वा न जानामि। तव वीर्यं बलं सामर्थ्यं वा अपरिमितं वर्तते। तव हस्ताः अथ च हस्तोपलक्षिताः सर्वे शरीरावयवाः अगणिताः सन्ति। किञ्च चन्द्रः सूर्यश्च क्रमेण तव वामदक्षिणे नयने स्तः। हुताशो वह्निः प्रदीप्तो महाज्वालः ते मुखे स्थितः। एवञ्च एतस्य प्रकाशेन इदं सम्पूर्णं विश्वब्रह्माण्डं तापयन्तं प्रकाशयन्तं च त्वामहं पश्यामि।

हिन्दी—यहाँ अर्जुन भगवान् श्रीकृष्ण के विराट् रूप का विस्तार और प्रकाश का वर्णन कर रहे हैं—

हे प्रभो! मैं आपकी उत्पत्ति, स्थिति और प्रलय को नहीं जानता तथा आपके सामर्थ्य का पार नहीं पा रहा हूँ, अतः मैं आपको आदि, मध्य और अन्त से हीन और अनन्त शक्तिमान् समझ रहा हूँ। हे भगवन्! आपकी भुजायें तथा आपके शरीर के सारे अंग अनगिनत दिखाई दे रहे हैं। चन्द्र और सूर्य आपके बायें और दाहिने नेत्र लग रहे हैं तथा आपके मुख में जलती आग की लपटें धधक रही हैं। हे स्वामिन्! आप अपने तेज से इस सम्पूर्ण विश्व ब्रह्माण्ड को तपा रहे हैं और चैतन्य प्रकाश से प्रकाशित कर रहे हैं।

अवबोधाभ्यासः

अधस्तनानां प्रश्नानां समाधानं करोतु—

१. अर्जुनोऽस्मिन् श्लोके किं वर्णयति? ....

२. सर्वस्मिन् देशे सर्वस्मिन् काले वा स्थितः किमुच्यते? ....

३. यस्य वीर्यमन्तहीनं भवति स किमुच्यते? ....

४. इह बाहुशब्देन किमुपलक्षितम्? ....

५. विराड्रूपस्य सूर्याचन्द्रमसौ कुत्र स्थितौ? ....

६. भगवतः मुखे कः प्रज्वलितो दृश्यते? ....

७. विराट्तेजः किं तापयति? ....

व्याकरणाभ्यासः

(अ) सन्धिः

१. मध्यान्तम् – मध्य + अन्तम् – दीर्घः

२. हुताश – हुत + आश – दीर्घः

३. इदं तपन्तम् – इदम् + तपन्तम् – अनुस्वारः

४. त्वां दीप्त – त्वाम् + दीप्त – अनुस्वारः

५. वक्त्रं स्व – वक्त्रम् + स्व – अनुस्वारः

६. बाहुं शशि – बाहुम् + शशि – अनुस्वारः

अधस्तनेषु रेखाङ्कितेषु सन्धिमसन्धिं वा करोतु–

(i) तव कथामृतं तप्तजीवनम्। ....

(ii) कविभिरीडितं कल्मषापहम्। ....

(iii) हा नाथ! क्वासि क्वासि महाभुज! ....

(iv) मोहितां दुःखितां सखीम्। ....

(v) त्वयि धृत + असवः त्वां विचिन्वते। ....

(vi) सख! उदेयिवान् सात्वताम् + कुले। ....

(vii) फणिफण + अर्पितम् + ते पद + अम्बुजम्। ....

(viii) तेन + अटवीम् अटसि। ....

(आ) समासः

१. अनादिमध्यान्तम् – आदिश्च मध्यं च अन्तश्च इति आदिमध्यान्ताः – द्वन्द्वः

न विद्यमानाः इति अविद्यमानाः – नञ्तत्पुरुषः

अविद्यमानाः आदिमध्यान्ताः यस्य तम् – बहुव्रीहिः

(मध्यमविद्यमानपदलोपः नुडागमश्चेति विशेषः)

२. अनन्तवीर्यम् – न विद्यमानः इति अविद्यमानः – नञ्तत्पुरुषः

अविद्यमानः अन्त यस्मिन् तत् – अनन्तम् – बहुव्रीहिः

अनन्तं वीर्यं यस्य तम् इति अनन्तवीर्यम् - बहुव्रीहिः

३. अनन्तबाहुम् - न विद्यमानः इति अविद्यमानः - नञ्तत्पुरुषः

अविद्यमानः अन्तः येषु ते अनन्ताः - बहुव्रीहिः

अनन्ताः बाहवो यस्य तम् - अनन्तबाहुम् - बहुव्रीहिः

४. शशिसूर्यनेत्रम् - शशी च सूर्यश्चेति - शशिसूर्यौ - द्वन्द्वः

शशिसूर्यौ नेत्रे यस्य तम् इति शशिसूर्यनेत्रम् - बहुव्रीहिः

५. दीप्तहुताशवक्त्रम् - हुतम् अश्नाति इति - हुत + अश् + घञ् =

हुत + आश = हुताशः - उपपदसमासः

दीप्तश्चासौ हुताशश्च इति दीप्तहुताशः - कर्मधारयः

दीप्तहुताशः वक्त्रं वक्त्रे वा यस्य तम् - बहुव्रीहिः

६. स्वतेजसा - स्वस्य तेजसा इति - षष्ठीतत्पुरुषः

अधस्तनेषु रेखाङ्कितेषु विग्रहं समासं च करोतु–

(i) कृष्णे लसत्पीतपटे रतिर्ममास्तु। ....

(ii) श्रीनिकेतनं त्वत्पदाम्बुजम्। ....

(iii) प्रीत्युत्फुल्लदृशः अबला तं विलोकयन्ति। ....

(iv) कृष्णदर्शनलालसं चैतन्यमहाप्रभुं सर्वे प्रणमेयुः। ....

(v) राजानः चारचक्षुषो भवन्ति। ....

(vi) प्रदीप्तोज्ज्वलिताननं रामं ददर्श। ....

(vii) दुन्दुभिनादेन तस्य घोषमकुर्वन्। ....

(viii) अनादिनिधनं ब्रह्म। ....

(ix) विराट्पुरुषः सहस्रशीर्षा सहस्रपात् चासीत् ....

(x) अधना धनमिच्छन्ति। ....

(इ) कृत्प्रत्ययः

१. नेत्रम् - नयति अनेन इति नी + ष्ट्रन् (त्र) = नेत्र।

२. दीप्त - दीप् + क्त (त) = दीप्त।

३. हुत - हु + क्त हुत।

४. वक्त्रम् - वक्ति अनेन इति - वच् + ष्ट्रन् = वक्त्र

५. तपन्तम् - तप् + शतृ (अत्) = तपत्

अधस्तनेभ्यः प्रकृतिप्रत्ययेभ्यः निष्पन्नं पदं वाक्ये प्रयुङ्क्ष्वाम्–

(i) दीप्ति + शतृ - ....

(ii) जनि + शतृ - ....

(iii) बोधि + शतृ - ....

(iv) धू + ष्ट्रन् - ....

(v) सू + ष्ट्रन् - ....

(vi) मुह् + क्त - ....

(vii) क्षुभ् + क्त - ....

(viii) क्रुध् + क्त - ....

(ix) उप + इ + क्त - ....

(x) द्रु + क्त - ....

(ई) क्रियाकारकभावसम्बन्धः

पश्यामि	-	कर्तरि क्रिया	शशिसूर्यनेत्रम्	-	कर्मविशेषणम्
अहम्	-	आक्षिप्तः कर्ता	दीप्तहुताशवक्त्रम्	-	कर्मविशेषणम्
त्वाम्	-	कर्म	तपन्तम्	-	कर्मविशेषणम्
अनादिमध्यान्तम्	-	कर्मविशेषणम्	विश्वम्	-	तपिक्रियायाः कर्म
अनन्तवीर्यम्	-	कर्मविशेषणम्	इदम्	-	कर्मविशेषणम्
अनन्तबाहुम्	-	कर्मविशेषणम्	स्वतेजसा	-	तपिक्रियायाः करणम्

(उ) छन्दोविधानम्

अस्य श्लोकस्य प्रथमाद्वितीयचतुर्थपादेषु उपेन्द्रवज्रा तथा च तृतीये पादे इन्द्रवज्रा इत्युभयोः सम्मेलनात् इह प्रेमानाम उपजातिः छन्दः विज्ञेयम्।

◆◆◆

८८. श्लोकः

द्यावापृथिव्योरिदमन्तरं हि।
व्याप्तं त्वयैकेन दिशश्च सर्वाः।
दृष्ट्वाद्भुतं रूपमुग्रं तवेदं
लोकत्रयं प्रव्यथितं महात्मन्।।(भ. गी. ११.२०)

पदच्छेदः

द्यावा-पृथिव्योः, इदम्, अन्तरम्, हि,
व्याप्तम्, त्वया, एकेन, दिशः, च, सर्वाः।

दृष्ट्वा, अद्भुतम्, रूपम्, उग्रम्, तव, इदम्,
लोक-त्रयम्, प्रव्यथितम्, महात्मन्।।

पदच्छेदाभ्यासः

अधस्तनानि पदानि विच्छिनत्तु–

(i) द्यावापृथिव्योरिदम् – ....

(ii) अन्तरं हि – ....

(iii) त्वयैकेन – ....

(iv) व्याप्तं त्वया – ....

(v) दिशश्च – ....

(vi) दृष्ट्वाद्भुतम् – ....

(vii) तवेदम् – ....

(viii) उग्रं तव – ....

पदपरिचयः

पदम्	विश्लेषणम्	पदम्	विश्लेषणम्
द्यावापृथिव्योः	द्यावापृथिवी-ईका.स्त्री.षष्ठी द्विती.समस्तम्	दृष्ट्वा	क्त्वान्तम्-अव्ययम् पूर्वकालिकी गौणक्रिया
इदम्	इदम्-मका.नपुं.प्र.एक.सर्व.वि.	अद्भुतम्	अका.नपुं.द्विती.एक.वि.
अन्तरम्	अका.नपुं.प्र.एक.विशे.	रूपम्	अका.नपुं.द्विती.एक.विशे.

हि	अव्ययम्	उग्रम्	अका.नपुं.द्विती.एक.वि.
व्याप्तम्	अका.नपुं.प्र.एक.क्तान्तं विशे.	तव	युष्मद्-दका.षष्ठी एक.सर्व.
त्वया	युष्मद्-दका.तृ.एक.सर्व.विशे.	इदम्	इदम्-मका.नपुं.द्विती.एक.सर्व.वि.
एकेन	अका.पुं.तृ.एक.विशे.सर्व.	लोकत्रयम्	अका.नपुं.प्र.एक.समस्तं विशे.
दिशः	दिश्-शका.स्त्री.प्र.बहु.विशे.	प्रव्यथितम्	अका.नपुं.प्र.एक.क्तान्तं वि.
सर्वाः	सर्वा-आका.स्त्री.प्र.बहु.सर्व.वि.	महात्मन्	नका.पुं.सम्बो.एक.समस्तम्

वर्गीकरणाभ्यासः

अधस्तनेषु वर्गेषु श्लोकपदानि विभजतु–

(i) प्रथमान्तम् (७) ....

(ii) द्वितीयान्तम् (४) ....

(iii) तृतीयान्तम् (२) ....

(iv) षष्ठ्यन्तम् (२) ....

(v) सम्बोधनान्तम् (१) ....

(vi) अव्ययम् (३) ....

(vii) सर्वनाम (५) ....

(viii) अकारान्तम् (२) ....

(ix) आकारान्तम् (१) ....

(x) ईकारान्तम् (१) ....

(xi) शकारान्तम् (१) ....

(xii) नकारान्तम् (१) ....

(xiii) पुंलिङ्गम् (२) ....

(xiv) स्त्रीलिङ्गम (३) ....

(xv) नपुंसकम् (९) ....

(xvi) विशेष्यम् (५) ....

(xvii) विशेषणम् (८) ....

(xviii) समस्तम् (३) ....

(xix) क्तान्तं क्रियापदम्(२) ....

(xx) क्त्वान्तं गौणक्रियापदम्(१) ....

आकाङ्क्षाविस्तरः

व्याप्तम् (= व्याप्यते स्म)।

किं व्याप्तम्? .... (अका. नपुं. प्र. एक.)

कथम्भूतम् अन्तरं व्याप्तम्? .... (सर्व. प्र.)

कयोरिदम् अन्तरं व्याप्तम्? .... (ईका. ष.)

द्यावापृथिव्योरिदम् अन्तरं केन व्याप्तम्? .... (सर्व. तृ.)

द्यावापृथिव्योरिदम् अन्तरं कथम्भूतेन त्वया व्याप्तम्? .... (सर्व. तृ.)

द्यावापृथिव्योरिदम् अन्तरम् एकेन त्वया व्याप्तम्।

अथ च काः व्याप्ताः? .... (शका. प्र.)

कथम्भूताः दिशः व्याप्ताः? .... (आका. प्र.)

प्रव्यथितम् (= प्रपीडितम्)।

किं प्रव्यथितम्? .... (अका. समस्तं प्र.)

कथं लोकत्रयं प्रव्यथितम्? .... (क्त्वान्तम्)

किं दृष्ट्वा प्रव्यथितम्? .... (अका. न. विशे.)

कीदृशं रूपं दृष्ट्वा लोकत्रयं प्रव्यथितम्? .... (अका. विशे.)

अद्भुतं रूपं पुनश्च कीदृशम्? .... (अका. वि.)

अद्भुतम् उग्रं रूपं पुनश्च कीदृशम्? .... (सर्व. द्वि.)

इदम् अद्भुतम् उग्रं रूपं कस्य? .... (सर्व. ष.)

हे महात्मन्! तव इदम् अद्भुतम् उग्रं रूपं दृष्ट्वा लोकत्रयं प्रव्यथितम्।

पदार्थः

पदम्	संस्कृतम्	हिन्दी
हि	यतोहि	क्योंकि
एकेन	एकाकिना	अकेले
त्वया	भवता श्रीकृष्णेन	आपने ही
द्यावापृथिव्योः	स्वर्गभूलोकयोः	पृथ्वी और स्वर्ग के बीच
इदम्	इदं प्रत्यक्षं	इस
अन्तरम्	अन्तरिक्षम्	आकाश को
व्याप्तम्	परिपूरितम्	व्याप्त कर लिया है
सर्वाः	सकलाः	सभी
दिशः	दिशाः	दिशायें (भी)
च	व्याप्ताः	और (आच्छन्न हैं)
महात्मन्	हे विराट् पुरुष!	हे विश्वरूप!
तव	भवतः	आपके
इदम्	दृश्यमानम्	इस
अद्भुतम्	विस्मापनम्	विस्मयकारी
उग्रम्	क्रूरम्	उग्र
रूपम्	स्वरूपम्	रूप को
दृष्ट्वा	विलोक्य	देखकर
लोकत्रयम्	त्रयो लोकाः	तीनों लोक
प्रव्यथितम्	अतिभीतम्	सन्त्रस्त (है)

भावार्थः

संस्कृतम्—अनेन श्लोकेन अर्जुनः भगवतो विराड्रूपस्य व्याप्तिमाह—

हे प्रभो! तवेदं विराड्रूपं द्युलोकपृथिवीलोकयोः मध्ये विद्यमानम् सर्वमप्याकाशं व्याप्नोति। किञ्चेदं रूपं सर्वासु दशदिक्षु व्याप्तं वर्तते। तवेदं रूपम् अलौकिकम् आश्चर्यकरम् अतिभयङ्करं

चास्ते। हे महात्मन्! तवेदं रूपमुपलभ्य त्रयोऽपि लोकाः भयङ्करतेजस्तापाद् व्याकुला भवन्ति।

हिन्दी–इस श्लोक में अर्जुन ने भगवान् के विराड् रूप का वर्णन किया है–

हे प्रभो! आपका यह विराट् शरीर इतना बड़ा है कि स्वर्ग और पृथिवी के बीच का यह सम्पूर्ण आकाश और सभी दिशायें उससे परिपूर्ण हो गयी हैं। ऐसा कोई स्थान मुझे नहीं दीखता, जहाँ आपका यह स्वरूप न हो। साथ ही मैं यह देख रहा हूँ कि आपका यह अद्भुत और अत्यन्त उग्र रूप इतना भयानक है कि स्वर्ग, मर्त्य और अन्तरिक्ष – इन तीनों लोकों के जीव इसे देखकर भय के मारे अत्यन्त ही त्रस्त हो रहे हैं। उनकी दशा अत्यन्त ही शोचनीय हो गयी है।

अवबोधाभ्यासः

अधस्तनान् प्रश्नान् समादधातु–

१. अस्मिन् श्लोके अर्जुनः किं वर्णयति?

२. किमाकाशं कुत्र च तद्वर्तते?

३. केन एकेन तदाकाशं परिपूर्णम्?

४. कति दिशः भवन्ति, काश्च ताः?

५. वस्तुतः विश्वरूपं सर्वेषाम् अक्षिगोचरं न भवितुमर्हति, अतः लोकत्रयपीडनं कथं स्यात्?

६. अर्जुनः 'लोकत्रयं प्रपीडितम्' इति केन हेतुना अनुमिनोति?

७. कथं तद्रूपम् अद्भुतम्? उग्रं च कथम्?

व्याकरणाभ्यासः

(अ) सन्धिः

१. द्यावापृथिव्योरिदम्	-	द्यावापृथिव्योः + इदम्	-	रभावः
२. दिशश्च	-	दिशः + च	-	शभावः
३. दृष्ट्वाद्भुतम्	-	दृष्ट्वा + अद्भुतम्	-	दीर्घः
४. तवेदम्	-	तव + इदम्	-	गुणः
५. त्वयैकेन	-	त्वया + एकेन	-	वृद्धिः
६. अन्तरं हि	-	अन्तरम् + हि	-	अनुस्वारः
७. व्याप्तं त्वया	-	व्याप्तम् + त्वया	-	अनुस्वारः

८. अद्भुतं रूपम् - अद्भुतम् + रूपम् - अनुस्वार:

९. उग्रं तव - उग्रम् + तव - अनुस्वार:

१.. इदं लोक - इदम् + लोक - अनुस्वार:

११. लोकत्रयं प्रव्यथितम् - लोकत्रयम् + प्रव्यथितम् - अनुस्वार:

१२. प्रव्यथितं महात्मन् - प्रव्यथितम् + महात्मन् - अनुस्वार:

अधस्तनेषु रेखाङ्कितेषु पदेषु सन्धिंविसन्धिं वा करोतु–

(i) स्वैः + उत्तरीयैः + बालम् आच्छादयति।

(ii) स्वार्थ + एकान्त + उद्यमाः मिथो सख्यं भजन्ति।

(iii) ताभिर्विधूतशोकाभिवृतो भगवान्।

(iv) केशवालोकेन परमोत्सवनिर्वृताः ताः।

(v) तन्मुखाम्बुजं जुषते।

(vi) व्यरोचत + अधिकं तात।

(vii) योगी + इव + आनन्दसम्प्लुता।

(viii) धरणिमण्डनम् + ध्येयमापदि।

(ix) शोकनाशनं ते पदाम्बुजम्।

(x) व्रजजनार्तिहन् वीर! प्रार्थये।

(आ) समासः

१. द्यावापृथिव्योः - द्यौश्च पृथिवी च इति तयोः - द्वन्द्वः

२. लोकत्रयम् - लोकानां त्रयम् इति - षष्ठीतत्पुरुषः

३. महात्मन् - महान् आत्मा यस्य, तत्सम्बुद्धौ - बहुव्रीहिः

४. प्रव्यथितम् - प्रकर्षेण व्यथितम् इति - उपपदसमासः

अधस्तनेषु विग्रहेषु निष्पन्नं समस्तं पदं वाक्ये प्रयुङ्क्ताम्–

(i) होता च उद्गाता च - ....

(ii) सूर्यश्च चन्द्रमाश्च, तयोः - ....

(iii) गौः च भूश्च हिरण्यं च वासांसि च - ....

(iv) ब्रह्मा च हरश्च हरिश्च – ....

(v) जगतां त्रयम् इति तस्मिन् – ....

(vi) दिनानां पञ्चकम् इति – ....

(vii) विश्वस्य मङ्गलम् इति – ....

(viii) जलरुहमिव आननं यस्य तम् – ....

(ix) कल्पितम् आसनं यस्य तस्मै – ....

(x) विधूता हृद्रुक् यस्य सः – ....

(इ) कृत्प्रत्ययः

१. व्याप्तम् – वि + आप् + क्त (त) = व्याप्त

२. प्रव्यथितम् – प्र + व्यथ् + क्त = प्रव्यथित

३. दृष्ट्वा – दृश् + क्त्वा (त्वा) = दृष्ट्वा

अधस्तनेषु पदेषु प्रकृतिप्रत्ययच्छेदं कृत्वा वाक्ये व्यवहरतु–

(i) उज्झितम् – ....

(ii) तिरोहितम् – ....

(iii) अर्चितः – ....

(iv) आसादितम् – ....

(v) संदष्टम् – ....

(vi) अपीत्वा – ....

(vii) सभाजयित्वा – ....

(viii) गृहीत्वा – ....

(ई) क्रियाकारकसम्बन्धः

व्याप्तम्	–	कर्मणि क्तान्ता क्रिया	रूपम्	–	गौणक्रियायाः कर्म
अन्तम्	–	कर्म	इदम्	–	कर्मविशेषणम्
इदम्	–	कर्मविशेषणम्	अद्भुतम्	–	कर्मविशेषणम्

दिशः	–	कर्म	उग्रम्	–	कर्मविशेषणम्
सर्वाः	–	कर्मविशेषणम्	तव	–	कर्मसम्बन्धी
त्वया	–	कर्ता	प्रव्यथितम्	–	क्तान्ता कर्मणि क्रिया
एकेन	–	कर्तृविशेषणम्	लोकत्रयम्	–	कर्म
द्यावापृथिव्योः	–	कर्मसम्बन्धी	महात्मन्!	–	सम्बोधनम्
दृष्ट्वा	–	गौणक्रिया			

(उ) छन्दोविधानम्

इह पद्ये चतुर्षु पादेषु इन्द्रवज्रा नाम छन्दः। 'स्यादिन्द्रवज्रा यदि तौ जगौ गः' इति (ऽऽ। ऽऽ। ।ऽ। ऽऽ) तल्लक्षणम्।

◆◆◆

८९. श्लोकः

अमी हि त्वां सुरसङ्घा विशन्ति
केचिद् भीताः प्राञ्जलयो गृणन्ति।
स्वस्तीत्युक्त्वा महर्षिसिद्धसङ्घाः
स्तुवन्ति त्वां स्तुतिभिः पुष्कलाभिः।। (भ. गी. ११.२१)

पदच्छेदः

अमी, हि, त्वाम्, सुर-सङ्घाः, विशन्ति,
केचित्, भीताः, प्राञ्जलयः, गृणन्ति।

स्वस्ति, इति, उक्त्वा, महर्षि-सिद्ध-सङ्घाः
स्तुवन्ति, त्वाम्, स्तुतिभिः, पुष्कलाभिः।।

पदच्छेदाभ्यासः

अधस्तनानि पदानि विच्छिनत्तु–

(i) स्वस्तीति – ....
(ii) इत्युक्त्वा – ....
(iii) सुरसङ्घा विशन्ति – ....
(iv) प्राञ्जलयो गृणन्ति – ....
(v) केचिद् भीताः – ....
(vi) त्वां सुर – ....
(vii) त्वां स्तुतिभिः – ....

पदपरिचयः

पदम्	विश्लेषणम्
अमी	अदस् – सका. पुं. प्र. बहु. सर्व. वि.
हि	अव्ययम् १
त्वाम्	युष्मद् – दका. एक. सर्व.
सुरसङ्घाः	अका. पुं. प्र. बहु. समस्तं विशे.
विशन्ति	विश् + लट् प्रपु. बहु. भ्वादि परस्मै. कर्तरि क्रिया

केचित्	किम् + चित् - पुं. प्र. बहु. सर्व. + अव्य.
भीताः	अका. पुं. प्र. बहु. क्तान्तं विशे.
प्राञ्जलयः	प्राञ्जलि - इका. पुं. प्र. बहु. समस्तं विशे.
गृणन्ति	गॄ + लट् प्रपु. बहु. क्र्यादि. परस्मै. कर्तरि क्रिया.
स्वस्ति	अव्ययम् २
इति	अव्ययम् ३
उक्त्वा	क्त्वान्तमव्ययम् ४
महर्षिसिद्धसङ्घाः	अका. पुं. प्र. बहु. समस्तम्
स्तुवन्ति	स्तु + लट् प्रपु. बहु. अदादि. परस्मै कर्तरि क्रिया
त्वाम्	युष्मद् - दका. द्विती. एक. सर्व.
स्तुतिभिः	स्तुति - इका. स्त्री. तृ. बहु. कृदन्तम् विशेष्यम्
पुष्कलाभिः	पुष्कला - आका. स्त्री. तृ. बहु. विशेषणम्

वर्गीकरणाभ्यासः

अधस्तनेषु वर्गेषु श्लोकपदानि विभजतु—

(i) प्रथमान्तम् (६) ....

(ii) द्वितीयान्तम् (२) ....

(iii) तृतीयान्तम् (२) ....

(iv) अकारान्तम् (३) ....

(v) आकारान्तम् (१) ....

(vi) इकारान्तम् (२) ....

(vii) पुंलिङ्गम् (६) ....

(viii) स्त्रीलिङ्गम् (२) ....

(ix) अव्ययम् (४) ....

(x) सर्वनाम (४) ....

(xi) क्रियापदम् (३) ....

(xii) विशेष्यम् (१) ....

(xiii) विशेषणम् (५) ....

(xiv) समस्तम् (३) ....

(xv) क्तान्तम् (१) ....

आकाङ्क्षाविस्तरः

विशन्ति (= प्रविशन्ति)।

के विशन्ति? .... (अका. विशे. प्र.)

के सुरसंघाः विशन्ति? .... (अदस् प्र.)

अमी सुरसङ्घाः कं विशन्ति? .... (सर्व. द्विती.)

अमी सुरसङ्घा त्वां हि विशन्ति।

गृणन्ति (= शब्दं कुर्वन्ति)।

के गृणन्ति? .... (सर्व. प्र.)

कथम्भूताः केचिद् गृणन्ति? .... (अका. प्र. वि.)

भीताः केचित् पुनश्च कथम्भूताः गृणन्ति? .... (इका. प्र.)

केचिद् भीताः प्राञ्जलयः गृणन्ति।

स्तुवन्ति (= स्तुतिं कुर्वन्ति)।

के स्तुवन्ति? .... (अका. प्र.)

महर्षिसिद्धसङ्घाः किं कृत्वा स्तुवन्ति? .... (क्त्वान्तम्)

महर्षिसिद्धसङ्घाः किम् उक्त्वा स्तुवन्ति? .... (अव्ययम् २,३)

महर्षिसिद्धसङ्घाः स्वस्तीति उक्त्वा कं स्तुवन्ति? .... (सर्व. द्विती.)

महर्षिसिद्धसङ्घाः स्वस्तीति उक्त्वा त्वां काभिः स्तुवन्ति? .... (इका. तृ.)

महर्षिसिद्धसङ्घाः स्वस्तीति उक्त्वा त्वां काभिः स्तुतिभिः स्तुवन्ति? .... (आका. तृ.)

महर्षिसिद्धसङ्घाः स्वस्तीति उक्त्वा त्वां पुष्कलाभिः स्तुतिभिः स्तुवन्ति।

पदार्थः

पदम्	संस्कृतम्	हिन्दी
अमी	ते	वे
सुरसङ्घाः	देवसमूहाः	देवताओं के झुण्ड
त्वाम्	भवन्तं विश्वरूपम्	आपके विराट शरीर में
हि	नूनम्	ही
विशन्ति	अन्तर्भवन्ति	प्रवेश कर रहे हैं
केचित्	कतिपये (देवसमूहाः)	कुछ (देवसंघ)
भीताः	भयं प्राप्ताः	डरकर
प्राञ्जलयः	अञ्जलिबद्धाः	हाथ जोड़कर
गृणन्ति	(दैन्यम्) उच्चारयन्ति	गिड़-गिड़ा रहे हैं
महर्षिसिद्धसङ्घाः	महर्षीणां सिद्धानां च निकायाः	महर्षियों और सिद्धों के झुण्ड
स्वस्ति	मङ्गलम्	स्वस्ति
इति	एवम्	ऐसा
उक्त्वा	कथयित्वा	कहकर
पुष्कलाभिः	बहुभिः	बहुत-सी
स्तुतिभिः	स्तोत्रैः	स्तुतियों से
त्वाम्	भवन्तम्	आपकी
स्तुवन्ति	प्रार्थयन्ते	स्तुति करते हैं।

भावार्थः

संस्कृतम्—अनेन श्लोकेन अर्जुनः भगवतो विश्वरूपस्य भूभारसंहारकारित्वं वर्णयति—

हे प्रभो! स्वर्गलोके स्थिताः मया दृष्टपूर्वाः ते वस्वादिदेवानां समुदायाः तव विराट्शरीरं प्रविशन्ति। तस्मिन्नेव शरीरे लयं प्राप्नुवन्ति ते। तेषु देवनिकायेषु केचिद् देवाः तवोग्ररूपेण भयभीताः सन्तः अञ्जलिं बद्ध्वा त्वां प्रसादयितुं चेष्टन्ते। ते स्वरक्षार्थं तव गुणगणान् वर्णयन्ति। किञ्च मरीच्यङ्गिरसादयो महर्षयः, कपिलादयः सिद्धाश्च 'स्वस्त्यस्तु विश्वस्य' इत्युच्चारयन्तः परिपूर्णाभिः

प्रभूताभिः स्तुतिभिः त्वां स्तुवन्ति। ते हि अनेन महाभारतयुद्धेन जगत्क्षयम् उत्पश्यन्तः विश्वस्य रक्षायै तव गुणोत्कर्षप्रतिपादिकाभिः वाग्भिः स्तुतिं कुर्वन्ति।

हिन्दी–अर्जुन ने इस श्लोक में भगवान् के विराट् रूप की भयंकरता का प्रतिपादन किया है। यह रूप पृथ्वी के भार का संहार करने वाला है–अर्जुन की इस प्रतीति का यहाँ संकेत हुआ है–

हे प्रभो! स्वर्गलोक में मैंने जिन देवताओं को पहले देखा था, वे इन्द्रादि देव समूह आपके इस विराट् रूप में प्रवेश करते हुए दिखाई दे रहे हैं। अर्थात् उनकी कोई अलग सत्ता नहीं है, अपितु वे सबके सब आप में समाये हुए हैं। उनमें से कुछ देवगण भय के मारे हाथ जोड़कर आपके सामने गुणों का बखान करते हुए गिड़-गिड़ा रहे हैं। आपके विराट् रूप की उग्रता को वे सह नहीं पा रहे हैं।

हे प्रभो! मरीचि, अङ्गिरा, नारद आदि महर्षियों का समुदाय तथा कपिल आदि अनेक सिद्धों का झुण्ड इस महाभारत युद्ध से जगत् का संहार जानकर 'विश्व का कल्याण हो' ऐसा बार-बार बोल रहे हैं और आपको प्रसन्न करने के लिए बड़ी-बड़ी पूरी की पूरी स्तुतिओं से आपकी प्रार्थना कर रहे हैं। वे भयभीत नहीं हैं, अपितु श्रद्धा और प्रेमपूर्वक भावमय स्तोत्रों से जगन्मङ्गल के लिए आपका स्तवन कर रहे हैं–ऐसा मैं देख रहा हूँ।

अवबोधाभ्यासः

अधस्तनान् प्रश्नान् समादधातु–

१. अर्जुनः इह श्लोके किं वर्णयति? ....

२. अर्जुनः इन्द्रादिदेवान् पूर्वं कुत्र दृष्टवान्? ....

३. ते देवाः कथं भयभीताः सन्ति? ....

४. भयभीताः स्पष्टाक्षरं नोच्चारयितुं समर्थाः भवन्ति। अत एव इह 'गृणन्ति' इति क्रियापदं प्रयुक्तम्। भयभीताः स्खलिताक्षरेण किमपि अस्पष्टं दीनभावं दर्शयन्ति।
इह 'गृणन्ति' इति क्रियया किं व्यज्यते?
....

५. के न भीताः सन्ति? ....

६. महर्षयः सिद्धाश्च किम् उत्पश्यन्ति? ....

७. ते जगद्रक्षायै किं कुर्वन्ति? ....

व्याकरणाभ्यासः

(अ) सन्धिः

१. प्राञ्जलयः – प्र + अञ्जलयः – दीर्घः

२. स्वस्तीति - स्वस्ति + इति - दीर्घः

३. इत्युक्त्वा - इति + उक्त्वा - यण्

४. सुरसङ्घा विशन्ति - सुरसङ्घाः + विशन्ति - लोपः

५. प्राञ्जलयो गृणन्ति - प्राञ्जलयः + गृणन्ति - ओभावः

६. केचिद् भीताः - केचित् + भीताः - जश्त्वम्

७. त्वां सुरसङ्घाः - त्वाम् + सुरसङ्घाः - अनुस्वारः

८. त्वां स्तुतिभिः - त्वाम् + स्तुतिभिः - अनुस्वारः

अधस्तनेषु रेखाङ्कितेषु सन्धिं करोतु–

(i) भगवतः + वाचः + गोप्यः शृण्वन्ति। ....

(ii) तत्र + आरभत क्रीडाम् + गोविन्दः। ....

(iii) अन्योऽन्य + आबद्धबाहुभिः मित्रैः सह क्रीडन्ति। ....

(iv) विनश्यति + आचरन् मौढ्यात्। ....

(v) नित्यतृप्ताः + मुनयः + अपि भजन्ति। ....

(vi) साधु-साधु + इति वदन्ति जनाः। ....

(vii) तत्र स्नात्वा सरस्वत्याम् + देवमार्चयत्। ....

(viii) मात्रा सह + आविशत् + बालः। ....

(आ) समासः

१. सुरसङ्घाः - सुराणां सङ्घाः इति - बहुव्रीहिः

२. प्राञ्जलयः - प्रगतौ अञ्जली येषां ते - प्रादिबहुव्रीहिः

३. महर्षिसिद्धसङ्घाः - महर्षयश्च सिद्धाश्च इति महर्षिसिद्धा - द्वन्द्वः

महर्षिसिद्धानां सङ्घाः इति - षष्ठीतत्पुरुषः

अधस्तनेषु विग्रहेषु समासं करोतु–

(i) पङ्कजानां परागस्य निषेवणम् - ....

(ii) योगस्य प्रभावेण - ....

(iii) विधुतानि अखिलकर्मबन्धनानि येषां तान् - ....

(iv) अखिलानि कर्मबन्धनानि – ....

(v) कर्मणां बन्धनानि – ....

(vi) कुशलानाम् आचरितेन – ....

(vii) कुशलं च अकुशलं च – ....

(viii) मङ्गलामङ्गलयोः अन्वयः – ....

(ix) सत्याः कामाः यस्य तस्मै – ....

(x) आम्राश्च निम्बाश्च पेरवश्च पनसाश्च – ....

(xi) अहिश्च नकुलं च – ....

(इ) कृत्प्रत्ययः

१. भीताः – भी + क्त (त) = भीत

२. उक्त्वा – वच् + क्त्वा (त्वा) = उक्त्वा

३. स्तुतिभिः – स्तु + क्तिन् (ति) = स्तुति

अधस्तनेषु पदेषु प्रकृतिप्रत्ययं निर्दिश्य वाक्यप्रयोगं करोतु–

(i) पराभूतिः – ....

(ii) अनुकृतिः – ....

(iii) निर्ऋतिः – ....

(iv) भीत्वा – ....

(v) शक्त्वा – ....

(vi) स्तुत्वा – ....

(vii) दग्ध्वा – ....

(viii) पिनद्धः – ....

(ix) अविहतम् – ....

(x) अक्षतम् – ....

(ई) क्रियाकारकसम्बन्धः

विशन्ति	-	कर्तरि क्रिया	स्तुवन्ति	-	कर्तरि क्रिया
सुरसङ्घाः	-	कर्ता	महर्षिसिद्धसङ्घाः	-	कर्ता
त्वाम्	-	कर्म	उक्त्वा	-	पूर्वकालिकी गौणक्रिया
अमी	-	कर्तृविशेषणम्	स्वस्ति	-	कर्म
गृणन्ति	-	कर्तरि क्रिया	इति	-	कर्मत्वद्योतिका
केचित्	-	कर्ता	त्वाम्	-	मुख्यक्रियायाः कर्म
भीताः	-	कर्तृविशेषणम्	स्तुतिभिः	-	करणम्
प्राञ्जलयः	-	कर्तृविशेषणम्	पुष्कलाभिः	-	करणविशेषणम्

(उ) छन्दोविधानम्

अस्य पद्यस्य प्रथमचतुर्थपादयोः उपेन्द्रवज्रा तथा द्वितीयतृतीयपादयोः इन्द्रवज्रा छन्दः। एवञ्चैकस्मिन् पद्ये उभयोः प्रयोगात् आर्द्रा नाम उपजातिः छन्दः।

(ऊ) पर्यायशब्दः

१. **सङ्घः** - १. समूहः (अका. पुं.), २. समवायः (अका. पुं.), ३. समुदायः (अका. पुं.), ४. पुञ्जः (अका. पुं.)

२. **स्तुतिः** - १. वन्दना (आका. स्त्री.), २. प्रार्थना (आका. स्त्री.), ३. स्तोत्रम् (अका. नपुं.)

◆◆◆

१०. श्लोकः

रुद्रादित्या वसवो ये च साध्या
विश्वेऽश्विनौ मरुतश्चोष्मपाश्च।
गन्धर्वयक्षासुरसिद्धसङ्घा
वीक्षन्ते त्वां विस्मिताश्चैव सर्वे।।(भ. गी. ११.२२)

पदच्छेदः

रुद्र + आदित्याः, वसवः, ये, च, साध्याः,
विश्वे, अश्विनौ, मरुतः, च, ऊष्मपाः, च।

गन्धर्व-यक्ष+असुर-सिद्ध-सङ्घाः,
वीक्षन्ते, त्वाम्, विस्मिताः, च + एव, सर्वे।।

पदच्छेदाभ्यासः

अधस्तनेषु पदच्छेदं करोतु–

(i) रुद्रादित्या – ....

(ii) वसवो ये – ....

(iii) विश्वेऽश्विनौ – ....

(iv) मरुतश्च – ....

(v) ऊष्मपाश्च – ....

(vi) चोष्मपाश्च – ....

(vii) चैव – ....

(viii) विस्मिताश्च – ....

(ix) गन्धर्वयक्षासुरसिद्धसङ्घा :- ....

(x) त्वां विस्मिताः – ....

पदपरिचयः

पदम्	विश्लेषणम्
रुद्रादित्याः	अका. पुं. प्र. बहु. समस्तम्
वसवः	वसु - उका. पुं. प्र. बहु.
ये	यद् - दका. पुं. प्र. बहु. सर्व. वि.

च	अव्ययम् १
साध्याः	अका. पुं. प्र. बहु.
विश्वे	विश्व अका. पु. प्र. बहु. सर्व.
अश्विनौ	अश्विन् - नका. पुं. प्र. द्वि.
मरुतः	मरुत् - तका. पुं. प्र. बहु.
च	अव्ययम् २
ऊष्मपाः	अका. पुं. प्र. बहु. समस्तम्
च	अव्ययम् ३
गन्धर्वयक्षासुरसिद्धसङ्घाः	अका. पुं. प्र. बहु. समस्तम्
वीक्षन्ते	वि + ईक्ष + लट् प्रपु. बहु. भ्वादि. आत्मने कर्तरि क्रिया
त्वाम्	युष्मद् - दका. द्विती. एक. सर्व.
विस्मिताः	अका. पुं. प्र. बहु. वि.
च	अव्ययम् ४
एव	अव्ययम् ५
सर्वे	अका. पुं. प्र. बहु. सर्व. वि.

वर्गीकरणाभ्यासः

अधस्तनेषु वर्गेषु श्लोकपदानि लिखतु–

(i) प्रथमान्तम् (११) ....

(ii) द्वितीयान्तम् (१) ....

(iii) अकारान्तम् (७) ....

(iv) उकारान्तम् (१) ....

(v) तकारान्तम् (१) ....

(vi) नकारान्तम् (१) ....

(vii) सर्वनाम (४) ....

(viii) पुंलिङ्गम् (११) ....

(ix) अव्ययम् (५) ....

(x) क्रियापदम् (१) ....

(xi) समस्तम् (३) ....

(xii) विशेषणम् (३) ....

आकाङ्क्षाविस्तरः

वीक्षन्ते (= पश्यन्ति)।

के वीक्षन्ते? .... (यद् प्र.)

ये के वीक्षन्ते? .... (अका. प्र. बहु.)

ये रुद्रादित्याः पुनश्च के वीक्षन्ते? .... (उका. प्र.)

ये रुद्रादित्याः वसवः पुनश्च के वीक्षन्ते? .... (अका. प्र.)

ये रुद्रादित्याः वसवः साध्याः च पुनश्च के वीक्षन्ते? .... (अका. प्र.)

ये रुद्रादित्याः वसवः साध्याः च विश्वे पुनश्च कौ? .... (नका. प्र.)

ये रुद्रादित्याः वसवः साध्याः विश्वे अश्विनौ पुनश्च के वीक्षन्ते? .... (तका. प्र.)

ये रुद्रादित्याः वसवः साध्याः विश्वे अश्विनौ मरुतः पुनश्च के वीक्षन्ते? .... (अका. समस्तं प्र.)

ये रुद्रादित्याः वसवः साध्याः च विश्वे अश्विनौ च मरुतः ऊष्मपाश्च पुनश्च के वीक्षन्ते? .... (अका. समस्तं प्र.)

ये रुद्रादित्या वसवः साध्याः च विश्वे अश्विनौ ते सर्वे एव वीक्षन्ते। च मरुतः ऊष्मपाः च गन्धर्वयक्षासुरसिद्धसंघाः च सन्ति, ते सर्वे एव किं कुर्वन्ति? ....

ते सर्वे एव कं वीक्षन्ते? .... (सर्व. द्विती.)

ते सर्वे एव कीदृशाः सन्तः त्वां वीक्षन्ते? .... (अका. प्र. विशेष.)

ते सर्वे एव विस्मिताः (सन्तः) त्वां वीक्षन्ते।

पदार्थ:

पदम्	संस्कृतम्	हिन्दी
ये	ये (प्रसिद्धा:)	जो
रुद्रादित्या:	एकादश रुद्रा: द्वादश आदित्या: देवा:	ग्यारह रुद्र और बारह आदित्य देवता
वसव:	अष्टौ वसुसंज्ञका: देवा:	८ वसु नामक देवता
साध्या:	साध्यनामका: देवा:	साध्य नाम के देवता
च	तथा	और
विश्वे	विश्वेदेवा:	विश्वेदेव
अश्विनौ	अश्विनीकुमारौ	दोनों अश्विनी कुमार
च	तथा	और
मरुत:	ऊनपञ्चाशत् मरुत्संज्ञका: देवता:	उनचास मरुत् नाम के देवता
ऊष्मपा:	पितर:	पितर
च	तथा	और
गन्धर्वयक्षासुर-सिद्धसङ्घा:	गन्धर्व-यक्ष-दानव-राक्षस-सिद्धसमूहा: (सन्ति)	गन्धर्व, यक्ष, दानव, राक्षस और सिद्धों के समूह (हैं)
(ते) सर्वे	(ते) समे	(वे) सभी
एव	एव	ही
विस्मिता:	आश्चर्यचकिता:	आश्चर्यचकित होकर
त्वाम्	भवन्तम् (विश्वरूपम्)	आपको (विराड्रूप को)
वीक्षन्ते	अवलोकयन्ति	देख रहे हैं।

भावार्थ:

संस्कृतम्—इह श्लोके अर्जुन: रुद्रादिदेवानां विस्मयेन विश्वरूपदर्शनं वर्णयति—

हे प्रभो! स्वर्गादिलोके ये देवा: सन्ति प्रसिद्धा:, यथा—एकादश रुद्रा:, द्वादश आदित्या:, अष्टौ वसव:, द्वादश मनोऽनुमन्तृप्राणादिसाध्यदेवा:, दश क्रतुदक्षादिविश्वेदेवा:, अश्विनीकुमारौ द्वौ, ऊनपञ्चाशत्

मरुद्देवाः, पितरो देवताः, गानविद्यानिपुणाः गन्धर्वाः, यक्षाः, दैत्याः-दानवाः-राक्षसाश्चेति असुराः, कपिलादयः सिद्धाश्च। ते सर्वे देवा आश्चर्ययुक्ताः सन्तः त्वां विराट्शरीरमेव अदृष्टपूर्वं पश्यन्ति।

एतेषु देवेषु रुद्र-आदित्य-वसु-मरुत्-पितृणां नामानि पूर्वस्मिन् अध्याये परिगणितानि। साध्यदेवताः पुनः–मनः, अनुमन्ता, प्राणः, नरः, यानः, चित्तिः, हयः, नयः, हंसः, नारायणः, प्रभवः, विभुश्चेति वायुपुराणे (६६/१५-१५) कथिताः सन्ति।

दश विश्वेदेवाः पुनः–

क्रतुर्दक्षः श्रवः सत्यः कालः कामो धुनिस्तथा।

कुरुवान् प्रभवांश्चैव रोचमानश्च ते दश।।

(वायुपुराणे ६६/३१-३२) इति प्रोक्ताः।

हिन्दी–स्वर्गलोक के सभी प्रसिद्ध रुद्रादि देवता बड़े अचरज से भगवान् के विराट् रूप का दर्शन कर रहे हैं इसे यहाँ अर्जुन ने बतलाया है–

हे प्रभो! स्वर्गादिलोक में जो प्रसिद्ध देवता मुझे ज्ञात हैं, जैसे–ग्यारह रुद्र, बारह आदित्य, आठ वसु, मनस्-अनुमन्ता आदि बारह साध्य देवता, क्रतु-दक्ष आदि दस विश्वेदेव, दोनों अश्विनी कुमार, उनचास मरुद्गण, पितर, गान विद्या में निपुण गन्धर्व, यक्ष, दैत्य-दानव और राक्षस तथा कपिलादि सिद्धगण देवताओं के ये समूह नितान्त प्रसिद्ध हैं। वे सभी के सभी देवगण आश्चर्यचकित होकर आपके विराट् शरीर को देख रहे हैं, क्योंकि उन्होंने इससे पहिले कभी आपके इस रूप को देखा नहीं है।

उपर्युक्त देवताओं में रुद्र-आदित्य-वसु-मरुत् और पितरों के नाम ग्यारहवें अध्याय में बताये गये हैं। साध्य देवता के नाम–मनस्, अनुमन्तृ (अनुमन्ता) प्राण, नर, यान, चित्ति, हय, नय, हंस, नारायण, प्रभव और विभु। वायुपुराण के अनुसार ये नाम हैं, स्कन्दपुराण में कुछ नाम अलग हैं।

दश विश्वेदेवों के वायुपुराण के अनुसार नाम ये हैं–क्रतु, दक्ष, श्रवस्, सत्य, काल, काम, धुनि, कुरुवान्, प्रभवान् और रोचमान। स्कन्दपुराण में कुछ नाम अलग हो जाते हैं, जो कल्पान्तर भेद से समझने चाहिए।

अवबोधाभ्यासः

अधस्तनान् प्रश्नान् समादधातु–

१. इह श्लोके अर्जुनः किं निर्दिशति? ....

२. इह कति देवगणाः कथिताः? ....

३. साध्याः कति? के च ते? ....

४. विश्वेदेवानां नामानि कानि? ....

५. असुरेषु कति भेदाः, के च ते? ....

६. सर्वे देवा कथं विस्मिताः सन्ति? ....

७. रुद्रादीनां नामानि पूर्वस्माद् अध्यायात् अन्विष्य लिखतु। ....

व्याकरणाभ्यासः

(अ) सन्धिः

१. रुद्रादित्याः – रुद्र + आदित्याः – दीर्घः

२. आदित्या वसवः – आदित्याः + वसवः – विसर्गलोपः

३. वसवो ये – वसवः + ये – ओभावः

४. साध्या विश्वे – साध्याः + विश्वे – विसर्गलोपः

५. विश्वेऽश्विनौ – विश्वे + अश्विनौ – पूर्वरूपम्

६. मरुतश्च – मरुतः + च – शभावः

७. ऊष्मपाश्च – ऊष्मषाः + च – शभावः

८. चोष्मपाः – च + ऊष्मपाः – गुणः

९. यक्षासुर – यक्ष + असुर – दीर्घः

१.. संघा वीक्षन्ते – संघाः + वीक्षन्ते – विसर्गलोपः

११. त्वां विस्मिताः – त्वाम् + विस्मिताः – अनुस्वारः

१२. विस्मिताश्च – विस्मिताः + च – शभावः

१३. चैव – च + एव – वृद्धिः

अधस्तनेषु रेखाङ्कितेषु सन्धिच्छेदं करोतु–

(i) एकदा जन्तुशालायां बालका जातकौतुकाः। ....

(ii) धूमशकटैस्तेऽगच्छन्। ....

(iii) तस्य चाक्रन्दनं श्रुत्वा गोपालाः सहसोत्थिताः। ....

(iv) क्रोधो मेऽनुग्रहायैव कृतस्तैः करुणात्मभिः। ....

(v) गोविन्दो रामश्च व्यचरतां वने। ....

(vi) स्रग्विणौ विरजोऽम्बरौ आस्तां तौ। ....

(vii) तं त्वाहं शरणं गत:। ....

(viii) यतचित्ता धृतमौना हरिमुपासत ते। ....

(ix) सर्वलोकेश्वरेश्वरो मामनुजानातु। ....

(x) प्रभोश्चरितमद्भुतम्। ....

(आ) समास:

१. रुद्रादित्या: – रुद्राश्च आदित्याश्च इति – द्वन्द्व:

२. ऊष्मपा: – ऊष्मं पिबन्ति इति – ऊष्म + पा + क (अ) = ऊष्म + प = ऊष्मप – उपपदसमास:

३. गन्धर्वयक्षासुरसिद्धसङ्घा: – गन्धर्वाश्च यक्षाश्च असुराश्च सिद्धाश्च इति गन्धर्वयक्षासुरसिद्धा:–द्वन्द्व:

गन्धर्वयक्षासुरसिद्धानां सङ्घा: इति – षष्ठीतत्पुरुष:

अधस्तनेषु पदेषु विग्रहपूर्वकं समासं करोतु–

(i) पत्रपुष्पफलानि ....

(ii) पशुपक्षिण: ....

(iii) अजमहिषगजघोटकनिकाया: ....

(iv) ग्रामवासिन: ....

(v) मधुप: ....

(vi) सरस्वतीतीरे ....

(vii) मध्वन्नम् ....

(viii) व्रजवधूभि: ....

(ix) सर्वभुज: ....

(x) धर्मव्यतिक्रम: ....

(इ) अध्याहार:

वाक्ये येन पदेन विना अर्थबोधो न जायते, तत्र तस्य पदस्य अध्याहार: क्रियते। अस्मिन्नर्थे 'येन विना यदनुपपन्नं तत्तेनाक्षिप्यते' इति न्याय: प्रचलति। इत्थमेव 'यत्तदोर्नित्यसम्बन्ध:' इत्युक्तिरपि अमुमेव

अर्थं पुष्णाति। अस्मिन् श्लोकवाक्ये 'ये च साध्याः' इत्यादौ यत्पदं प्रयुक्तम्, अत एव विधेयवाक्ये 'ते सर्वे वीक्षन्ते' इत्यादौ तत्पदम् अध्याहृतम्। अपि च इह श्लोकवाक्ये यत्पदप्रयोगादेव 'ये च साध्याः इत्यादयः सन्ति' इत्यादौ 'सन्ति' इति क्रियापदमपि अध्याहार्यम्। एवञ्च इह प्रथमम् उद्देश्यवाक्यम् 'ये च रुद्रादयः सन्ति' इति, द्वितीयं विधेयवाक्यम् 'ते सर्वे विस्मिताः त्वां वीक्षन्ते' इत्यवधेयम्।

(ई) क्रियाकारकसम्बन्धः

सन्ति	-	कर्तरि आक्षिप्ता क्रिया	ऊष्मपाः	-	कर्ता
रुद्रादित्याः	-	कर्ता	गन्धर्वयक्षा-सुरसिद्धसङ्घाः	-	कर्ता
वसवः	-	कर्ता	ये	-	कर्तृविशेषणम्
साध्याः	-	कर्ता	सर्वे	-	कर्ता
विश्वे	-	कर्ता	विस्मिताः	-	कर्तृविशेषणम्
अश्विनौ	-	कर्ता	ते	-	आक्षिप्तं कर्तृविशेषणम्
मरुतः	-	कर्ता	त्वाम्	-	कर्म

(उ) छन्दोविधानम्

इह श्लोके तृतीयपादे इन्द्रवज्रा, शेषेषु च त्रिषु पादेषु श्रीः, इत्युभयोरेकस्मिन् पद्ये प्रयोगात् शालिनी नामकं वृत्तं विज्ञेयम्।

(ऊ) पर्यायशब्दः

१. ऊष्मः - १. उष्णम् (अका. त्रिलि.), २. ग्रीष्मम् (अका. त्रिलि.), ३. तप्तम (अका. त्रिलि.), ४. ऊष्मकम् (अका. त्रिलि.)

२. असुरः - १. दैत्यः (अका. पुं.), २. दैतेयः (अका. पुं.), ३. दानवः (अका. पुं.), ४. पूर्वदेवः (अका. पुं.), ५. सुरद्विट् (सुरद्विष् षका. पुं.)

◆◆◆

९१. श्लोकः

रूपं महत्ते बहुवक्त्रनेत्रं
महाबाहो बहुबाहूरुपादम्।
बहूदरं बहुदंष्ट्राकरालं
दृष्ट्वा लोकाः प्रव्यथितास्तथाहम्।।(भ. गी. ११.२३)

पदच्छेदः

रूपम्, महत्, ते, बहु-वक्त्र-नेत्रम्,
महाबाहो, बहु-बाहु + ऊरु-पादम्।

बहु + उदरम्, बहु-दंष्ट्रा-करालम्,
दृष्ट्वा, लोकाः, प्रव्यथिताः, तथा, अहम्।।

पदच्छेदाभ्यासः

अधस्तनेषु पदच्छेदं करोतु–

(i) बहुबाहूरुपादम् – ....
(ii) बहूदरम् – ....
(iii) तथाहम् – ....
(iv) प्रव्यथितास्तथा – ....
(v) रूपं महत् – ....
(vi) नेत्रं महा. – ....
(vii) करालं दृष्ट्वा – ....

पदपरिचयः

पदम्	विश्लेषणम्	पदम्	विश्लेषणम्
रूपम्	अका. नपुं. द्विती. एक. विशे.	बहुदंष्ट्राक-रालम्	अका.नपुं.द्विती.एक.समस्तं वि. ५
महत्	महत् तका. नपुं. द्विती. एक. वि.१	दृष्ट्वा	क्त्वान्तमव्ययम्
ते	युष्मद्–दका.षष्ठी.एक.सर्व.(युष्मदादेशः)	लोकाः	अका. पुं. प्र. बहु. विशे.
बहुवक्त्रनेत्रम्	अका.नपुं.द्विती.एक.समस्तं वि.२	प्रव्यथिताः	अका. पुं. प्र. बहु. क्तान्तं वि. ६

महाबाहो	महाबाहु-उका.पुं.सम्बो.एक.समस्तम्	तथा	अव्ययम्
बहुबाहूरुपादम्	अका.नपुं.द्विती.एक.समस्तं वि. ३	अहम्	अस्मद्-दका.प्र.एक.सर्व.विशेष्यम्
बहूदरम्	अका.नपुं.द्विती.एक.समस्तं वि. ४		

वर्गीकरणाभ्यासः

अधस्तनेषु वर्गेषु यथानिर्देशं श्लोकपदानि लिखतु–

(i) प्रथमान्तम् (३) ....

(ii) द्वितीयान्तम् (६) ....

(iii) षष्ठ्यन्तम् (१) ....

(iv) सम्बोधनान्तम् (१) ....

(v) पुंलिङ्गम् (३) ....

(vi) नपुंसकम् (६) ....

(vii) अकारान्तम् (७) ....

(viii) उकारान्तम् (१) ....

(ix) तकारान्तम् (१) ....

(x) अव्ययम् (२) ....

(xi) सर्वनाम (२) ....

(xii) क्तान्तं क्रियापदम्(१) ....

(xiii) विशेष्यम् (३) ....

(xiv) विशेषणम् (६) ....

(xv) समस्तम् (५) ....

आकाङ्क्षाविस्तरः

प्रव्यथिताः (= प्रपीडिताः)।

के प्रव्यथिताः? .... (अका. प्र.)

लोकाः प्रव्यथिताः तथा अन्यश्च कः प्रव्यथितः? .... (सर्व. प्र.)

लोकाः प्रव्यथिताः तथा अहं प्रव्यथितः कथम्?	....	(क्त्वान्तम्)
लोकाः तथाहं किं दृष्ट्वा प्रव्यथिताः?	....	(अका. द्विती. विशे.)
लोकाः तथाहं कस्य रूपं दृष्ट्वा प्रव्यथिताः?	....	(सर्व. षष्ठी.)
लोकाः तथाहं ते कीदृशं रूपं दृष्ट्वा प्रव्यथिताः?	....	(तका. द्विती.)
महद् रूपं ते पुनश्च कीदृशम्?	....	(वि. २)
महद् रूपं ते बहुवक्त्रनेत्रं पुनश्च कीदृशम्?	....	(वि. ३)
महद्रूपं ते बहुवक्त्रनेत्रं बहुबाहूरुपादं पुनश्च कीदृशम्?	....	(वि. ४)
महद्रूपं ते बहुवक्त्रनेत्रं बहुबाहूरुपादं बहूदरं पुनश्च कीदृशम्?	....	(वि. ५)
किं च सम्बोधनम्?	....	(उका. सम्बोधनम्)

महाबाहो! बहुवक्त्रनेत्रं बहुबाहूरुपादं बहूदरं बहुदंष्ट्राकरालं ते महद् रूपं दृष्ट्वा लोकाः प्रव्यथिताः तथा अहम् (प्रव्यथितः) इत्यन्वयः।

पदार्थः

पदम्	संस्कृतम्	हिन्दी
महाबाहो	विशालभुज!	लम्बी बाहों वाले हे कृष्ण!
बहुवक्त्रनेत्रम्	अनेकमुखनयनम्	अनेक मुख और आँखों वाले
बहुबाहूरुपादम्	अनेकदोर्जङ्घाचरणम्	बहुत हाथ, जाँघ और पैरों वाले
बहूदरम्	अनेककुक्षियुतम्	बहुत उदरों वाले
बहुदंष्ट्राकरालम्	अनेकदंष्ट्राभिः भयङ्करम्	अनेक जबड़ों से विकराल लगने वाले
ते	भवतः	आपके
महत्	विराट्	विराट्
रूपम्	शरीरम्	शरीर को
दृष्ट्वा	अवलोक्य	देखकर
लोकाः	मर्त्यलोकनिवासिनः	लोग
प्रव्यथिताः	अत्यन्तं पीडिताः	अत्यन्त पीड़ित हो रहे हैं

तथा	एवम्	तथा
अहम्	अहम् (अर्जुनः) (प्रव्यथितः)	मैं (भी) घबरा रहा हूँ।)

भावार्थः

संस्कृतम्–इह श्लोके अर्जुनः विराड्रूपस्य उग्रतां वर्णयति–

हे महाबाहो! अस्मिन् तव विराड्रूपे बहूनि मुखानि नेत्राणि च सन्ति। अत्र अनेके बाहवः ऊरवः पादाश्च दृश्यन्ते। इह बहूनि उदराणि च सन्ति। इदं रूपम् अनेकाभिः दशनशीलाभिः दंष्ट्राभिः भयानकं प्रतीयते। तवैतत् अपरिमितं विश्वरूपं विलोक्य सर्वे जनाः जीवाश्च अत्यन्तं व्याकुलिताः सन्ति तथा अहमपि अतीवव्याकुलितः संत्रस्तश्च अस्मि।

हिन्दी–इस श्लोक में अर्जुन ने भगवान् के विराड् रूप की उग्रता का वर्णन किया है–

हे महाबाहो! आपके इस विराट् शरीर में अनेकों मुख और नेत्र हैं, इसमें बहुत भुजायें, जंघा और पैर हैं तथा अनेकों उदर हैं। बहुत दाढों के कारण यह रूप अत्यन्त विकराल लग रहा है। सभी लोग इस अपरिमित विराड् रूप को देखकर बहुत घबराये हुए हैं तथा मैं भी इसे देखकर अत्यन्त व्याकुल हो रहा हूँ–ऐसा अर्जुन विराड्रूप में देख रहे हैं।

वस्तुतः उस विश्वरूप को दिव्य-दृष्टि से ही देखा जा सकता था, अतः सबके देखने की बात नहीं है। किन्तु अर्जुन उस रूप में सबको भयभीत देख रहे हैं। यह तथ्य यहाँ सभी श्लोकों में समझना चाहिए।

यहाँ यह भी अवधेय है कि पूर्व के श्लोकों में विराट् रूप के इन सभी अवयवों की चर्चा आयी थी। अब अर्जुन इन अवयवों को देखकर व्याकुल हो रहे हैं, अतः यहाँ पुनः उन अवयवों की चर्चा हुई है। इस प्रकरण में आगे के श्लोकों में भी इसी कारण पुनः-पुनः विराट् शरीर के एक-एक अथवा अनेक अंगों की चर्चा आयी है।

अवबोधाभ्यासः

अधस्तनानां प्रश्नानां समाधानं लिखतु–

१. इह श्लोके किं वर्णितम्? ....

२. इह विश्वरूपस्य कानि अङ्गानि निर्दिष्टानि? ....

३. अवयवानाम् इह पुनरुल्लेखे किं कारणम्? ....

४. 'महत्' विशेषणेन किं रूपं गृह्यते? ....

५. 'अहम्' पदेन इह किं क्रियापदम् आक्षिप्यते? ....

६. महाबाहो! इति कस्य सम्बोधनम्? ....

७. सर्वे लोकाः तद् विराड्रूपं द्रष्टुं समर्था आसन् न वा? ....

व्याकरणाभ्यासः

(अ) सन्धिः

१. बाहूरु - बाहु + ऊरु - दीर्घः

२. बहूदरम् - बहु + उदरम् - दीर्घः

३. तथाहम् - तथा + अहम् - दीर्घः

४. प्रव्यथितास्तथा - प्रव्यथिताः + तथा - सभावः

५. रूपं महत् - रूपम् + महत् - अनुस्वारः

६. नेत्रं महा. - नेत्रम् + महा. - अनुस्वारः

७. बहूदरं बहु. - बहूदरम् + बहु. - अनुस्वारः

८. करालं दृष्ट्वा - करालम् + दृष्ट्वा - अनुस्वारः

अधस्तनेषु रेखाङ्कितेषु सन्धिच्छेदं करोतु–

(i) सद्यस्ते विमुक्तास्ततः। ....

(ii) मूढस्तिष्ठति दूरतः। ....

(iii) वनलतास्तरवः पुष्पफलाढ्यास्सन्ति। ....

(iv) वृषभासुरः गोष्ठमागतवान्। ....

(v) उद्यम्य पुच्छं व प्राणि विषाणाग्रेण चोद्धरति। ....

(vi) मा भैष्टेति गिराऽऽश्वास्य स वृषासुरमुपाह्वयत्। ....

(vii) सख्युरंसे भुजाभोगं प्रसार्यावस्थितो हरिः। ....

(viii) सोऽपि खुरेणावनिमुल्लिखन् कृष्णम् उपाद्रवत्। ....

(ix) कृष्णो निष्पीडयामास यथार्द्रमम्बरम्। ....

(x) एवं ककुद्मिनं जघान भगवान् पुरा। ....

(आ) समासः

१. बहुवक्त्रनेत्रम् – वक्त्राणि च नेत्राणि च – द्वन्द्वः

बहूनि वक्त्रनेत्राणि यस्मिन् तत् – बहुव्रीहिः

२. महाबाहो – महान्तौ बाहू यस्य तत्सम्बुद्धौ – बहुव्रीहिः

३. बहुबाहूरुपादम् – बाहवश्च ऊरवश्च पादाश्च – द्वन्द्वः

बहवः बाहूरुपादाः यस्मिन् तत् – बहुव्रीहिः

४. बहूदरम् – बहूनि उदराणि यस्मिन् तत् – बहुव्रीहिः

५. बहुदंष्ट्राकरालम् – बह्व्यः च ताः दंष्ट्राः च – कर्मधारयः

बहुदंष्ट्राभिः करालम् इति – तृतीयातत्पुरुषः

अधस्तनेषु पदेषु विग्रहं समासं च करोतु–

(i) बदरपाण्डुवदनः – ....

(ii) मृदुगण्डम् – ....

(iii) कुन्ददामकृतकौतुकवेषः – ....

(iv) गोपगोधनवृतः – ....

(v) सारसहंसविहङ्गाः – ....

(vi) ध्वजवज्रनीरजाङ्कुशाः – ....

(vii) धृतमौनाः – ....

(viii) अधरार्पितवेणुः – ....

(इ) कृत्प्रत्ययः

१. वक्त्रम् – वक्ति अनेन – वच् + ष्ट्रन् (त्र) = वक्त्र

२. नेत्रम् – नयति अनेन – नी + ष्ट्रन् = नेत्र

३. पादः – पद्यतेऽनेन – पद् + घञ् = पाद

४. दंष्ट्रा – दशति अनेन – दंश् + ष्ट्रन्दंष्ट्र + टाप् (आ) = दंष्ट्रा

५. दृष्ट्वा - दृश् + क्त्वा (त्वा)

६. प्रव्यथिताः - प्र + व्यथ + क्त (त) = प्रव्यथित

अधस्तनेभ्यः प्रकृतिप्रत्ययेभ्यः निष्पन्नं पदं वाक्ये प्रयुङ्क्ष्म्–

(i) मिह् + ष्ट्रन् - ....

(ii) सिच् + ष्ट्रन् - ....

(iii) भज् + घञ् - ....

(iv) वप् + घञ् - ....

(v) हृष् + क्त्वा - ....

(vi) स्पृश् + क्त्वा - ....

(vii) ग्रस् + क्त - ....

(ई) क्रियाकारकसम्बन्धः

दृष्ट्वा	– पूर्वकालिकी गौणक्रिया	बहुदंष्ट्राकरालम्	– कर्मविशेषणम्
रूपम्	– गौणक्रियायाः कर्म	ते	– कर्मसम्बन्धी
महत्	– कर्मविशेषणम्	लोकाः	– कर्ता
बहुवक्त्रनेत्रम्	– कर्मविशेषणम्	अहम्	– कर्ता
बहुबाहूरुपादम्	– कर्मविशेषणम्	प्रव्यथिताः	– क्तान्ता क्रिया
बहूदरम्	– कर्मविशेषणम्	तथा	– कर्तृसमुच्चये

(उ) छन्दोविधानम्

अस्य श्लोकस्य प्रथमचतुर्थपादयोः इन्द्रवज्रा तथा द्वितीयतृतीयपादयोः उपेन्द्रवज्रा छन्दः। इह उभयोः प्रयोगात् माया नाम उपजातिः छन्दो विज्ञेयम्।

(ऊ) पर्यायशब्दः

१. ऊरुः १. सक्थि (इका. नपुं.), २. जङ्घा (अका. स्त्री.)

२. बाहुः १. भुजः (अका. पुं. / आका. स्त्री.), २. प्रवेष्टः (अका. पुं.), ३. दोः (षका. पुं.), ४. दोषा (आका. स्त्री.), ५. पाणिः (इका. पुं.), ६. हस्तः (अका. पुं.)

३. उदरम्	१. पिचण्डः (अका. पुं.), २. कुक्षिः (इका. पुं.), ३. जठरम् (अका. नपुं.), ४. तुन्दम् (अका. नपुं.)
४. दंष्ट्रा	१. तुण्डम् (अका. नपुं.)
५. पादः	१. पदम् (अका. नपुं.), २. अङ्घ्रिः (इका. पुं.), ३. चरणम् (नपुं / पुं. अका.)

◆◆◆

१२. श्लोकः

नभःस्पृशं दीप्तमनेकवर्णं
व्यात्ताननं दीप्तविशालनेत्रम्।
दृष्ट्वा हि त्वां प्रव्यथितान्तरात्मा
धृतिं न विन्दामि शमं च विष्णो।। (भ. गी. ११.२४)

पदच्छेदः

नभः-स्पृशम्, दीप्तम्, अनेक-वर्णम्,
व्यात्त + आननम्, दीप्त-विशाल-नेत्रम्।

दृष्ट्वा, हि, त्वाम्, प्रव्यथिता+अन्तर्+आत्मा,
धृतिम्, न विन्दामि, शमम्, च, विष्णो।।

पदच्छेदाभ्यासः

अधस्तनानि पदानि छिनत्तु–

(i) स्पृशं दीप्तम् – ....
(ii) वर्णं व्यात्ताननं – ....
(iii) व्यात्ताननम् – ....
(iv) प्रव्यथितान्तरात्मा – ....
(v) धृतिं न – ....
(vi) शमं च – ....
(vii) आननं दीप्त. – ....
(viii) त्वां प्रव्यथित. – ....

पदपरिचयः

पदम्	विश्लेषणम्
नभःस्पृशम्	नभःस्पृश् - शका. पुं. द्विती. एक. समस्तं वि. १
दीप्तम्	अका. पुं. द्विती. एक. क्तान्तं वि. २
अनेकवर्णम्	अका. पुं. द्विती. एक. समस्तं विशेषणम् ३
व्यात्ताननम्	अका. पुं. द्विती. एक. समस्तं विशेषणम् ४
दीप्तविशालनेत्रम्	अका. पुं. द्विती. एक. समस्तं विशेषणम् ५

दृष्ट्वा	क्त्वान्तमव्ययम्
हि	अव्ययम्
त्वाम्	युष्मद् - दका. द्विती. एक. सर्व. विशेष्यम्
प्रव्यथितान्तरात्मा	प्रव्यथितान्तरात्मन् - नका. पुं. प्र. एक. समस्तं विशेषणम्
धृतिम्	धृति - इका. स्त्री. द्विती. एक.
न	अव्ययम्
विन्दामि	विद् + लट् उ. पु. एक. तुदादि. परस्मै. कर्तरि क्रिया.
शमम्	शम - अका. पुं. द्विती. एक.
च	अव्ययम्
विष्णो	विष्णु - उका. पुं. सम्बो. एक.

वर्गीकरणाभ्यासः

अधस्तनेषु वर्गेषु श्लोकपदानि लिखतु–

(i) प्रथमान्तम् (१) ....

(ii) द्वितीयान्तम् (८) ....

(iii) सम्बोधनम् (१) ....

(iv) अव्ययम् (४) ....

(v) सर्वनाम (१) ....

(vi) अकारान्तम् (५) ....

(vii) इकारान्तम् (१) ....

(viii) उकारान्तम् (१) ....

(ix) नकारान्तम् (१) ....

(x) शकारान्तम् (१) ....

(xi) पुंलिङ्गम् (८) ....

(xii) स्त्रीलिङ्गम् (१) ....

(xiii) समस्तम् (५) ....

(xiv) क्रियापदम् (१) ....

(xv) विशेष्यम् (१) ....

(xvi) विशेषणम् (६) ....

आकाङ्क्षाविस्तरः

न विन्दामि	**(= न लभे)।**	
कः न विन्दति?	अहं न विन्दामि।	
अहं कां न विन्दामि?	....	(इका. द्विती.)
अहं धृतिम् अन्यं च कं च विन्दामि?	....	(अका. द्विती.)
अहं धृतिं शमं च कथं न विन्दामि?	....	(नका. प्र.)
कथम् अहं प्रव्यथितान्तरात्मा?	....	(क्त्वान्तमव्ययम्)
कं दृष्ट्वा प्रव्यथितान्तरात्मा?	....	(सर्व. द्विती.)
कथम्भूतं त्वां दृष्ट्वा प्रव्यथितान्तरात्मा?	....	(वि. १)
नभःस्पृशं त्वां पुनश्च कथम्भूतम्?	....	(वि. २)
नभःस्पृशं दीप्तं त्वां पुनश्च कथम्भूतम्?	....	(वि. ३)
नभःस्पृशं दीप्तम् अनेकवर्णं त्वां पुनश्च कथम्भूतम्?	....	(वि. ४)
नभःस्पृशं दीप्तम् अनेकवर्णं व्यात्ताननं त्वां पुनश्च कथम्भूतम्?	....	(वि. ५)

नभःस्पृशं दीप्तम् अनेकवर्णं व्यात्ताननं दीप्तविशालनेत्रं त्वां दृष्ट्वा हि (अहम्) प्रव्यथितान्तरात्मा (अतः) हे विष्णो! धृतिं शमं च न विन्दामि।

पदार्थः

पदम्	संस्कृतम्	हिन्दी
विष्णो	व्यापनशील हे त्रिविक्रम!	हे विष्णो!
नभःस्पृशम्	व्योमव्यापिनम्	आकाश तक व्याप्त
दीप्तम्	जाज्वल्यमानम्	देदीप्यमान
अनेकवर्णम्	भयङ्करनानासंस्थानयुक्तम्	भयंकर अनेक आकृति वाले

व्यात्ताननम्	विवृतमुखम्	मुख फैलाये हुए
दीप्तविशालनेत्रम्	प्रज्वलितविस्तीर्णचक्षुषम्	प्रकाशमान विशाल आँखों से युक्त
त्वाम्	भवन्तम्	आपको
दृष्ट्वा	विलोक्य	देखकर
हि	एव (अहम्)	ही (मैं)
प्रव्यथितान्तरात्मा	प्रभीतचित्तः (अस्मि, अतः)	भयभीत चित्त (हो गया हूँ, अतः)
धृतिम्	धैर्यम्	धैर्य को
शमम्	शान्तिम्	शान्ति को
च	तथा	और
न	न हि	नहीं
विन्दामि	प्राप्नोमि	पाता हूँ।

भावार्थः

संस्कृतम्—अर्जुनः अनेन पद्येन भगवतो विश्वरूपस्य उग्रतया आत्मनोऽशान्तिं प्रकटयति—

हे विष्णो! तव विराट्शरीरं नभः स्पृशति, यावन्नभोमण्डलं व्याप्तमस्ति। तच्च शरीरम् अत्यन्तं भास्वरं नानाकारैः युक्तञ्चास्ति। तस्मिन् शरीरे आकृतीनां मुखानि व्यात्तानि विवृतानि सन्ति। तत्र अतीव तेजोमयानि विस्तीर्णानि चक्षूंषि भयमुत्पादयन्ति। हे विष्णो! एतादृशं भयानकं त्वामवलोक्यैव ममान्तरात्मा प्रकर्षेण भीतः सञ्जातः। अतोऽहम् इदानीं धैर्यं मनःप्रसादं वा न प्राप्नोमि। किञ्च इदानीमहम् अन्यत्रापि गन्तुं न समर्थः, यतो हि त्वं सर्वत्र विश्नोति व्याप्नोति। नाहं तादृशं स्थलं पश्यामि, यत्र त्वं न स्याः।

हिन्दी—अर्जुन ने इस पद्य में भगवान् के विराड् रूप की उग्रता के कारण अपनी अशान्ति को प्रकट किया है—

हे विष्णो! आपका विराट् शरीर इतना बड़ा है कि वह नभोमण्डल तक फैला है। उससे असह्य तेज फैल रहा है। उसमें अनेक आकृतियों का संयोग है और उनके मुख फैले होने से वे भयंकर लग रही हैं। उन सभी आकारों में बड़े-बड़े नेत्र हैं, जिनसे प्रचण्ड ज्योति निकल रही है। इस प्रकार भयानक रूप धारण करने वाले आपको देखकर ही मेरा अन्तर्मन अकल्पित भयवश बहुत घबरा गया है। इसलिए मेरा धैर्य और मन का सुख-चैन जाता रहा है। मैं अत्यन्त अधीर और अशान्त हो गया हूँ। इस स्थिति में मैं कहीं दूसरी जगह भी भाग कर नहीं जा सकता, क्योंकि जहाँ जाऊँगा वहीं पर आपको पहले से मौजूद पाऊँगा। आप तो विष्णु हैं, सर्वत्र व्याप्त हैं।

अवबोधाभ्यासः

अधस्तनान् प्रश्नान् समादधातु–

१. अस्मिन् श्लोके अर्जुनः किं प्रकटयति? ....

२. 'अनेकवर्णम्' इति विशेषणस्य इह कोऽभिप्रायः? ....

३. रूपस्य भयङ्करता इह कैः पदैः संसूचिता? ....

४. इह 'अन्तरात्मा' पदस्य कोऽर्थः? ....

५. इह कर्तुः बोधकं किं पदमाक्षिप्तम्? ....

६. 'विष्णो' सम्बोधनेन किं पदमाक्षिप्तम्? ....

७. जनः कस्मादपि स्थानात्कथं पलायितुम् इच्छति? ....

व्याकरणाभ्यासः

(अ) सन्धिः

१. व्यात्ताननम् – व्यात्त + आननम् – दीर्घः

२. प्रव्यथितान्तरात्मा – प्रव्यथित + अन्तरात्मा – दीर्घः

३. स्पृशं दीप्तम् – स्पृशम् + दीप्तम् – अनुस्वारः

४. वर्णं व्यात्त० – वर्णम् + व्यात्त० – अनुस्वारः

५. आननं दीप्त० – आननम् + दीप्त० – अनुस्वारः

६. त्वां प्रव्यथित – त्वाम् + प्रव्यथित – अनुस्वारः

७. धृतिं न – धृतिम् + न – अनुस्वारः

८. शमं च – शमम् + च – अनुस्वारः

अधस्तनेषु रेखाङ्कितेषु सन्धिं करोतु–

(i) मया + आचरितम् + भद्रम्।

(ii) किम् + तप्तम् परमम् + तपः।

(iii) मम + अद्य + अमङ्गलम् + नष्टम्।

(iv) यन्नमस्ये भगवतो योगिध्येय + अङ्घ्रिपङ्कजम्।

(v) मम + अधमस्य + अपि स्यादेव + अच्युतदर्शनम्।

(vi) रथमास्थाय नन्दगोकुलम् + प्रययौ।

(vii) चोरपाल + अपदेशतः क्रीडन्ति बालकाः।

(आ) समासः

१. नभःस्पृशम् – नभः स्पृशतीति – नभः स्पृश् + क्विप् (०) = नभः + पृश् – उपपदसमासः

२. अनेकवर्णम् – अनेके वर्णाः यस्मिन् तम् – बहुव्रीहिः

३. व्यात्ताननम् – व्यात्तानि आननानि येषु तम् – बहुव्रीहिः

४. दीप्तविशालनेत्रम् – विशालानि च तानि नेत्राणि – कर्मधारयः

दीप्तानि विशालनेत्राणि येषु तम् – बहुव्रीहिः

५. प्रव्यथितान्तरात्मा – अन्तःस्थितः आत्मा इति – मध्यमपदलोपितत्पुरुषः

प्रव्यथितः अन्तरात्मा यस्य सः – बहुव्रीहिः

अधस्तनेषु विग्रहेषु समासं कृत्वा वाक्यप्रयोगं करोतु–

(i) मनसो जवः इति – ....

(ii) मनोजवः इव जवः यस्य सः – ....

(iii) विश्वं भुनक्ति इति – ....

(iv) भूतं भावयतीति – ....

(v) भीषिताः अखिलाः येन सः – ....

(vi) विकटम् आस्यकोटरं यस्य सः – ....

(vii) नीलः महाम्बुदः उपमा यस्य तम् – ....

(viii) लब्धा संज्ञा येन तस्मै – ....

(ix) अयत्नेन हताः अरयः यस्य तस्य – ....

(x) अन्तर्विद्यमानम् अङ्कम् इति – ....

(इ) कृत्प्रत्ययः

१. नभः स्पृशम् – नभः + स्पृश् + क्विप् (०) = नभःस्पृश्

२. दीप्तम् – दीप् + क्त (त) = दीप्त

३. व्यात्त - वि + आङ् (आ) दा + क्त =

४. प्रव्यथित - प्र + व्यथ + क्त =

५. धृतिम् - धृ + क्तिन् (ति) = धृति

६. शमम् - शम् + अच् (अ) = शम

७. विशाल - वि + शल + घञ् = विशाल

८. नेत्र - नीः + ष्ट्रन् (त्र) = नेत्र

९. दृष्ट्वा - दृश् + क्त्वा (त्वा) = दृष्ट्वा

१०. विष्णो - वेवेष्टि इति विष् + नु = विष्णु

अधस्तनेषु पदेषु प्रकृतिप्रत्ययं निर्दिशतु–

(i) शिष्टकृत् - ....

(ii) नन्दजित् - ....

(iii) गूढः - ....

(iv) हेषितम् - ....

(v) लक्षितम् - ....

(vi) विसृष्टः - ....

(vii) महाज्वालः - ....

(viii) स्थाणुः - ....

(ix) अवनतिः - ....

(x) नियमः - ....

(ई) क्रियाकारकसम्बन्धः

विन्दामि	-	कर्तरि क्रिया	त्वाम्	-	गौणक्रियायाः कर्म
अहम्	-	आक्षिप्तः कर्ता	नभःस्पृशम्	-	कर्मविशेषणम्
प्रव्यथितान्तरात्मा	-	कर्तृविशेषणम्	दीप्तम्	-	कर्मविशेषणम्
धृतिम्	-	कर्म	अनेकवर्णम्	-	कर्मविशेषणम्
शमम्	-	कर्म	व्यात्ताननम्	-	कर्मविशेषणम्

च	- कर्मसमुच्चये	दीप्तविशालनेत्रम्	-	कर्मविशेषणम्
न	- क्रियाविशेषणम्	हि	-	हेतौ
दृष्ट्वा	- पूर्वकालिकी गौणक्रिया	विष्णो	-	सम्बोधनम्

(उ) छन्दोविधानम्

अस्य श्लोकस्य प्रथमचतुर्थपादयोः उपेन्द्रवज्रा छन्दः, द्वितीयतृतीयपादयोश्च इन्द्रवज्रा। अतः उभयोः प्रयोगात् इह पद्ये आर्द्रा नाम उपजातिः छन्दः।

(ऊ) पर्यायशब्दः

१. विष्णुः - १. नारायणः (अका० पुं०) २. कृष्णः (अका० पुं०) ३. वैकुण्ठः (अका० पुं०) ४. विष्टरश्रवाः (विष्टरश्रवस् - सका० पुं०)

२. धृतिः - १. धारणम् (अका० नपुं०) २. धैर्यम् (अका० नपुं०) ३. धीरता (आका० स्त्री०)

◆◆◆

१३. श्लोकः

दंष्ट्राकरालानि च ते मुखानि
दृष्ट्वैव कालानलसन्निभानि।
दिशो न जाने न लभे च शर्म
प्रसीद देवेश जगन्निवास।। (भ. गी. ११.२५)

पदच्छेदः

दंष्ट्रा-करालानि, च, ते, मुखानि,
दृष्ट्वा, एव, काल+अनल-संनिभानि।

दिशः, न, जाने, न, लभे, च, शर्म,
प्रसीद, देव + ईश, जगत्-निवास।।

पदच्छेदाभ्यासः

अधस्तनानि पदानि विच्छिनत्तु–

(i) दंष्ट्राकरालानि – ....

(ii) दृष्ट्वैव – ....

(iii) कालानलसंनिभानि– ....

(iv) दिशो न – ....

(v) देवेश – ....

(vi) जगन्निवास – ....

पदपरिचयः

पदम्	विश्लेषणम्
दंष्ट्रा	आका. स्त्री. समासपूर्वपदम्
दंष्ट्राकरालानि	अका. नपुं. द्विती. बहु. समस्तं वि. १
च	अव्ययम्
ते	युष्मद् – दका. षष्ठी. एक. युष्मदादेश. सर्व.
मुखानि	अका. नपुं. द्विती. बहु. विशे.

दृष्ट्वा	क्त्वान्तमव्ययम्
एव	अव्ययम्
कालानलसंनिभानि	अका. नपुं. द्विती. बहु. समस्तं विशेषणम् २
दिशः	शका. स्त्री. द्विती. बहु.
न	अव्ययम्
जाने	ज्ञा + लट् उपु. एक. क्र्यादि. आत्मने. कर्तरि क्रिया
न	अव्ययम्
लभे	लभ + लट् उपु. एक. भ्वादि. आत्मने. कर्तरि क्रिया
च	अव्ययम्
शर्म	शर्मन् - नका. नपुं. द्विती. एक.
प्रसीद	प्र + षद् + लोट् मपु. एक. भ्वादि परस्मै कर्तरि क्रिया
देवेश	अका. पुं. सम्बो. एक. समस्तम्
जगन्निवास	स अका. पुं. सम्बो. एक. समस्तम्

वर्गीकरणाभ्यासः

अधस्तनेषु वर्गेषु श्लोकपदानि विभजतु–

(i) सम्बोधनान्तम् (२) ....

(ii) द्वितीयान्तम् (५) ....

(iii) षष्ठ्यन्तम् (१) ....

(iv) अव्ययम् (६) ....

(v) सर्वनाम (१) ....

(vi) अकारान्तम् (५) ....

(vii) नकारान्तम् (१) ....

(viii) शकारान्तम् (१) ....

(ix) क्त्वान्तम् (१) ....

(x) पुंलिङ्गम् (२) ....

(xi) स्त्रीलिङ्गम् (१) ....

(xii) नपुंसकम् (१) ....

(xiii) विशेष्यम् (१) ....

(xiv) विशेषणम् (२) ....

(xv) क्रियापदम् (३) ....

(xvi) विशेष्यविशेषणणानि पाकत्र लिखतु–

आकाङ्क्षाविस्तरः

न जाने (= न जानानि)।

को न जानीते? **अहं न जाने।**

अहं काः न जाने? .... (शका. द्विती.)

अहं दिशः कथं न जाने? .... (क्त्वान्तम्)

अहं कानि दृष्ट्वैव दिशो न जाने? .... (अका. द्विती. विशेष्यम्)

कीदृशानि मुखानि दृष्ट्वैव दिशो न जाने? .... (विशेषणम् १)

दंष्ट्राकरालानि मुखानि पुनश्च कथम्भूतानि? .... (विशेषणम् २)

कस्य दंष्ट्राकरालानि कालानलसंनिभानि मुखानि? .... (सर्व. ष.)

हे देवेश! दंष्ट्रकरालानि कालानलसंनिभानि च .... न लभे।
ते मुखानि दृष्ट्वैव दिशो न जाने। अथ च किम्?

किं न लभे? .... (नका. द्वि.)

शर्म न लभे। अतः हे जगन्निवास! त्वं प्रसीद।

पदार्थः

पदम्	संस्कृतम्	हिन्दी
देवेश	हे सुरेश!	हे देवेश!
दंष्ट्राकरालानि	दंष्ट्राभिः विकृतानि	दाढ़ों से विकराल
कालानलसंनिभानि	प्रलयाग्नितुल्यानि	प्रलयाग्नि के समान दहकते
च	तथा	और
ते	तव	आपके

मुखानि	वदनानि	मुखों को
दृष्ट्वा	विलोक्य	देखकर
एव	एव	ही
दिशः	ककुभः	दिशाओं को
न	न	नहीं
जाने	अवबोधानि	जान पा रहा हूँ
शर्म	सुखम्	सुख-शान्ति
च	तथा	और
न	न	नहीं
लभे	प्राप्नोमि	पाता हूँ
जगन्निवास	हे जगदाधार!	हे जगदीश!
प्रसीद	प्रसन्नो भव	(आप) प्रसन्न हों।

भावार्थः

संस्कृतम्—इह श्लोके भगवतो विराड्रूपस्य उग्रतया अशान्तः अर्जुनः भगवत्प्रसादमिच्छति—

हे देवेश! त्वं देवानाम् ईशोऽसीति प्रत्यक्षम् अहम् अनुभवामि। अतः इह सम्बोधयति अर्जुनः— हे देवेश! तव विराट्शरीरे स्थितानि अपरिमितानि मुखानि दंष्ट्राभिः दीर्घतमैः दृढैः दन्तैः भयङ्कराणि दृश्यन्ते। अथ च तानि मुखानि प्रलयाग्नितुल्यानि महाज्वालयुक्तानि असह्यदृश्यानि सन्ति। अतस्तानि मुखानि विलोक्यैव मम दिग्भ्रमः सञ्जातः। तेषां मुखानां समीपे गतिस्तु दूरतः त्याज्या, दूरतः तेषां दर्शनेनैव मम दिग्ज्ञानं विलुप्तम्। किञ्च भगवद्रूपदर्शनेन यत्सुखम् उपलभ्यते, तदपि शर्म सुखशान्तिं नोपलभे। अतः हे जगन्निवास! त्वं मयि प्रसन्नो भव। यथा भयाभावेन त्वद्दर्शनजं सुखं प्राप्नुयाम्। तव जगन्निवासत्वं च प्रत्यक्षेण मया उपलब्धम्, यदर्थं मम प्रार्थनासीत्। अतः ममापि त्वं सुखनिवासो भव।

हिन्दी—भगवान् के विराड् रूप की उग्रता से अशान्त अर्जुन इस श्लोक में भगवान् से प्रसन्न होने की प्रार्थना करता है—

विश्वरूप का दर्शन करते हुए अर्जुन ने देखा कि श्रीकृष्ण सभी देवताओं के स्वामी हैं। इस प्रत्यक्ष दर्शन से इस विषय में उसका सन्देह समाप्त हो गया। आपके इस विराट् शरीर में अगणित मुख हैं और उन मुखों की दृढ़ दाढ़ों के कारण वे मुख बड़े भयंकर लग रहे हैं। उन मुखों से प्रलय काल की आग की भांति ऊँची-ऊँची भयानक लपटें निकल रही हैं। अतः उन मुखों के पास जाना तो दूर, प्रत्युत बहुत दूर से उन्हें देखकर ही मैं हक्का-बक्का हो रहा हूँ, दिशाओं को नहीं जान पा रहा हूँ मैं दिग्भ्रमित हो गया हूँ। और मेरा सुख-चैन छिन गया है। भगवान् के दर्शन

से जो सहज सुखानुभव होता है, वह मुझे नहीं मिल पा रहा है। अतः हे जगन्निवास! आप मुझ पर प्रसन्न हों और मुझे भी सुख-शान्ति प्रदान करें। मैंने प्रत्यक्ष देखा है कि आप में सारा जगत् सुखपूर्वक निवास करता है, अतः मेरा भी निवास सुखकर हो।

अवबोधाभ्यासः

अधस्तनान् प्रश्नान् उत्तरयतु–

१. इह श्लोके अर्जुनः किमिच्छति? ....

२. इह मुखस्य भयङ्करत्वे के कारणे निर्दिष्टे स्तः? ....

३. 'देवेश' सम्बोधने किं तात्पर्यम्? ....

४. भगवद्दर्शनेन किमनुभूयते? ....

५. सुखं कथं नानुभवति अर्जुनः? ....

६. भगवत्प्रसादेन किं स्यात्? ....

७. 'जगन्निवास' सम्बोधनस्य कोऽभिप्रायः? ....

व्याकरणाभ्यासः

(अ) सन्धिः

१. दृष्ट्वैव – दृष्ट्वा + एव – वृद्धिः

२. कालानल – काल + अनल – दीर्घः

३. देवेश – देव + ईश – गुणः

४. जगन्निवास – जगत् + निवास – अनुनासिकः

५. दिशो न – दिशः + न – ओभावः

अधस्तनेषु रेखाङ्कितेषु सन्धिच्छेदं करोतु-

(i) ममैतद् दुर्लभं मन्ये उत्तमश्लोकदर्शनम्। ....

(ii) कृष्णोऽवधीद् व्योमासुरम्। ....

(iii) भगवति अम्बुजेक्षणे भक्तिं परामुपगतः। ....

(iv) गिरीन्द्रसदृशं रूपमधारयत्। ....

(v) विमोक्तुमात्मानं नाशक्नोद् ग्रहणातुरः। ....

(vi) दिङ्मोहो मामजायत। ....

(vii) सन्निधौ निवसेद् गुरोः। ....

(viii) गुरुणाऽभ्यनुज्ञातो गच्छेद् बहिः। ....

(आ) समासः

१. दंष्ट्राकरालानि – दंष्ट्राभिः करालानि इति – तृतीयातत्पुरुषः

२. कालानलसंनिभानि – कालस्य अनलः इति – षष्ठीतत्पुरुषः

कालानलेन संनिभानि इति – तृतीयातत्पुरुषः

३. देवेश – देवानाम् ईश इति – षष्ठीतत्पुरुषः

४. जगन्निवास – जगतां निवास इति – षष्ठीतत्पुरुषः

अधस्तनेषु रेखाङ्कितेषु समासं विग्रहं च करोतु–

(i) प्रणतानां भरणः इति – ....

(ii) कंसेन प्रहितः – ....

(iii) नखमण्डलानां त्विषा – ....

(iv) गवां चारणाय – ....

(v) कुङ्कुमेन अङ्कितम् – ....

(vi) गुडालकैः वृतम् – ....

(vii) भारस्य अवताराय – ....

(viii) स्वतेजसा अपास्तम् – ....

(ix) योगिभिः ध्येयः – ....

(x) हेषितेन भीषिताः – ....

(इ) कृत्प्रत्ययः

१. दंष्ट्रा – दंश् + ष्ट्रन् (त्र) = दंष्ट्र + टाप् (आ) = दंष्ट्रा

२. दृष्ट्वा – दृश् + क्त्वा (त्वा) = दृष्ट्वा

३. शर्म – शृणाति दुःखमिति – शृ + मनिन् (मन्) शर्मन्

४. ईश – ईष्टे इति ईश् + अच् = ईश्

५. निवास – नि + वस् + घञ् (अ) = निवास

अधस्तनेषु पदेषु प्रकृति-प्रत्ययं निर्दिश्य पदानि वाक्ये व्यवहरणीयानि–

(i) पञ्चपात्रम् – ....

(ii) स्तोत्रम् – ....

(iii) दृष्ट्वा – ....

(iv) धूत्वा – ....

(v) दृष्ट्वा – ....

(vi) जित्वा – ....

(vii) वर्म – ....

(viii) मर्म – ....

(ix) दमः – ....

(x) प्रसादः – ....

(ई) क्रियाकारकसम्बन्धः

जाने	– आत्मने. कर्तरि क्रिया	मुखानि	– गौणक्रियायाः कर्म
न	– क्रियाविशेषणम्	दंष्ट्राकरालानि	– कर्मविशेषणम्
लभे	– आत्मन. कर्तरि क्रिया	कालानलसंनिभानि	– कर्मविशेषणम्
न	– क्रियाविशेषणम्	च	– विशेषणसमुच्चये
च	– क्रियासमुच्चये	ते	– कर्मसम्बन्धी
अहम्	– आक्षिप्तः कर्ता	प्रसीद	– परस्मै. कर्तरि लोडर्थे क्रिया
दिशः	– ज्ञानक्रियायाः कर्म	त्वम्	– आक्षिप्तः कर्ता
शर्म	– लाभक्रियायाः कर्म	देवेश	– सम्बोधनम्
दृष्ट्वा	– पूर्वकालिकी गौणक्रिया	जगन्निवास	– सम्बोधनम्
एव	– दृशीतरव्यावर्तने		

(उ) छन्दोविधानम्

अस्य श्लोकस्य प्रथमद्वितीयपादयोः इन्द्रवज्रा छन्दः तथा तृतीयचतुर्थपादयोः उपेन्द्रवज्रा छन्दः। उभयोरिह प्रयोगात् रामा नाम उपजातिश्छन्दो विज्ञेयम्।

◆◆◆

९४ - ९५ श्लोकौ

अमी च त्वां धृतराष्ट्रस्य पुत्राः
सर्वे सहैवावनिपालसङ्घैः।
भीष्मो द्रोणः सूतपुत्रस्तथासौ
सहास्मदीयैरपि योधमुख्यैः॥

वक्त्राणि ते त्वरमाणा विशन्ति
दंष्ट्राकरालानि भयानकानि।
केचिद्विलग्ना दशनान्तरेषु
संदृश्यन्ते चूर्णितैरुत्तमाङ्गैः॥(भ. गी. ११.२६-२७)

पदच्छेदः

अमी, च, त्वाम्, धृत-राष्ट्रस्य, पुत्राः,
सर्वे, सह, एव, अवनि-पाल-सङ्घैः।
भीष्मः, द्रोणः, सूत-पुत्रः, तथा, असौ,
सह, अस्मदीयैः, अपि, योध-मुख्यैः॥२६॥

वक्त्राणि, ते, त्वरमाणाः, विशन्ति,
दंष्ट्रा-करालानि, भयानकानि।
केचित्, विलग्नाः, दशन + अन्तरेषु,
संदृश्यन्ते, चूर्णितैः, उत्तम + अङ्गैः॥२७॥

पदच्छेदाभ्यासः

अधस्तनेषु पदच्छेदं करोतु–

(i) सहैवावनिपालसङ्घैः – ....

(ii) भीष्मो द्रोणः – ....

(iii) सूतपुत्रस्तथा – ....

(iv) तथासौ – ....

(v) सहास्मदीयैः – ....

(vi) अस्मदीयैरपि – ....

(vii) त्वां धृतराष्ट्रस्य – ....

(viii) त्वरमाणा विशन्ति – ....

(ix) केचिद्विलग्नाः – ....

(x) दशनान्तरेषु – ....

(xi) उत्तमाङ्गैः – ....

(xii) चूर्णितैरुत्तम – ....

(xiii) विलग्ना दशन – ....

पदपरिचयः

पदम्	विश्लेषणम्	पदम्	विश्लेषणम्
अमी	अदस्–सका.पुं.प्र.बहु.सर्व.वि. १	अस्मदीयैः	अका.पुं.तृ.बहु.तद्धितान्तं वि.४
च	अव्ययम् १	अपि	अव्ययम् ६
त्वाम्	युष्मद्–दका.द्विती.एक.सर्व.	योधमुख्यैः	अका.पुं.तृ.बहु.समस्तं विशे.
धृतराष्ट्रस्य	धृतराष्ट्र अका.पुं.षष्ठी.एक.समस्तम्	वक्त्राणि	अका.नपुं.द्विती.बहु.विशेष्यम्
पुत्राः	पुत्र अका.पुं.प्र.बहु.विशे.	ते	युष्मद्–दका.षष्ठी.एक.युष्मदादेशः सर्व.
सर्वे	अका.पुं.प्र.बहु.सर्व.वि. २	त्वरमाणाः	अका.पुं.प्र.बहु.शानजन्तं वि.५
सह	अव्ययम् २	विशन्ति	विश्+लट् प्रपु.बहु.तुदादि.परस्मै.कर्तरि क्रिया
एव	अव्ययम् ३	दंष्ट्राकरालानि	अका.नपुं.द्विती.बहु. समस्तं वि.६
अवनिपालसङ्घैः	अका.पुं.तृ.बहु.समस्तम्	भयानकानि	अका.नपुं.द्विती.बहु.वि.७
भीष्मः	भीष्म–अका.पुं.प्र.एक.	केचित्	किम्+चित् पुं.प्र.बहु.सर्व.वि.८
द्रोणः	अका.पुं.प्र.एक.	विलग्नाः	अका.पुं.प्र.बहु.क्तान्तं विशेषणम् ९
सूतपुत्रः	अका.पुं.प्र.एक. समस्तम् विशे.	दशनान्तरेषु	अका.नपुं.सप्त.बहु.समस्तम्
तथा	अव्ययम् ४	संदृश्यन्ते	सम्+दृश्+लट् प्रपु.बहु.भ्वादि.कर्मणि आत्मने.क्रिया.
असौ	अदस्–सका.पुं.प्र.एक.सर्व. वि. ३	चूर्णितैः	अका.नपुं.तृ.बहु.क्तान्तं वि.१
सह	अव्ययम् ५	उत्तमाङ्गैः	अका.नपुं.तृ.बहु.समस्तं विशे.

वर्गीकरणाभ्यासः

अधस्तनेषु वर्गेषु यथानिर्देशं श्लोकपदानि लिखतु–

(i) प्रथमान्तम् (१.) ....

(ii) द्वितीयान्तम् (४) ....

(iii) तृतीयान्तम् (५) ....

(iv) षष्ठ्यन्तम् (२) ....

(v) सप्तम्यन्तम् (१) ....

(vi) अव्ययम् (६) ....

(vii) सर्वनाम (६) ....

(viii) समस्तम् (७) ....

(ix) अकारान्तम् (१७) ....

(x) पुंलिङ्गम् (१४) ....

(xi) नपुंसकम् (६) ....

(xii) विशेष्यम् (५) ....

(xiii) विशेषणम् (१.) ....

(xiv) क्रियापदम् (२) ....

(xv) विशेष्यै सह विशेषणानि योजयतु। ....

आकाङ्क्षाविस्तरः

विशन्ति (= प्रविशन्ति)।

के विशन्ति? .... (अका. प्र. विशेष्यम् १)

कस्य पुत्राः विशन्ति? .... (अका. ष.)

धृतराष्ट्रस्य के पुत्राः विशन्ति? .... (अदस्)

धृतराष्ट्रस्य अमी कति पुत्राः विशन्ति? .... (सर्व)

धृतराष्ट्रस्य अमी सर्वे पुत्राः कं विशन्ति? .... (युष्मद् द्विती.)

धृतराष्ट्रस्य अमी सर्वे पुत्राः कैः सह त्वां .... (समस्तम् अका. तृ. बहु.)

विशन्ति?

धृतराष्ट्रस्य अमी सर्वे पुत्राः अवनिपालसङ्घैः सहैव त्वां विशन्ति।

अन्ये च के विशन्ति? ....

तथा भीष्मः द्रोणः असौ सूतपुत्रः च कैः .... (तृ. बहु. विशेष्यम्)
सह विशन्ति?

तथा भीष्मः द्रोणः असौ सूतपुत्रश्च .... (अका. तृ. बहु. विशेषणम्)
कीदृशैः योधमुख्यैः सह विशन्ति?

तथा भीष्मः द्रोणः असौ सूतपुत्रश्च .... (अका. प्र. बहु. विशेषणम् ५)
अस्मदीयैरपि योधमुख्यैः सह कथम्भूताः विशन्ति?

तथा भीष्मः द्रोणः असौ सूतपुत्रश्च .... (अका. नपुं. प्र. बहु. विशेष्यम्)
अस्मदीयैरपि योधमुख्यैः सह त्वरमाणाः कानि विशन्ति?

तथा भीष्मः द्रोणः असौ सूतपुत्रश्च .... (युष्मदादेशः)
अस्मदीयैरपि योधमुख्यैः सह त्वरमाणाः कस्य वक्त्राणि विशन्ति?

तथा भीष्मः द्रोणः असौ सूतपुत्रश्च .... (विशेषणम् ६)
अस्मदीयैरपि योधमुख्यैः सह त्वरमाणाः ते
कथम्भूतानि वक्त्राणि विशन्ति?

वक्त्राणि दंष्ट्राकरालानि अत एव कथम्भूतानि? .... (विशेषणम् ७)

तथा भीष्मः द्रोणः असौ सूतपुत्रश्च अस्मदीयैरपि योधमुख्यैः सह त्वरमाणाः ते दंष्ट्राकरालानि भयानकानि वक्त्राणि विशन्ति।

संदृश्यन्ते (= स्पष्टम् अलोक्यन्ते)।

के संदृश्यन्ते? वक्त्राणि प्रविष्टेषु योधेषु केचित् संदृश्यन्ते।

केचित् कथम्भूताः संदृश्यन्ते? .... (विशेषणम् ९)

केचित् कुत्र विलग्नाः संदृश्यन्ते? .... (अका. स. बहु.)

केचित् कैः सह दशनान्तरेषु विलग्नाः .... (अका. सम. तृ. बहु. विशेष्यम्)
संदृश्यन्ते?

केचित् कीदृशैः उत्तमाङ्गैः सह .... (विशेषणम् १.)
दशनान्तरेषु विलग्नाः संदृश्यन्ते?

केचित् चूर्णितैः उत्तमाङ्गैः सह दशनान्तरेषु विलग्नाः संदृश्यन्ते।

पदार्थ:

पदम्	संस्कृतम्	हिन्दी
धृतराष्ट्रस्य	राज्ञ: धृतराष्ट्रस्य	धृतराष्ट्र के
अमी	ते (प्रसिद्धा:)	वे
सर्वे	समे	सभी
पुत्रा:	सुता:	पुत्र
अवनिपालसङ्घै:	भूपालगणै:	राजगणों के
सह	साकम्	साथ
एव	निश्चयेन	ही
त्वाम्	भवन्तं विश्वरूपम्	आपमें
विशन्ति	प्रविशन्ति	प्रवेश कर रहे हैं
तथा	एवम्	तथा
भीष्म:	भीष्मपितामह:	भीष्म पितामह
द्रोण:	द्रोणाचार्य:	आचार्य द्रोण
असौ	स: (प्रसिद्ध:)	वह
सूतपुत्र:	कर्ण:	कर्ण
च	च	(और) भी
अस्मदीयै:	मम पक्षीयै:	मेरे पक्ष के
अपि	अन्यपक्षीयै: अपि	(और शत्रुपक्ष के) भी
योधमुख्यै:	प्रधानयोधै:	प्रमुख योद्धाओं के
सह	सार्धम्	साथ
त्वरमाणा:	धावमाना:	भागते हुए
ते	तव	आपके
दंष्ट्राकरालानि	दीर्घदन्तै: विकृतानि	दाढ़ों से विकराल
भयानकानि	भयङ्कराणि	(अत एव) भयंकर
वक्त्राणि	मुखानि	मुखों में

विशन्ति	प्रवेशं कुर्वन्ति	प्रवेश कर रहे हैं
केचित्	मुखप्रविष्टेषु केचित्	मुखों में घुसे हुए कुछ
चूर्णितैः	चूर्णीकृतैः पिष्टैः	चकनाचूर
उत्तमाङ्गैः	शिरोभिः (सह)	मस्तकों के (साथ)
दशनान्तरेषु	दन्तसन्धिषु	दाँतों के छेदों में
विलग्नाः	लम्बमानाः	लटकते हुए
संदृश्यन्ते	सम्यग् विलोक्यन्ते	साफ-साफ दिखाई पड़ रहे हैं।

भावार्थः

संस्कृतम्–अनयोः श्लोकयोः अर्जुनः विराट्पुरुषस्य करालेषु वक्त्रविवरेषु आपतितान् कौरवपाण्डव-भटादीन् कालव्यालमुखग्रासभूतान् पश्यति–

हे प्रभो! अन्धस्य राज्ञो धृतराष्ट्रस्य ये दुर्योधनादयः पुत्राः मत्समक्षं समराङ्गणे स्थिताः आसन्, अथ च तैः सह अन्येऽपि राजसमुदायाः तत्पक्षीयाः योद्धुं शस्त्रास्त्रसज्जिताः आसन् ते सर्वेऽपि दुर्योधनादयः शतं पुत्राः तैः भूपालसमुदायैः सह वेगेन धावमानाः त्वां विशन्ति। तव विराट्पुरुषस्य शरीरावयवेषु अधोच्छिद्रेषु आपतन्ति, पापानाम् अधोगतिरिति सिद्धान्तात्। अत एव इह प्रथमपद्ये 'त्वाम्' इति कर्म प्रोक्तम्, 'त्वां विशन्ति पापाः' इति भावः। पुनश्च द्वितीयपद्ये 'वक्त्राणि ते विशन्ति' इत्यादौ 'वक्त्राणि' इति द्वितीयं कर्म प्रोक्तम्, भीष्मादीनाम् अपापानाम् ऊर्ध्वगतिस्मरणात्।

पापेभ्यः धृतराष्ट्रपुत्रेभ्यः तत्पक्षाश्रितेभ्यो राजकुलेभ्यश्च पार्थक्यं बोधयितुमेव इह भीष्मादीनां पृथङ् नामग्रहणं कृतम्, अर्जुनबुद्धौ भीष्मादीनां नाशस्याकल्पनात्।

हे प्रभो! भीष्मपितामहः इच्छामृत्युः, गुरुः द्रोणाचार्यः तथा मम बद्धवैरः सूतपुत्रः कर्णोऽपि मत्पक्षीयैः अपि धृष्टद्युम्नशिखण्डिप्रभृतिभिः प्रधानैः भटैः सह वेगेन धावन्तः सन्तः ते वक्त्राणि विशन्ति। तव वक्त्राणि सुदृढैः दीर्घैः दन्तैः विकरालानि अत एव महाभयोत्पादकानि सन्ति। तेषु दंष्ट्रावत्सु अतीव भयङ्करेषु ते मुखेषु एते भीष्मादयः सम्मर्दयन्तो वेगेन आपतन्ति। अपि च मुखप्रविष्टेषु तेषु केचित् चूर्णीभूतैः मस्तकैः सहिताः तव दन्तच्छिद्रेषूपस्पृष्टाः लम्बमाना स्पष्टं दृश्यन्ते। दन्तस्तम्भावलग्नाः कङ्कालमात्रावशेषाः भक्षितमांसाः इव ते अवलोक्यन्ते।

अनेन कौरवाणां विनाशः पाण्डवानां जयश्च सूचितो भवति।

हिन्दी–विराट्-पुरुष के विकराल मुखों की गुफाओं में कौरव और पाण्डवों की सेना के योद्धा घुस रहे हैं और काल के गाल में समा रहे हैं। इन दोनों श्लोकों में अर्जुन ने इसी दृश्य का वर्णन किया है–

हे प्रभो! अन्धे राजा धृतराष्ट्र के वे पुत्र, जो मेरे सामने समराङ्गण में लड़ने के लिए खड़े थे और उनके साथ देश के राजाओं के झुण्ड के झुण्ड शस्त्रास्त्रों से सुसज्जित होकर उनके पक्ष

में खड़े थे, वे सब के सब दुर्योधनादि सौ पुत्र अपने पक्ष के राजाओं के झुण्ड के साथ बड़े वेग से दौड़ते हुए आपके विराट् शरीर के अधोभाग के छिद्रों में घुस रहे हैं।

पापी मनुष्यों का प्राण शरीर छोड़ते समय अधोभाग के छिद्र से बाहर निकलता है तथा धर्मात्मा के प्राण ऊर्ध्व भाग के छिद्र से निकलता है, यह शास्त्र-सिद्धान्त है। इसी अन्तर को स्पष्ट करने के लिए इन पद्यों में दो कर्म पदों का प्रयोग हुआ है। पहले पद्य में 'त्वाम्' कर्म पापियों के लिए प्रयुक्त हुआ है और दूसरे पद्य में "वक्त्राणि" कर्म धर्मात्माओं के लिए कहा गया है। अत एव यहाँ अन्वय करते समय 'विशन्ति' क्रिया की आवृत्ति करके दो वाक्य दर्शाये गये हैं। पहले वाक्य में बताया गया है कि धृतराष्ट्र के दुर्योधनादि सौ पापी पुत्र एवं अन्याय के पक्षधर राजकुल– त्वां विशन्ति– विराट् पुरुष में अर्थात् विराट् पुरुष के अधोभाग में प्रवेश कर रहे हैं। दूसरे वाक्य में भीष्मादि एवं न्याय के पक्षधर पाण्डव-योद्धाओं को विराट्-पुरुष के – वक्त्राणि विशन्ति– मुखों में प्रवेश कर रहे हैं, बताया गया है।

भीष्मपितामह, द्रोणाचार्य एवं घोर प्रतिद्वन्द्वी कर्ण को अर्जुन अजेय समझता था, किन्तु वह उन्हें भी काल के गाल में समाते देख रहा है, अतः वह भीष्मादि का अलग से नाम लेकर उल्लेख करता है–

हे प्रभो! भीष्मपितामह, गुरु द्रोणाचार्य तथा हमारा घोर विरोधी कर्ण हमारे पक्षधर धृष्टद्युम्न शिखण्डी आदि योद्धाओं के साथ विराट् पुरुष के विकराल मुखों में जल्दी से भागते हुए समा रहे हैं। आपके वे मुख विशाल दाढ़ों के कारण विकराल और भयानक लगते हैं। उनमें वे सब के सब भागकर प्रवेश कर रहे हैं। उनमें से कुछ के शिर फूटकर चूर्ण हो गये हैं और वे आपके दाँतों के छेद में फँसकर लटके हुए हैं। मांस-विहीन उनका लटकता कंकाल साफ दिखाई दे रहा है।

इस प्रकार इस दृश्य से अर्जुन को कौरवों के विनाश और अपने विजय का संकेत हो जाता है।

अवबोधाभ्यासः

अधस्तनान् प्रश्नान् समादधातु–

१. अनयोः पद्ययोः अर्जुनः किं पश्यति? ....

२. त्वां के विशन्ति? ....

३. वक्त्राणि के विशन्ति? ....

४. 'त्वाम्' इति कर्मणः किं गृहीतम्? ....

५. इह द्वयोः कर्मणोः प्रयोगे किं प्रयोजनम्? ....

६. अधोगतिः केषां भवति? ....

७. धर्मात्मनाम् ऊर्ध्वगतेः कोऽभिप्रायः? ....

८. मुखानां करालतायां किं कारणम्? ....

९. भीष्मादीनां पार्थक्येण ग्रहणं किमर्थम्? ....

१०. इह कस्याः क्रियायाः अन्वये आवृत्तिः क्रियते? ....

११. क्रियावृत्तेः किं फलम्? ....

१२. किं तद् वाक्यद्वयम्? ....

१३. विराट्पुरुषस्य दन्तेषु के लम्बन्ते? ....

१४. अनयोः श्लोकयोः तृतीयं वाक्यं किम्? ....

१५. अनेन दृश्येन अर्जुनः किं निश्चिनोति? ....

व्याकरणाभ्यासः

(अ) सन्धिः

१. सहैव	- सह + एव	-	वृद्धिः
२. एवावनि	- एव + अवनि	-	दीर्घः
३. तथासौ	- तथा + असौ	-	दीर्घः
४. सहास्मदीयैः	- सह + अस्मदीयैः	-	दीर्घः
५. अस्मदीयैरपि	- अस्मदीयैः + अपि	-	रभावः
६. पुत्रस्तथा	- पुत्रः + तथा	-	सभावः
७. भीष्मो द्रोणः	- भीष्मः + द्रोणः	-	ओभावः
८. त्वां धृत.	- त्वाम् + धृत.	-	अनुस्वारः
९. त्वरमाणा विशन्ति	- त्वरमाणाः + विशन्ति	-	लोपः
१०. विलग्ना दशन	- विलग्नाः + दशन	-	लोपः
११. केचिद्विलग्नाः	- केचित् + विलग्नाः	-	जश्त्वम्
१२. दशनान्तरेषु	- दशन + अन्तरेषु	-	दीर्घः
१३. चूर्णितैरुत्तम	- चूर्णितैः + उत्तम	-	रभावः
१४. उत्तमाङ्गैः	- उत्तम + अङ्गै	-	दीर्घः

अधस्तनेषु रेखाङ्कितेषु सन्धिं करोतु–

(i) सूर्यश्च + अस्तगिरिं प्राप्तः। ....

(ii) तत् + दर्शनेन कृतकृत्यः + जातः। ....

(iii) दर्शन + आह्लादम् अनुभवति। ....

(iv) अश्रुकलाभिः + अन्वितः। ....

(v) प्रभोः + अमूनि अङ्घ्रिरजांसि सन्ति। ....

(vi) पीतनील + अम्बरधरौ किशोरौ स्तः। ....

(vii) शरत् + अम्बुरुहेक्षणो। ....

(viii) बृहत् + भुजौ तौ प्राप्तौ। ....

(ix) दिशः + वितिमिरा + राजन् कुर्वाणौ स्तः। ....

(x) यः + अवधीत् स्वस्वसुः + तनयान् स + खलः। ....

(xi) पप्रच्छ सत्कृतम् + नन्दः + विनयेन। ....

(आ) समासः

१. धृतराष्ट्रस्य – धृतं राष्ट्रं येन तस्य – बहुव्रीहिः

२. अवनिपालसङ्घैः – अवनिं पालयन्ति इति

अवनिम् + पाल + अण् (ञ) = अवनिम् + पाल – उपपदसमासः

अवनिपालानां सङ्घैः इति – षष्ठीतत्पुरुषः

३. सूतपुत्रः – सूतेन पालितः – तृतीयातत्पुरुषः

सूतपालितश्च असौ पुत्रश्च – मध्यमपदलोपितत्पुरुषः

४. योधमुख्यैः – योधानां मुख्यैः इति – षष्ठीतत्पुरुषः

५. दंष्ट्राकरालानि – दंष्ट्राभिः करालानि – तृतीयातत्पुरुषः

६. भयानकानि – भयस्य आनकानि – षष्ठीतत्पुरुषः

७. दशनान्तरेषु – दशनानाम् अन्तरेषु – षष्ठीतत्पुरुषः

८. उत्तमाङ्गैः – उत्तमानि च तानि अङ्गानि च तैः कर्मधारयः

अधस्तनेषु विग्रहेषु समासं तद्वाक्यप्रयोगं च करोतु–

(i) अग्रे जायते इति – ....

(ii) असुभिः तृप्यति इति – ....

(iii) पारिजातस्य अपहरणम् – ....

(iv) वीराश्च ताः कन्याश्च – ....

(v) कृतं कृत्यं येन तेन – ....

(vi) द्विरदानां विक्रमः – ....

(vii) द्विरदविक्रमः इव विक्रमः ययोः तौ – ....

(viii) कनकैः पूरिता – ....

(ix) पुण्यगन्धेन अनुलिप्तौ – ....

(x) पुण्यगन्धानुलिप्तानि अङ्गानि ययोः तयोः – ....

(इ) तद्धितप्रत्ययः

१. अस्मदीयैः – अस्माकम् इमे इति – अस्मद् + छ (ईश) = अस्मदीय, तैः इति

२. मुख्यैः – मुखे भवाः तैः इति – मुख + यत् (य) = मुख्य

अधस्तनेषु पदेषु प्रकृतिप्रत्ययं निर्दिशतु–

(i) युष्मदीयम् – ....

(ii) त्वदीयम् – ....

(iii) मदीयम् – ....

(iv) भवदीयः – ....

(v) भवदीया – ....

(vi) शालीयः – ....

(vii) एकपक्षीयम् – ....

(viii) यानीयम् – ....

(ix) आवासीयम् – ....

(x) पर्वतीयः – ....

(ई) कृत्प्रत्ययः

१. राष्ट्रस्य – राजतेऽनेन – राज् + ष्ट्रन् (त्र) = राष्ट्र

२. अवनिपाल – अवनि + पाल + अण् (अ) = अवनिपाल

३. योध – युध्यते इति – युध् + अच् (अ) = योध

४. वक्त्राणि – वक्ति अनेन इति – वच् + ष्ट्रन् (त्र) = वक्त्र

५. त्वरमाणाः – त्वरते इति – त्वर + शानच् (आन्) = त्वरमाण

६. दंष्ट्रा – दशति अनेन – दंश + ष्ट्रन् = दंष्ट्र + टाप् (आ) = दंष्ट्रा

७. विलग्नाः – वि + लग् + क्त (त) = विलग्न

८. चूर्णितैः – चूर्ण + क्त = चूर्णित

९. दशन – दश्यतेऽनेन – दंश + ल्युट् (अन) = दशन

अधस्तनेभ्यः प्रकृतिप्रत्ययेभ्यो निष्पन्नं पदं वाक्ये प्रयुङ्क्षाम्–

(i) भ्राज + ष्ट्रन् – ....

(ii) गृह + पाल + अण् – ....

(iii) मुद् + अच् – ....

(iv) वि + पत् [illegible]त – ....

(v) नि + [illegible] + क्त – ....

(vi) रद् + ल्युट् – ....

(vii) वन्द् + शानच् – ....

(viii) घट् + शानच् – ....

(ix) घूर्ण + शानच् – ....

(x) कामय + शानच् – ....

(xi) जल्प् + क्त – ....

(उ) क्रियाकारकसम्बन्धः

विशन्ति – परस्मै. कर्तरि क्रिया

पुत्राः – कर्ता

अस्मदीयैः – सहार्थविशेषणम्

अपि – परकीयसमुच्चये

अमी	- कर्तृविशेषणम्	वक्त्राणि	- कर्म
सर्वे	- कर्तृविशेषणम्	दंष्ट्राकरालाग्नि	- कर्मविशेषणम्
धृतराष्ट्रस्य	- कर्तुः सम्बन्धी	भयानकानि	- कर्मविशेषणम्
अवनिपालसङ्घैः	- सहार्थे तृतीया	ते	- कर्मसम्बन्धी
त्वाम्	- कर्म	त्वरमाणाः	- कर्तृविशेषणम्
त्वरमाणाः	- कर्तृविशेषणम्	संदृश्यन्त	- आत्मने. कर्मणि क्रिया
विशन्ति	- परस्मै कर्तरि क्रिया	मया	- आक्षिप्तः कर्ता
भीष्मः	- कर्ता	केचित्	- कर्म
द्रोणः	- कर्ता	विलग्नाः	- कर्मविशेषणम्
सूतपुत्रः	- कर्ता	उत्तमाङ्गैः	- सहार्थे तृतीया
तथा	- वाक्यसमुच्चये	चूर्णितैः	- सहार्थविशेषणम्
च	- कर्तृसमुच्चये	दशनान्तरेषु	- अधिकरणम्
योधमुख्यैः	- सहार्थे तृतीया		

(ऊ) छन्दोविधानम्

इह प्रथमश्लोकस्य प्रथमचतुर्थपादयोः उपेन्द्रवज्रा छन्दः तथा द्वितीयतृतीयपादयोः इन्द्रवज्राः इत्युभयोरेकत्र मेलनात् आर्द्रा नाम उपजातिः छन्दो विज्ञेयम्।

द्वितीयश्लोकस्य चतुर्ष्वपि पादेषु इन्द्रवज्रायाः प्रयोगः। अतः इह इन्द्रवज्रानामकं छन्दो ज्ञेयम्।

(ए) युग्मकम्

इह द्वयोरेतयोः श्लोकयोः वाक्यार्थबोधः सहैव भवति, तयोरन्योऽन्याश्रयत्वात्। अत एव अनयोः सहैव व्याख्या कृता। तदेतद् पद्यद्वयं 'युग्मकम्' इत्युच्यते।

वस्तुतः उद्देश्यविधेयात्मकं वाक्यमित्युच्यते। श्लोकोऽपि वाक्यरूप एव। वाक्ये उद्देश्यभागः विधेयभागश्च भवतः। तत्र प्रथमे उद्देश्यभागे सिद्धानि कारकाणि भवन्ति, द्वितीये विधेयभागे च अपूर्वविशेषणोपहिता क्रिया निर्दिश्यते। इह प्रथमश्लोके केवलं कर्तृकारकं तत्सहार्थो वा निर्दिष्टः–पुत्राः, भीष्मः, योधमुख्यैः– इत्यादिः। तेन निराकाङ्क्षत्वाद् अर्थबोधो न जायते। 'ते पुत्रादयः किं कुर्वन्ति' इत्यादिरूपा आकाङ्क्षा द्वितीये श्लोके 'त्वां विशन्ति, वक्त्राणि वा विशन्ति' इत्यादि विशिष्टक्रियाश्रवणादेव शाम्यति। एवमेव द्वितीयश्लोकस्यापि केवलस्य निराकाङ्क्षबोधो न जायते; 'के त्वरमाणाः विशन्ति' इत्यादिरूपायाः आकाङ्क्षायाः पूर्वश्लोकादेव पूरणात्। अत एव उभे पद्ये सहैव व्याख्याते स्तः।

(ऐ) पर्यायशब्दः

१. दशनः - १. रदनः (अका. पुं.), २. दन्तः (अका. पुं.), ३. रदः (अका. पुं.)

२. योधः - १. भटः (अका. पुं.), २. योद्धा (योद्धृ ऋका. पुं.), ३. वीरः (अका. पुं.), ४. सैनिकः (अका. पुं.)

३. पुत्रः - १. तनयः (अका. पुं.), २. सुतः (अका. पुं.), ३. सूनुः (उका. पुं.), ४. तोकः (अका. पुं.)

◆◆◆

१६. श्लोकः

यथा नदीनां बहवोऽम्बुवेगाः
समुद्रमेवाभिमुखा द्रवन्ति।
तथा तवामी नरलोकवीरा
विशन्ति वक्त्राण्यभिविज्वलन्ति।। (भ. गी. ११.२८)

पदच्छेदः

यथा, नदीनाम्, बहवः, अम्बुवेगाः,
समुद्रम्, एव, अभि-मुखाः, द्रवन्ति।

तथा, तव, अमी, नर-लोक-वीराः,
विशन्ति, वक्त्राणि, अभिविज्वलन्ति।।

पदच्छेदाभ्यासः

अधस्तनानि पदानि विच्छिनत्तु–

(i) बहवोऽम्बुवेगाः – ....

(ii) नदीनां बहवः – ....

(iii) एवाभिमुखाः – ....

(iv) तवामी – ....

(v) नरलोकवीराः – ....

(vi) वक्त्राण्यभिविज्वलन्ति – ....

पदपरिचयः

पदम्	विश्लेषणम्
यथा	अव्ययम् १
नदीनाम्	नदी – ईका. स्त्री. षष्ठी. बहु.
बहवः	बहु. उका. पुं. प्र. बहु. विशेषणम्
अम्बुवेगाः	अका. पुं. प्र. बहु. विशे. समस्तम्
समुद्रम्	अका. पुं. द्विती. एक.
एव	अव्ययम् २

अभिमुखाः	अका. पुं. प्र. बहु. समस्तं वि.
द्रवन्ति	द्रु + लट् प्रपु. बहु. भ्वादि. परस्मै. कर्तरि क्रिया
तथा	अव्ययम् ३
तव	युष्मद् - दका. ष. एक. सर्व.
अमी	अदस् - सका. पुं. प्र. बहु. सर्व. विशेषणम्
नरलोकवीराः	अका. पुं. प्र. बहु. समस्तं विशेष्यम्
विशन्ति	विश् + लट् प्रपु. बहु. तुदादि. परस्मै. कर्तरि क्रिया
वक्त्राणि	वक्त्र अका. नपुं. द्विती. बहु.
अभिविज्वलन्ति	अभिविज्वलत् तका. नपुं. द्विती. बहु. शत्रन्तं वि. अभि + वि + ज्वल् + लट् प्रपु. बहु. भ्वादि. अकर्मक. परस्मै. कर्तरि क्रिया

वर्गीकरणाभ्यासः

अधस्तनेषु वर्गेषु यथानिर्देशं श्लोकपदानि लिखतु–

(i) प्रथमान्तम् (५) ....

(ii) द्वितीयान्तम् (२) ....

(iii) षष्ठ्यन्तम् (२) ....

(iv) अकारान्तम् (५) ....

(v) ईकारान्तम् (१) ....

(vi) उकारान्तम् (१) ....

(vii) पुंलिङ्गम् (७) ....

(viii) स्त्रीलिङ्गम् (१) ....

(ix) नपुंसकम् (१) ....

(x) समस्तम् (३) ....

(xi) अव्ययम् (३) ....

(xii) सर्वनाम (२) ....

(xiii) क्रियापदम् (३) ....

(xiv) विशेष्यम् (२) ....

(xv) विशेषणम् (३) ....

आकाङ्क्षाविस्तरः

द्रवन्ति (= गच्छन्ति)।

के द्रवन्ति? .... (अका. विशे.)

कति अम्बुवेगाः द्रवन्ति? .... (उका. वि.)

कासां बहवः अम्बुवेगाः द्रवन्ति? .... (ईका. षष्ठी)

नदीनां बहवोऽम्बुवेगाः कम् द्रवन्ति? .... (अका. द्विती.)

नदीनां बहवोऽम्बुवेगाः समुद्रमेव कथम्भूताः सन्तः द्रवन्ति? (यथा इति उपमाने)।

यथा नदीनां बहवोऽम्बुवेगाः समुद्रमेव अभिमुखाः (सन्तः) द्रवन्ति।

तथा विशन्ति (= प्रविशन्ति)।

तथा के विशन्ति? .... (अका. विशे.)

तथा कीदृशाः नरलोकवीराः विशन्ति? .... (अदस् प्र.)

तथा अमी नरलोकवीराः कानि विशन्ति? .... (अका. नपुं. द्विती.)

तथा अमी नरलोकवीराः कस्य वक्त्राणि .... विशन्ति?
तथा अमी नरलोकवीराः तव वक्त्राणि विशन्ति।

अभिविज्वलन्ति (= प्रकाशन्ते)।

के अभिविज्वलन्ति? ....
नरलोकवीराः अभिविज्वलन्ति।

अथवा–'अभिविज्वलन्ति वक्त्राणि विशन्ति' इति शत्रन्तपक्षेऽन्वयः।

पदार्थः

पदम्	संस्कृतम्	हिन्दी
यथा	येन प्रकारेण	जैसे
नदीनाम्	सरिताम्	नदियों के
बहवः	अनेके	अनेकों

अम्बुवेगाः	जलप्रवाहाः	जल प्रवाह
अभिमुखाः	प्रतिमुखाः	सम्मुख होकर
समुद्रम्	सागरम्	समुद्र में
एव	एव	ही
द्रवन्ति	गच्छन्ति	मिलते हैं
तथा	तेन प्रकारेण	वैसे
अमी	ते (प्रसिद्धा)	वे
नरलोकवीराः	मर्त्यलोकस्य वीराः	नरलोक के वीर
तव	भवतः	आपके
अभिविज्वलन्ति	सर्वतोदेदीप्यमानानि	सर्वतः प्रज्वलित
वक्त्राणि	मुखानि	मुखों में
विशन्ति	प्रविशन्ति	प्रवेश कर रहे हैं।

भावार्थः

संस्कृतम्—अस्मिन् श्लोके अर्जुनः भीष्मादीनां पुण्यात्मनां विराण्मुखप्रवेशं नदीदृष्टान्तेन स्पष्टयति—

यथा स्रवन्तीनां नदीनां बहवः जलप्रवाहाः समुद्राभिमुखाः सन्तः समुद्रमेव सङ्गच्छन्ति। तेन सह एकत्वं तद्रूपत्वम् अखण्डत्वं वा आपद्यन्ते, तथैव नरलोकस्य वीराः पुण्यात्मानः ते भीष्मादयोऽपि तव सर्वतः प्रकाशमानानि मुखानि विशन्ति।

भीष्मादयो हि नरलोकस्य वीराः महात्मानः सन्ति। ते हि भौतिकयुद्धे यथा अजेयाः महान्तो योद्धारः तथैव आध्यात्मिकयुद्धेऽपि जितकामारिषड्वर्गाः भगवद्भक्ताः अनिच्छया युद्धप्रवृत्ताः आसन्। तेषां भगवन्मुखप्रवेशे नदीसमुद्रदृष्टान्तः इह कथितः। यथा नदीजलं समुद्रोन्मुखं सत् नामरूपे विहाय तत्रैव प्रविलीयते तथैव एते शूरवीराः भक्ता अपि भगवन्मुखानां ज्योतिषि बाह्ये नामरूपे ज्वलयित्वा स्वयं ज्योतिर्मयाः सन्तः भगवतो विराड्रूपेऽखण्डतां यान्ति।

हिन्दी—इस श्लोक में अर्जुन ने भीष्मादि उन पुण्यात्माओं के मुख-प्रवेश की तुलना नदी और समुद्र के दृष्टान्त से की है।

जैसे नदियों के बहुत-से जल के प्रवाह स्वाभाविक रूप में समुद्र के ही सम्मुख दौड़ते हैं अर्थात् समुद्र में प्रवेश करते हैं, वैसे ही वे नरलोक के वीर भी आपके प्रज्वलित मुखों में प्रवेश कर रहे हैं।

यहाँ 'नरलोकवीराः' विशेषण भीष्म-द्रोण आदि श्रेष्ठ शूरवीर पुरुषों के लिए प्रयुक्त हुआ है, जो भगवान् की प्राप्ति के लिए साधना कर रहे थे तथा जिनको अनिच्छा से युद्ध में प्रवृत्त होना पड़ा था। वे जैसे युद्ध में अजेय महान् योद्धा थे वैसे भगवत्प्राप्ति की साधना में भी कामादि षड्रिपुओं को वशीभूत किये थे। उनके प्रवेश में नदी और समुद्र के दृष्टान्त से यह भाव बतलाया गया है कि जैसे नदियों के जल स्वाभाविक ही समुद्रोन्मुख होते हैं और अन्त में अपना नाम-रूप छोड़कर समुद्र बन जाते हैं, वैसे यहाँ शूरवीर भक्तजन भी आपके मुखों की महान् ज्योति में अपने बाह्य नाम-रूप को जलाकर स्वयं भगवान् के साथ ज्योतिर्मय हो जाते हैं।

अवबोधाभ्यासः

अधस्तनान् प्रश्नान् उत्तरयतु–

१. इह अर्जुनः दृष्टान्तेन किं स्पष्टयति? ....

२. कम् अभिमुखीकृत्य नदी प्रवहति? ....

३. नदीजलं किं विहाय समुद्रं विशति? ....

४. इह 'नरलोकवीराः' विशेषणेन केषां ग्रहणम्? ....

५. भीष्मादयः कथं नरलोकवीराः आसन्? ....

६. तेषां विराण्मुखप्रवेशेन किं सङ्केतितम्? ....

७. ते भीष्मादयः नरवीराः विराण्मुखाग्नौ किं ज्वलयन्ति? ....

व्याकरणाभ्यासः

(अ) सन्धिः

१. बहवोऽम्बुवेगाः - बहवः + अम्बुवेगाः - ओभावः पूर्वरूपं च

२. एवाभिमुखाः - एव + अभिमुखाः - दीर्घः

३. अभिमुखा द्रवन्ति - अभिमुखाः + द्रवन्ति - लोपः

४. तवामी - तव + अमी - दीर्घः

५. वीरा विशन्ति - वीराः + विशन्ति - लोपः

६. वक्त्राण्यभि. - वक्त्राणि + अभि - यण्

७. नदीनां बहवः - नदीनाम् + बहवः - अनुस्वारः

अधस्तनेषु रेखाङ्कितेषु सन्धिं छिनत्तु–

(i) नन्दतनयोऽध्वनि क्रीडति। ....

(ii) निवेद्यान्नं तस्मै गोपी मुक्तवती स्वयम्। ....

(iii) अप्यङ्घ्रिमूले पतितं मामुद्धर दयानिधे। ....

(iv) जलेष्वक्रीडन् तेषु बालकाः। ....

(v) अग्रजोऽयं घनश्यामः याति हट्टम्। ....

(vi) देवा नारायणाङ्गजाः सन्ति। ....

(vii) वेदा ज्ञानराशयः। ....

(viii) विबुधा जनकल्याणं कल्पयन्ति। ....

(आ) समासः

१. अम्बुवेगाः – अम्बूनां वेगाः इति षष्ठीतत्पुरुषः

२. अभिमुखाः – मुखम् अभिगताः इति प्रादितत्पुरुषः

३. नरलोकवीराः – नराणां लोकः इति षष्ठीतत्पुरुषः

नरलोकस्य वीरा इति – षष्ठीतत्पुरुषः

अधस्तनेषु विग्रहेषु समासं करोतु–

(i) देवानां लोकः – ....

(ii) देवलोकस्य मुखम् इति – ....

(iii) प्रतिगतः पक्षः इति – ....

(iv) कूलम् अनुगताः – ....

(v) क्षितेः उद्धारः – ....

(vi) मधुकैटभयोः मृत्युः – ....

(vii) अन्यदेवतानां भक्ताः – ....

(viii) अरविन्दानां कोशात् – ....

(इ) कृत्प्रत्ययः

१. वक्त्राणि - वच् + त्र (त्र) = वक्त्र

२. अभिविज्वलन्ति - अभि + वि + ज्वल् + शतृ (अत्) = अभिविज्वलत्

अधस्तनेभ्यः धातुभ्यः शत्रन्तं रूपं लिखतु–

(i) वि + लस् - ....

(ii) लाञ्छ् - ....

(iii) लिख् - ....

(iv) लिम्प् - ....

(v) लिह् - ....

(vi) लुण्ट् - ....

(vii) लुण्ठ् - ....

(viii) लुञ्च् - ....

(ix) लोड् - ....

(x) वद् - ....

(ई) क्रियाकारकसम्बन्धः

द्रवन्ति - कर्तरि सकर्मकक्रिया

अम्बुवेगाः - कर्ता

बहवः - कर्तृविशेषणम्

अभिमुखाः - कर्तृविशेषणम्

नदीनाम् - कर्तुः सम्बन्धी

समुद्रम् - कर्म

एव - कर्मेतरव्यावृत्तौ

यथा - उपमाने

तथा - उपमेये

विशन्ति - कर्तरि सकर्मकक्रिया

नरलोकवीराः - कर्ता

अमी - कर्तृविशेषणम्

वक्त्राणि - कर्म

अभिविज्वलन्ति - कर्मविशेषणम्

तव - कर्मसम्बन्धी

(उ) छन्दोविधानम्

(i) अस्य श्लोकस्य चतुर्ष्वपि पादेषु उपेन्द्रवज्रा छन्दः, तल्लक्षणं यथा–उपेन्द्रवज्रा जतजास्ततौ गः–इति।

(ii) अस्मिन् श्लोके पूर्णोपमालङ्कारः, उपमान-उपमेय-वाचकशब्द-साधारणधर्मवाचकानाम् इहोपादानात्।

(ऊ) पर्यायशब्दः

१. **नदी** - १. सरित् (तका. स्त्री.), २. (धुनी ईका. स्त्री.), ३. आपगा (आका. स्त्री.), ४. निम्नगा (आका. स्त्री.), ५. तरङ्गिणी (ईका. स्त्री.)

२. **समुद्रः** - १. अब्धिः (इका. पुं.), २. अकूपारः (अका. पुं.), ३. पारावारः (अका. पुं.), ४. उदधिः (इका. पुं.), ५. जलनिधिः (इका. पुं.)

३. **अम्बु** - १. सलिलम् (अका. नपुं.), २. जलम् (अका. नपुं.), ३. उदकम् (अका. नपुं.), ४. पयः (पयस् सका. नपुं.), ५. कीलालम् (अका. नपुं.)

४. **वेगः** - १. प्रवाहः (अका. पुं.), २. प्रवृत्तिः (इका. स्त्री.), ३. धारा (आका. स्त्री.)

◆◆◆

१७. श्लोकः

यथा प्रदीप्तं ज्वलनं पतङ्गा
विशन्ति नाशाय समृद्धवेगाः।
तथैव नाशाय विशन्ति लोका-
स्तवापि वक्त्राणि समृद्धवेगाः।। (भ. गी. ११.२९)

पदच्छेदः

यथा, प्रदीप्तम्, ज्वलनम्, पतङ्गाः,
विशन्ति, नाशाय, समृद्ध-वेगाः।

तथा, एव, नाशाय, विशन्ति, लोकाः,
तव, अपि, वक्त्राणि, समृद्ध-वेगाः।।

पदच्छेदाभ्यासः

अधस्तनानि पदानि विच्छिनत्तु–

(i) प्रदीप्तं ज्वलनम् – ....

(ii) ज्वलनं पतङ्गाः – ....

(iii) पतङ्गा विशन्ति – ....

(iv) तथैव – ....

(v) तवापि – ....

(vi) लोकास्तव – ....

पदपरिचयः

पदम्	विश्लेषणम्
यथा	अव्ययम्
प्रदीप्तम्	अका. पुं. द्विती. एक. क्तान्तं विशेषणम्
ज्वलनम्	ज्वलन अका. पुं. द्विती. एक. विशेष्यम्
पतङ्गाः	अका. पुं. प्र. बहु. विशेष्यम्
विशन्ति	विश् + लट् प्रपु. बहु. तुदादि. सकर्मक. कर्तरि क्रिया
नाशाय	अका. पुं. चतु. एक.

समृद्धवेगाः	अका. पुं. प्र. बहु. समस्तं वि.
तथा	अव्ययम्
एवं	अव्ययम्
नाशाय	अका. पुं. चतु. एक.
विशन्ति	विश् + लट् प्रपु. बहु. तुदादि सकर्म. परस्मै. कर्तरि क्रिया
लोकाः	अका. पुं. प्र. बहु. विशे.
तव	युष्मद् - दका. षष्ठी. एक. सर्व.
अपि	अव्ययम्
वक्त्राणि	अका. नपुं. द्विती. बहु.
समृद्धवेगाः	अका. पुं. प्र. बहु. समस्तं वि.

वर्गीकरणाभ्यासः

अधस्तनेषु वर्गेषु यथानिर्देशं श्लोकपदानि लिखतु–

(i) प्रथमान्तम् (४) ....

(ii) द्वितीयान्तम् (३) ....

(iii) चतुर्थ्यन्तम् (२) ....

(iv) षष्ठ्यन्तम् (१) ....

(v) पुंलिङ्गम् (८) ....

(vi) नपुंसकम् (१) ....

(vii) अकारान्तम् (९) ....

(viii) सर्वनाम (१) ....

(ix) अव्ययम् (४) ....

(x) क्रियापदम् (२) ....

(xi) विशेष्यम् (३) ....

(xii) विशेषणम् (३) ....

आकाङ्क्षाविस्तरः

विशन्ति (= प्रविशन्ति)।

के विशन्ति? पतङ्गाः विशन्ति।

कथम्भूताः पतङ्गाः विशन्ति? समृद्धवेगाः पतङ्गाः विशन्ति।

समृद्धवेगाः पतङ्गाः कं विशन्ति? समृद्धवेगाः पतङ्गाः ज्वलनं विशन्ति।

समृद्धवेगाः पतङ्गाः कथम्भूतं ज्वलनं विशन्ति? प्रदीप्तं ज्वलनं विशन्ति।

समृद्धवेगाः पतङ्गाः किमर्थं प्रदीप्तं ज्वलनं विशन्ति? समृद्धवेगाः पतङ्गाः नाशाय प्रदीप्तं ज्वलनं विशन्ति।

यथा–इत्युपमाने, तथा–इत्युपमेये।

तथैव के विशन्ति? तथैव लोकाः विशन्ति।

कथम्भूताः लोकाः विशन्ति? तथैव समृद्धवेगाः लोकाः विशन्ति।

तथैव समृद्धवेगाः लोकाः अपि कानि विशन्ति। तथैव समृद्धवेगाः लोकाः अपि वक्त्राणि विशन्ति।

तथैव समृद्धवेगाः लोकाः अपि कस्य वक्त्राणि विशन्ति? समृद्धवेगाः लोकाः अपि तव वक्त्राणि विशन्ति।

तथैव समृद्धवेगाः लोकाः अपि किमर्थं तव वक्त्राणि विशन्ति? तथैव समृद्धवेगाः लोका अपि नाशाय तव वक्त्राणि विशन्ति।

पदार्थः

पदम्	संस्कृतम्	हिन्दी
यथा	येन प्रकारेण	जैसे
पतङ्गाः	शलभाः	फतिंगे
नाशाय	(बुद्धिपूर्वं) विनाशाय	मरने के लिए
प्रदीप्तम्	प्रज्वलितम्	जलती
ज्वलनम्	अग्निम्	आग में
समृद्धवेगाः	उद्धूतगतयः (सन्तः)	बड़े वेग से (दौड़ते हुए)
विशन्ति	आपतन्ति	गिरते हैं

तथा एव	तेनैव प्रकारेण	वैसे ही
लोकाः	सामान्यजनः	सामान्य लोग
अपि	अपि	भी
नाशाय	मरणाय (बुद्धिपूर्वम्)	मरने के लिए जान-बूझकर
तव	भवतः	आपके
वक्त्राणि	मुखानि	मुखों में
समृद्धवेगाः	उद्धूतवेगाः (सन्तः)	बड़े वेग से (भागते हुए)
विशन्ति	प्रविशन्ति	प्रवेश कर रहे हैं।

भावार्थः

संस्कृतम्–अस्मिन् पद्ये अर्जुनः स्वेच्छया योद्धुं समागतानां सामान्यजनानां कालमुखप्रवेशं पतङ्गदृष्टान्तेन वर्णयति–

यथा शलभाः मोहवशात् मरणाय प्रज्वलितं वह्निं स्वेच्छया ज्ञानपूर्वकम् अतीव वेगेन उड्डीयमानाः प्रविशन्ति, विनाशं च प्राप्नुवन्ति। तथैव सामान्यजनाः अपि स्वविनाशायैव स्वेच्छया ज्ञानपूर्वकं तव विराट्पुरुषस्य कालस्य मुखानि अतीवप्रबलवेगेन त्वरमाणाः प्रविशन्ति।

अत्रेदमवधेयम्–पूर्वस्मिन् श्लोके नदीदृष्टान्तेन स्मृताः भीष्मादयो युद्धप्रपञ्चे अनिच्छया सम्मिलिताः, स्वेच्छया भगवद्भक्तौ एव निरता आसन्। ये पुनः स्वेच्छया अभिनिवेशेन युद्धप्रपञ्चे सम्मिलन्ति, तेषां दुर्योधनादीनां सामान्यजनानां प्रपञ्चमात्रैकपराणां पतङ्गदृष्टान्तेन कालमुखप्रवेशोऽवगन्तव्यः इति विशेषः। 'जातस्य हि ध्रुवो मृत्युः' इति सर्वे जानन्तीति विनाशज्ञानं सामान्यम्।

हिन्दी–इस पद्य में अर्जुन ने स्वेच्छा से लड़ने के लिए आये हुए सामान्य लोगों के कालमुख-प्रवेश का वर्णन फतिंगे के दृष्टान्त से किया है–

जैसे फतिंगे मोहवश नष्ट होने के लिए जलती आग में जान-बूझकर बड़े वेग से उड़-उड़ कर प्रवेश करते हैं और मर जाते हैं। वैसे ही सब लोग अपने नाश के लिए स्वेच्छा से ज्ञानपूर्वक बड़े वेग से दौड़ते हुए आपके मुखों में प्रवेश कर रहे हैं।

पिछले पद्य में नदी के दृष्टान्त से भीष्मादि भक्तों की कालगति बतलायी गयी है। वे भक्तजन युद्ध- प्रपञ्च में अनिच्छा से सम्मिलित थे, स्वेच्छा से तो वे भगवद्भक्ति में निरत रहने वाले थे। यहाँ उनसे भिन्न सामान्य लोगों की गति का वर्णन हुआ है। दुर्योधन आदि सामान्य जन युद्ध-प्रपञ्च में स्वेच्छा से आग्रहपूर्वक सम्मिलित थे, अतः इस प्रकार के सामान्य जन फतिंगे के समान काल के गाल में समा जाते हैं। 'जातस्य हि ध्रुवो मृत्युः' यह सामान्य नियम है, इसे सभी जानते हैं। फिर भी इच्छा और अनिच्छा के कारण दो प्रकार की गति यहाँ दो पद्यों में बताई गयी है।

अवबोधाभ्यासः

अधस्तनानां प्रश्नानां समाधानं लिखतु–

१. अस्मिन् श्लोके अर्जुनः किं वर्णयति? ....

२. शलभाः कथमग्निं प्रविशन्ति? ....

३. स्वेच्छया के योधा, योद्धुम् आगताः? ....

४. भीष्मादीनां स्वेच्छया कुत्र प्रवृत्तिरासीत्? ....

५. अर्जुनः कालमुखप्रवेशं द्वयोः श्लोकयोः कथं वर्णितवान्? ....

६. दृष्टान्तद्वयस्य इह किं प्रयोजनम्? ....

७. 'नाशाय प्रविशन्ति' इत्यनेन कः सामान्यनियमः सूचितः? ....

व्याकरणाभ्यासः

(अ) सन्धिः

१. तथैव	–	तथा + एव	–	वृद्धिः
२. तवापि	–	तव + अपि	–	दीर्घः
३. लोकास्तव	–	लोकः + तव	–	सभावः
४. पतङ्गा विशन्ति	–	पतङ्गाः + विशन्ति	–	लोपः
५. ज्वलनं पतङ्गाः	–	ज्वलनम् + पतङ्गाः	–	अनुस्वारः
६. प्रदीप्तं ज्वलनम्	–	प्रदीप्तम् + ज्वलनम्	–	अनुस्वारः

अधस्तनेषु रेखाङ्कितेषु सन्धिं छिनत्तु–

(i) नैते स्वरूपं जानन्ति। ....

(ii) वृक्षौषधयः भगवतः शिरोरुहाः सन्ति। ....

(iii) नमस्ते रघुवर्याय। ....

(iv) रावणान्तकाय च। ....

(v) कस्ते मायां जानीयात्। ....

(vi) पुरुषे प्रकल्पिता लोका बहुजीवसङ्कुलाः। ....

(vii) मशका इव पिशुना जनाः। ....

(आ) समासः

१. समृद्धवेगाः - समृद्धः वेगः येषां ते बहुव्रीहिः

अधस्तनेषु विग्रहेषु समासं तस्य वाक्ये प्रयोगं च करोतु–

(i) चत्वारो भुजाः यस्य सः - ....

(ii) अरुणे ईक्षणे यस्य तम् - ....

(iii) प्रसन्नं वदनं यस्य तेन - ....

(iv) तुङ्गौ अंसौ यस्य तस्मै - ....

(v) निम्ना नाभिः यस्य तस्य - ....

(vi) कम्बुः इव कण्ठः यस्य तस्मिन् - ....

(vii) पल्लवम् इव उदरं यस्याः सा - ....

(इ) कृत्प्रत्ययः

१. प्रदीप्तम् - प्र + दीप् + क्त (त) = प्रदीप्त

२. ज्वलनम् - ज्वलन् + ल्युट् (अन) = ज्वलन

३. पतङ्गाः - पतन् गच्छतीति - पत + गम् + उ (अ) = पतङ्ग

४. नाशाय - नश् + घञ् (अ) = नाश

५. समृद्ध - सम् + ऋध् + क्त = समृद्ध

६. वक्त्राणि - वच् + त्र (त्र) = वक्त्र

अधस्तनेषु पदेषु प्रकृतिप्रत्ययनिर्देशं तेषां वाक्यप्रयोगं च करोतु–

(i) भुजङ्गाः - ....

(ii) वृतम् - ....

(iii) निवृत्तम् - ....

(iv) संस्तुतम् - ....

(v) मोहनः - ....

(vi) पावनः – ....

(vii) आरामः – ....

(viii) कामः – ....

(ई) क्रियाकारकसम्बन्धः

विशन्ति	–	कर्तरि सकर्मकक्रिया	एव	–	व्यवच्छेदे
पतङ्गाः	–	कर्ता	विशन्ति	–	सकर्मकक्रिया
समृद्धवेगाः	–	कर्तृविशेषणम्	लोकाः	–	कर्ता
ज्वलनम्	–	कर्म	समृद्धवेगाः	–	कर्तृविशेषणम्
प्रदीप्तम्	–	कर्मविशेषणम्	अपि	–	समुच्चये
नाशाय	–	तादर्थ्ये चतुर्थी	वक्त्राणि	–	कर्म
यथा	–	उपमाने	तव	–	कर्मसम्बन्धी
तथा	–	उपमेये	नाशाय	–	तादर्थ्ये चतुर्थी

(उ) छन्दोविधानम्

(क) अस्य श्लोकस्य चतुर्ष्वपि पादेषु उपेन्द्रवज्रा छन्दः प्रयुक्तम्।

(ख) पूर्णोपमालङ्कार इह सम्पूर्णे श्लोके। पतङ्गाः उपमानम्, लोकाः = उपमेयम्, यथा-तथा = वाचकशब्दौ, समद्धवेगाः नाशाय विशन्ति = सामान्यधर्मः, इति चतुर्णामिह उपादानात्पूर्णोपमा विज्ञेया।

◆◆◆

९८. श्लोकः

लेलिह्यसे ग्रसमानः समन्ता-
ल्लोकान् समग्रान् वदनैर्ज्वलद्भिः।
तेजोभिरापूर्य जगत्समग्रं
भासस्तवोग्राः प्रतपन्ति विष्णो।।(भ. गी. ११.३०)

पदच्छेदः

लेलिह्यसे, ग्रसमानः, समन्तात्,
लोकान्, समग्रान्, वदनैः, ज्वलद्भिः।

तेजोभिः, आपूर्य, जगत्, समग्रम्,
भासः, तव, उग्राः, प्रतपन्ति, विष्णो।।

पदच्छेदाभ्यासः

अधस्तनानि पदानि विच्छिनत्तु–

(i) समन्ताल्लोकान् – ....

(ii) वदनैर्ज्वलद्भिः – ....

(iii) तेजोभिरापूर्य – ....

(iv) समग्रं भासः – ....

(v) भासस्त्व – ....

(vi) तवोग्राः – ....

पदपरिचयः

पदम्	विश्लेषणम्
लेलिह्यसे	लिह् + यङ् (य) = लेलिह्य + लट् मपु. एक. आत्मने. कर्तरि सकर्मकयङन्तक्रिया
ग्रसमानः	अका. पुं. प्र. एक. शानजन्तं वि.
समन्तात्	विभक्तिप्रतिरूपकम् अव्ययम्
लोकान्	अका. पुं. द्विती. बहु. विशे.
समग्रान्	अका. पुं. द्विती. बहु. वि.

वदनैः	अका. नपुं. तृ. बहु. विशे.
ज्वलद्भिः	ज्वलत् - तका. नपुं. तृ. बहु. शत्रन्तं वि.
तेजोभिः	तेजस् - सका. नपुं. तृ. बहु.
आपूर्य	ल्यबन्तम् अव्ययम्
जगत्	तका. नपुं. द्विती. एक. विशे.
समग्रम्	अका. नपुं. द्विती. एक. वि.
भासः	भास् - सका. स्त्री. प्र. बहु. विशे.
तव	युष्मद् - दका. षष्ठी. एक. सर्व.
उग्राः	उग्रा आका. स्त्री. प्र. बहु. वि.
प्रतपन्ति	प्र + तप् + लट् प्रपु. बहु. भ्वादि कर्तरि अकर्म. क्रिया
विष्णो	विष्णु उका. पुं. सम्बो. एक.

वर्गीकरणाभ्यासः

अधस्तनेषु वर्गेषु यथानिर्देशं श्लोकपदानि लिखतु–

(i) प्रथमान्तम् (३) ....

(ii) द्वितीयान्तम् (४) ....

(iii) तृतीयान्तम् (३) ....

(iv) षष्ठ्यन्तम् (१) ....

(v) सम्बोधनान्तम् (१) ....

(vi) अव्ययम् (२) ....

(vii) सर्वनाम (१) ....

(viii) अकारान्तम् (५) ....

(A) आकारान्तम् (१) ....

(ix) उकारान्तम् (१) ....

(x) तकारान्तम् (२) ....

(xi) सकारान्तम् (२) ....

(xii) पुंलिङ्गम् (२) ....

(xiii) स्त्रीलिङ्गम् (२) ....

(xiv) नपुंसकम् (५) ....

(xv) शत्रन्तम् (१) ....

(xvi) शानजन्तम् (१) ....

(xvii) ल्यबन्तम् (१) ....

(xviii) विशेष्यम् (४) ....

(xix) विशेषणम् (५) ....

(xx) क्रियापदम् (२) ....

आकाङ्क्षाविस्तरः

लेलिह्यसे (= पुनः पुनः अतिशयेन वा लेक्षि)।

कः लेलिह्यते? **त्वं लेलिह्यसे।**

कीदृशः त्वं लेलिह्यसे? .... (अका. प्र. एक.)

कान् ग्रसमानः लेलिह्यसे? .... (अका. द्विती. बहु. वि.)

कति लोकान् ग्रसमानः लेलिह्यसे? .... (अका. द्विती. बहु.)

समग्रान् लोकान् कैः ग्रसमानः लेलिह्यसे? .... (अका. तृ. विशे.)

समग्रान् लोकान् कीदृशैः वदनैः ग्रसमानः लेलिह्यसे? .... (तका. तृ.)

समग्रान् लोकान् ज्वलद्भिः वदनैः कथं .... ग्रसमानः लेलिह्यसे? (अव्ययम्)

समग्रान् लोकान् ज्वलद्भिः वदनैः समन्ताद् ग्रसमानः लेलिह्यसे।

प्रतपन्ति (= तापं जनयन्ति)।

काः प्रतपन्ति? **भासः प्रतपन्ति।**

कस्य भासः प्रतपन्ति? .... (सर्व. षष्ठी.)

तव कीदृशाः भासः प्रतपन्ति? .... (आका. षष्ठी.)

तव उग्राः भासः किं कृत्वा प्रतपन्ति? .... (ल्यबन्तम्)

तव उग्राः भासः किम् आपूर्य प्रतपन्ति? .... (तका. द्विती.)

तव उग्राः भासः कियद् जगद् आपूर्य प्रतपन्ति? .... (अका. द्विती. नपुं.)

तव उग्राः भासः समग्रं जगत् कैः आपूर्य प्रतपन्ति? .... (सका. तृ.)

हे विष्णो! तव उग्राः भासः समग्रं जगत् तेजोभिः आपूर्य प्रतपन्ति।

पदार्थः

पदम्	संस्कृतम्	हिन्दी
विष्णो!	हे नारायण!	सर्वव्यापी हे कृष्ण!
(त्वम्)	(त्वम्)	(तुम)
ज्वलद्भिः	ज्वालयुक्तैः (दहद्भिः)	दहकते ज्वालाओं वाले
वदनैः	मुखैः	मुखों से
समग्रान्	सम्पूर्णान्	सारे
लोकान्	भुवनानि	ब्रह्माण्ड को
समन्तात्	सर्वतोभावेन	सभी ओर से
ग्रसमानः	निगिलन्	निगलते हुए
लेलिह्यसे	पुनः पुनः जिह्वया आस्वादयसि	जीभ लपलपा रहे हैं
तव	भवतः	आपकी
उग्राः	प्रचण्डाः	प्रचण्ड
भासः	ज्योतिः	ज्वाला
समग्रम्	सम्पूर्णम्	सम्पूर्ण
जगत्	चराचरम्	चराचर को
तेजोभिः	उद्दीप्तप्रकाशैः	तेज से
आपूर्य	पूरयित्वा	पूरित करके
प्रतपन्ति	प्रकृष्टं तापं जनयन्ति	प्रखर ताप उत्पन्न कर रही हैं।

भावार्थः

संस्कृतम्–अर्जुनः योद्धुकामानां राज्ञां भगवन्मुखप्रवेशप्रकारं प्रदर्शितवान्। प्रविष्टान् तान् भगवान् कथं कवलीकरोति अवशिष्टांश्च कथं तापयति इत्यस्मिन् श्लोके अर्जुनः वर्णयति–

हे विष्णो! तव वदनेभ्यो वह्निज्वालाः निःसरन्ति। तादृशैः ज्वलनैः मुखैः त्वं सर्वाणि भुवनानि सर्वतो भावेन निगिलसि। तानि सर्वाणि ग्रसित्वापि त्वम् अतृप्तः सन् लेलिह्यसे (अतिशयेन पुनः पुनः जिह्वां चालयसि), कवलीकृताँस्तान् आस्वादयसि।

अपि च हे सर्वव्यापिन्! तव प्रचण्डाः दाहाः सम्पूर्णं ब्रह्माण्डं समन्तात् प्रखराभिः दीप्तिभिः पूरयन्ति, तस्मात्ताः महान्तं तापं जनयन्ति। तेन सर्वे लोकाः सन्तप्ताः सन्ति।

हिन्दी–पिछले श्लोक में बताया गया कि युद्ध की कामना से उपस्थित राजगण विराट् पुरुष के मुख में प्रवेश कर रहे हैं। विराट् पुरुष प्रविष्ट हुए उन लोगों को कैसे निगल रहे हैं और अवशिष्ट लोगों को कैसे अपने-आप से तपा रहे हैं – अर्जुन इस श्लोक में यह वर्णन कर रहे हैं–

विश्वव्यापी हे कृष्ण! तुम्हारे मुखों से आग की लपटें निकल रही हैं। उन मुखों से आप समस्त भुवनों को निगल रहे हैं। उस निगलने में कोई अंश छूट नहीं रहा है अर्थात् अन्दर-बाहर, ऊपर-नीचे सब ओर से उन्हें अपना ग्रास बना रहे हैं। उनको निगलने के बाद आप अपनी जीभ निकालकर उनका आस्वाद ले रहे हैं और अतृप्ति का भाव प्रकट कर रहे हैं।

हे विष्णो! आपका प्रचण्ड प्रकाश सम्पूर्ण विश्व को अपनी प्रखर प्रभा से आपूरित कर रखा है, जिससे विश्व में भयंकर ताप हो रहा है और उससे सम्पूर्ण लोक सन्तप्त है।

अवबोधाभ्यासः

अधस्तनान् प्रश्नान् समादधातु–

१. इह पद्ये अर्जुनः किं वर्णयति? ....

२. इतः पूर्वयोः पद्ययोः अर्जुनः किं वर्णितवान्? ....

३. विराट् पुरुषस्य मुखेभ्यः किं निस्सरद् आसीत्? ....

४. 'समन्तात्' इति पदस्य किं तात्पर्यम्? ....

५. 'लेलिह्यसे' इति क्रियायां कीदृशो व्यापारः? ....

६. तेजोभिरापूरणेन किं भवति? ....

७. के सन्तप्ताः भवन्ति? ....

व्याकरणाभ्यासः

(अ) सन्धिः

१. समन्ताल्लोकान् – समन्तात् + लोकान् – लत्वम्

२. वदनैर्ज्वलद्भिः - वदनैः + ज्वलद्भिः - रभावः

३. तेजोभिरापूर्य - तेजोभिः + आपूर्य - रभावः

४. समग्रं भासः - समग्रम् + भासः - अनुस्वारः

५. भासस्तव - भासः + तव - सभावः

६. तवोग्राः - तव + उग्राः - गुणः

अधस्तनेषु रेखाङ्कितेषु पदेषु सन्धिच्छेदं करोतु–

(i) यावल्लोमा व्यजायत। ....

(ii) हृष्यल्लोमा व्यजायत। ....

(iii) यावदालक्ष्यते केतुर्गोप्यस्तावत् स्थिताः। ....

(iv) ता निराशा निववृतुर्गोविन्द विनिवर्तने। ....

(v) विलोक्य सुभृशं श्रोतः। ....

(vi) भूस्तोयमग्निरिति त्रीणि तत्त्वानि। ....

(vii) सर्व एव यजन्ति त्वां सर्वदेवमयेश्वरम्। ....

(viii) नोत्सहेऽहं कृपणधीः। ....

(ix) हृषीकेश नमस्तुभ्यं प्रपन्नं पाहि मां प्रभो। ....

(आ) कृत्प्रत्ययः

१. ग्रसमानः - ग्रस् + शानच् (आन्) = ग्रसमान

२. वदनैः - वदति अनेन इति - वद् + ल्युट् (अन) = वदन

३. ज्वलद्भिः - ज्वल् + शतृ (अत्) = ज्वलत्

४. आपूर्य - आ + पृ + ल्यप् (य) = आपूर्य

५. भाः - भासते इति - भास् + क्विप् (.) = भास्

अधस्तनानां पदानां प्रकृतिप्रत्ययभागं वाक्यप्रयोगं च करोतु–

(i) उपगूहमाना - ....

(ii) मन्यमानः - ....

(iii) सदनम् - ....

(iv) रटनम् - ....

(v) जपद्भिः – ....

(vi) गायन्त्यः – ....

(vii) अभ्येत्य – ....

(viii) अनूद्य – ....

(इ) क्रियाकारकसम्बन्धः

लेलिह्यसे – यङन्त सक. कर्तरि क्रिया		भासः – कर्ता	
त्वम् – आक्षिप्तः कर्ता		उग्राः – कर्तृविशेषणम्	
ग्रसमानः – कर्तृविशेषणम्		तव – कर्तुः सम्बन्धी	
लोकान् – ग्रसनक्रियायाः कर्म		आपूर्य – पूर्वकालिकी गौणक्रिया	
समग्रान् – कर्मविशेषणम्		जगत् – गौणक्रियायाः कर्म	
वदनैः – ग्रसनक्रियायां करणम्		समग्रम् – कर्मविशेषणम्	
ज्वलद्भिः – करणविशेषणम्		तेजोभिः – करणम्	
समन्तात् – क्रियाविशेषणम्		विष्णो – सम्बोधनम्	
प्रतपन्ति – कर्तरि सकर्मकक्रिया			

(ई) छन्दः – इन्द्रवज्रा

(उ) पर्यायशब्दः

१. भाः – १. प्रभा (आका. स्त्री.), २. रुक् (रुच् चका. स्त्री.),
३. रोचिः (रोचिस् सका. नपुं.)

◆◆◆

९९. श्लोकः

आख्याहि मे को भवानुग्ररूपो
नमोऽस्तु ते देववर प्रसीद।
विज्ञातुमिच्छामि भवन्तमाद्यं
न हि प्रजानामि तव प्रवृत्तिम्।।(भ. गी. ११.३१)

पदच्छेदः

आख्याहि, मे, कः, भवान्, उग्र-रूपः,
नमः, अस्तु, ते, देव-वर, प्रसीद।

विज्ञातुम्, इच्छामि, भवन्तम्, आद्यम्,
न, हि, प्रजानामि, तव, प्रवृत्तिम्।।

पदच्छेदाभ्यासः

अधस्तनानां पदानां पदच्छेदं करोतु–

(i) को भवान् – ....

(ii) नमोऽस्तु – ....

(iii) .रूपो नमः – ....

(iv) आद्यं न – ....

(v) उग्ररूपः – ....

(vi) देववर – ....

पदपरिचयः

पदम्	विश्लेषणम्
आख्याहि	आ + ख्या + लोट् मपु. एक. अदादि. परस्मै. सकर्मक. कर्तरि क्रिया
मे	अस्मद् – दका. चतु. एक. अस्मदादेशः सर्व.
कः	किम् – तका. पुं. प्र. एक. सर्व.
भवान्	भवत् – मका. पुं. प्र. एक. सर्व. विशे.
उग्ररूपः	अका. पुं. प्र. एक. समस्तं वि.

नमः	नमस् - सका. अव्ययम्
अस्तु	अस् + लोट् प्रपु. एक. अदादि. अकर्मक कर्तरि क्रिया
ते	युष्मद् - दका. चतु. एक. युष्मदादेशः सर्व.
देववर	अका. पुं. सम्बो. एक. समस्तम्
प्रसीद	प्र + सद् + लोट् मपु. एक. कर्तरि क्रिया
विज्ञातुम्	वि + ज्ञा + तुमुन् अव्ययम्
इच्छामि	इष् + लट् उपु. एक. परस्मै. कर्तरि सकर्मकक्रिया
भवन्तम्	भवत् - तका. पुं. द्विती. एक. विशे.
आद्यम्	आद्य अका. पुं. द्विती. एक. तद्धितान्तं वि.
न	अव्ययम्
हि	अव्ययम्
प्रजानामि	प्र + ज्ञा + लट् उपु. एक. सकर्म. परस्मै. कर्तरि क्रिया
तव	युष्मद् - दका. षष्ठी एक. सर्व.
प्रवृत्तिम्	इका. स्त्री. द्विती. एक. कृदन्तम्

वर्गीकरणाभ्यासः

अधस्तनेषु वर्गेषु श्लोकपदानि लिखतु–

(i) प्रथमान्तम् (३) ....

(ii) द्वितीयान्तम् (३) ....

(iii) चतुर्थ्यन्तम् (२) ....

(iv) षष्ठ्यन्तम् (१) ....

(v) सम्बोधनान्तम् (१) ....

(vi) अकारान्तम् (३) ....

(vii) इकारान्तम् (५) ....

(viii) पुंलिङ्गम् (६) ....

(ix) स्त्रीलिङ्गम् (१) ....

(x) समस्तम् (२) ....

(xi) अव्ययम् (४) ....

(xii) सर्वनाम (६) ....

(xiii) क्रियापदम् (५) ....

(xiv) विशेष्यम् (२) ....

(xv) विशेषणम् (३) ....

(xvi) तुमुन्नन्तम् (१) ....

(xvii) तद्धितान्तम् (१) ....

(xviii) कृदन्तम् (१) ....

आकाङ्क्षाविस्तरः

आख्याहि (कथय)।

कः आख्यातु ? (त्वम्) आख्याहि।

(त्वं) कस्मै आख्याहि? .... (अस्मदादेशः)

त्वं मे किम् आख्याहि? भवान् कः इति आख्याहि।

कीदृशः भवान्? .... (अका. पुं. प्र. एक. विशेषणम्)

उग्ररूपः भवान् कः इति मे आख्याहि।

अस्तु (भवतु)।

कः अस्तु? नमः अस्तु।

कस्मै नमः अस्तु? ते नमः अस्तु।

प्रसीद (प्रसन्नो भव)।

कः प्रसीदतु? हे देववर! त्वं प्रसीद।

इच्छामि (वाञ्छामि)।

कः इच्छति? अहम् इच्छामि।

अहं किम् इच्छामि? .... (तुमुन्नन्तम्)

अहं कं विज्ञातुम् इच्छामि? .... (तका. पुं. द्वि. एक.)

कीदृशं भवन्तं विज्ञातुम् इच्छामि? .... (अका. पुं. द्विती. एक.)

आद्यं भवन्तं विज्ञातुम् इच्छामि।

न हि प्रजानाति (यतोहि सम्यक् न जाने)।

कः न प्रजानाति? अहं हि न प्रजानामि।

अहं कां न जानामि? .... (इका. स्त्री. द्वि. एक.)

कस्य प्रवृतिं न प्रजानामि? .... (दका. षष्ठी एक. सर्व.)

पदार्थः

पदम्	संस्कृतम्	हिन्दी
उग्ररूपः	क्रूराकारः	उग्ररूप वाले
भवान्	भवान्	आप
कः	कोऽस्ति	कौन (हैं)
मे	(इति) मह्यम्	(यह) मुझे
आख्याहि	कथय	बतायें
नमोऽस्तु	प्रमाणोऽस्तु	नमस्कार हो
ते	तुभ्यम्	आपको
देववर!	हे देवश्रेष्ठ!	हे देवों में श्रेष्ठ!
प्रसीद	प्रसन्नो भव	(आप) प्रसन्न हों
आद्यम्	आदिकारणम्	आदि कारण
भवन्तम्	भवन्तम्	आपको
विज्ञातुम्	विशेषरूपेण ज्ञातुम्	विशेषरूप से जानना
इच्छामि	अभिलषामि	चाहता हूँ
हि	यतोहि	क्योंकि
तव	भवतः	आपकी
प्रवृत्तिम्	चेष्टाम्	प्रवृत्ति को
न	नहि	नहीं
प्रजानामि	अवगच्छामि	जानता हूँ।

भावार्थः

संस्कृतम्–अर्जुनस्य प्रार्थनयैव भगवान् श्रीकृष्णः तस्मै विश्वरूपं दर्शितवान्। विश्वरूपस्य उग्रतया प्रव्यथितः अर्जुनः जिज्ञासति यत् वस्तुतः श्रीकृष्णः कः? तथा अनेन उग्ररूपेण स किं चिकीर्षति? एवं जिज्ञासया स पृच्छति–

हे प्रभो! भयंकराकृतिर्भवान् वस्तुतः कोऽस्ति इति स्पष्टं मह्यं निर्दिशतु। यद्यपि भवान् श्रीकृष्णः स्वयोगशक्त्या मह्यं विश्वरूपं दर्शयति इति ज्ञानं ममास्ति, तथापि उग्ररूपं दृष्ट्वा शङ्कितः सन् पृच्छामि। अथवा भवान् यो वा को वास्तु, प्रथमं, त्वामहं प्रणमामि। अतः हे देवश्रेष्ठ! त्वं मयि प्रसीद, सन्तुष्टो भव। इदानीमहम् आदिकारणं भवन्तं विशेषेण अवबोद्धुं कामये। यतोहि अनेन उग्ररूपेण भवान् किं चिकीर्षति? मह्यम् उग्ररूपं कथं दर्शयति? इदानीं तव उग्ररूपस्य मुखेषु उभयपक्षीयान् राज्ञः ग्रस्तान् पश्यामि, किन्तु सन्निकटे काले अत परं किं करिष्यतीति रहस्यमेतत् न जानामि। अतः हे प्रभो कृपां कृत्वा रहस्यमिदं मह्यं कथय।

हिन्दी–विराट् पुरुष की उग्रता देख व्याकुल अर्जुन के मन में शंका होती है कि भगवान् अपनी उग्रता से क्या करना चाहते हैं और इनका वास्तविक स्वरूप क्या है? इस श्लोक में अर्जुन अपनी इसी शंका के समाधान के लिए भगवान् से पूछ रहे हैं–

हे प्रभो! महाभयानक आकृति धारण किए हुए आप वस्तुतः कौन हैं? यह मुझे बताएँ। यह तो मैं जानता हूँ कि आप श्रीकृष्ण हैं और अपनी योगशक्ति के प्रभाव से मुझे आप अपना ऐश्वर्य दिखला रहे हैं, फिर इस उग्ररूप के कारण मुझे शंका हो रही है। अथवा आपका असली रूप कुछ भी हो, पहले तो मैं आपको प्रणाम करता हूँ। हे देवताओं में श्रेष्ठ! आप मुझ पर प्रसन्न हों और कृपा करें। आप इस ब्रह्माण्ड के प्रधान कारण हैं, इतना तो जानता हूँ, किन्तु इसके अतिरिक्त आपका जो विशेष रूप है उसे और इस उग्ररूप से आप क्या करना चाहते हैं उसे मैं नहीं जानता हूँ। अतः इस भयंकर रूप को मुझे क्यों दिखा रहे हैं? निकट भविष्य में आप क्या करना चाहते हैं? कृपा करके इस रहस्य को समझाएँ।

अवबोधाभ्यासः

अधस्तनान् प्रश्नान् उत्तरयतु–

१. इह श्लोके अर्जुनः किं पृच्छति? ....

२. अर्जुनः कृष्णं ज्ञात्वाऽपि कथं पृच्छति? ....
....

३. सः भगवतः कथं भीतः? ....

४. प्रमाणेन क्रुद्धे किं परिवर्तनं जायते। ....

५. उग्ररूपस्य मुखेषु अर्जुनः कान् राज्ञः दृष्टवान्? ....

....

६. अर्जुनः कम् आदिकारणम् अवधारयति? ....

७. कस्य प्रवृत्त्या आशङ्कितः अर्जुनः? ....

व्याकरणाभ्यासः

(अ) सन्धिः

१. को भवान् – कः + भवान् – ओभावः

२. .रूपो नमः – .रूपः + नमः – ओभावः

३. नमोऽस्तु – नमः + अस्तु – ओभावः पूर्वरूपं च

४. आद्यं न – आद्यम् + न – अनुस्वारः

अधस्तनेषु रेखाङ्कितेषु पदेषु सन्धिं छिनत्तु–

(i) अखिलहेतुहेतुं त्वां नतोऽस्मि।

(ii) एष लोको यत आविरासीत्।

(iii) सर्वे हेतवो जगतोऽङ्गभूताः सन्ति।

(iv) अजायाः गुणैः स अजोऽनुबद्धः।

(v) ज्ञानिनो ज्ञानयज्ञेन ज्ञानविग्रहं यजन्ति।

(vi) गुणप्रवाहोऽयमविद्यया कृतः।

(vii) नमस्तेऽद्भुतसिंहाय।

(आ) समासः

१. उग्ररूपः – उग्रं रूपं यस्य सः – बहुव्रीहिः

२. देववर – देवेषु वरः – सप्त. तत्पु.ः

अधस्तनेषु विग्रहेषु समासं करोतु–

(i) गुणेषु आसक्तः – ....

(ii) गृहे रक्तः – ....

(iii) वाचि पटुः – ....

(iv) वरम् आननं यस्याः, ताम् - ....

(v) गृहीतं भाजनं यया, ताम् - ....

(vi) घर्षितः आत्मा यस्याः, सा - ....

(इ) तद्धितप्रत्ययः

१. आद्यम् - आदौ भवम् - आदि + यत् (य) = आद्य

अधस्तनेषु पदेषु प्रत्ययं निर्दिश्य पदानां वाक्यप्रयोगं करोतु–

(i) धुर्यः - ....

(ii) अन्त्यम् - ....

(iii) वन्यम् - ....

(iv) अरण्यम् - ....

(v) अग्र्यम् - ....

(vi) सोदर्यः - ....

(ई) कृत्प्रत्ययः

१. विज्ञातुम् - वि + ज्ञा + तुमुन् = विज्ञातुम्

२. प्रवृत्तिम् - प्र + वृत् + क्तिन् (ति) = प्रवृत्ति

अधस्तनेभ्यः प्रकृतिप्रत्ययेभ्यो निष्पन्नं पदं वाक्ये प्रयोजयतु–

(i) वि + ईक्ष् + तुमुन् - ....

(ii) उप + सेव् + तुमुन् - ....

(iii) अलम् + कृ + तुमुन् - ....

(iv) उप + स्था + तुमुन् - ....

(v) सम् + तृप् + क्तिन् - ....

(vi) सम् + अनु + इ + क्तिन् - ....

(vii) अनु + कृ + क्तिन् - ....

(viii) प्र + विश् + क्तिन् - ....

(उ) क्रियाकारकसम्बन्धः

आख्याहि	-	कर्तरि लोडर्थ क्रिया	देववर	-	सम्बोधनम्
त्वम्	-	आक्षिप्तः कर्ता	इच्छामि	-	कर्तरि सकर्मकक्रिया
मे	-	तादर्थ्यचतुर्थी	अहम्	-	आक्षिप्तकर्ता
कः	-	कर्ता	विज्ञातुम्	-	इषि - क्रियायाः कर्म
भवान्	-	कर्तृविशेषणम्	भवन्तम्	-	ज्ञानक्रियायाः कर्मीभूतायाः कर्म
उग्ररूपः	-	कर्तृविशेषणम्	आद्यम्	-	कर्मविशेषणम्
अस्ति	-	आक्षिप्ता कर्तरि क्रिया	प्रजानानि	-	कर्तरि सकर्मकक्रिया
अस्तु	-	अकर्मक लोडर्थक्रिया	अहम्	-	आक्षिप्तः कर्ता
नमः	-	कर्ता	न	-	क्रियाविशेषणम्
ते	-	तादर्थ्यचतुर्थी	हि	-	हेत्वर्थे
प्रसीद	-	अकर्मकलोडर्थक्रिया	प्रवृत्तिम्	-	कर्म
त्वम्	-	आक्षिप्तः कर्ता	तव	-	कर्मसम्बन्धी

(ऊ) छन्दोविधानम्

अस्य श्लोकस्य प्रथमतृतीयपादयोः इन्द्रवज्रा तथा च द्वितीयचतुर्थपादयोः उपेन्द्रवज्रा छन्दः। एकस्मिन् पद्ये उभयोः छन्दसोः प्रयोगाद् भद्रा नाम उपजातिछन्दो विज्ञेयम्।

(ए) पर्यायशब्दः

१. उग्रम् - १. क्रूरम् (अका. त्रि.), २. घोरम् (अका. त्रि.), ३. भयानकम् (अका. त्रि.), ४. भयङ्करम् (अका. त्रि.)

२. आद्यम् - १. प्रथमम् (अका. त्रि.), २. प्रधानम् (अका. त्रि.), ३. बीजम् (अका. नपुं.), ४. मूलम् (अका. नपुं.)

३. प्रवृत्तिः - १. चेष्टा (आका. स्त्री.), २. व्यवहारः, ३. क्रिया, ४. वृत्तान्तः (आका. स्त्री.), ५. उदन्तः (अका. पुं.), ६. कथा (आका. स्त्री.)

◆◆◆

१००. श्लोकः

श्रीभगवानुवाच

कालोऽस्मि लोकक्षयकृत्प्रवृद्धो
लोकान् समाहर्तुमिह प्रवृत्तः।
ऋतेऽपि त्वां न भविष्यन्ति सर्वे
येऽवस्थिताः प्रत्यनीकेषु योधाः।। (भ. गी. ११.३२)

पदच्छेदः

श्री-भगवान् उवाच–

कालः, अस्मि, लोक-क्षय-कृत्, प्रवृद्धः,
लोकान्, समाहर्तुम्, इह, प्रवृत्तः।

ऋते, अपि, त्वाम्, न, भविष्यन्ति, सर्वे,
ये, अवस्थिताः, प्रत्यनीकेषु, योधाः।।

पदच्छेदाभ्यासः

अधस्तनानि पदानि छिनत्तु–

(i) कालोऽस्मि – ....

(ii) लोकक्षयकृत् – ....

(iii) प्रवृद्धो लोकान् – ....

(iv) ऋतेऽपि – ....

(v) त्वां न – ....

(vi) येऽवस्थिताः – ....

पदपरिचयः

पदम्	विश्लेषणम्
श्रीभगवान्	भगवत् – तका. पुं. प्र. एक. समस्तम्
उवाच	ब्रू + लिट् प्र. एक. परस्मै सकर्म कर्तरि क्रिया
कालः	अका. पुं. प्र. एक. विशे.
अस्मि	अस् + लट् उपु. एक. परस्मै अकर्म. कर्तरि क्रिया

लोकक्षयकृत्	लोकक्षयकृत् तका. पुं. प्र. एक. समस्तं वि.
प्रवृद्धः	अका. पुं. प्र. एक. क्तान्तं वि.
लोकान्	अका. पुं. द्विती. बहु.
समाहर्तुम्	तुमुन्नन्तम् अव्ययम् १
इह	अव्ययम् २
प्रवृत्तः	अका. पुं. प्र. एक. क्तान्तं वि.
ऋते	अव्ययम् ३
अपि	अव्ययम् ४
त्वाम्	युष्मद् - दका. - द्विती. एक. सर्व.
न	अव्ययम् ५
भविष्यन्ति	भू + लृट् प्रपु. बहु. परस्मै अकर्म. कर्तरि क्रिया
सर्वे	सर्व- अका. पुं. प्र. बहु. सर्व. वि.
ये	यद् - दका. पुं. प्र. बहु. सर्व. वि.
अवस्थिताः	अका. पुं. प्र. बहु. क्तान्तं वि.
प्रत्यनीकेषु	अका. नपुं. स. बहु. समस्तम्
योधाः	अका. पुं. प्र. बहु. विशे.

वर्गीकरणाभ्यासः

अधस्तनेषु वर्गेषु श्लोकपदानि विभज्य लिखतु–

(i) प्रथमान्तम् (८) ....

(ii) द्वितीयान्तम् (२) ....

(iii) सप्तम्यन्तम् (१) ....

(iv) सर्वनाम (३) ....

(v) अव्ययम् (५) ....

(vi) अकारान्तम् (८) ....

(vii) तकारान्तम् (१) ....

(viii) पुंलिङ्गम् (९) ....

(ix) नपुंसकम् (१) ....

(x) समस्तम् (२) ....

(xi) तुमुन्नन्तम् (१) ....

(xii) क्तान्तम् (३) ....

(xiii) विशेष्यम् (२) ....

(xiv) विशेषणम् (६) ....

(xvi) क्रियापदम् (२) ....

आकाङ्क्षाविस्तरः

अस्मि (भवामि)।

कः अस्ति? अहम् अस्मि।

अहं कः अस्मि? अहं कालः अस्मि।

अहं कीदृशः कालः अस्मि? अहं प्रवृद्धः कालः अस्मि।

अहं प्रवृद्धः कालः पुनश्च कीदृशः? .... (तका. प्र.) लोकक्षयकृत् प्रवृद्धः कालः अस्मि्

प्रवृत्तः (प्रवृत्तिमान् अस्मि)।

कः प्रवृत्तः? सः कालः प्रवृत्तः।

कालः किमर्थं प्रवृत्तः? .... (तुमुन्नन्तम्)

कान् समाहर्तुम् इह प्रवृत्तः? .... (अका. पुं. द्वि. बहु.)

न भविष्यन्ति (न वर्तिष्यन्ते)।

के न भविष्यन्ति? .... (अका. पुं. प्र. बहु. विशे.)

के योधाः न भविष्यन्ति? ये अवस्थिताः सन्ति।

ये योधा कुत्र अवस्थिताः? .... (अका. नपुं. सप्त. बहु.)

प्रत्यनीकेषु ये योधा अवस्थिताः, ... (अका. पुं. प्र. बहु. सर्व.)
तेषु कति न भविष्यन्ति?

ये योधाः प्रत्यनीकेषु अवस्थिताः, ...(दका. त्रि. द्वि. एक. सर्व.)
ते सर्वे कम् ऋतेऽपि न भविष्यन्ति?

ये योधाः प्रत्यनीकेषु अवस्थिताः (सन्ति, ते) सर्वे त्वाम् ऋतेऽपि न भविष्यन्ति।

पदार्थः

पदम्	संस्कृतम्	हिन्दी
लोकक्षयकृत्	लोकसंहारकारी (अहम्)	विश्व का संहार करने वाला (मैं)
प्रवृद्धः	महान्	महान्
कालः	कालः क्रियाशक्तिमान् परमेश्वरः	काल
अस्मि	भवामि वर्ते	हूँ।
इह	इदानीम्	इस समय
लोकान्	जनान्	लोगों का
समाहर्तुम्	संहर्तुम्	संहार करने के लिए
प्रवृत्तः	व्यापृतः	प्रवृत्त हुआ हूँ
ये	यत्संख्याकाः	जो
योधाः	योद्धारः	योद्धा
प्रत्यनीकेषु	प्रतिपक्षसैन्येषु	विपक्षी सेना में
अवस्थिताः	विद्यमानाः (सन्ति)	खड़े हैं
सर्वे	(ते) समे	(वे) सब
त्वाम्	भवन्तम् (अर्जुनम्)	तुम्हारे
ऋते	विना	विना
अपि	अपि	भी
न	न	नहीं
भविष्यन्ति	वत्स्यन्ते	रहेंगे।

भावार्थः

संस्कृतम्—पूर्वश्लोके अर्जुनेन प्रार्थितः भगवान् श्रीकृष्णः स्वस्य विशिष्टं स्वरूपं स्वप्रवृत्तिप्रयोजनं च निर्दिशति। तदुक्तम्—श्रीभगवान् उवाच-इति।

सर्वस्य लोकस्य संहारकारकः अहं क्रियाशक्तिसमन्वितः अत्युग्ररूपः महाकालः अस्मि। लोकसंहारार्थं त्वत्प्रवृत्तावपि नासौ फलवती, प्रतिपक्षाणां भीष्मादीनां मत्प्रवृत्तिं विना संहारोऽशक्यः। अतः इदानीमहं लोकान् भक्षितुं प्रवृत्तः।

ये योद्धारः भीष्मद्रोणकर्णप्रभृतयः योद्धुम् अनर्हत्वेन सम्भाविताः प्रतिपक्षसैन्येषु समन्तात् अवस्थिताः सन्ति, ते सर्वे त्वां हन्तारं विनाऽपि न जीविष्यन्ति। मया कालात्मना ग्रस्तत्वात् एते सर्वे मरिष्यन्त्येव। तत्र तव अर्जुनस्य व्यापारः अकिञ्चित्करः इति भावः। तस्मात् त्वमुत्तिष्ठ, स्थित्वा युध्यस्व। तेन मदाराधनादिजन्यपुण्यजनितं यशो लभस्व।

हिन्दी—पूर्व श्लोक में अर्जुन के द्वारा की गयी प्रार्थना को स्वीकार करके यहाँ भगवान् श्रीकृष्ण ने अपने उग्ररूप की विशेषता और अपनी प्रवृत्ति का प्रयोजन बतलाया है—श्रीभगवान् ने कहा—

हे अर्जुन! मैं सभी लोकों का संहार करने वाला, क्रिया शक्ति और उग्ररूप से युक्त महाकाल हूँ। योद्धाओं का नाश करने के लिए तुम्हारे प्रवृत्त होने पर भी तुमसे वे मरेंगे नहीं। मेरी प्रवृत्ति के विना विपक्ष में युद्ध के लिए खड़े भीष्मादि का संहार तुम नहीं कर सकते हो। अतः इस समय इन लोगों का संहार करने के लिए मेरी प्रवृत्ति हुई है।

इस समय विपक्षी सेना में भीष्म, द्रोण, कर्ण आदि ऐसे योद्धा हैं, जिनके साथ युद्ध करने की योग्यता किसी में नहीं है। वे सब के सब तुम्हारे युद्ध करने के विना भी नहीं बचेंगे, क्योंकि इन सबको मैंने काल रूप से अपना ग्रास बना लिया है। ये सब अवश्य मरेंगे। तुम तो एक निमित्त हो। अतः उठो और युद्ध करो। आज तक मेरी आराधना करके तुमने जो पुण्य अर्जित किया है, इस समय उसका यशोरूप फल प्राप्त करो।

अवबोधाभ्यासः

अधस्तनान् प्रश्नान् समादधातु—

१. इह श्रीभगवान् किमुवाच? ....

२. आदिकारणस्य जगत्कर्तुः भगवतः किं रूपमिह उक्तम्? ....

३. भगवतः प्रवृत्तेरिह किं प्रयोजनं वर्णितम्? ....

४. युद्धे अर्जुनं विना कथं मरिष्यन्ति योद्धारः? ....

५. योद्धुम् अनर्हत्वेन के सम्भाविताः आसन्? ....

६. भीष्मादीनां हन्ता कः भवितुमर्हति? ....

७. अजेयानां भीष्मादीनां हनने निमित्तमात्रं कः आसीत्? ....

व्याकरणाभ्यासः

(अ) सन्धिः

१. कालोऽस्मि - कालः + अस्मि - ओभावः पूर्वरूपं च

२. प्रवृद्धो लोकान् - प्रवृद्धः + लोकान् - ओभावः

३. ऋतेऽपि - ऋते + अपि - पूर्वरूपम्

४. त्वां न - त्वाम् + न - अनुस्वारः

५. येऽवस्थिताः - ये + अवस्थिताः - पूर्वरूपम्

६. प्रत्यनीकेषु - प्रति + अनीकेषु - यण्

अधस्तनेषु रेखाङ्कितेषु सन्धिमसन्धिं वा करोतु–

(i) ते प्रतीक्षन्तोऽवस्थिताः।

(ii) गुरवोऽग्रतः + अगच्छन् उपवनम्।

(iii) अङ्घ्रि + अवनेजन्यः आपः त्रीन् लोकान् पुनन्ति।

(iv) कृष्णः + वपुः समाहरत्।

(v) प्रीत्युत्फुल्लमुखाः प्रमदाः पुष्पैः अभ्यवर्षन्।

(vi) भृत्यो राज्ञो रुषितः प्राह।

(vii) यूयं राजद्रव्याण्यभीप्सथ।

(viii) गदाग्रजो रङ्गकारं रजकं वासांसि + अयाचत।

(ix) त्वयि + अवस्थिते किम् + मे + असुखम्।

(x) जगदीश्वरः पाणिना पाणिं गृहीत्वा अक्रूरं प्राह।

(आ) समासः

१. लोकक्षयकृत् - लोकानां क्षयः इति - षष्ठीतत्पुरुषः

लोकक्षयं करोतीति - लोकक्षयम् + कृत् - उपपदसमासः

२. प्रत्यनीकेषु - अनीकम् अनीकं प्रति इति, तेषु - अव्ययीभावः

अधस्तनेषु विग्रहेषु समासं करोतु–

(i) विश्वं धरतीति - ....

(ii) शिष्टं करोतीति - ....

(iii) कामान् प्रददातीति - ....

(iv) भारं बिभर्तीति - ....

(v) हुतं भुङ्क्ते इति - ....

(vi) जनेषु जनेषु इति - ....

(vii) विपिने विपिने इति - ....

(viii) वाहनैः वाहनैः इति - ....

(इ) कृत्प्रत्ययः

१. कृत् - करोतीति - कृ + क्विप् (.) = कृत्

२. प्रवृद्धः - प्र + वृद्ध + क्त (त) = प्रवृद्ध

३. समाहर्तुम् - सम् + आ + हृ + तुमुन् = समाहर्तुम्

४. प्रवृत्तः - प्र + वृत् + क्त = प्रवृत्त

५. अवस्थिताः - अव + स्था + क्त = अवस्थित

६. योधाः - युध् + अच् (अ) = योध

अधस्तनानां पदानां प्रत्ययनिर्देशं वाक्यप्रयोगं च करोतु–

(i) रुक् - ....

(ii) जित् - ....

(iii) द्युत् - ....

(iv) आहृतम् - ....

(v) प्रहर्षितः - ....

(vi) आस्फोटितम् - ....

(vii) आस्वादितम् - ....

(viii) विस्मर्तुम् – ....

(ix) निगदितुम् – ....

(x) विश्लेषितुम् – ....

(xi) सान्त्वयितुम् – ....

(ई) क्रियाकारकसम्बन्ध:

अस्मि	– कर्तरि अकर्मकक्रिया	भविष्यन्ति	– कर्तरि भविष्यत्कालिकी अकर्मकक्रिया
अहम्	– आक्षिप्त: कर्ता	न	– क्रियाविशेषणम्
काल:	– कर्तृविशेषणम् (विधेयम्)	योधा:	– कर्ता
लोकक्षयकृत्	– कर्तृविशेषणम्	सर्वे	– कर्तृविशेषणम्
प्रवृद्ध:	– कर्तृविशेषणम्	ये	– कर्तृविशेषणम्
अस्मि	– आक्षिप्ता क्रिया	अवस्थिता:	– कर्तृविशेषणम्
अहम्	– आक्षिप्त: कर्ता	प्रत्यनीकेषु	– अधिकरणम्
प्रवृत्त:	– कर्तृविशेषणम्	ऋते	– क्रियाविशेषणम्
समाहर्तुम्	– क्रियार्थकक्रिया	अपि	– त्वद्भिन्नसमुच्चये
लोकान्	– क्रियार्थक्रियाया: कर्म	त्वाम्	– उपपद – द्वितीया
इह	– अधिकरणार्थे		

(उ) छन्दोविधानम्

अस्य श्लोकस्य प्रथम – द्वितीय – चतुर्थपादेषु इन्द्रवज्रा छन्द: तथा च तृतीये पादे उपेन्द्रवज्रा। एवञ्च उभयोर्योगादिह शाला नाम उपजाति: छन्द: ज्ञेयम्:।

(ऊ) पर्यायशब्द:

१. **काल:** – १. महाकाल: (अका. पुं.), २. परमेश्वर: (अका. पुं.), ३. रुद्र: (अका. पुं.)

२. **अनीकम्** – १. बलम् (अका. नपुं.), २. चक्रम् (अका. नपुं.), ३. सैन्यम् (अका. नपुं.)

◆◆◆

१०१. श्लोकः

तस्मात्त्वमुत्तिष्ठ यशो लभस्व
जित्वा शत्रून् भुङ्क्ष्व राज्यं समृद्धम्।
मयैवैते निहताः पूर्वमेव
निमित्तमात्रं भव सव्यसाचिन्।। (भ. गी. ११.३३)

पदच्छेदः

तस्मात्, त्वम्, उत्तिष्ठ, यशः, लभस्व,
जित्वा, शत्रून्, भुङ्क्ष्व, राज्यम्, समृद्धम्।

मया, एव, एते, निहताः, पूर्वम्, एव,
निमित्तमात्रम्, भव, सव्यसाचिन्।।

पदच्छेदाभ्यासः

अधस्तनानि पदानि छिनत्तु–

(i) तस्मात्त्वमुत्तिष्ठ – ....

(ii) यशो लभस्व – ....

(iii) राज्यं समृद्धम् – ....

(iv) मयैव – ....

(v) एवैते – ....

(vi) निमित्तमात्रं भव – ....

पदपरिचयः

पदम्	विश्लेषणम्
तस्मात्	तद् – दका. पुं. पं एक. सर्व.
त्वम्	युष्मद् – दका. त्रि. प्र. एक. सर्व.
उत्तिष्ठ	उद् + स्था + लोट् मपु. एक. परस्मै. अकर्म. कर्तरि क्रिया.
यशः	यशस् – सका. नपुं. द्विती. एक.
लभस्व	लभ् + लोट् मपु. एक. आत्मने. सकर्म. कर्तरि क्रिया.
जित्वा	क्त्वान्तम् अव्ययम्

शत्रून्	शत्रु - उका. पुं. द्विती. बहु.
भुङ्क्ष्व	भुज् + लोट् मपु. एक. रुधादि. आत्मने. सकर्मक. कर्तरि क्रिया
राज्यम्	अका. नपुं. द्विती. एक. विशे.
समृद्धम्	अका. नपुं. द्विती. एक. क्तान्तं वि.
मया	अस्मद् - दका. त्रि. तृ. एक. सर्व.
एव	अव्ययम्
एते	एतद् - दका. पुं. प्र. बहु. सर्व.
निहताः	अका. पुं. प्र. बहु. क्तान्तं वि.
पूर्वम्	पूर्व अका. नपुं. द्विती. एक. क्रियावि.
एव	अव्ययम्
निमित्तमात्रम्	अका. नपुं. द्विती. एक. क्रियावि., समस्तम्
भव	भू + लोट् मपु. एक. परस्मै. अकर्म. कर्तरि क्रिया.
सव्यसाचिन्!	नका. पुं. सम्बो. एक. समस्तम्

वर्गीकरणाभ्यासः

अधस्तनेषु वर्गेषु श्लोकपदानि विभजतु–

(i) प्रथमान्तम् (३) ....

(ii) द्वितीयान्तम् (६) ....

(iii) तृतीयान्तम् (१) ....

(iv) पञ्चम्यन्तम् (१) ....

(v) सम्बोधनान्तम् (१) ....

(vi) अकारान्तम् (५) ....

(vii) उकारान्तम् (१) ....

(viii) नकारान्तम् (१) ....

(ix) सकारान्तम् (१) ....

(x) पुंलिङ्गम् (५) ....

(xi) नपुंसकम् (५) ....

(xii) सर्वनाम (४) ....

(xiii) अव्ययम् (३) ....

(xiv) क्रियापदम् (४) ....

(xv) क्रियाविशेषणम् (२) ....

(xvi) त्वान्तमव्ययम् (१) ....

(xvii) क्तान्तम् (२) ....

(xviii) समस्तम् (२) ....

(xix) विशेषणम् (२) ....

(xx) विशेष्यम् (२) ....

आकाङ्क्षाविस्तरः

उत्तिष्ठ (उत्थितो भव)।

कः उत्तिष्ठतु? त्वम् उत्तिष्ठ।

कस्मात् त्वम् उत्तिष्ठ? यस्मात् त्वां विनापि सर्वे योद्धारः मरिष्यन्ति, तस्मात् त्वम् उत्तिष्ठ।

लभस्व (प्राप्नुहि)।

किं लभस्व? .... (सका. नपु. द्विती.)

भुङ्क्ष्व (भोगं कुरु)।

किं भुङ्क्ष्व? .... (अका. नपुं. द्विती. एक विशे.)

कीदृशं राज्यं भुङ्क्ष्व? .... (अका. नपुं. द्विती. एक. वि.)

किं कृत्वा समृद्धं राज्यं भुङ्क्ष्व? .... (क्त्वान्तमव्ययम्)

कान् जित्वा? .... (उका. पुं. द्विती. बहु.)

निहताः (मारिताः)।

के निहताः? .... (एतद् दका. पुं. दका. पुं. प्र. बहु.)

केन एते निहताः? .... (अस्मद् दका. त्रि. तृ. एक.)

मया एते कदा निहताः? .... (क्रियावि.)

अतः हे सव्यसाचिन्! त्वं भव।

त्वं किं भव? निमित्तमात्रं भव।

पदार्थः

पदम्	संस्कृतम्	हिन्दी
तस्मात्	पूर्वोक्तात् कारणात्	इसलिए
त्वम्	त्वम् (अर्जुनः)	तुम
उत्तिष्ठ	युध्यस्व	उठो (लड़ो)
यशः	कीर्तिम्	यश
लभस्व	अवाप्नुहि	पाओ
शत्रून्	रिपून्	शत्रुओं को
जित्वा	विजित्य	जीतकर
समृद्धम्	सम्पन्नम्	समृद्ध
राज्यम्	राज्यश्रियम्	राज्यलक्ष्मी का
भुङ्क्ष्व	भोगं कुरु	भोग करो
एते	तव शत्रवः	ये (तुम्हारे शत्रु)
मयैव	मया (कालपुरुषेण श्रीकृष्णेन) एव	मेरे ही द्वारा
पूर्वम् एव	प्रागेव	पहले ही
निहताः	निःशेषेण मारिताः	मार दिये गये हैं
(अतः)	(अतः)	(इसलिए)
सव्यसाचिन्	हे अर्जुन!	हे अर्जुन!
निमित्तमात्रम्	केवलं माध्यमम्	केवल निमित्त
भव	एधि	हो जाओ।

भावार्थः

संस्कृतम्—पूर्वस्मिन् श्लोके अर्जुनस्य प्रश्नान् समाधाय श्रीकृष्णः अनेन श्लोकेन अर्जुनं युद्धार्थम् आदिशति, तत्र विजयादिलाभं च निर्दिशति—

हे अर्जुन! यस्मात् त्वद्व्यापारम् अन्तरेणापि मम प्रभावात् एते तव प्रतिपक्षिणः विनङ्क्ष्यन्त्येव तस्मात् त्वम् उत्तिष्ठ, युद्धाय उद्युक्तो भव। अथ च देवैरपि दुर्जया भीष्मद्रोणादयोऽतिरथाः अर्जुनेन पराजिता इत्येवं भूतं यशः प्राप्नुहि। अयत्नतश्च दुर्योधनादीन् शत्रून् जित्वा धन-धान्य-सम्पन्नम् अकण्टकं राज्यं कुरु, राज्यसुखं च अनुभव। अनेन वाक्येन स्पष्टं सङ्केतितं यत् युद्धे अर्जुनस्य जयः सुनिश्चितः अस्ति। अपि च अनेन युद्धेन अर्जुनः महापुण्यप्रदां कीर्तिम् अर्जयिष्यति प्रकामं राज्यसुखं च अनुभविष्यति इति।

अर्जुनः वामहस्तेनापि शरसंधानकुशलोऽस्ति, अतस्तं सम्बोधयति भगवान्—सव्यसाचिन् इति। हे सव्यसाचिन् अर्जुन! एतेषां शत्रूणां विजये तव परिश्रमो नास्ति, यतोहि एते शत्रवः महाकालेन मया श्रीकृष्णेन पूर्वमेव निश्चयेन हताः इति त्वया प्रत्यक्षमेव दृष्टम्, अतस्त्वं निमित्तमात्रं भव, प्रतिपक्षिणां भीष्मद्रोणादीनां रथात् अवपतने त्वं केवलो माध्यमो भव। त्वां द्वारं कर्तुमेव मया मारिता अपि एते शत्रवः रथात् नावपातिता इति भावः।

हिन्दी—भगवान् ने पूर्व श्लोक में अर्जुन के प्रश्नों का उत्तर दिया। अब इस श्लोक में उन्होंने विजय, कीर्ति एवं सुखादि लाभ बताकर अर्जुन को युद्ध के लिए उत्साहित किया है—

हे अर्जुन! तुम्हारे युद्ध किये बिना भी मुझ महाकाल के प्रभाव से तुम्हारे सभी शत्रु स्वतः मर जायेंगे, इसलिए तुम उठो, युद्ध करो और देवताओं से भी पराजित न होने वाले भीष्म, द्रोणादि अतिरथियों को अर्जुन ने जीत लिया, इस यश को अर्जित करो। अर्थात् प्रयास के बिना ही दुर्योधनादि शत्रुओं को जीतकर निष्कण्टक एवं धन-धान्य से परिपूर्ण राज्य के सुखों का भोग करो।

भगवान् के इस कथन से स्पष्ट संकेत मिलता है कि इस युद्ध में अर्जुन की जीत अवश्य होगी। उन्हें महान् यश और राज्य सुख प्राप्त होगा।

अर्जुन बाँये हाथ से भी बाण चलाने में निपुण थे। अतः यहाँ भगवान् ने उनके लिए 'सव्यसाचिन्' शब्द से सम्बोधन किया है। इस सम्बोधन से ध्वनि निकलती है कि इन शत्रुओं को मारना तुम्हारे बाँयें हाथ का खेल है। क्योंकि ये सब के सब मुझ महाकाल के द्वारा पहले ही मारे जा चुके हैं। तुमने अपनी आँखों से अभी-अभी यह देख भी लिया है। ये भीष्मद्रोणादि केवल रथ पर खड़े हैं। इन्हें रथ से गिराने में तुम केवल निमित्त हो। तुम्हें यश देने के लिए ही मैंने इन्हे रथ से नीचे नहीं गिराया है।

अवबोधाभ्यासः

अधस्तनान् प्रश्नान् उत्तरयतु—

१. इह श्लोके कः कं प्रति कथयति? ....

२. श्रीकृष्णः अर्जुनं किमर्थम् उत्साहयति? ....

३. अर्जुनः कीदृशं यशो लप्स्यते? ....

४. सव्यसाचिन् इति सम्बोधनेन किं सङ्केतितम्? ....

५. अर्जुनः विराट्पुरुषस्य मुखेषु किमपश्यत्? ....

६. 'तस्मात्' पदस्य इह क आशयः? ....

७. अर्जुनस्य के शत्रवः सन्ति? ....

व्याकरणाभ्यासः

(अ) सन्धिः

१. यशो लभस्व - यशः + लभस्व - ओभावः

२. मयैव - मया + एव - वृद्धिः

३. एवैते - एव + एते - वृद्धिः

४. निमित्तमात्रं भव - निमित्तमात्रम् + भव - अनुस्वारः

५. राज्यं समृद्धम् - राज्यम् + समृद्धम् - अनुस्वारः

अधस्तनेषु पदेषु सन्धिं करोतु–

(i) धनुषः + भज्यमानस्य शब्दः + दिशः + अपूरयत्। ....

(ii) एहि वीर! गृहम् + यामः। ....

(iii) न त्वाम् + त्युक्तम् इहोत्सहे। ....

(iv) एष्यामि ते गृहम् + सुभ्रूः। ....

(v) रङ्गशालायां मल्ल + ओघम् + ददर्शतुः। ....

(vi) राज + ऐश्वर्येण दृप्तः + असौ कंसः। ....

(vii) तव + एष्यामि कुटीम् + मित्र। ....

(viii) काष्ठ + औषधम् + स्वयं निर्मेयम्। ....

(आ) समासः

१. निमित्तमात्रम् - निमित्तम् एव इति - तत्पु. (मयूरव्यंसकादिनित्यसमासः)

२. निहताः - निश्शेषेण हताः - तत्पु. (उपपदसमासः)

३. समृद्धम् - सम्यक्तया ऋद्धम् - उपपदतत्पु.

४. सव्यसाचिन् - सव्येन वामहस्तेन सचितुम्

= शरान् सन्धातुं शीलं यस्य > सव्येन साचिन् इति - उपपदसमासः

अधस्तनेषु रेखाङ्कितेषु विग्रहपूर्वकं समासं निर्दिशतु–

(i) छात्राणाम् अध्ययनमात्रं तपः। ....

(ii) सेवामात्रं करोति सा। ....

(iii) निहताः किङ्कराः सर्वे जम्बुमाली च राक्षसः। ....

(iv) विलोक्य सुभृशं प्रीतः। ....

(v) समृद्धं स्त्रीसहस्रेण रावणान्तःपुरम्। ....

(vi) सेवाभाविन्! हरिस्त्वयि प्रसेत्स्यति। ....

(इ) कृत्प्रत्ययः

१. समृद्धम् - सम् + ऋध् + क्त (त) ....

२. निहताः - नि + हन् + क्त ....

३. सव्यसाचिन्- सव्य + सच् + णिनि (इन्) ....

अधस्तनेषु रेखाङ्कितेषु प्रकृतिप्रत्ययविभागं करोतु–

(i) मार्गे ग्रामजना राजंस्तत्र तत्रोपसङ्गताः। ....

(ii) आयास्ये भवतो गेहम् अहम् आर्यसमन्वितः। ....

(iii) रङ्गद्वारि अवस्थितं नागमपश्यत्। ....

(iv) स्वविक्रमे प्रतिहते कुञ्जरेन्द्रोऽत्यमर्षितः। ....

(v) पापकारी विनश्यति। ....

(vi) अश्वदायी गोदायी धनदायी महाप्रभुः। ....

(vii) लघ्वाहारी सुखी भवेत्। ....

(ई) क्रियाकारकसम्बन्धः

उत्तिष्ठ - कर्तरि क्रिया शत्रून् - गौणक्रियायाः कर्म

त्वम्	-	कर्ता	निहताः	-	कर्मणि क्तान्ता क्रिया
तस्मात्	-	हेतुपञ्चमी	एते	-	कर्म
लभस्व	-	कर्तरि क्रिया	मया	-	कर्ता
यशः	-	कर्म	पूर्वम्	-	क्रियाविशेषणम्
भुङ्क्ष्व	-	कर्तरि क्रिया	एव	-	निर्धारणे
राज्यम्	-	कर्म	भव	-	कर्तरि क्रिया
समृद्धम्	-	कर्मविशेषणम्	निमित्तमात्रम्	-	कर्तृविशेषणम्
जित्वा	-	गौणक्रिया (पूर्वकालिकी)	सव्यसाचिन्!	-	सम्बोधनान्तम्

(उ) छन्दोविधानम्

श्लोकेस्मिन् प्रथमद्वितीयपादयोः इन्द्रवज्रा तथा च तृतीयचतुर्थपादयोः उपेन्द्रवज्रा छन्दसी स्तः, अतः उभयोः संयोगात् 'रामा' नाम उपजातिभेदः।

◆◆◆

१०२. श्लोकः

द्रोणं च भीष्मं च जयद्रथं च
कर्णं तथान्यानपि योधवीरान्।
मया हतांस्त्वं जहि मा व्यथिष्ठा
युध्यस्व जेतासि रणे सपत्नान्।। (भ. गी. ११.३४)

पदच्छेदः

द्रोणम्, च, भीष्मम्, च, जयद्-रथम्, च
कर्णम्, तथा, अन्यान्, अपि, योध-वीरान्।

मया, हतान्, त्वम्, जहि, मा, व्यथिष्ठा,
युध्यस्व, जेतासि, रणे, सपत्नान्।।

पदच्छेदाभ्यासः

अधस्तनानि पदानि छिनत्तु–

(i) जयद्रथं च – ....

(ii) तथान्यान् – ....

(iii) हतांस्त्वम् – ....

(iv) योधवीरान् – ....

(v) द्रोणं च – ....

पदपरिचयः

पदम्	विश्लेषणम्
द्रोणम्	अका. पुं. द्विती. एकती.
च	अव्ययम्
भीष्मम्	अका. पुं. द्विती. एक. समस्तम्
च	अव्ययम्
जयद्रथम्	अका. पुं. द्विती. एक. समस्तम्
च	अव्ययम्
कर्णम्	अका. पु. द्विती. एक.

तथा	अव्ययम्
अन्यान्	अका. पुं. द्विती. बहु. वि. सर्व.
अपि	अव्ययम्
योधवीरान्	अका. पुं. द्विती. बहु. विशेष्यम्
मया	अस्मद् - दका. तृ. एक. सर्व.
हतान्	अका. पुं. द्विती. बहु. क्तान्तं वि.
त्वम्	युष्मद् - दका. त्रि. प्र. एक. सर्व.
जहि	हन् + लोट् मपु. एक. सक. कर्तरि क्रिया
मा	माङ् अव्ययम्
व्यथिष्ठा	व्यथ् + लुङ् मपु. एक. अक. आत्मने. कर्तरि क्रिया
युध्यस्व	युध् + लोट् मपु. एक. आत्मने. अक. कर्तरि क्रिया
जेतासि	जि + लुट् मपु. एक. परस्मै. सकर्म. कर्तरि क्रिया
रणे	रण अका. पुं. सप्त. एक.
सपत्नान्	अका. पुं. द्विती. बहु.

वर्गीकरणाभ्यासः

अधस्तनेषु वर्गेषु श्लोकपदानि विभजतु–

(i) प्रथमान्तम् (१) ....

(ii) द्वितीयान्तम् (८) ....

(iii) तृतीयान्तम् (१) ....

(iv) सप्तम्यन्तम् (१) ....

(v) अकारान्तम् (९) ....

(vi) पुंलिङ्गम् (९) ....

(vii) विशेष्यम् (१) ....

(viii) विशेषणम् (२) ....

(ix) अव्ययम् (६) ....

(x) सर्वनाम (३) ....

(xi) क्रियापदम् (४) ....

(xii) क्रियापदानां धातून् लिखतु- ....

(xiii) अकर्मकधातुः (२) ....

(xiv) सकर्मकधातुः (२) ....

(xv) आत्मनेपदिनः (२) ....

(xvi) परस्मैपदिनः (२) ....

आकाङ्क्षाविस्तरः

जहि (मारय)।

कः हन्तु? त्वं जहि।

त्वं कं कं जहि?

त्वं द्रोणं च भीष्मं च जयद्रथं च कर्णं च जहि।

त्वं पुनश्च कान् जहि? .... (अका. पुं. द्विती. बहु.)

कान् योधवीरान् जहि? .... (वि.)

अन्यान् अपि कान् योधवीरान् जहि? .... (वि.)

अन्यानपि केन हतान् योधवीरान् जहि? .... (दका. तृ. एक. सर्व.)

मा व्यथिष्ठाः (मा भैषीः)।

कः मा व्यथिष्ट? त्वं मा व्यथिष्ठाः

युध्यस्व (युद्धं कुरु)।

जेतासि (अभिभवितासि)।

कः जेता? त्वं जेतासि।

कान् जेतासि? .... (अका. पुं. द्विती. बहु.)

त्वं सपत्नान् कुत्र जेतासि? .... (अका. पुं. सप्त. एक.)

पदार्थः

पदम्	संस्कृतम्	हिन्दी
त्वम्	त्वम् (अर्जुनः)	तुम
द्रोणम्	द्रोणाचार्यम्	द्रोणाचार्य
भीष्मम्	भीष्मपितामहम्	भीष्मपितामह

च	च	और
जयद्रथम्	धृतराष्ट्रजामातरम्	जयद्रथ
च	च	और
कर्णम्	सूतपुत्रं कर्णम्	कर्ण को
च	च	और
तथा	तथा	तथा
मया	श्रीकृष्णेन	मेरे द्वारा
हतान्	गतप्राणान्	मारे गये
अन्यान्	इतरान् (दुर्योधनादीन्)	दूसरे
अपि	अपि	भी
योधवीरान्	योधमुख्यान्	शूरवीर योद्धाओं को
जहि	वधं कुरु	मारो
मा	न हि	मत
व्यथिष्ठाः	शोकं कार्षीः	शोक करो
युध्यस्व	युद्धं कुरु	लड़ो
रणे	संग्रामे	लड़ाई में
सपत्नान्	शत्रून्	शत्रुओं को
जेतासि	अवश्यं जेष्यसि	अवश्य जीतोगे।

भावार्थः

संस्कृतम्–द्रोणादिषु सत्सु कथं जित्वा शत्रून् राज्यं भोक्ष्ये, कथं वा यशो लप्स्ये इत्याशङ्काम् अर्जुनस्य अपनेतुम् इह श्रीकृष्णः नामग्राहं द्रोणादीन् व्यपदिशति–

द्रोणभीष्मयोस्तावत् प्रसिद्धम् आशङ्काकारणं यत् द्रोणः ब्राह्मणोत्तमः धनुर्वेदाचार्यो मम गुरु विशेषेण च दिव्यास्त्रसम्पन्नः आसीत्। तथा भीष्मः शन्तनुकृपया स्वच्छन्दमृत्युः दिव्यास्त्रसम्पन्नश्च परशुरामेण द्वन्द्वयुद्धमुपगम्यापि न पराजितः। तथा यस्य पिता वृद्धक्षत्रः तपश्चरति स्म यन्मम पुत्रस्य शिरो यो भूमौ पातयिष्यति तस्यापि शिरः तत्कालं भूमौ पतिष्यति इत्येवम्भूतो जयद्रथोऽपि धृतराष्ट्रजामाता जेतुमशक्यः स्वयमपि महादेवाराधनपरो दिव्यास्त्रसम्पन्नश्च। सूर्यपुत्रः कर्णोऽपि सूर्याराधनेन दिव्यस्त्रसम्पन्नः इन्द्रदत्तया अमोघशक्त्या विशिष्टः आसीत्। तथान्येऽपि कृपाश्वत्थामभूरिश्रवः प्रभृतयो महावीराः सर्वथा दुर्जया एव आसन्। अतः अर्जुनस्य आशङ्काविषयान् पृथक्-पृथङ् नामभिः कथयति–द्रोणादीन्

त्वदाशङ्काविषयीभूतान् सर्वानेव योधवीरान् कालात्मना विराट्पुरुषेण मया पूर्वमारितान् एवं त्वं मारय। मृतानां मारणे को वा परिश्रमः? अतो व्यथां भयनिमित्तां पीडां मा गाः। भयं त्यक्त्वा युध्यस्व। अचिरेणैव रणक्षेत्रे शत्रून् अवश्यं जेष्यसि।

अत्र द्रोणं च भीष्मं च जयद्रथं चेति चकारत्रयेण एतेषामजेयत्वशङ्का अनूद्यते। तथाशब्देन कर्णे एवम् अपिशब्देन अन्येष्वपि सा शङ्कानूद्यते। एवञ्च कुतोऽपि स्वस्य पराजयं वधनिमित्तं पापं च मा शङ्किष्ठाः इत्यभिप्रायः।

इह 'हतान्' इति बहुत्वस्य समुदायेऽन्वयं विधाय अनन्तरं प्रत्येकान्वयो द्रष्टव्यः। यथा निम्नाङ्किते श्लोके द्वित्वस्य–

कथं भीष्ममहं संख्ये द्रोणं च मधुसूदन।
इषुभिः प्रतियोत्स्यामि 'पूजार्हौ' ......।। इति।

हिन्दी–द्रोणादि देवताओं से भी अजेय हैं, इनके रहते इन्हें जीतकर कैसे राज्य का भोग करूँगा, अर्जुन की इस आशंका को दूर करने के लिए भगवान् ने यहाँ द्रोणादि का अलग-अलग नाम लेकर इनसे जीतने की बात स्पष्ट कही है।

द्रोणादि से अर्जुन की आशंका के कारण प्रसिद्ध थे। द्रोण सर्वोत्तम ब्राह्मण, धनुर्वेद के आचार्य एवं अर्जुन के शिक्षक होने के साथ-साथ दिव्यास्त्रों से सम्पन्न थे। भीष्म को अपने पिता शन्तनु से स्वच्छन्द मृत्यु का वरदान प्राप्त था। उन्होंने द्वन्द्व युद्ध में परशुराम से पराजय नहीं पाई तथा उनके पास अनेक दिव्यास्त्र थे।

धृतराष्ट्र की एकमात्र पुत्री दुःशला के पति जयद्रथ ने महादेव की आराधना से दिव्यास्त्र प्राप्त किया था। और उनके पिता उस समय समन्त पञ्चक तीर्थ में तपस्या-रत थे कि उनके पुत्र का शिर जिसके द्वारा पृथ्वी पर गिरेगा, उसके शिर के भी सौ टुकड़े हो जायेंगे। इसीलिए श्रीकृष्ण के आदेश से अर्जुन ने जयद्रथ के शिर को बाण के द्वारा आकाश में उड़ाते हुए तपस्या-रत जयद्रथ के पिता वृद्धक्षत्र की गोद में गिराया। एवञ्च शिर उनकी गोद से नीचे गिरने के कारण उसी समय पिता के शिर के सौ टुकड़े हो गये थे (महाभारत द्रोणपर्व)।

कन्या कुन्ती के कर्ण से उत्पन्न सूर्यपुत्र कानीन कर्ण भी सूर्य की आराधना से अनेक दिव्यास्त्रों से सम्पन्न थे और इन्द्र की कृपा से उन्हें अमोघ शक्ति प्राप्त थी। इसी प्रकार अन्य कृपाचार्य, अश्वत्थामा, भूरिश्रवा आदि अनेक अजेय योद्धाओं के कारण अर्जुन को अपनी जीत में आशंका थी।

अतः द्रोणादि का अलग-अलग नाम लेकर भगवान् ने स्पष्ट किया कि इन सबको मैंने महाकाल विराट् रूप से पहले ही मार दिया है। इन मरे हुए मृतकों को मारने में कोई परिश्रम नहीं होता। अतः तुम भय मत करो। तुम निःशंक होकर युद्ध करो। रणक्षेत्र में तुम अपने इन शत्रुओं को शीघ्र ही अवश्य पराजित करोगे।

यहाँ जीत को सुनिश्चित बताने के लिए 'जेतासि' क्रियापद में लुट्लकार का प्रयोग हुआ है। 'द्रोणं च भीष्मं च जयद्रथं च' यहाँ तीन चकारों से आगे 'तथा' और 'अपि' शब्द के द्वारा भी द्रोणादि

के अजेयत्व का अनुवाद हुआ है।

यहाँ 'मया हतान्' की बहुत्व संख्या का पहले समुदाय में अन्वय होकर तत्पश्चात् प्रत्येक में अन्वय समझना चाहिए। जैसे–

कथं भीष्ममहम् .... 'पूजार्हौ' .... । इस श्लोक में द्वित्व का पहले 'भीष्मद्रोण' द्वित्व समुदाय में अन्वय होकर प्रत्येकान्वय होता है।

अवबोधाभ्यासः

अधस्तनान् प्रश्नान् समादधातु–

१. द्रोणादीनां पृथङ् नामग्रहणे को हेतुः? ....

२. द्रोणाचार्यः कस्य गुरुः? ....

३. भीष्मः स्वच्छन्दमृत्युवरं कुतो लब्धवान्? ....

४. जयद्रथः दुर्योधनस्य कः? ....

५. वृद्धक्षत्रजयद्रथयोः कः सम्बन्धः? ....

६. वृद्धक्षत्रः किमर्थं तपश्चरति स्म? ....

७. कर्णः कथं सूतपुत्रः? ....

८. कर्णाय अमोघशक्तिः केन प्रदत्ता? ....

व्याकरणाभ्यासः

(अ) सन्धिः

१. तथान्यान्	–	तथा + अन्यान्	–	दीर्घः
२. हतांस्त्वम्	–	हतान् + त्वम्	–	सानुनासिकरुत्वम्
३. द्रोणं च	–	द्रोणम् + च	–	अनुस्वारः
४. भीष्मं च	–	भीष्मम् + च	–	अनुस्वारः
५. जयद्रथं च	–	जयत् + रथम् + च	–	जश्त्वम्, अनुस्वारः च
६. त्वं जहि	–	त्वम् + जहि	–	अनुस्वारः
७. कर्णं तथा	–	कर्णम् + तथा	–	अनुस्वारः

अधस्तनेषु पदेषु सन्धिमसन्धिं वा करोतु–

(i) तस्माद् राज्ञः प्रियं यूयं वयं च करवामहे। ....

(ii) गाः पालयन् सहबलः क्वणयंश्च वेणुम्। ....

(iii) हाहेति शब्दः सुमहान् + तदाभूत्। ....

(iv) तत् + एव रूपं दुखापम्। ....

(v) ये बल + अबलवद् युद्धम् अन्विच्छन्ति। ....

(vi) तस्यानुजा भ्रातरोऽष्टौ कङ्कन्यग्रोधकादयः। ....

(vii) तथातिरभसांस्तास्तु परिघेण हतवान् बलः। ....

(आ) समासः

१. योधवीरान् – योधेषु वीरान् – सप्तमीतत्पु.

२. जयद्रथम् – जयन् रथः यस्य, तम् – बहुव्रीहिः

अधस्तनेषु विग्रहेषु समासरूपं वाक्ये प्रयुङ्क्ताम्–

(i) सेनासु अग्रगण्यान् – ....

(ii) बालकेषु मुख्याः – ....

(iii) आम्रेषु मधुराणि – ....

(iv) क्षीणं जीवितं यस्य सः – ....

(v) भज्यमानानि अङ्गानि एषां तेभ्यः – ....

(vi) भूरि पुण्यं येषां तेषाम् – ....

(vii) मल्लेषु मुख्याः – ....

(viii) सस्मितं मुखं यस्य सः – ....

(इ) कृत्प्रत्ययः

१. द्रोणः – द्रवतीति – द्रु + न = द्रोण

२. भीष्मम् – बिभेति अस्मात् इति – भी + षुक् + मक् = भीष्म

३. जयत् – जि + शतृ (अत्)

४. योध – युध्यते इति – युध् + अच् (अ)

५. हतान् – हन् + क्त (त)

(ई) तिङ्प्रत्ययः

मा व्यथिष्ठाः -- माङ्योगे सर्वलकारान् अपवाद्य लुङ्। तथा च सूत्रम्–माङि लुङ् ३।३।१७५ इति। अतः इह लोडर्थे लुङ्प्रयोगः। अपि च माङ्योगे अडागमः आडागमो वा न भवतः। "न माङ्योगे" (६.४.७४) इति सूत्रात्। यथा–त्वं मा गाः, मा भैषीः, मा कार्षीः, मा रोदीः इत्यादि।

(उ) क्रियाकारकसम्बन्धः

जहि	-	कर्तरि क्रिया	च	-	समुच्चये
त्वम्	-	कर्ता	तथा	-	समुच्चये
द्रोणम्	-	कर्म	अपि	-	समुच्चये
भीष्मम्	-	कर्म	व्यथिष्ठाः	-	कर्तरि क्रिया
जयद्रथम्	-	कर्म	मा	-	निषेधे, क्रियाविशेषणम्
कर्णम्	-	कर्म	युध्यस्व	-	कर्तरि क्रिया
योधवीरान्	-	कर्म	जेतासि	-	कर्तरि क्रिया
हतान्	-	कर्मविशेषणम्	सपत्नान्	-	कर्म
मया	-	हतक्रियायाः कर्ता	रणे	-	अधिकरणम् जयक्रियायाः
अन्यान्	-	कर्मविशेषणम्			

(ऊ) पर्यायशब्दः

१. **योधः** - १. भटः, २. योद्धा (योद्धृ - ऋका. पुं.)

२. **द्रोणः** - १. द्रोणाचार्यः, २. आढकम् (अका. नपुं./पुं.), ३. कृष्णकाकः, ४. अड्डुपः

३. **भीष्मः** - १. गाङ्गेयः (अका. पुं.), २. रुद्रः (अका. पुं.), ३. राक्षसः (अका. पुं.), ४. भयङ्करः (अका. त्रि.)

(ए) छन्दोविधानम्

अस्य पद्यस्य प्रथमद्वितीयचतुर्थेषु चरणेषु इन्द्रवज्रा छन्दः तथा च तृतीये चरणे उपेन्द्रवज्रा। एवञ्च उभयोः संयोगादिह 'शाला' नाम उपजाति भेदः अवगन्तव्यः।

◆◆◆

१०३. श्लोकः

अर्जुन उवाच

त्वमादिदेवः पुरुषः पुराणस्
त्वमस्य विश्वस्य परं निधानम्।
वेत्तासि वेद्यं च परं च धाम
त्वया ततं विश्वमनन्तरूप।। (भ. गी. ११.३८)

पदच्छेदः

त्वम्, आदि-देवः, पुरुषः, पुराणः,

त्वम्, अस्य, विश्वस्य, परम्, निधानम्।

वेत्ता, असि, वेद्यम्, च, परम्, च, धाम,

त्वया, ततम्, विश्वम्, अनन्त-रूप।।

पदच्छेदाभ्यासः

(i) पुराणस्त्वम् – ....

(ii) वेत्तासि – ....

(iii) ततं विश्वम् – ....

(iv) आदिदेवः – ....

पदपरिचयः

पदम्	विश्लेषणम्
त्वम्	युष्मद् - दका. त्रि. प्र. एक. सर्व. उद्देश्यम्
आदिदेवः	अका. पुं. प्र. एक. समस्तं विधेयम्
पुरुषः	अका. पुं. प्र. एक. विधेयम्
पुराणः	अका. पुं. प्र. एक. विधेयम्
त्वम्	युष्मद् - दका. त्रि. प्र. एक. सर्व उद्देश्यम्
अस्य	इदम् - मका. नपुं. षष्ठी एक. सर्व. वि.
विश्वस्य	अका. नपुं. षष्ठी एक. सर्व. विशे.

परम्	अका. नपुं. प्र. एक. वि.
निधानम्	अका. नपुं. प्र. एक. विशे.
वेत्ता	वेत्तृ - ऋका. पुं. प्र. एक. विधेयम्
असि	अस् + लट् मपु. एक. परस्मै. अकर्म. कर्तरि क्रिया
वेद्यम्	वेद्य - अका. नपुं. प्र. एक. विधेयम्
च	अव्ययम्
परम्	अका. नपुं. प्र. एक. वि.
च	अव्ययम्
धाम	धामन् - नका. नपुं प्र. एक. विशेष्यम्
त्वया	युष्मद् - दका. त्रि. तृ. एक. सर्व.
ततम्	तत - अका. नपुं. प्र. एक. क्तान्तं वि.
विश्वम्	अका. नपुं. प्र. एक. सर्व. विशे.
अनन्तरूप	अका. पुं. सम्बो. एक. समस्तम्

वर्गीकरणाभ्यासः

अधस्तनेषु वर्गेषु श्लोकपदानि विभज्य लिखतु–

(i) प्रथमान्तम् (१३) ....

(ii) तृतीयान्तम् (१) ....

(iii) षष्ठ्यन्तम् (२) ....

(iv) सम्बोधनान्तम् (१) ....

(v) अकारान्तम् (११) ....

(vi) ऋकारान्तम् (१) ....

(vii) नकारान्तम् (१) ....

(viii) पुंलिङ्गम् (५) ....

(ix) नपुंसकम् (९) ....

(x) सर्वनाम (६) ....

(xi) अव्ययम् (२) ....

(xii) समस्तम् (२) ....

(xiii) क्रियापदम् (१) ....

(xiv) उद्देश्यम् (२) ....

(xv) विधेयम् (५) ....

(xvi) विशेष्यम् (४) ....

(xvii) विशेषणम् (४) ....

(xviii) क्तान्तं पदम् (१) ....

आकाङ्क्षाविस्तरः

असि (भवसि)।

कः अस्ति?	त्वम् असि।
त्वं कोऽसि?	आदिदेवः।
पुनश्च त्वं कोऽसि?	पुरुषः।
पुनश्च त्वं कोऽसि?	पुराणः। अथवा, त्वं पुराणः पुरुषः असि।
पुनश्च त्वं कोऽसि?	निधानम्।
कीदृशं निधानम्?	परं निधानम्।
त्वं कस्य परं निधानम्?	विश्वस्य।
त्वं कस्य विश्वस्य परं निधानम् असि?	अस्य विश्वस्य।
पुनश्च त्वं कोऽसि?	वेत्ता।
पुनश्च त्वं कोऽसि?	वेद्यम्।
पुनश्च त्वं कोऽसि?	धाम।
कीदृशं धाम?	परं धामासि।

ततम् (व्याप्तम्)।

किं ततम्?	विश्वम्।
केन विश्वं ततम्?	त्वया।

किं सम्बोधनम्? अनन्तरूप।

हे अनन्तरूप! त्वया विश्वं ततम् अस्तीति शेषः।

पदार्थः

पदम्	संस्कृतम्	हिन्दी
अर्जुनः	पार्थः	अर्जुन
उवाच	उक्तवान्	बोले
त्वम्	त्वं (श्रीकृष्णः)	तुम
आदिदेवः	देवानाम् आदिः	जगत् के कर्ता
पुराणः	सनातनः	चिरन्तन
पुरुषः	चैतन्यम् (असि)	पुरुष (हो)
त्वम्	त्वं (श्रीकृष्णः)	तुम
अस्य	एतस्य	इस
विश्वस्य	जगतः	जगत् के
परम्	प्रकृष्टम्	परम
निधानम्	आश्रयः (असि)	आधार (हो)
वेत्ता	ज्ञाता	जानने वाले
वेद्यम्	ज्ञातव्यम्	जानने योग्य
च	तथा	और
परम्	परमम्	परम
धाम	पदम्	धाम
च	एवम्	और
असि	भवसि	हो
अनन्तरूप!	हे अपरिच्छिन्नस्वरूप!	हे अनन्तरूप!
त्वया	भवता (श्रीकृष्णेन)	आपके द्वारा
विश्वम्	जगत्	जगत्
ततम्	परिपूर्णम् (अस्ति)	व्याप्त (है)

भावार्थः

संस्कृतम्—भगवतः श्रीकृष्णस्य उत्तरं श्रुत्वा अर्जुनः तं स्तोतुम् उक्तवान्—

हे अनन्तरूप! तव अनन्तानि असंख्याकानि रूपाणि केनापि गणयितुं न शक्यन्ते, अतस्त्वम् अनन्तरूपोऽसि। जगतः सृष्टिहेतुत्वात् त्वम् आदिदेवः सृष्टिकारणभूतो देवानामादिः जनयिताऽसि। त्वं सर्वशरीरशायी चिरन्तनः पुरुषो नित्योऽस्ति। महाप्रलयादौ सर्वं जगत् त्वयि निधीयते। तव एकस्मिन् पादे जगदिदं तिष्ठति। अतस्त्वमेव अस्य विश्वस्य प्रकृष्टः आश्रयोऽसि। एवञ्च सृष्टिप्रलयस्थानत्वेन भगवत उपादानत्वम् उक्त्वा सर्वज्ञत्वेन प्रधानं व्यावर्तयन् निमित्ततां वक्ति। प्रकृतिर्हि सृष्टिप्रलयस्थानत्वेन उपादानकारणं भवति किन्तु सा सर्वज्ञा न भवति, प्रत्युत परं ब्रह्म श्रीकृष्णः सर्वज्ञः सन् जगतो निमित्तकारणं भवतीति विवेकः।

हे प्रभो! त्वं जगदिदं यथार्थं पूर्णरूपेण जानासि, अतो भवान् सर्वज्ञः। तव सदृशः अन्यः कोऽपि सर्वज्ञः नास्तीति भावः। यच्च वेदितव्यं ज्ञेयं तत्त्वम्, तदपि त्वमेवासि। किञ्च मुक्तपुरुषाणां यत् परमं पदं मोक्षाख्यं सच्चिदानन्दघनम् अविद्यातत्कार्यनिर्मुक्तम्, तदपि त्वमेवासि।

हे अगणिताकार! त्वया विश्वमिदं परिव्याप्तम्। जगतः प्रत्येकस्मिन् परमाणौ त्वं पूर्णोऽसि। तवैव सत्तया लब्धसत्ताकं विश्वमेतत्। स्वतस्तु सत्तास्फूर्तिशून्यं वर्तते जगदिदमिति भावः।

हिन्दी—भगवान् श्रीकृष्ण के वचन सुनकर उनकी स्तुति करने के लिए अर्जुन ने कहा—

हे अनन्तरूप! आपके अनगिनत रूप हैं, कोई व्यक्ति आपके रूपों का पार नहीं पा सकता, अतः आप अनन्तरूप हैं।

हे प्रभो! आप संसार की सृष्टि में आदि कारण हैं, अतः आप आदिदेव हैं। आप प्रत्येक पुर अर्थात् शरीर में शयन करने वाले सनातन पुराण पुरुष हैं। सदा रहने वाले नित्य हैं। आप सम्पूर्ण विश्व के एकमात्र आश्रय हैं। महाप्रलय में सारा विश्व आपके एक पाद में समाहित रहता है। इसलिए आप ही इस विश्व के परम आश्रय हैं।

इस प्रकार संसार की सृष्टि और प्रलय का स्थान बताकर अर्जुन ने भगवान् को सृष्टि और लय का उपादान कारण बताया है। किन्तु भगवान् को केवल सृष्टि और लय का उपादान कारण मानने पर भगवान् और प्रकृति में भेद नहीं हो पायेगा, क्योंकि प्रकृति भी सृष्टि और लय का उपादान कारण है। अतः प्रकृति से परमात्मा में भेद दिखाने के लिए अर्जुन ने कहा कि हे प्रभो! आप सम्पूर्ण ब्रह्माण्ड को यथार्थरूप में और पूरी तरह जानने वाले सर्वज्ञ हैं। आप ही जानने योग्य वेदितव्य हैं। मनुष्य को शरीर धारण करके जो जानना चाहिए, वह ज्ञेय तत्त्व आप ही हैं। हे प्रभो! परम धाम अर्थात् मोक्षरूप परम पद भी आप ही है, जो मुक्त पुरुषों की परम गति है, उसे ही सच्चिदानन्द घन कहते हैं।

हे असंख्य स्वरूप! आपसे यह विश्व व्याप्त है। इस जगत् के कण-कण में आप का वास है। इसका एक अणु भी आपसे रहित नहीं है। आपकी सत्ता और स्फूर्ति से ही ब्रह्माण्ड सत्तावान् व स्फुरणशील है।

अवबोधाभ्यासः

अधस्तनान् प्रश्नान् उत्तरयतु–

१. इह कः कं स्तौति? ....

२. पुराणपदस्य कोऽर्थः? ....

३. परमात्मा कथमादिदेवः? ....

४. प्रकृतिपुरुषयोः इह को भेदो दर्शितः? ....

५. किं च परं धाम? ....

६. 'अनन्तरूप' इत्यस्य कः आशयः? ....

७. निमित्तकारणं कोऽस्ति? ....

८. विश्वं कस्य सत्तया सत्तावत् भाति? ....

व्याकरणाभ्यासः

(अ) सन्धिः

१. अर्जुन उवाच	– अर्जुनः + उवाच	–	विसर्ग लोपः
२. पुराणस्त्वम्	– पुराणः + त्वम्	–	सत्वम्
३. वेत्तासि	– वेत्ता + असि	–	दीर्घः
४. परं निधानम्	– परम् + निधानम्	–	अनुस्वारः
५. वेद्यं च	– वेद्यम् + च	–	अनुस्वारः
६. परं च	– परम् + च	–	अनुस्वारः
७. ततं विश्वम्	– ततम् + विश्वम्	–	अनुस्वारः

अधस्तनेषु पदेषु सन्धिच्छेदं करोतु–

(i) कालियो दमितः सर्प इन्द्रश्च विमदः कृतः। ....

(ii) वर्षवाताशनिभ्यश्च परित्रातं च गोकुलम्। ....

(iii) बाला वयं तुल्यबलैः क्रीडिष्यामः। ....

(iv) न बालो न किशोरस्त्वम्। ....

(v) बलश्च बलिनां वरः। ....

(vi) द्विजस्तयोस्तं महिमानं संलक्षितवान्। ....

(vii) ता मन्मनस्का मत्प्राणा मदर्थे त्यक्तदैहिकाः। ....

(viii) कस्मात् कृष्ण इहायाति प्राप्तराज्यो हताहितः। ....

(आ) समासः

१. आदिदेवः – आदिश्च असौ देवश्च इति – कर्मधारयः

२. अनन्तरूप – अविद्यमान अन्तः येषां तानि इति अनन्तानि,
अनन्तानि रूपाणि यस्य, तत्सम्बुद्धौ – बहुव्रीहिः

अधस्तनेषु विग्रहेषु निष्पन्नं समस्तं पदं वाक्ये व्यवहरतु–

(i) कुसुमिताश्च ते द्रुमाश्च – ....

(ii) परमश्चासौ प्रीतश्च – ....

(iii) निखिलेषु च तेषु आत्मसु च – ....

(iv) मुखं च तद् अम्बुजं च – ....

(v) व्यपेतः विरहज्वरः यासां ताः – ....

(vi) हता धियः यासां ताः – ....

(vii) अश्रूणि लोचनेषु येषां ते – ....

(viii) रूढः भावः यासां, तासाम् – ....

(इ) कृत्प्रत्ययः

१. देवः – दीव्यतीति – दिव + अच् (अ)

२. पुरुषः – पुरति। पुर-अग्रगमने। "पुरः कुषन!" उणादि (५२३) – ४-७४
पुरि शेते इति – पुर् + शी + ड (अ) उगागमः

३. पुराणम् – पुरा नवमिति – पुरा + नव (ड – प्रत्ययः वलोपः)

४. निधानम् – निधीयतेऽस्मिन् – नि + धा + ल्युट् (अन)

५. वेत्ता – वेत्ति इति – विद् + तृच् (तृ)

६. वेद्यम् – वेत्तुं योग्यम् – विद् + यत् (य)

७. ततम् – तन्यते इति – तन् + क्त (त)

अधस्तनेषु रेखाङ्कितेषु प्रकृतिप्रत्ययविभागं करोतु–

(i) आनीतानि विमानानि न तेषां युगपत् कुतः? ....

(ii) गुरुणा दत्ता ज्ञः स्वयमासनम् आविशेत्। ....

(iii) छात्रेभ्यः पुस्तकं देयम्। ....

(iv) पेयं पूतं जलं सदा। ....

(v) छेद्यानि नखलोमानि काले-काले विशुद्धये। ....

(vi) विधानं नियमेनैव परिपाल्यं सदा मुदा। ....

(vii) गुरुः स्यात् संशयच्छेत्ता। ....

(viii) भेत्ता मोहमलीमसाम्। ....

(ई) क्रियाकारकसम्बन्धः

असि	-	कर्तरि क्रिया	वेत्ता	-	कर्तृविशेषणम्
त्वम्	-	कर्ता	वेद्यम्	-	कर्तृविशेषणम्
आदिदेवः	-	कर्तृविशेषणम्	धाम	-	कर्तृविशेषणम्
पुरुषः	-	कर्तृविशेषणम्	परम्	-	कर्तृविशेषणम्
पुराणः	-	कर्तृविशेषणम्	च	-	समुच्चये
निधानम्	-	कर्तृविशेषणम्	ततम्	-	कर्मणि क्तान्तं कर्मविशेषणम्
परम्	-	कर्तृविशेषण	विश्वम्	-	कर्म
विश्वस्य	-	सम्बन्धप्रतियोगी	त्वया	-	तनोति रति क्रियायाः कर्ता
अस्य		सम्बन्धप्रतियोगिविशेषणम्	अनन्तरूप!	-	सम्बोधनम्

(उ) पर्यायशब्दः

कालः - १. कारणम् (अका. नपुं.), २. आश्रयः (अका. पुं.), ३. बीजम् (अका. नपुं.), ४. अव्ययम् (अका. नपुं.)

(ऊ) छन्दोविधानम्

अस्य पद्यस्य प्रथमद्वितीयचतुर्थपादेषु उपेन्द्रवज्रा तथा तृतीय पादे इन्द्रवज्रा इत्यनयोः संयोगादिह 'प्रेमा' नाम उपजातिच्छन्दो वर्तते।

◆◆◆

१०४. श्लोकः

वायुर्यमोऽग्निर्वरुणः शशाङ्कः
प्रजापतिस्त्वं प्रपितामहश्च।
नमो नमस्तेऽस्तु सहस्रकृत्वः
पुनश्च भूयोऽपि नमो नमस्ते।। (भ. गी. ११.३९)

पदच्छेदः

वायुः, यमः, अग्निः, वरुणः, शशाङ्कः,
प्रजा-पतिः, त्वम्, प्रपितामहः, च।

नमः, नमः, ते, अस्तु, सहस्रकृत्वः,
पुनः, च, भूयः, अपि, नमः, नमः, ते।।

पदच्छेदाभ्यासः

अधस्तनानि पदानि विच्छिनत्तु–

(i) वायुर्यमः – ....

(ii) यमोऽग्निः – ....

(iii) अग्निर्वरुणः – ....

(iv) प्रजापतिस्त्वम् – ....

(v) प्रपितामहश्च – ....

(vi) त्वं प्रपितामहः – ....

(vii) नमस्ते – ....

(viii) नमो नमः – ....

(ix) तेऽस्तु – ....

(x) पुनश्च – ....

(xi) भूयोऽपि – ....

पदपरिचयः

पदम्	विश्लेषणम्
वायुः	उका. पुं. प्र. एक. विधेयम् १
यमः	अका. पुं. प्र. एक. विधेयम् २
अग्निः	इका. पुं. प्र. एक. विधेयम् ३
वरुणः	अका. पुं. प्र. एक. विधेयम् ४
शशाङ्कः	अका. पुं. प्र. एक. विधेयम् ५ समस्तम्
प्रजापतिः	इका. पुं. प्र. एक. विधेयम् ६ समस्तम्
त्वम्	युष्मद् - दका. त्रि. प्र. एक. सर्व. उद्देश्यम्
प्रपितामहः	अका. पुं. प्र. एक. विधेयम् ७ समस्तम्
च	अव्ययम्
नमः नमः	नमस् - सका. अव्ययम् (द्विरुक्तम्)
ते	युष्मद् - दका. त्रि. चतु. एक. सर्व. आदेशः
अस्तु	अस् + लोट् प्रपु. एक. परस्मै. अकर्म. कर्तरि क्रिया
सहस्रकृत्व	सहस्रकृत्वस् - सका. अव्ययम् (तद्धितान्तम्)
पुनः	पुनस् - सका. अव्ययम्
च	अव्ययम्
भूयः	भूयस् - सका. अव्ययम्
अपि	अव्ययम्
नमः नमः	सका. अव्ययम्, (द्विरुक्तम्)
ते	युष्मदादेशः चतु. एक.

वर्गीकरणाभ्यासः

अधस्तनेषु वर्गेषु श्लोकपदानि विभजतु–

(i) प्रथमान्तम् (८) ....

(ii) युष्मदादेशः (२) ....

(iii) अकारान्तम् (४) ....

(iv) इकारान्तम् (२) ....

(v) उकारान्तम् (१) ....

(vi) पुंलिङ्गम् (७) ....

(vii) सर्वनाम (३) ....

(viii) अव्ययम् (१) ....

(ix) तद्धितान्तमव्ययम् (१) ....

(x) सकारान्तमव्ययम् (७) ....

(xi) द्विरुक्तम् (२) ....

(xii) क्रियापदम् (१) ....

(xiii) उद्देश्यम् (१) ....

(xiv) विधेयम् (७) ....

(xv) उद्देश्यविधेययोः समाना विभक्तिर्भवति। तत्र उद्देश्यम् = विशेष्यम्, विधेयम् = विशेषणम् इति चोच्यते।

आकाङ्क्षाविस्तरः

असि (आक्षिप्ता कर्तरि क्रिया)।

त्वम् असि।

त्वं कोऽसि? त्वं वायुः असि। उ. पुं. प्र. एक.

पुनश्च त्वं कोऽसि? यमः असि। अका. पुं. प्र. एक.

पुनश्च त्वं कोऽसि? अग्निः असि। इका. पुं. प्र. एक.

पुनश्च त्वं कोऽसि? वरुणः असि। अका. पुं. प्र. एक.

पुनश्च त्वं कोऽसि? शशाङ्कः असि। अका. पुं. प्र. एक.

पुनश्च त्वं कोऽसि? प्रजापतिः असि। इका. पुं. प्र. एक.

पुनश्च त्वं कोऽसि? प्रपितामहः असि। अका. पुं. प्र. एक.

अस्तु (भवतु)।

किम् अस्तु? नमो नमः अस्तु।	सका. अव्य.
कतिवारं नमो नमोऽस्तु? सहस्रकृत्वः।	सका. अव्य. (तद्धि.
कस्मै सहस्रकृत्वः नमो नमोऽस्तु? तुभ्यम् (ते)	दका. चतु. एक.
सहस्रकृत्वः नमो नमोऽस्तु।	
पुनश्च ते नमो नमोऽस्तु।	
भूयोऽपि ते नमो नमोऽस्तु।	

पदार्थः

पदम्	संस्कृतम्	हिन्दी
त्वम्	त्वं (श्रीकृष्णः)	तुम
वायुः	मातरिश्वा	वायु देव
यमः	यमराजः	यमराज
अग्निः	अग्निदेवः	अग्नि देव
वरुणः	पाशी अपांपतिः	वरुण देव
शशाङ्कः	चन्द्रः	चन्द्रमा
प्रजापतिः	कश्यपादिः प्रजानां पतिः	प्रजापति
प्रपितामहः	पितामहस्य ब्रह्मणः पिता	ब्रह्मा जी के पिता
च	च (असि)	और (हो)
(अतः) ते	(अतः) तुभ्यम्	(अतः) तुम्हें
सहस्रकृत्वः	सहस्रवारम्	हजारों बार
नमो नमः	वारं वारं पौनपुन्येन प्रणामाः	बार-बार नमस्कार
अस्तु	भूयात्	हो
पुनश्च	तथा पुनः	और फिर से
नमो नमः	वारं वारं नमांसि	बार-बार नमस्कार
भूयोऽपि	तथा भूयः	तथा पुनः पुनः
ते	तुभ्यम्	तुमको
नमो नमः	नमस्कारः (अस्तु)	बार-बार नमस्कार (हो)

भावार्थः

संस्कृतम्–भगवान् श्रीकृष्णः सर्वैः नमस्कार्यः, सर्वदेवात्मकत्वात्। अत इह अर्जुनः श्रीकृष्णस्य सर्वदेवमयत्वं स्थापयन् स्वयमपि तं नमस्करोति–

हे प्रभो! त्वं वायुः यमः अग्निः वरुणः चन्द्रः असि। वाय्वादिरूपेण त्वमेव प्रतिभासि। किञ्च इह वाय्वादीनां पृथक्-पृथक् नामग्रहणं सर्वदेवताबोधनार्थम्। यावन्तः नमस्कारार्हाः देवाः सन्ति, ते सर्वे तव रूपाणि सन्ति। अतः सर्वैः सर्वथा त्वमेव नमस्करणीयोऽसि। प्रजानां पतिः स्वामी कश्यपः दक्षः, सप्तर्षिः च, तेषां पिता पितामहः ब्रह्मा, तस्यापि जनकः प्रपितामहः त्वमेवासि। अतो भवान् सर्वेषामेव प्रपितामहः नमस्कारार्हः।

अतः हे प्रभो! तुभ्यं सहस्रशः नमः, पुनश्च नमः, भूयोऽपि ते नमो नमोऽस्तु। एवञ्च अर्जुनः भक्तिश्रद्धाभरातिरेकेण तृप्तिम् अनधिगच्छन् बहुशः प्रणमति।

हिन्दी–यहाँ अर्जुन ने भगवान् श्रीकृष्ण को सर्वदेवमय बताकर उन्हें बार-बार नमस्कार किया है–

हे प्रभो! वायु, यमराज, अग्नि, वरुण, चन्द्रमा और प्रजापति ब्रह्मा आप ही हैं। इनके सहित जितने भी नमस्कार करने योग्य देवता हैं–वे सब आपके ही स्वरूप हैं। यहाँ वायु आदि शब्द नमस्कार करने योग्य सभी देवताओं के बोधक हैं।

आप 'प्रपितामह' अर्थात् ब्रह्मा जी के भी पिता हैं। जगत् को उत्पन्न करने वाले कश्यप, दक्ष प्रजापति तथा सप्तर्षि आदि के पिता होने से ब्रह्मा सबके पितामह हैं और उन ब्रह्मा को भी उत्पन्न करने वाले आप हैं, इसलिए आप सबके प्रपितामह हैं।

इसलिए आपको हजारों बार नमस्कार हो, पुनः नमस्कार हो और फिर से बार-बार नमस्कार।

यहाँ 'सहस्रकृत्वः' 'नमः' और 'पुनः' शब्दों का बार-बार प्रयोग करके यह दिखाया गया है कि श्रद्धा और भक्ति के कारण अर्जुन भगवान् को नमस्कार करते हुए अघाते नहीं हैं और बार-बार प्रणाम कर रहे हैं।

अवबोधाभ्यासः

अधस्तनान् प्रश्नान् उत्तरयतुः–

१. इह श्लोके किं ख्यापितम्? ....

२. श्रीकृष्णः कथं सर्वदेवमयः प्रोक्तः? ....

३. भगवान् कथं प्रपितामहः उक्तः? ....

४. इह कः प्रजापतिः निर्दिष्टः? ....

५. पूर्वार्धे कस्याः क्रियायाः आक्षेपः कार्यः? ....

६. उत्तरार्धे का क्रिया कतिवारम् आवर्तते? ....

७. अर्जुनः कथं वारं वारं नमस्करोति? ....

व्याकरणाभ्यासः

(अ) सन्धिः

१. वायुर्यमः	–	वायुः + यमः	–	रभावः
२. यमोऽग्निः	–	यमः + अग्निः	–	ओभावः पूर्वरूपञ्च
३. अग्निर्वरुणः	–	अग्निः + वरुणः	–	रभावः
४. प्रजापतिस्त्वम्	–	प्रजापतिः + त्वम्	–	सभावः
५. प्रपितामहश्च	–	प्रपितामहः + च	–	शभावः
६. नमो नम	–	नमः + नमः	–	ओभावः
७. नमस्ते	–	नमः + ते	–	सभावः
८. तेऽस्तु	–	ते + अस्तु	–	पूर्वरूपम्
९. पुनश्च	–	पुनः + च	–	शभावः
१. भूयोऽपि	–	भूयः + अपि	–	ओभावः पूर्वरूपञ्च
११. त्वं प्रपितामहः	–	त्वम् + प्रपितामहः	–	अनुस्वारः

अधस्तनेषु रेखाङ्कितेषु सन्धिमसन्धिं वा करोतु–

(i) धूपैः सुरभिभिर्दीपैः स्रग्गन्धैरपि मण्डितम्।

(ii) तयाभिपूजितो न्यषीदद् उद्धवः।

(iii) कृष्णोऽपि तूर्णं शयनं विवेश।

(iv) ज्ञानात्मनस्ते क्व च बन्धहेतुः।

(v) इत्यर्चितः संस्तुतश्च भक्तेन भगवान् हरिः।

(vi) वयं तु रक्ष्याः पोष्याः च अनुकम्प्याः प्रजा हि वः।

(vii) अतः + न बन्ध + तव नैव मोक्षः।

(viii) स त्वं प्रभो + अद्य वसुदेवगृहे + अवतीर्णः।

(ix) योगेश्वरैः + अपि दुरापगतिः सुरेशैः।

(x) न बध्यसे तद्गुणकर्मभिः + वा।

(आ) समासः

१. शशाङ्कः – शशस्य अङ्कः इव अङ्कः यस्मिन् सः – बहुव्रीहिः

२. प्रजापतिः – प्रजानां पतिः – षष्ठीतत्पुरुषः

३. प्रपितामहः – प्रकृष्टः पितामहः – प्रादितत्पुरुषः

अधस्तनेषु रेखाङ्कितेषु विग्रहं समासं च लिखतु–

(i) शशंस रामकृष्णाभ्यां धृतराष्ट्रविचेष्टितम्। ....

(ii) भूमेर्भारावताराय योऽवतीर्णो यदोः कुले। ....

(iii) प्रारुदद् दुःखिता राजन्! भवतां प्रपितामही। ....

(iv) समदुःखसुखोऽक्रूरो विदुरश्च महायशाः। ....

(v) यदा यदा वेदपथः पुराणः बाध्येत। ....

(vi) यत्पादशौचसलिलं त्रिजगत् पुनाति। ....

(vii) मृगलाञ्छनं मृगयते तस्या उपमायै। ....

(इ) तद्धितप्रत्ययः

१. पितामहः – पितुः पिता – पितृ + डामहच् (आमह)

२. सहस्रकृत्वः – सहस्रवारम् – सहस्र + कृत्वसुच् (कृत्वस्)

अधस्तनेषु पदेषु प्रकृतिप्रत्ययविभागं करोतु–

(i) पितामही – ....

(ii) मातामही – ....

(iii) मातामहः – ....

(iv) प्रमातामहः – ....

(v) शतकृत्वः – ....

(vi) दशकृत्वः – ....

(vii) विंशतिकृत्वः – ....

सूत्रम्–संख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुच् ५।४।१७

(ई) क्रियाकारकसम्बन्धः

असि	–	आक्षिप्ता कर्तरि क्रिया	अस्तु	–	कर्तरि क्रिया
त्वम्	–	कर्ता	नमो नमः	–	कर्ता
वायुः	–	कर्तृविशेषणम्	ते	–	सम्प्रदानम्
यमः	–	कर्तृविशेषणम्	सहस्रकृत्वः	–	क्रियाविशेषणम्
अग्निः	–	कर्तृविशेषणम्	पुनः	–	क्रियाविशेषणम्
वरुणः	–	कर्तृविशेषणम्	भूयः	–	क्रियाविशेषणम्
शशाङ्कः	–	कर्तृविशेषणम्	च	–	कर्तुः समुच्चये
प्रजापतिः	–	कर्तृविशेषणम्	अपि	–	कर्तुः समुच्चयें
प्रपितामहः	–	कर्तृविशेषणम्	ते	–	सम्प्रदानम्
च	–	समुच्चये			

(उ) पर्यायशब्दः

१. वायुः – १. श्वसनः (अका. पुं.) २. स्पर्शनः (अका. पुं.) ३. मातरिश्वा (मातरिश्वन् – नका. पुं.) ४. सदागतिः (इका. पुं.)

२. वरुणः – १. प्रचेताः (प्रचेतस् – सका. पुं.) २. पाशी (पाशिन् – नका. पुं.) ३. यादसां पतिः (इका. पुं.) ४. अप्पतिः (इका. पुं.)

३. यमः – १. धर्मराजः (अका. पुं.) २. पितृपतिः (अका. पुं.) ३. कृतान्तः (अका. पुं.) ४. अन्तकः (अका. पुं.)

(ऊ) छन्दोविधानम्

अस्य पद्यस्य प्रथमे पादे इन्द्रवज्रा तथा च द्वितीयतृतीयचतुर्थपादेषु उपेन्द्रवज्रा, अतः अनयोः सम्मेलनात् श्लोकेऽस्मिन् 'बुद्धिः' नाम उपजातिभेदो विज्ञेयः।

◆◆◆

१०५. श्लोकः

नमः पुरस्तादथ पृष्ठतस्ते
नमोऽस्तु ते सर्वत एव सर्व।
अनन्तवीर्यामितविक्रमस्त्वं
सर्वं समाप्नोषि ततोऽसि सर्वः।। (भ. गी. ११.४०)

पदच्छेदः

नमः, पुरस्तात्, अथ, पृष्ठतः, ते,
नमः, अस्तु, ते, सर्वतः, एव, सर्व।
अनन्त-वीर्य-अमित-विक्रमः, त्वम्,
सर्वम्, सम्-आप्नोषि, ततः, असि, सर्वः।।

पदच्छेदाभ्यासः

अधस्तनेषु पदेषु विच्छेदं करोतु–

(i) पुरस्तादथ – ....
(ii) पृष्ठतस्ते – ....
(iii) नमोऽस्तु – ....
(iv) सर्वत एव – ....
(v) अनन्तवीर्यामितविक्रमस्त्वम् – ....
(vi) ततोऽसि – ....

पदपरिचयः

पदम्	विश्लेषणम्
नमः	नमस् - सका. अव्ययम्
पुरस्तात्	तद्धितान्तम् अव्ययम्
अथ	अव्ययम्
पृष्ठतः	तद्धितान्तम् अव्ययम्
ते	युष्मदादेशः चतु. एक. सर्व.
नमः	सका. अव्ययम्

अस्तु	अस् + लोट् प्रपु. एक. परस्मै. अकर्म. कर्तरि क्रिया
ते	युष्मदादेशः चतु. एक. सर्व.
सर्वतः	तद्धितान्तम् अव्ययम्
एव	अव्ययम्
सर्व	अका. पुं. सम्बो. एक. सर्व.
अनन्तवीर्यामितविक्रमः	अका. पुं. प्र. एक. समस्तं वि.
त्वम्	युष्मद् – दका. त्रि. प्र. एक. सर्व. विशे.
सर्वम्	सर्व – अका. नपुं. द्विती. एक. सर्व.
समाप्नोषि	सम् + आप् + लट् मपु. एक. परस्मै. सकर्म. कर्तरि क्रिया
ततः	तद्धितान्तम् अव्ययम्
असि	अस् लट् मपु. एक. परस्मै. अकर्म. कर्तरि क्रिया
सर्वः	अका. पुं. प्र. एक. सर्व. वि.

वर्गीकरणाभ्यासः

अधस्तनेषु वर्गेषु श्लोकपदानि विभजतु–

(i) प्रथमान्तम् (३) ....

(ii) द्वितीयान्तम् (१) ....

(iii) सम्बोधनान्तम् (१) ....

(iv) चतुर्थ्यन्तं युष्मदादेशम् (२) ....

(v) अकारान्तम् (४) ....

(vi) पुंलिङ्गम् (३) ....

(vii) नपुंसकम् (१) ....

(viii) अव्ययम् (८) ....

(ix) तद्धितान्तमव्ययम् (४) ....

(x) सर्वशब्दस्य रूपाणि (४) ....

(xi) क्रियापदम् (३) ....

(xii) अस्-धातोः रूपाणि (२) ....

(xiii) विशेष्यम् (१) ....

(xiv) विशेषणम् (२) ....

(xv) सकर्मक धातुः (१) ....

(xvi) उपसर्गः (१) ....

आकाङ्क्षाविस्तरः

अस्तु (भवतु)।

किम् अस्तु? नमः अस्तु।

कस्यां दिशि नमोऽस्तु? पुरस्तात् नमोऽस्तु।

पुरस्तात् कस्मै नमः? पुरस्तात् ते नमोऽस्तु।

अथ पुनः कस्यां दिशि नमः? पृष्ठतः ते नमोऽस्तु।

पुनश्च कस्यां दिशि ते नमः? सर्वतः एव ते नमोऽस्तु।

त्वं सर्वासु दिक्षु वर्तमानोऽसि, अतः हे सर्व! इति सम्बोधनम्।

समाप्नोषि (सम्यग् रूपेण व्याप्नोषि)।

कः समाप्नोति? त्वं समाप्नोषि।

कीदृशः त्वम्? .... (समस्तं विशेषणम्)

अनन्तवीर्यामितविक्रमः त्वं किं समाप्नोषि? .... (द्विती.)

ततः (तस्मात् कारणात् असि)।

कः अस्ति? त्वम् असि।

ततः त्वं कोऽसि? ततः त्वं सर्वः असि।

पदार्थः

पदम्	संस्कृतम्	हिन्दी
सर्व!	हे सर्वरूप!	सर्वव्याप्त हे प्रभु!
पुरस्तात्	पूर्वस्यां दिशि (स्थिताय)	सामने पूर्व दिशा में (अवस्थित)

ते	तुभ्यम्	तुम्हें
नमः	प्रणामः	नमस्कार
पृष्ठतः	पृष्ठभागे पश्चिमायां	पीछे पश्चिम में दिशि (स्थिताय ते नमः) (अवस्थित तुम्हें नमस्कार)
अथ	अपि च	और
सर्वतः	सर्वासु दिक्षु (स्थिताय)	सब तरफ (अवस्थित)
एव	अवश्यम्	ही
ते	तुभ्यम्	तुम्हें
नमः	प्रह्वीभावः	नमस्कार
अस्तु	भवतु	हो
अनन्तवीर्य- अमितविक्रमः	असंख्यसामर्थ्य- असीमितकौशलः	अन्तहीन शक्ति और अपरिमित पराक्रमशाली
त्वम्	त्वं (श्रीकृष्णः)	तुम
सर्वम्	अखिलं (ब्रह्माण्डम्)	सबमें (सबको)
समाप्नोषि	व्याप्नोषि / स्वस्मिन् विलापयसि	परिव्याप्त हो / अपने में लीन कर लेते हो
ततः	तस्मात्कारणात्	इसलिए
सर्वः	(त्वम्) अखिलः / पूर्णः	(तुम) सब कुछ
असि	भवसि	हो।

भावार्थः

संस्कृतम्—इह अर्जुनः विधान्तरेण भगवन्तं श्रीकृष्णं स्तुत्या नमस्कुर्वन् अभिमुखीकरोति—

भगवान् श्रीकृष्णः सर्वेषामात्मा सर्वव्यापी सर्वरूपश्च, अतस्तमर्जुनः सम्बोधयति—हे सर्व! इति। यस्यां दिशि सवितोदेति सा पूर्वा दिगुच्यते। तस्यां व्यवस्थिताय ते तुभ्यं मम प्रणामाः सन्तु।

अथ मम पृष्ठभागे पश्चिमायां दिशि अवस्थिताय ते तुभ्यं मम नमस्काराः सन्तु। अपि च सर्वत एव सर्वासु एव दिक्षु उपस्थिताय तुभ्यं मम प्रह्वीभावः स्यात्। यावन्त्यो दिशः, तत्र सर्वत्र यद् वर्तते, तदशेषं त्वमेवेति भावः।

वीर्यम् = शारीरं बलम्, विक्रमः = शस्त्रप्रयोगकौशलं शिक्षा। भीमदुर्योधनयोरन्येषु च एकैकं व्यवस्थितमिति भागवते उक्तम्—एकं वीर्याधिकं मन्य उतैकं शिक्षयाधिकम्—इति। त्वं तु अनन्तवीर्यः च अपरिमित-पराक्रमश्च सर्वं जगत् सम्यग् एकेन आत्मना सद्रूपेण सर्वात्मना व्याप्नोषि। तस्मात् त्वं सर्वोऽसि। त्वदतिरिक्तं किमपि नास्तीत्यर्थः। त्वया विना भूतं न किञ्चिदस्ति। अथवा, महाप्रलयादौ त्वं सर्वं जगत् समाप्नोषि स्वस्मिन् विलीनं करोषि, ततस्त्वं सर्वोऽसि। तदुक्तम्—पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते—इति।

हिन्दी—इस पद्य में अर्जुन ने प्रकारान्तर से भगवान् श्रीकृष्ण की स्तुति द्वारा उन्हें प्रणाम करने के लिए सम्बोधित किया है—

भगवान् कृष्ण सर्वात्मा, सर्वव्यापी और सर्वरूप हैं, अतः अर्जुन ने उन्हें सम्बोधित किया है—हे सर्व! जिस दिशा में सूर्य उगता है उसे पूर्वा दिक् कहते हैं। उस पूर्वा दिक् में व्यवस्थित तुम्हें सामने से नमस्कार है। आप पीछे अर्थात् पश्चिम में भी अवस्थित हैं, अतः आपको पीछे से भी नमस्कार हो। आप तो सभी ओर सभी दिशाओं में अवस्थित हैं, अतः सभी तरफ से आपको मेरा नमन होवे। जितनी भी दिशायें हैं, उन सबमें आप विद्यमान हैं, इसलिए सब कुछ और सम्पूर्ण आप ही हैं।

शारीर बल को वीर्य और शस्त्रास्त्र प्रयोग कौशल को पराक्रम कहते हैं। भागवत में बलराम जी ने कहा है—भीम और दुर्योधन में तथा अन्यों में भी वीर्य और विक्रम में से एक-एक ही पूर्ण है, दोनों नहीं—

'एकं वीर्याधिकं मन्य उतैकं शिक्षयाधिकम्' इति। हे प्रभो! आपमें तो वीर्य और विक्रम दोनों ही अनन्त और अपरिमित हैं। इस प्रकार आप सबमें सद्रूप से एकात्मभाव से व्याप्त हैं। अथवा सबको महाप्रलयादि में अपने में लीन कर लेते हैं। इसलिए आप सब कुछ हैं, सर्वथा परिपूर्ण हैं। श्रुतियों में कहा है—पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते इति।

अवबोधाभ्यासः

अधस्तनान् प्रश्नान् समादधातु—

१. इह अर्जुनः भगवन्तं कथं स्तौति? ....

२. 'सर्व' इति सम्बोधने किं तात्पर्यम्? ....

३. 'पुरस्तात्' इत्यस्य कोऽभिप्रायः? ....

४. 'सर्वतः' इति पदेन किं गृह्यते? ....

५. वीर्यविक्रमयोः को भेदः? ....

६. दुर्योधनाद् भीमः कस्मिन्नधिकः आसीत्? ....

७. 'समाप्नोषि' क्रियायाः इह कौ अर्थौ विहितौ? ....

८. 'पूर्णमेवावशिष्यते' इत्यस्य को भावार्थः? ....

व्याकरणाभ्यासः

(अ) सन्धिः

१. वीर्यामित	- वीर्य + अमित	-	दीर्घः
२. विक्रमस्त्वम्	- विक्रमः + त्वम्	-	सभावः
३. पुरस्तादथ	- पुरस्तात् + अथ	-	जश्त्वम्
४. पृष्ठतस्ते	- पृष्ठतः + ते	-	सभावः
५. नमोऽस्तु	- नमः + अस्तु	-	ओभावः पूर्वरूपं च
६. सर्वत एव	- सर्वतः + एव	-	विसर्गलोपः
७. ततोऽसि	- ततः + असि	-	ओभावः पूर्वरूपं च
८. त्वं सर्वम्	- त्वम् + सर्वम्	-	अनुस्वारः
९. सर्वं समाप्नोषि	- सर्वम् + समाप्नोषि	-	अनुस्वारः

अधस्तनेषु रेखाङ्कितेषु सन्धिं करोतु–

(i) स तत् + अप्रियमाकर्ण्य शोक + अमर्षयुतो नृप।

(ii) अयादवीम् + महीम् + कर्तुम् + चक्रे परमम् उद्यमम्।

(iii) निरीक्षितवान् तत् + बलं कृष्णः + उद्वेलम् इव सागरम्।

(iv) चिन्तितवान् सः + हरिः + तद्देशकाल + अनुगुणम्।

(v) एतदर्थः + अवतारः + अयं भूभारहरणाय मे।

(vi) निर्जग्मतुः स्व + आयुध + आद्यौ बलेन + अल्पीयसा + आवृत्तौ।

(vii) ततः + अभूत् परसैन्यानाम् + हृदि वित्रास वेपथुः।

(viii) जरासुतः + तौ अभिसृतवान्।

(आ) समासः

१. अनन्तवीर्यामितविक्रमः

न विद्यमानः इति अविद्यमानः - त.पुरुषः)

अविद्यमानः अन्तः यस्मिन् तद् अनन्तम् (बहुव्रीहिः)

अनन्तं वीर्यं यस्मिन् सः अनन्तवीर्यः (बहुव्रीहिः)

न मितः इति अमितः (नञ्तत्पुरुषः)

अनन्तवीर्यश्च असौ अमितविक्रमश्चेति (कर्मधारयः)

अधस्तनेषु विग्रहेषु निष्पन्नं समस्तं पदं वाक्ये तत्प्रयोगं च व्यवहरतु–

(i) हताः अरातयः यस्य, तम् – ....

(ii) अर्थश्च पदानि चेति अर्थपदानि, ...
पवित्राणि अर्थपदानि येषु, तैः – ....

(iii) दुर्गतः अन्तः यस्य स दुरन्तः, ...
दुरन्तः पारः यस्य, तम् – ....

(iv) नराणां केशाः इति नरकेशाः, ...
नरकेशाः एव शैवलानि यासु, ताः – ....

(v) निर्भिन्नाः कुम्भाः येषां ते – ....

(vi) शरैः वृक्णाः कन्धराः येषां ते – ....

(vii) भुजाश्च ऊरवश्च कन्धराश्च इति ....
छिन्नाः भुजोरुकन्धरा येषां, तान् – ....

(इ) तद्धितप्रत्ययः

१. पुरस्तात् – पूर्वस्यां पूर्वस्याः पूर्वा वा दिक् इति –
पूर्वा + अस्ताति, (अस्तात्) = पुरस्तात्

२. पृष्ठतः – पृष्ठे पृष्ठात् पृष्ठं वा इति –
पृष्ठ + तसि (तस्) = पृष्ठतः

३. सर्वतः – सर्वासु सर्वाभ्यः सर्वा इति –
सर्व + तसिल् (तस्) = सर्वतः

४. ततः – तस्मात् – तद् + तसिल् = ततः

अधस्तनेषु पदेषु प्रकृति-प्रत्ययविभागं करोतु–

(i) कृष्णम् <u>अभितः</u> गोपाः सन्ति। ....

(ii) विद्यालयम् <u>उभयतः</u> राजमार्गः अस्ति। ....

(iii) <u>अतस्</u>त्वं शीघ्रं याहि। ....

(iv) तस्य <u>अधस्तात्</u> तां देवीं ददर्श। ....

(v) भवनात् अवस्तात् चन्द्रं पश्य। ....

(vi) मम पार्श्वतः गतास्ते। ....

(vii) ग्रामस्य अवरस्तात् नदी प्रवहति। ....

(viii) कुतस्ते ईदृशी गतिः? ....

(ई) क्रियाकारकसम्बन्धः

अस्तु	-	कर्तरि क्रिया	समाप्नोषि	-	कर्तरि क्रिया
नमः	-	कर्ता	त्वम्	-	कर्ता
पुरस्तात्	-	अधिकरणम्	अनन्तवीर्यामितविक्रमः	-	कर्तृविशेषणम्
ते	-	सम्प्रदानम्	सर्वम्	-	कर्म
अथ	-	समुच्चये	असि	-	कर्तरि क्रिया
पृष्ठतः	-	अधिकरणम्	त्वम्	-	अक्षिप्तः कर्ता
सर्वतः	-	अधिकरणम्	सर्वः	-	कर्तृविशेषणम्
एव	-	अवधारणे	ततः	-	क्रियाविशेषणम्

(उ) पर्यायशब्दः

१. **पुरस्तात्** - १. अग्रतः (अव्ययम्), २. समक्षम् (अव्ययम्), ३. पूर्वम् (अका. नपुं.)

२. **अथ** - १. मङ्गलम् (अका. नपुं.), २. अनन्तरम् (अव्ययम्), ३. आरम्भः (अका. पुं.)

(ऊ) छन्दोविधानम्

अस्य पद्यस्य आद्येषु प्रथमद्वितीयतृतीयचरणेषु उपेन्द्रवज्रा तथान्तिमे चरणे इन्द्रवज्रा। एवञ्चोभयोः संयोगादिह 'जाया' नाम उपजातिभेदः वर्तते।

◆◆◆

१०६. श्लोकः

सखेति मत्वा प्रसभं यदुक्तं
हे कृष्ण हे यादव हे सखेति।
अजानता महिमानं तवेदं
मया प्रमादात्प्रणयेन वापि।। (भ. गी. ११.४१)

पदच्छेदः

सखा, इति, मत्वा, प्रसभम्, यद्, उक्तम्,
हे, कृष्ण, हे, यादव, हे, सखे, इति।

अजानता, महिमानम्, तव, इदम्,
मया, प्रमादात्, प्रणयेन, वा, अपि।।

पदच्छेदाभ्यासः

अधस्तनानि पदानि विच्छिनत्तु–

(i) सखेति – ....

(ii) यदुक्तम् – ....

(iii) हे सखेति – ....

(iv) तवेदम् – ....

(v) वापि – ....

(vi) प्रसभं यदुक्तम् – ....

(vii) महिमानं तव – ....

पदपरिचयः

पदम्	विश्लेषणम्
सखा	सखि – इका. पुं. प्र. एक.
इति	अव्ययम्
मत्वा	क्त्वान्तम् अव्ययम्
प्रसभम्	प्रसभ – अका. नपुं. द्विती. एक.
यद्	यद् – दका. नपुं. प्र. एक. सर्व. विशे.

उक्तम्	उक्त – अका. नपुं. प्र. एक. क्तान्तं वि.
हे	अव्ययम्
कृष्ण	अका. पुं. सम्बो. एक.
हे	अव्ययम्
यादव!	अका. पुं. सम्बो. एक. तद्धितान्तम्
हे	अव्ययम्
सखे!	सखि इका. पुं. सम्बो. एक.
इति	अव्ययम्
अजानता	अजानत् – तका. पुं. तृ. एक. शत्रन्तं समस्तं वि.
महिमानम्	महिमन् – नका. पुं. द्विती. एक.
तव	युष्मद् – दका. षष्ठी एक. सर्व.
इदम्	इदम् – मका. नपुं. द्विती. एक. सर्व.
मया	अस्मद् – दका. त्रि. तृ. एक. सर्व. विशे.
प्रमादात्	अका. पुं. पं. एक.
प्रणयेन	अका. पुं. तृ. एक.
वा	अव्ययम्
अपि	अव्ययम्

वर्गीकरणाभ्यासः

अधस्तनेषु वर्गेषु श्लोकपदानि विभजतु–

(i) प्रथमान्तम् (३) ....

(ii) द्वितीयान्तम् (३) ....

(iii) तृतीयान्तम् (३) ....

(iv) षष्ठ्यन्तम् (१) ....

(v) सम्बोधनान्तम् (३) ....

(vi) पञ्चम्यन्तम् (१) ....

(vii) अकारान्तम् (६) ....

(viii) इकारान्तम् (२) ....

(ix) नकारान्तम् (१) ....

(x) पुंलिङ्गम् (८) ....

(xi) नपुंसकम् (४) ....

(xii) अव्ययम् (५) ....

(xiii) क्त्वान्तमव्ययम् (१) ....

(xiv) सर्वनाम (४) ....

(xv) क्तान्तं क्रियापदम् (१) ....

(xvi) विशेष्यम् (२) ....

(xvii) विशेषणम् (२) ....

(xviii) तद्धितान्तम् (१) ....

आकाङ्क्षाविस्तरः

उक्तम् (कथितम्)।

केन उक्तम्? .... (अस्मद् तृ. एक. सर्व.)

कीदृशेन मया उक्तम्? .... (शत्रन्तं तृ.)

किम् अजानता मया उक्तम्? इदम् (विश्वरूपम्) अजानता मया उक्तम्।

कस्य इदम् अजानता मया उक्तम्? .... (युष्मद् षष्ठी.)

पुनश्च कम् अजानता मया उक्तम्? .... (नका. द्विती.)

तव इदं महिमानम् अपि अजानता मया किं कृत्वा उक्तम्? .... (क्त्वान्तम्)

तव इदं महिमानम् अपि अजानता मया किं मत्वा उक्तम्? सखा इति मत्वा उक्तम्।

सखेति मत्वा कथम् उक्तम्? सखेति मत्वा प्रमादात् उक्तम्।

सखेति मत्वा प्रमादात् पुनश्च केन कारणेन उक्तम्?

सखेति मत्वा प्रमादात् प्रणयेन वा उक्तम्

सखेति मत्वा प्रमादात् प्रणयेन वा .... (अका. द्विती.)
कथम् उक्तम्?

सखेति मत्वा प्रमादात् प्रणयेन वा प्रसभं .... (यत् द्विती. नपुं.)
किम् उक्तम्?

सखेति मत्वा प्रमादात् प्रणयेन वा प्रसभं .... (सम्बोधनान्तानि)
यद् किम् उक्तम्?

हे कृष्ण! हे यादव! हे सखे! इति यद् उक्तम्।

तव इदं महिमानम् अपि अजानता मया सखा इति मत्वा प्रमादात् प्रणयेन वा प्रसभं हे कृष्ण हे यादव हे सखे इति यद् उक्तम् (तद् अहं त्वां क्षामये) इति उत्तरेण सम्बन्धः ।

पदार्थः

पदम्	संस्कृतम्	हिन्दी
तव	भवतः श्रीकृष्णस्य	तुम्हारे
इदम्	पुरो दृष्टं विश्वरूपम्	इस विश्वरूप को
अपि	तथा	और
महिमानम्	माहात्म्यम्	महिमा को
अजानता	अज्ञानिना	नहीं जानता हुआ
मया	अर्जुनेन	मैंने
सखा	समानवयाः	बराबरी का मित्र
इति	(अस्ति) इत्येवम्	(है) ऐसा
मत्वा	बुद्ध्वा	मानकर
प्रमादात्	चित्तविक्षेपात्	भूल से
वा	अथवा	अथवा
प्रणयेन	स्नेहेन	प्रेम से
प्रसभम्	तिरस्कारपूर्वकम्	तिरस्कारपूर्वक
हे कृष्ण	हे कृष्ण	हे कृष्ण
हे यादव	हे यादव	हे यादव

हे सखे	हे मित्र	हे सखे
इति	इत्येवम्	ऐसा
यद्	यद्	जो
उक्तम्	भणितम् (तद् अहं त्वां क्षामये) इति उत्तरेण वाक्यांशेन सम्बन्धः।	कहा (उसे आप क्षमा करें) इस अगले वाक्यांश से सम्बन्ध करें।

भावार्थः

संस्कृतम्—पूर्वश्लोकेषु भगवन्तं श्रीकृष्णं स्तुत्वा प्रणम्य च अर्जुनः इदानीं मनसा वचसा कर्मणा च यद् अपराद्धं तत् क्षमापयति—

हे प्रभो! विराड्रूपस्य दर्शनावसरे यदहं तव इदं विश्वरूपं दृष्टवान्, ततः पूर्वं तद् ज्ञानं मम नासीत्। किञ्च तेन अलौकिकेन तव माहात्म्येनापि तदानीमहम् अपरिचितः आसम्। अतः अज्ञानात् अहं भवन्तं समानवयाः सखा इति मानितवान्। अतः अज्ञानजन्यात् विस्मरणापराधात् अथवा स्नेहजन्यात् विश्वासात् वा अहं कदाचित् स्वोत्कर्षं ख्यापयितुं भवतः आदरसूचकं विशेषणं विना केवलं नाम 'हे कृष्ण' इति उक्त्वा सम्बोधितवान्। कदाचिच्च तव अभिशप्तं गोत्रम् उच्चार्य सम्बोधनम् अकरवम्—'हे यादव' इति। कर्हिचित् प्राकृतं मित्रं त्वां मत्वा 'हे सखे' इति च सम्बोधनं तिरस्कारपूर्वकं यद् उक्तवान् अस्मि, 'तद् अहं त्वां क्षामये'।

अग्रिमे श्लोके 'तदहं त्वां क्षामये' इति वाक्यांशो वर्तते। तेन सह अस्य श्लोकवाक्यस्य सम्बन्धः आवश्यकः। तत्सम्बन्धेनैव निराकाङ्क्षः वाक्यबोधो जायते। 'यत्तदोः नित्यसम्बन्धः' इति नियमात् यत्पदघटितवाक्ये तत्पदघटितवाक्यस्य अपेक्षा भवति। अतः 'यद् उक्तम्, तत् क्षामये' इत्येवं सम्बन्धात् वाक्यं निराकाङ्क्षं भवति।

हे प्रभो! इतः पूर्वं भवतः अप्रतिमम् अनन्तं च ऐश्वर्यातिशयं न ज्ञातवान्। अतः अज्ञानापराधादेव अहं त्वां समानं प्राकृतं मित्रम् अमन्ये। अत एव व्यवहारे संलापे च आदरार्थकं सम्बोधनं नैव कृतम्। नूनं ममैषः अपराधः। देवाधिदेवाः महर्षयश्च तव चरणारविन्दानां दर्शनं स्पर्शनं वन्दनं च सौभाग्यं मन्वते, किन्तु अहं दौर्भाग्यात् तन्न ज्ञातवान्। अतः हे दयालो! क्षमस्व मेऽपराधम् इति भावार्थः।

हिन्दी—पूर्व श्लोकों में अर्जुन ने भगवान् की स्तुति और वन्दना की है। अब यहाँ जाने-अनजाने में मन, वाणी या कर्म के द्वारा भगवान् के प्रति जो अपराध किये हैं, उसे क्षमा करने की प्रार्थना की है—

हे प्रभो! आपके विराट् स्वरूप का दर्शन करते समय मैंने आपके अतुलनीय तथा अप्रमेय ऐश्वर्य, गौरव और गुण को देखा। उससे पूर्व मैं आपके इस विश्वरूप को और आपकी महिमा को नहीं जानता था। इस यथार्थ को न जानने के कारण ही मैं आपको बराबर का मित्र समझता

रहा। अतः अज्ञान के कारण हुई भूल से अथवा स्नेहजनित विश्वास से मैंने आपके लिए कभी आदरसूचक विशेषण का प्रयोग नहीं किया, अपितु अपना उत्कर्ष बताने के लिए आपको केवल नाम से सम्बोधित करता रहा। कभी आपका नाम लेकर, कभी अभिशप्त यदु गोत्र से और कभी बराबरी का प्राकृत सखा शब्द से तिरस्कार के साथ बुलाता रहा। इस प्रकार मुझसे यह बड़ा अपराध हुआ है। बड़े से बड़े देवता और महर्षि गण आपके जिन चरणों की वन्दना करना अपना सौभाग्य समझते हैं, मैंने आपके साथ बराबरी का बर्ताव किया।

हे प्रभो! अज्ञानजन्यप्रमाद अथवा स्नेहवश मुझसे जो यह अपराध हुआ है, उसे आप क्षमा करें।

अगले श्लोक के उत्तरार्ध में 'तद् अहं त्वां क्षामये' (उसके लिए मैं आपसे क्षमा-प्रार्थी हूँ) यह वाक्यांश है। उसके साथ इस श्लोक का सम्बन्ध समझना चाहिए। तभी निराकांक्षबोध सम्पन्न होगा– ऐसा जो मैंने कहा, उसे क्षमा करें। इसीलिए यह नियम है–'यत्' और 'तत्' का नित्य सम्बन्ध होता है। जब वाक्य में 'यत्' होगा, तब 'तत्' भी अवश्य होगा, अन्यथा निराकांक्ष बोध नहीं होगा।

अवबोधाभ्यासः

अधस्तनान् प्रश्नान् समादधातु–

१. इह अर्जुनः किं प्रार्थयते? ....

२. पूर्वश्लोकेषु अर्जुनः किं कृतवान्? ....

३. श्लोके 'इदम्' पदं कस्यार्थस्य बोधकम्? ....

४. अर्जुनः कथं प्रमादं कृतवान्? ....

५. अर्जुनस्य इह कः प्रमादः? ....

६. 'इदं महिमानम्' इत्यत्र विशेष्यविशेषण-भावः कथं नास्ति? ....

७. यदुः स्वपित्रे ययातये स्वयुवावस्थां न अदात्। तेन रुष्टः पिता यदुं शप्तवान् यत् त्वं शासनं न करिष्यसीति। शापकारणं लेख्यम् ....

व्याकरणाभ्यासः

(अ) सन्धिः

१. सखेति – सखा + इति – गुणः

२. तवेदम् - तव + इदम् - गुणः

३. हे सखेति - हे सखे + इति - गुणः (अपाणिनीयः)

४. वापि - वा + अपि - दीर्घः

५. यदुक्तम् - यत् + उक्तम् - जश्त्वम्

६. प्रसभं यत् - प्रसभम् + यत् - अनुस्वारः

७. उक्तं हे - उक्तम् + हे - अनुस्वारः

८. महिमानं तव - महिमानम् + तव - अनुस्वारः

९. इदं मया - इदम् + मया - अनुस्वारः

अधस्तनेषु रेखाङ्कितेषु सन्धिं करोतु–

(i) कालत्रय + उपपन्नानि जन्मकर्माणि ते प्रभोः।

(ii) अनुक्रमन्तो नैवान्तम् + गच्छन्ति परम + ऋषयः।

(iii) पलायनं ते न + उचितम्।

(iv) एक एव + ईश्वरः तस्य।

(v) तत्र + अन्यम् + शयानम् + ददृशे नरम्।

(vi) देहजेन + अग्निना दग्धो भस्मसात् + अभवत् क्षणात्।

(vii) कस्मात् + गुहाम् + गतः शिश्ये।

(viii) अनुकूलो महा + ईश्वरः।

अवधेयम्

सखि शब्दस्य सम्बोधनैकवचने 'सखे' इति रूपम्। 'सखे + इति' अस्यां स्थितौ इकारे अचि परे खकाराद् एकारस्य अयादेशः, 'सखय् + इति' इत्यत्र यकारस्य लोपेन 'सख इति' सन्धौ कृते पाणिनीयं रूपं भवति। अत्र पुनः अकार + इकारयोः एकारो गुणः असिद्धः, किन्तु आर्षप्रयोगात् इह श्लोके पुनः सन्धिः कृतः। स च सन्धिः अपाणिनीयः इति बोध्यम्।

(आ) समासः

१. अजानता - न जानता इति - नञ्तत्पुरुषः

२. प्रसभम् - प्रगता सभा यस्मात् तत् - प्रादिबहुव्रीहिः

अधस्तनेषु विग्रहेषु निष्पन्नं पदं लिखतु–

(i) प्रकृष्टा गतिः – ....

(ii) विन्ध्यायाः निर्गतः – ....

(iii) विशेषेण लुलितम् – ....

(iv) न गच्छन् – ....

(v) विगतः मदः यस्मात्– ....

(vi) न भाषितम् – ....

(इ) तद्धितप्रत्ययः

१. यादव – यदोः गोत्रापत्यम् – यदु + अण् (अ)

२. महिमानम् – महसो भावः – महस् + इमनिच् (इमन्)

अधस्तनेषु पदेषु प्रकृति-प्रत्यय विभागं करोतु–

(i) रैवतः – ....

(ii) मागधः – ....

(iii) भैष्मी – ....

(iv) पौरवः – ....

(v) पाण्डवाः – ....

(vi) कौरवः – ....

(vii) शुक्लिमा – ....

(viii) नीलिमा – ....

(ई) क्रियाकारकसम्बन्धः

उक्तम् – वच् + क्त कर्मणि क्तान्ता क्रिया   अपि – समुच्चये

मया – कर्ता   मत्वा – क्त्वान्ता गौणक्रिया

अजानता	-	शत्रन्तं कर्तृविशेषणम्
महिमानम्	-	शत्रन्तायाः अज्ञानक्रियायाः कर्म
इदम्	-	शत्रन्तायाः अज्ञानक्रियायाः कर्म
तव	-	महिमार्थस्य इदमर्थस्य सम्बन्धप्रतियोगी
प्रमादात्	-	वचने हेतु पञ्चमी
प्रणयेन	-	वचने हेतु तृतीया
वा	-	विकल्पे
सखा	-	गौणक्रियायाः कर्म
इति	-	कर्मत्वाभिधाने निपातः
यत्	-	वचनक्रियायाः कर्म
हे	-	सम्बोधनार्थे निपातः
कृष्ण, यादव, सखे	-	सम्बोधने
इति	-	शब्दपरत्वे निपातः
प्रसभम्	-	वचनक्रियायाः विशेषणम्

(उ) छन्दोविधानम्

अस्य पद्यस्य प्रथमतृतीयचतुर्थचरणेषु उपेन्द्रवज्रा तथा द्वितीयचरणे इन्द्रवज्रा छन्दः। एवञ्चानयोः सम्मेलनात् अस्मिन् पद्ये 'ऋद्धिः' नाम उपजातिच्छन्दो विज्ञेयम्।

◆◆◆